BHARTI

1960-1978 G. K. U.

[illegible]

1960-1978 G.K.U.

113542

ारती

COMPILED

3/12/50

ंस्कृतस्य प्रमुखं मासिकपत्रम्

23

GURUKULA KANGRI LIBRARY HARDWAR

पश्चिमराष्ट्रेष्वपि यो भारतमहिमानमाघोषत् ।
स्वामिविवेकानन्दो गुणैरमन्दोदयो जयति ॥१

म ६
तृतीयोऽङ्कः
वार्षिकमूल्यम् ४) चतस्रो मुद्राः,



दी इन्दौर मालवा युनाइटेड मिल्स लि.

मैनेजिंग और सेलिंग एजेण्ट्स मेसर्स गोविन्दराम सेकसरिया (इन्दौर)

पताः मिल प्रेमिसेस इन्दौर (मध्य भारत)
फोनः जनरल आफिस - २०३३
,, सेल्स मैनेजर - ४००५
तारः मालवामिल

रजिस्टर्ड आफिसः सेकसरिया चेम्बर्स
१३९, मेडोज स्ट्रीट, फोर्ट बम्बई १
फोनः ३५-२५१४-५-६
तारः इन्दौरमिल

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र बम्बई-सर्वकारै-स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ सं०
१.	किन्तु न दयसे	श्रीशिवशरणझा, झांसी	५१
२.	पतञ्जलिं प्राञ्जलिरानतोऽस्मि	श्रीरङ्गनाथराकेश, एम. ए.	५२
३.	अन्तर्व्यूहः!	श्रीगणेशरामशर्मा विद्याभूषणम्, झालावाड़	५३
४.	विश्वकथासाहित्ये पंचतन्त्रस्य स्थानम्	श्रीजङ्गबहादुरखन्ना, देहली	५६
५.	गीर्वाणवाण्या गौरवम्	श्रीविनोदचन्द्रो 'विद्याधिकारी',	५७
६.	राष्ट्ररजः प्रशस्तिः	श्रीहरिशास्त्री दाधीचः, जयपुरम्	५८
७.	जीवनस्य पृष्ठद्वयम्	सहसम्पादकः	५९
८.	पत्रस्य स्वामित्वसम्बन्धे अविकृतं विवरणम्		६१
९.	स्वराज्यम्	श्रीदा०सातवलेकर अध्यक्ष स्वाध्याय मंडल, पारड़ी	६२
१०.	सम्पादकीयम्	सम्पादकः	६४
११.	गर्दभ गर्वोक्तिः	श्रीदीनानाथत्रिवेदी'मधुपः' जयपुरम्	६७
१२.	वनं रे जीवनं गहनम्	श्रीउमाकान्तशास्त्री	६८
१३.	गोहत्यानिरोधसम्मेलनम्	सम्पादकः	६८
१४.	गुरुजनवन्दनम्	श्रीहरिशास्त्री दाधीचः, जयपुरम्	६९
५.	सूक्ति-सुधा	सम्पादकः	

113542
113542

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एस. ए.
जयपुर

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् ६ | पोषशुक्ला प्रतिपद्, सं० २०१५ | अङ्कः ३

57
59

किन्तु न दयसे

—ले० श्रीशिवशरणझा, झांसी

अनुनयने बहु-कालो वीतः, किन्तु न दयसे, मौनं नयसे ॥
मामवलोकयसे न प्रियतया गीतमगीतं मामकम् ।
फल-परिहीनं कार्य-विधानं कर्तुः भवति हि नामकम्
आशित-मनसा मयाऽनुकम्पायै यदि गीतमनेकदा
परिणामश्चेदधुना वाच्यः सर्वमभून् मम श्रामकम् ॥
व्यस्मार्षीः भोः, कुतोऽनुकम्पां, दौर्भाग्यान् मम वा विस्मयसे ॥१

प्रीतिं प्राप्तुमना विश्वासैः निशि गीतं रचयामि यत् ।
दिवा दयामपहाय नाशयति नाना-कटु-चिन्तया च तत् ॥
एवं दैनिक-विघ्ने यत्नः को नु कथं नु विधीयताम्
सदा निपत्य शुचा शय्यायां समयस्वा गमयामि कियत् ॥
मामकमथ सुख-पथप्रत्यूहं दैन्यं कस्मात् त्वं न विजयसे ॥२

त्वयि सति मे शीर्यति तिलशः प्रिय. इदमवहेलित-जीवनम् ।
अनुकम्पा-पानीय-विहीनं शुष्यति साकल्येन वनम् ।
पालयितः, नयने उन्मीलय, लोकय मत्प्रतिकूलताम्
आशा-तरवो विघ्न-वायुना प्राप्नुवते नु निपातनम्
नाववोधयसि कृतापराधं, मौनेनैव विरागं श्रय

पतञ्जलिं प्राञ्जलिरानतोऽस्मि

(ले० श्रीरङ्गनाथराकेश, एम. ए.)

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन ।
योपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ।

भाष्यकारं पतञ्जलिं प्रणतोऽस्मि । वेदस्य मुखं व्याकरणम् । सर्वेषु दर्शनेषु सूत्रभाष्यव्याख्याशैली परिदृश्यते । भाष्यापेक्षया वार्तिकस्यैव प्राधान्यं महत्त्वञ्च, किन्तु व्याकरणे सूत्रवार्तिकभाष्येति शैल्या भाष्यस्य प्राधान्यं महत्वं च । 'यथोत्तरं मुनीनां प्रामाण्यम्' श्रूयते । ननु सर्वत्र दर्शनादिशास्त्रेषु भाष्यं इत्यभिधीयते कथमत्र व्याकरणशास्त्रे महाभाष्यमिति कथ्यते । इति चेत् शृणु—व्याकरणभाष्यस्य सर्वेभ्यो भाष्येभ्यः प्राङ् निर्मितत्वात् महत्वात् वृद्धत्वात् भारवत्वाच्च महाभाष्यमिति ईर्य्यते ।

किं नाम भाष्यम् ? अत्राह—

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥'

श्रीमद्वाल्मीकिरामायणे हनुमन्तं प्रति सौमित्रिः कथयामास, तत्र व्याकरणं प्रति—

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किञ्चिदपशब्दितम् ॥

किष्किन्धा का० । सर्ग ३ । श्लोक २९

इदं व्याकरणम् परम्परानुसारेण शनैः शनैः कालक्रमेण शिथिलतामुपगतम् । तत्र महर्षिणा पाणिनिना महता यत्नेन सूत्रं प्रणीयते स्म । मूलत्वेन चतुर्दशसूत्रात्मकवर्णसमाम्नायसंयोजितमिदं पाणिनीयं व्याकरणम् । तत् तु महाकठिनम् । श्रूयते च—

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

सर्वशास्त्रोपकारकत्वेन व्याकरणस्य महत्त्वम् । तत्र अवगतिकामुकानां जनानां ज्ञानोदयाय भाष्यस्य महत्वम् ।

हरदत्तो नाम वैयाकरणशिरोमणिरत्राह—आक्षेपसमाधानपरो ग्रन्थो भाष्यम् । पातञ्जलं नाम भाष्यं नैव सूत्रार्थबोधकं व्याख्यानमथवा सूत्रार्थबोधिनी टीका पाणिनेः, परन्तस्य समालोचनमुखेन कृता टीका । सूत्रतात्पर्यं व्याख्याय परीक्ष्य च यदि केनचित्सूत्रस्य गतार्थत्वं विधातुं न शक्यते तर्हि भाष्यकारेण पतञ्जलिना स्वयमेव इष्टाख्यानि सूत्राणि

त्वामभिवक्तुं कम्पित-कम्पित-चरणं गीतं स्खलति मदीयम् ।
कृपा-प्रसादं प्राप्तं प्रभवति नाद्यावधि कमनीयम् ।
का गतिरन्या, धन्यं कुर्याद् या मामकमभिलाषम्
त्वामन्तरा मनो गृह्णीयात् शरणं किं परकीयम्
मामभाव-शत-पीडित-चेतसमनुकम्पनया नहि मोदयसे ॥४

कण्ठः शुष्यति, वपुर्वेपते, पुरो निगदितुं नास्मि प्रभुः ।
गातुं सन्त्यनुकूल-पदानि च नेत्यपि वेत्सि भवान् विभुः ।
मौन-धारणे जाते नास्मिन् जनेऽनुकम्पा भविष्यति
आकुलयति मानसमाधिर्यो नित्य-सहचरो नास्ति स्वभूः ।
मामपि त्वत्पादार्पितमनसं शोकमुषा न दृशा नन्दयसे ॥५

अन्तर्व्यूहः ! (INTERVIEW)

(ले० श्रीगणेशरामशर्मा विद्याभूषणम्, झालावाड़)

गताङ्कतोनुवृत्तम्

अन्तर्व्यूहपरीक्षाचार्यैः परीक्षार्थिनो विषयविशेषेऽधीतं शिक्षाजन्यं ज्ञानमादौ परीक्ष्य ततो जागतिकं, राज्यनैतिकं, सामाजिकं चव्यवहारज्ञानं परीक्षन्ते। परिक्षार्थिनो व्यक्तित्वपरीक्षणे किलाकृत्या, लोचनाभ्यां, मुखमुद्रया, इङ्गितैश्चेष्टाभिर्वर्णेनाकारेण, स्वरध्वनिना, गतिभङ्गैर्वेशभूषाशृङ्गारसज्जाभिः शिष्टाचारादिभिः परीक्षार्थिनोऽस्तित्वसम्बन्धि सर्वमपि तत्त्वं परीक्षन्ते विशेषज्ञाःदेहे यावद्विद्य किमधिकेन वक्तव्येन ? परीक्षार्थिनो देहे यावद्विद्यमानं नखरोमं क्षौरविधिं, शमश्रुकूर्चकर्तनकलां, वस्त्रसंहतीरुपानत्तलसन्धीनपि च परीक्षन्ते सूक्ष्मदर्शिणः परीक्षकाः। इत्थं व्यक्तित्वं परीक्ष्य यावदभीष्टं तस्य प्रत्युत्पन्नमतित्वमपि च परीक्ष्यते। एवमन्तर्व्यूहे सत्यपि तत्र परीक्षार्थिनो बाह्यस्वरूपमन्तरङ्गं चापि स्पृशन्ति परीक्षकाः, वाग्बाणान् क्षिपन्ति, युक्तिजालं वितन्यते प्रखरतरतर्ककर्क शास्त्राणि प्रयुञ्जते, भ्रान्तिचक्रं च भ्रामयन्ति सर्वतः। तत्रैवं भ्रामकंप्रश्नचक्रं चालयन्ति गुरवो येन केचन योग्या कृताभ्यासाः शिक्षिता दीक्षिता विद्यालयेषु परीक्षिताः कुलीना गुणविशिष्टा अपि तन्मार्गानजानन्तो भीरुस्वभावाः सुकुमारमतयस्तत्रत्यं चञ्चाकचक्यचमत्कारमेकवारं दृष्ट्वैव सहसा मोमुह्यन्ते लक्ष्यभेदेऽसफला अनुत्तीर्णाश्च जोघुष्यन्तेऽभिमन्यवो नवयुगीनाः ! इत्थं महत्क्लिष्टमेतदन्तर्व्यूहरणकौशलमधुनातनम् !

अथान्तर्व्यूहरचनासु क्वचित् परीक्षकाणामपि कौरव्यपक्षाश्रयिणां भीष्मद्रोणाचार्याणामिव कूटनीतिज्ञानां सन्धिविग्रहेषु दुष्टाभिसन्धयो भवन्ति। शासनानुरोधात् स्वतेजःप्रकर्षात् जिगीषया च यदा कदा त एत आचार्याः परीक्षार्थिनमभिमन्युमिव सहसा युगवत् प्रहरन्त्येव निर्दयम् ! अन्ते च ते "यतो धर्मस्ततो जय" इत्यपि निष्पक्षपातमात्मनो न्यायपक्षं च घोषयन्ति। नवीनेऽत्र भारतीयेऽन्तर्व्यूहप्रकरणे ये सुपरीक्षिताः सफलाश्च भवन्ति ते नौकरीध्वजविजयिनो सद्योऽप्सरस्त्वं लभन्ते। मुख्यतोऽन्तर्व्यूहजन्या सिद्धिस्तावदेतावत्फलैवेति, अहो माहात्म्यमन्तर्व्यूहानाम् !

प्रणीय व्याख्यायन्ते। अनेकानि उदाहरणानि दृश्यन्ते। (यथा 'न बहुव्रीहौ' इति सूत्रसत्वे)।

*'अथ गौरित्यत्र कः शब्दः ? किं यत्तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ? नेत्याह—द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः ? नेत्याह—क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोतेति स शब्दः ? नेत्याह—गुणो नाम सः यत्तर्हि यद्भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्दः' ? नेत्याह—आकृतिर्नाम सा। कस्तर्हि शब्दः ?' उत्तरितं भगवता पतञ्जलिना 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।'—महाभाष्ये, पस्पशाह्निके।

तत्समये संस्कृतभाषा (लिंग्वाफ्रांका) जनभाषा आसीत्।

नेयं कपोलकल्पिता कथा। रथकारोऽपि वदति—'न खलु वेत्रः सूतः, सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति व वक्तव्यम्।

दण्डा-दण्डि, केशाकेशि, हस्ताहस्ति (लाठा-लाठी), झोंट नुचौ वक्त, हाथापाई, पूर्वोत्तरी हिन्दी (भोजपुरी) दृश्यतेऽत्र।

महाभाष्ये—

पृष्ठं कुरु पादौ कुरु उन्मृदानेति+ गम्यते।
(अष्टाध्यायी १।३।१, तत्रोपरि भाष्यम्)

अनन्तं शास्त्रं, अल्पं जीवनं समयः सरति। अथ विरमामि। पुनश्च पतञ्जलिं प्राञ्जलिरानतोऽस्मि।

---

* अजेर्व्यघञपोः २।४।५६ अष्टाध्यायी, तत्रोपरि भाष्यः

+काश्यां भाषायां--गोड़ी कइली मूड़ी कइली तबो काम ना भइल' [illegible] कृ निर्मलीकरणार्थेऽत्र कइली।

क्वचित्पुनरन्तर्व्यूहपरीक्षार्थिनां प्रत्युत्पन्नमतित्वपरीक्षणाय, सद्योनिर्णयशक्तिपरिज्ञानाय, व्यावहारिकीमन्तः श्चेतनां च ज्ञातुमाचार्यैः केचन भ्रान्त्युत्पादकाः कूटाः प्रश्नाश्चापि पृच्छयन्ते । तथा हि :—

"अत्रास्माकं कार्यालयमागच्छता भवता सोपानमार्गमारोहता निःश्रेण्यां कतिसंख्याकानि पदानि प्रदत्तानि ?"

"का ते जननी ? सा च कुमारी वा परिणीता वा ? तस्याश्च कियन्तः पतयः ? तव पितुः किमभिधानम् ?"

गर्दभस्य कियन्ति भवन्ति शृङ्गाणि ? वेश्याणां सुधाराय यदि तव नियुक्तिः क्रियते तदा तासां समस्यामुन्मूलयितुं त्वं कां योजनामाविष्कुर्याः ?"

"प्रतिदिनं सायंसन्ध्यायां देवालयेषु क्रियमाणैर्घण्टाघोषैः शङ्खध्वनिभिश्च कथं परमाणुभेदनं सम्भाव्यते ?"

"पाकिस्थाने कियन्तो हिमालयास्तेभ्यः प्रवहन्तीनां नदीनां जलधारा भारतवर्षस्य कानि कानि क्षेत्राण्यभिषिञ्चन्ति कश्च तासां निरोधोपायः ?"

"भाखरानङ्गलबन्धरचनायां कियत्संख्यकानां श्रमजीविनां बलिदानमदीयत ? चर्मण्वत्या जलबन्धे कियन्मितानां महिषाणां भारपरिमाणा मृत्तिका तीरभूमौ प्रक्षिप्ता स्यात् ?

अन्तर्व्यूहपरीक्षणे परीक्षकाः शासनतन्त्रप्रभावात् सर्वथाप्रभाविता व्यक्तिविशेषनिरपेक्षाः सन्तोऽपि मानवस्वभावसुलभं जागतिकै राजकारणगतैः सामाजिकैः क्वचिन्मन्त्रिमण्डलसदस्यानां, विधानसंसत्सभ्यानां, क्वचित् सुहृदां सखीनां मित्राणां हितैषिणां परिचयनिष्ठानां प्रतिष्ठितानां नागरिकाणामधिकारिणां चानुरोधात् , क्वचिद्दुर्जनानां, विप्लवकारिणां, विद्रोहिणां, प्रतिपक्षमाश्रयतां निन्दकानां च भयात् परिस्थितिवशाद्वा पक्षपातदोषस्पृशो गण्यन्ते लोकैः । वैधानिकीनां न्यायधारणां जाटिल्यात् व्यवहारविरोधाशङ्कातङ्काच्चान्तर्व्यूहपरीक्षका आचार्यास्तत्र तत्र स्खलन्ति पदनियोजने प्रमाद्यन्ते चेत्यपि नासम्भवम् । सत्यप्येवमभिमन्योरिव दुर्घातः कर्तव्यो भवति भीष्मद्रोणादिभिरिव निर्दयमाचार्यवर्यैः परीक्षकैः । 'नरो वा कुञ्जरो वेति च' प्राप्तकालं वक्तव्यं भवति । मृदुलमपि निष्ठुरं कठोरं च सत्यमुद्घोषणीयं भवति अनुत्तीर्णानां परीक्षार्थिनां भावात्मकसंहारं कृत्वा वैराग्यमुद्

भारतीयमिति पर्यवस्यते यदा कदा नवीनेऽस्मिन् अहिंसाप्रधाने भव्यभारते ! इत्थमन्तर्व्यूहो दुर्भेद्यो वर्वर्ति परीक्षार्थिपरीक्षकयोर्व्यवहारदशायाम् ।

अन्तर्व्यूहेषु परीक्षणं नानाविधैर्दृष्टिकोणैर्विलोक्यते परीक्षार्थिभिः । केचित्तामिमां परीक्षापद्धतिं महतीं विभीषिकामिवाकलयन्ति तस्मात्तेऽन्तर्व्यूहामन्त्रणे सम्प्राप्ते सति स्वात्मनो बौद्धिकीं भीरुतामल्पज्ञतां पराजयं चाशङ्कमाना भ्रमिति तद्रणयात्राप्रस्थाने मन्दोत्साहा भवन्ति, शिथिलायन्ते विलम्बन्ते प्रपलायन्ते च । केचित्तु नौकरीं लिप्सवः परीक्षार्थिनः स्वस्य हीनताग्रन्थिदोषात् नात्र कर्मणि सोत्साहं प्रवर्तन्ते । केचन पुनरिदमन्तर्व्यूहपरीक्षणं नाम नाटकाभिनयं, प्रहसनं, सभ्यमृगयाविनोदं, प्रवञ्चनां, प्रकारणेन्द्रजालं च मन्वते । अपरे च व्यावहारिकमेतदिति विश्वविद्यालयपरीक्षासदृक्षमेव सर्वसाधारणपरिचितमपि प्रयोजनापेक्षयात्यावश्यकमिव चिन्तयन्ति । अन्ये 'हतो वा प्राप्स्यसे स्वर्गं जितो वा भोक्ष्यसे महीम् ।' इति गुरुजनोपदेशाद्धृतिं धृत्वात्र प्रविशन्ति । अन्ये च परिचयेऽप्यस्यान्तर्व्यूहदुर्गस्य श्रेयानिति द्यूतक्रीडायामिव भाग्यमाश्रित्य विजयाय व्रजन्ति । कतिचिदर्थं साधयेयं वा देहं पातयेयं वेति साधनसंपत्तिं सर्वां, पक्षबलं चात्मनः प्रबलं कृत्वा, साहाय्यमादाय गच्छन्ति किलान्तर्व्यूहभेदनाय । केचन पुनरिदमभ्यासैकसाध्यमिति तदुपयोगि साहित्यं गुरूणां मुखाच्छ्रावं श्राव तद्विधिविधानकर्मकाण्डप्रक्रियाः समधीत्य कानिचिद्व्यावहारिकानि सूत्राणि सावधानं कण्ठे कृत्वा तदुपयोगि ज्ञानमावर्ज्य, समाचार-पत्रपारायणानि कृत्वा फलश्रुतिश्रवणालब्धोद्यमाः सद्योजातं सर्वं स्वदेशीयमन्ताराष्ट्रियं च घटनाचक्रं जिह्वाग्रे निवेश्य समसामयिकं राजनीतिप्रपञ्चं साकल्येन परिचिन्वानाश्चान्तर्व्यूहपरीक्षाप्रवेशपत्रमापूर्य कथमपि पराक्रमन्ते ! केचिदात्मनः पुण्यपरम्परास्वात्मनो भाग्यसम्पत्तौ च बहु श्रद्दधाना 'घटं भिन्द्यां, पटं भिद्यां कुर्यां रासभरोहणम् । येन केन प्रकोरण नौकरीं प्राप्नुयामहम् ॥" इति निर्विशङ्कमन्तर्व्यूहभूयोभूयो परीक्षणे विशन्ति प्रविशन्ति च । कतिपये स्थितप्रज्ञाः परीक्षार्थिनो हि–'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।' इति 'सर्वथा व्यवहर्तम्यं कुतो ह्यवचनीयता ।' इति वा 'सर्वैरुपायैः फलमेव साध्यम् ।' इति

इति वाथवा 'स्वकार्यं साधयेद्धीमान् कार्यभ्रंशो हि मूर्खतेति ।' नीतिवचनेषु बह्वादराः 'मामनुस्मर युद्धय च' इति वद्धा किलान्तर्व्यूहपरीक्षास्वात्मानं नियुञ्जते ।

सत्यपि चान्तर्व्यूहभेदकाठिन्ये केचनानुभववन्तो बुद्धिवादशास्त्रार्थे प्रवीणाः समाचारपत्रशास्त्रिणो वीराः स्थितप्रज्ञतामाश्रित्यान्तर्व्यूह संग्रामे विजेतुमुत्सहन्ते स्वात्मबलादेव, स्वस्वानुरूपं पराक्रमन्ते, प्राणबलाच्च ते युयुत्सवो भवन्ति अन्ये केचन विरला अपि शूरवीराः महारथा धैर्यवन्तश्च पुरुषोत्तमास्तमेतमन्तर्व्यूहं लीलयैव भिन्दन्ति नाम नूनम् । ते नन्विदमन्तर्व्यूहरणप्रकरणं क्रीडामात्रं प्रमाणयन्ति स्वपुरुषार्थप्रकर्षात् । ते स्वकीयरणकौशलाद्विजयश्रियं वृण्वते मोदन्ते च नौकरीसाम्राज्यवैभवैराजीवनम् । ये नु खलु नौकरीनिरपेक्षास्ते केचन विद्वांसो मनीषिणोऽन्तर्व्यूहयन्त्ररचनाशिल्पनैपुणीमेव निरीक्षितुं परीक्षितुं च स्वावलम्बनबलात् स्वात्मविश्वासैकधियः स्वपौरुषनिर्भरमेवात्रान्तः प्रविश्य तद्रहस्यग्रन्थीनां भेत्तारो विजयन्ते विख्यान्ते च । अत्रैकमुदाहरणं प्रदायोपसंह्रियते लेखः ।

अथैकवारंकश्चनान्तर्व्यूहभेदे परीक्षार्थी प्रवेशपत्रं यथावदापूर्य लब्धानुमतिः सुनिश्चिते काले समाहूतस्तत्रोपस्थायान्तः प्रविवेश । नामधामादिकं प्रारम्भिकं परिचयमाप्य सप्तमहारथिष्वेको विशेषज्ञस्तं पप्रच्छः—

विशेषज्ञः—'अपि भवानधीते समाचारपत्राणि ?'

परीक्षार्थीः—'स्वाध्यायादतिरिक्तं नाहं किमपि पठामि ।'

द्वितीयोविशेषज्ञः—'अपि त्वं जानीषे कांग्रेसमहासभाया इति वृत्तं तदुद्योगपरम्पराश्च ?'

परीक्षार्थीः—'गान्धेः सिद्धान्तं किंचिज्जाने; तदतिरिक्तमत्यविषये किमपि नो बहु जाने तत्वतः ।'

तृतीयो विशेषज्ञः—'अथ जानाति किं भवान् स्वदेशेऽत्र भारतवर्षे नवीनायां राजनीत्यां के के प्रवीणाः ?'

परीक्षार्थी—'मन्मते तु जवाहरादन्यो न कोऽप्यस्ति ।'

चतुर्थो विशेषज्ञः—'धर्मनिरपेक्षं राज्य शासनं किम्फलाय ?'

परीक्षार्थीः—'समग्रेऽपि भूमण्डले नास्त्येव किमपि धर्मनिरपेक्षं तात्विकं वस्तु । आम् अस्मद्देशे धर्मनिरपेक्षतायां स्वीकृतायामधुना भ्रष्टाचाराः प्रवर्तन्ते, चारित्र्यं नामशेषं बभूव, दण्डनीतिशैथिल्यात् सदा सर्वदा प्रजाः पीड्यन्ते लुण्टाकैर्विद्रोहिभिः, अपराधवृत्तयो जनास्तृणाय मन्यन्ते शासनम्, अनुशासनं खपुष्पायते, अन्नं वस्त्रं रक्षणं च प्रजानां दुर्लभं जातं, फलतः कृष्णापणे वणिजो धनमपहरन्ति लोकेभ्य उत्कोचग्रहणं च सर्वत्र विवर्द्धमानमास्ते ।'

पञ्चमो विशेषज्ञः—'को नेता भवतां प्रियः !'

परीक्षार्थी—'मम प्रिया नेतारो दिवंगतास्सर्वे ।'

षष्ठो विशेषज्ञः—'भाखरानङ्गलयोजनायां चर्मण्वतीबन्धनिर्माणे च या भित्तिर्निर्मिता तत्र कियद्गर्दभभार परिमिता मृत्तिका वा सुधा वोपायुज्यत ?'

परीक्षार्थीः—'नाहं जाने ! किमनेन मे ज्ञातेनाज्ञातेन वा ? कश्च मम सम्बन्धोऽनेन प्रश्नेन यावन्नौकरीयन्त्रावयवो नाहं भवेयम् ?'

सभापतिः—'महाशय ! यदा त्वं नैतज्जानासि न च तज्जानीषे, तदा किमर्थं वृथायातोऽसि किमर्थं च त्वया प्रवेशपत्रमापूरितम् ? अन्ततस्त्वं किं किं वेत्सि साधो ?'

परीक्षार्थीः—'श्रीमन् ! मन्मतेऽन्यथाबोधमाश्रयसे ! अहं तज्जानामि, यद्युष्मासु नैकोऽपि जानीते । क्षन्तव्यो मेऽयमात्मश्लाघावादः, परमहं विनयेन वच्मि यदहं पौर्वात्यपश्चिमीयेषु दर्शनेषु, साहित्येषु, भाषाविज्ञाने, ज्यौतिषे, चित्रकलायामन्यासु च कासुचिद्विद्यासु व्युत्पन्नोऽस्मि । सारांशोऽयं यदहं भवादृशां परीक्षकाणां मनोविज्ञानमखिलमपि सम्यक् जाने । मज्जातेषु विषयेषु यदि भवतां मध्ये वर्तते चेत्कोऽपि विद्वांस्तदा समांतेषु तेषु शास्त्रेषु यथेच्छं पृच्छतु प्रश्नान् । अहमुत्तरदानाय सहर्षं प्रस्तुतोऽस्मि । नाहं नौकरीं भवत्प्रदत्तां जातुचित्कामये । अहं त्वत्र श्रीमतामन्तर्व्यूह परीक्षापद्धतिमेव परीक्षितुं समागच्छम् । विराजन्तां महोदयाः । विजयन्तां चात्राचार्यासननिषण्णाः । नौकरीलिप्सूनज्ञान् परीक्ष्य परीक्ष्य स्वमनोभावानुकूलं ने सफला असफला वा जोघुष्यन्ताम् !! एषोऽहं प्रस्थितोऽतः !!! अत्रागत्य मया न

विश्वकथासाहित्ये पंचतन्त्रस्य स्थानम्

(ले० श्रीजंगबहादुरखन्ना, देहली)

दक्षिणैशियायां जावादेशतः प्रारभ्य पश्चिमोत्तरयूरोपस्य 'आइसलैंडदेशपर्यन्तं प्रचलितासु षष्टिमितासु भाषासु जनपदभाषासु च द्विशताधिकाः अनुवादाः प्राप्यन्ते पंचतन्त्रस्य ।

ईस्वीयषष्ठशताब्दयां "खुसरोनोशेरवां" नामकस्य पारसीकभूपतेः साम्राज्ये "बुर्जोः" नामक एकः सुप्रसिद्धः चिकित्सकः बभूव, येन भारतदेशस्य भूरि भ्रमणं कृतम् । सः पर्यटकः भारतीयानां पण्डितानां सहयोगेन तत्रत्यानां कासांचित् कथानां निज "पहलवी" भाषायाम् अनुवादं कृत्वा ५५०वर्षे पुनः स्वदेशं परावृत्तः ।

एतासु कथासु पंचतन्त्रकथानां प्रामुख्यम् अभूत् । तेन प्रथमतन्त्रे मुख्यरूपेण वर्णितयोः "करटक-दमनक-शृगालयोः" नाम्नैव स्वकीयग्रन्थस्य नामकरणं कृतम् ।

"बुर्जो" महाशयेन निर्मितः एषोऽनुवादः यद्यपि भस्मीभूतः तथापि अस्य आधारेण अचिरात् एव द्वौ अनुवादौ विहितौ; ययोः एकतरः समस्ते यूरोपदेशे पञ्चतन्त्रस्य प्रचारस्य अग्रणीः बभूव । प्रथमः अनुवादः षष्ठशताब्द्यां सीरियाभाषायां "बुर्जो" समकालम् एव विहितः, शार्मण्यदेशभाषायाः अनुवादेन सह एषः अधुना प्रकाशितः उपलभ्यते । द्वितीयोऽनुवादः आरव्यभाषायां "अब्दुल्ला-इब्न-अल-मोकाफी" नामकेन विदुषा "कलीला दिमना च" नाम्ना अष्टमशताब्द्यां संपादितः ।

अष्टादशशताब्द्यां अखिलयूरोपमहाद्वीपे पश्चिमैशियायां च पंचतन्त्रस्य परिचयः एतत्सहयोगेनैव बभूव, "सायमनसेथ" नामकेन मनीषिणा एकादशशताब्द्यां अस्य ग्रीकभाषायां अनुवादः विहितः । यूरोपीयभाषायां समुत्पन्ना एषा प्रथमा पंचतन्त्रस्य सन्ततिः अभूत् । पञ्चतन्त्रस्य विशदः प्रचारः एतत्आधारेण रशियादिपूर्वीयदेशेषु संजातः । पश्चिमयूरोपीयभाषासु १२५१ ईस्वी वर्षे विहितः स्पेनीयः अनुवादः प्राचीनतमः प्रतीयते । हिब्रू भाषायां अपि पञ्चतन्त्रस्य प्राचीनोऽनुवादः मिलति, यस्य रचनाकालः कर्तुश्च नाम नोपलभ्यते । अस्य ऐतिहासिकं महत्त्वं महत् । यतः हि अस्यैव साहाय्येन १२६०–१२७० वर्षेषु "जोन" नामकेन महाभागेन लेटिनभाषायां अनुवादः कृतः । लेटिनभाषायाः अस्य अनुवादस्य आधारेण विभिन्नासु दशयूरोपीयभाषासु तस्य रूपान्तरं संजातम् ।

एषु प्रसिद्धतमः श्रमनदेशस्य भाषायाः अनुवादः आसीत्, यस्य प्रथमं संस्करणं १२८० ईस्वी प्रकाशितम् ।

प्रथमसंस्करणात् उपरान्तं पञ्चशतवर्षेषु अस्य विंशति संस्करणानि प्रकाशितानि ।

"जोन" कृतं लेटिनरूपान्तरं आधारीकृत्य स्पेनिश, चैक, इटलीय भाषासु च पंचतन्त्रस्य अनुवादः अभूत् । इटलीयानुवादो "दोनी" महोदयेन १५५२ ईस्व्यां कृतः, तथा अस्य सहयोगेन एवं "सर टोमस नार्थ" महाभागेन पञ्चतन्त्रस्य आङ्गलभाषायां अनुवादः कृतः, यस्य प्रथमं संस्करणं १५७० ईस्व्यां प्रकाशितम् बभूव । एतत् च संस्कृतपञ्चतन्त्रस्य षष्ठी कुलसन्ततिः आसीत् ।

संस्कृततः पारसीकः अनुवादः, पारसीकतः आरब्यां, आरब्यतो हिब्रू, हिब्रूतो लेटिनः, लेटिनात् इटलियः, इटलीयतः आंग्ल इति । "कलिला वा दिमना" नामकानुवादस्य "पिप्लया विदपई" नामभ्यां प्रसिद्धौ द्वौ फ्रैंचानुवादौ संजातौ, ययोः नामनी यूरोपीये जनजीवने गल्पकथासु प्रसृते अभूताम् । अनुरंजनसाहित्ये जगत्जनीनम् इदं पञ्चतन्त्रम् भारतीयकथासाहित्यस्य समुज्जवलं रत्नम्, यस्य भासुरा प्रभा भारतात् बहिः अपि विदेशीयानां मनांसि षष्ठशताब्द्याम् एव रंजयति ।

किन्नप्यपहापितम् !!! श्रीमतां दर्शन लाभएवास्यान्तर्व्यूहस्य पारमार्थिको लाभः !!!

इत्थमाभाष्य धाराप्रवाहं स खलु परीक्षार्थी मन्दं मन्दं हसन् दृप्तः सिंह इव गजान् विभेद्यान्तर्व्यूहं तेषां मनांसि च भित्वा यथायातं तथागतः । ते सर्वे महारथा अन्तर्व्यूहदिग्गजा अपि सार्वकारेण पृष्ठपोषिता अपि तद्बुद्धिं परीक्षार्थिनो विभाव्य बहुचमत्कृता मूढा इव लज्जिता इव विक्लवा इव ह्रियावनतमुखास्तस्थुः ।

गीर्वाणवाण्या गौरवम्

(ले० श्रीविनोदचन्द्रो 'विद्याधिकारी', गुरुकुलकांगडीविश्वविद्यालयस्थः)

गीर्वाणवाणी खल्वार्याणां समुज्ज्वलतमं रत्नम् । संसारस्य भाषासु देवभाषैव पुरातनतमा । भारतवर्षस्य प्रायः सर्वा भाषा देवभाषाया एव निःसृताः । इतिहासेन ज्ञायते यत् संस्कृतभाषायाः प्रभावो न केवलं भारतवर्षे एव, परं तिब्बत-चीन-जापान-कोरिया-लंका-मलाया-जावा-सुमात्रा-तुर्कप्रभृतिषु देशेष्वपि दृश्यते । देवभाषाया अस्याः साहित्यं सौन्दर्ये मौलिकतायां चापि श्रेष्ठम् । संस्कृतभाषायाः शब्दकोषः सुमहानस्ति । अस्याः व्याकरणमप्यतिविस्तृतं परिनिष्ठितञ्च ।

भारतेऽस्मिन्ननेकान्याक्रमणानि बभूवुः । शका हूणा यवनाश्च बहवोऽत्र समागच्छन् । कानिचिद् दिनानि स्वशासनं कृत्वा प्रत्यगच्छन् । एषामनंतरम् आङ्गलदेशीया अप्यागताः । येषां राज्ये भास्करः कदाप्यस्तं न गच्छति । तेषां राज्यं सार्द्धशताब्दीपर्यन्तमभवत् । तदापि संस्कृतभाषाऽन्तर्बहिश्च सर्वथाऽविकृता व्यराजत ।

संस्कृतस्यैतादृशं साहित्यं विद्यते यस्य पठनेन मानवजातेः सुमहत् कल्याणं भवितुमर्हति । पूर्वं तावद् ऋग्यजुःसामाथर्वरूपाश्चत्वारो वेदाः समुल्लसन्ति, येषु महोपकारकं ज्ञानं वर्तते । वर्तमाने कलहयुगे वेदानामध्ययनं राष्ट्रेषु शान्तिमानेतुं शक्नोति । वेदाः किल "दृते दृंह मा, मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्य चक्षुषा समीक्षामहे (यजु...)" इत्यादि रूपेण गीतकानि गायन्तोऽस्माकं चेतस्सु विश्वप्रेमभावनामुद्बोधयन्ति । पुनश्च ब्राह्मणग्रन्थाः सन्ति, येषु प्राचीनभारतीयानां यज्ञादिकस्य प्रतिपादनं वर्तते । तदुत्तरमारण्यकान्युपनिषदश्च सन्ति । उपनिषत्स्वतीव रोचकशैल्या कथारूपेण ब्रह्मविद्यायाः प्रतिपादनमस्ति । जगत्युपनिषदां महानादरः संजातः । प्रायशः सर्वास्वपि प्रमुखभाषासु तासामनुवाद उपलभ्यते । तदनन्तरं शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षडवेदाङ्गा अध्येतव्याः सन्ति । समग्रमिदं वैदिकसाहित्यं संस्कृतसाहित्ये ललामभूतम् ।

पुनश्च संस्कृते वाल्मीकिरामायणं महाभारतं च महाकाव्यं कस्य मनोरंजनं न करोति । भगवद्गीतायाः नाम को न जानाति यस्यार्जुनं प्रति श्रीकृष्णस्य सुविदित उपदेशः श्रूयते । इमामेव संस्कृतभाषां कालिदासादयो महाकवयो शाकुन्तलप्रभृतिभिः काव्यैः समलञ्चक्रुः । अस्यामेव भाषायां बाणभट्टस्य कादम्बरीं, विशाखदत्तस्य मुद्राराक्षसं, भट्टनारायणस्य वेणीसंहारं च वर्तते । संस्कृताध्ययनं विना एतेषां काव्यानां रसास्वादनं कथं स्यात् ।

लोके तावद् दरीदृश्यते यया भाषया व्यावहारिको लाभो भवति तामेव भाषां सर्वेऽपि पूजयन्ति । यया भाषया जीवनेऽर्थलाभः, प्रतिष्ठाप्राप्तिश्च भवति छात्राः तमेव विषयं तामेव भाषां च विद्यालयेषु पठन्ति । अतः संस्कृतं प्रति न्यूनादरो विलोक्यते ।

भवन्तः सर्वेऽपि संस्कृतप्रणयिनः प्रेक्षावन्तः एतं समाचारं ज्ञात्वा विस्मयविमूढा भविष्यन्ति यत् पूर्वं तावद् वाराणस्याः संस्कृतपरीक्षासु समस्तेभ्यः प्रान्तेभ्य आगता विंशतिसहस्रसंख्याका विद्यार्थिनः समवेताः भवन्ति स्म । अद्य सा संख्या अर्धादप्यल्पा संजाता ।

परमधुनापि संस्कृतभाषा सर्वासु भाषासु महिमवती वर्तते । यद्यस्मिन् भारतेऽस्माकं देशनायका अध्यापकाश्च प्रयत्नं विधास्यन्ति, तर्हि देवभाषां छात्राः प्रेम्णा पठिष्यन्ति ।

संस्कृतभाषाविदो भारतीया विद्वांस एनां भाषां मातरमिव पूजयन्ति राष्ट्रभाषात्वेन च द्रष्टुं कामयन्ते । कामं तेषामयं स्वप्नः पूर्तिं न गच्छेत् तथाप्यस्या भाषायाः प्रचारः प्रसारश्च सुनिश्चित एव । अतः संस्कृतभाषा एव लोकव्यवहारे सेव्या । प्रत्यहं परस्परं संभाषणेन दुस्तराप्येषा सरला भवति अतः सदा सेवितव्येयं गीर्वाणवाणी ।

राष्ट्ररजःप्रशस्तिः

(साहित्यमहोपाध्यायः आशुकविः कविभूषणः पं०श्रीहरिशास्त्री दाधीचः जयपुरम्)

धन्यं भारतभुवो धूलिरिति सर्वे सुरावदन्ति ।

(१)

अस्यां क्रीडित्वा सञ्जाता बहुवीरा बलसाराः
अस्यामेव रामकृष्णाद्या उद्भूता अवताराः ।
अनया कृततिलका अपि बहवो रूपमनूपमयन्ति
सर्वे सुरा वदन्ति ॥१॥

(२)

स्वर्गवासिनोऽप्यस्यां सर्वे क्रीडितुमभिवाञ्छन्ति
त्रिषु लोकेषु जना एतस्या विमलगुणान् गायन्ति ।
इमामुपेत्य जनाः स्वर्गस्थितसुरतानि न ध्यायन्ति
सर्वे सुरा वदन्ति ॥२॥

(३)

एकैकाऽप्येतस्याः कणिका अस्माकं सुखसारा
एकैकाऽप्येतस्याः कणिका ह्यस्मल्लोचनताराः ।
ता अन्तरं केचिदपि जीवितुमस्मासु न हीच्छन्ति
सर्वे सुरा वदन्ति ॥३॥

(४)

प्रातः सायं सम्मिलिता वयमस्या गुणान्वदामः
अचलप्रेमसूत्रे संग्रथिताः सर्वे वयं भवामः ।
अस्यामेव विलसतोऽस्मान् नो नहि दुःखान्युपयन्ति
सर्वे सुरा वदन्ति ॥४॥

हरिनगर सूगर मिल्स लि०
★★★ फेक्टरी ★★★
हरिनगर [एन० ई० रेल्वे०] [चम्पारन जिला] उत्तर बिहार
दूरभापयन्त्रम्—
मर्यादा—रामनगर [चम्पारन]
प्रधानकार्यालय—
२०७, कालबादेवी रोड, बम्बई—२
दूरभापयन्त्रम्—
'क्रिसूगर' [बम्बई]
निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)
★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर

धारावाहिकं कथानकम् :-

जीवनस्य पृष्ठद्वयम्

—सहसम्पादकः

मया संस्कृतभाषा पठिता । भवन्तः कथयिष्यन्ति, पठिता स्यात्–किमेतेन ? बहवः खलु पठन्ति संस्कृतम् । अस्मिन् कलियुगस्य कराले कालेऽपि सन्त्येव संस्कृतपाठशालाः, पठन्त्येव छात्राः, पाठयन्त्येव पंडिताः । त्वयाऽपि पठिता स्यात् संस्कृतभाषा ? किमत्रापतितम् ! किन्तु नैतावता विश्राम्यति मे कथा । मया संस्कृतभाषा पठिता इत्येव न—विप्रकुलस्य–एकया बालिकया मया, नैव–नैव–“बालया” मया संस्कृतभाषा पठिता । ‘बालिकया’ इत्यस्य स्थाने ‘बालया’ इति प्रयुञ्जानाऽहं लक्षणया कमर्थं, व्यङ्ग्यविधया च कमभिप्रायं प्रकटीकर्तुमिच्छामि इति बोधनस्य नाऽऽवश्यकता “चचाल बाला स्तनभिन्नवल्कला” इत्यधीतवतां कृते !!

तर्हि मया सेयं भाषा कौमार्यादेवाऽधीता । अस्यां विंश्यां शताब्द्यां, अस्मिन् भारते कथमिदं संभाव्यते इत्याशंका सहजा भवताम् । किन्तु नितान्तं सत्यमिदम् । मदीयः परिवारः, अधुना तु “मदीयः परिवारः” इत्यस्य अभिधेयार्थो भवेत् मदीयस्य पत्युः परिवारो यस्मिन् “ते,” अहम् , नवजातः शिशुः “राजीवः”, एकः परिचारकश्चाऽस्ति किन्तु तदा मदीयः परिवारः आसीत्–पिता, माता, ज्यायान् भ्राता–कनीयसी स्वसा च । परिवारः सोऽयं नितान्तमाधुनिकः, संभ्रान्तः, समृद्धश्चाऽऽसीत् । पिता मे एकस्याङ्गलविद्यालस्याध्यक्षः आसीत् । भ्राता डाक्तरविद्यामपठत् । एम्. बी. बी, एस्. परीक्षाया अन्तिमे वर्षेऽनुत्तीर्णो भूत्वा तस्मिन् वर्षे परीक्षामुत्तरितुं बद्धपरिकरोऽभूत् । मया मातृभाषा हिन्दी पठिताभूत्, आंगलभाषा मया कौमारादेव शिक्षिता । किन्तु यदाऽहं त्रयोदेशे वर्षे पदं निदधामि, तथैव पितुरेकाऽभिलाषाऽभूत् । जनक उवाच—“कल्पने ! अहमिच्छामि यत्त्वम् अस्यां परीक्षायामेकं विषयं संस्कृतं गृहाण ।”

“किमिति ?”

“यतो हि सेयमस्माकं पुरातनी भाषा, न केवलमिदमेव, किन्तु प्रथमश्रेण्याः कृते संस्कृतं सुमहत्सहायकं भवति ।”

मया संस्कृतमारब्धम् । कारणं त्वत्राऽभूत् प्रथमश्रेणिलोभः । किन्तु नासीदिदं वास्तविकं कारणमपि तु हेत्वाभास एव । प्रथमश्रेण्या लाभलोभाद्बह्वयो बालिकाः पठन्ति संस्कृतम् किन्तु ताः किं संस्कृतं पठन्ति ? ता रटन्ति–मया तु पठितम् । “त्वन्तादि न पूर्वभाक्” ।

पूर्वं सेयं भाषा नितरां जटिला, अमनोज्ञा च प्रतीताऽभूत् । भगवतः पाणिनेराचार्यस्य डमरुरवनिर्गतां प्रेरणाम् “अइउण् ऋऌक्—” इत्यादि रटन्त्या मम गृहे परिहासः प्रायो मासद्वयं व्याप्य प्राचलत् । मदीया कनीयसी भगिनी—या केवलं दशवर्षदेश्याऽभूत् रात्रौ स्वप्नेऽपि “जबगडदश्” इत्याद्युत्स्वप्नायमाना मया कतिशो निवारिता । षाण्मासिक्यां परीक्षायां मया शते त्रिंशदङ्का एव लब्धाः । एतेऽङ्का नासन् सन्तोषजनकाः । परन्तु नात्राश्चर्यं मे बभूव । भवभूतेरुक्तिमधुनाऽहं स्मरामि ।

“वितरति गुरुः प्राज्ञे विद्या यथैव तथा जडे,
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।”

मम मस्तिष्के भाषाया अस्याः स्वरूपं, व्याकरणं च द्वारमेव नालभत । अस्माकमाङ्गलविद्यालये मदीयेषु विषयेषु आङ्गलभाषा आङ्गलसाहित्यं चाप्यासीत् । आङ्गलाध्यापिका यदा शेलेमहाकवेः “[illegible]” नाम्नीं कवितां पाठयति स्म, तदा हृदये

देवभाषा बहुदिवसपर्यन्तं भारतवर्षस्य राष्ट्रभाषा अभवत् । केचिदीदृशा अपि विद्वांसः सन्ति, य इदानीमप्याङ्गलभाषाया व्यमोहं न त्यजन्ति । ते तामेव भाषां राष्ट्रभाषात्वेन द्रष्टुमीहन्ते परमिदं नोचितम् । यस्या भाषाया गौरवं देवा अपि गायन्ति सा संस्कृतभाषाऽस्माभिरवश्यमध्येतव्या ।

सरला सरसा साध्वी लालित्येन समन्विता ।
भारतप्राङ्गणे नित्यं देवभाषा विराजताम् ॥

नवीनस्यैकस्य जगतः कल्पनाऽङ्कुरिता भवति स्म, वारिदानां वृष्टिः, सस्यमयी धरा–सर्वं चित्रितमिव भवति स्म–अतोऽहम् अन्यविषयेषु रुचिपूर्वकमपठम्–किन्तु संस्कृतस्यान्तरे मनो विवर्णमिव भवति स्म। संस्कृताध्यापिका नासीत्सुलभा, अतः षष्टिवर्षकल्पा एके गुरवः संस्कृतमपाठयन्। स्वभावस्तेषामुग्र एवाऽऽसीत्–किन्तु बालिकानां श्रेण्यां स्वकीयं क्रोधं संयम्य सस्नेहं ते व्याख्यानमदुः, खण्डिकोपाध्याया भूत्वाऽपि ते शिष्येभ्यश्चपेटादानस्य साहसं नाकुर्वन्। तथाऽपि प्रथमे वर्षे मदीयं मनो व्याकरणे नालगत्। हितोपदेशं, पंचतन्त्रं, रघुवंशं च ते नास्पृशन्। एवं स्थिते यदि मया शते त्रिंशदेवाङ्का लब्धास्तर्हि किमत्रापगद्धम्? गृहे चिन्ताऽभूत्–यस्याः परिणामे स्वाभाविकतया गृहशिक्षकस्य कस्यचिन्नियुक्तेः प्रस्तावः समागतः। शिक्षिका नाऽऽसीत्सुलभा संस्कृते–अतः शिक्षकस्य चर्चाऽभूत्। अस्माकं विद्यालयीयगुरवः प्रार्थिताः। किन्तु ते प्रायो गव्यूति (४ मील) परिमितं दूरस्था आसन्–नानुमेनिरे। मासमेकं यावत् प्रस्तावो विचारपतितोऽस्थात्–पर्यन्ते च मद्गृहशिक्षायै संस्कृतविषयमादाय एम्. ए. परीक्षां दित्सुरेकश्छात्रो राकेशशर्मा नियुक्तोऽभूत्। आन्ध्राभिजनस्य, तथापि गौरस्य युवकस्यास्य स्वभावमस्मत्पिता सम्यक् पर्यचिनोत्–अतीव सौम्यः, सुभगश्चायमभूत्–तथाऽपि स्वभावसरला मदीया माताऽध्ययनसमये मया सहातिष्ठत्। युवकस्य वेषभूषा नितरां सरला, मुखमुद्रा च सौम्याऽभूत्–शिक्षणक्षेत्रे स्यात्तस्यायं प्रथम एव प्रयासः–किन्तु तेन व्याकरणं कौमुदीमाधारीकृत्य न पाठितम्:–व्याकरणस्य सरलान् नियमानसौ मामलेखयत्। अनुवादमहमकरवम्। पाठावलिमपठम्। तस्मिन् वर्षेऽहं द्विषष्टिप्रतिशतमङ्कैरुत्तीर्णा।

मदीया रुचिरधुना परिवर्त्तनमियेष। द्वितीये वर्षेऽहं परीक्षायै प्रयत्नान् आरब्धवती। काव्यं मया समारब्धम्। भगवत्या भारत्या वरदपुत्रः कविकुलगुरुः कालिदासः। तेन लिखितानि काव्यानि विश्वमूर्द्धन्यानि। तान्येव पाठ्यक्रमे नियतानि सन्ति। कविर्भूत्वा यदि रसराजं श्रृङ्गारं कश्चन न स्पृशति तर्हि धिगेव तस्य काव्यम्। "श्रृङ्गारी चेत्कविः, काव्ये जातं रसमयं जगत्' इत्यधुनाऽहं स्मरामि, प्रशंसामि च। किन्तु, तदानीम्? वराकेण कालिदासेन न कदापि चिन्तितं स्याद्यन्व्यान् मदीयानि काव्यानि [illegible] परीक्षायाः पाठ्यक्रमे नियतानि च करिष्यन्ते! अहं चाऽसम् पञ्चदशवर्षकल्पा।

श्रृङ्गारकवीनामाराध्यदेवोऽयमासीन्मे "वयःसन्धिः।" असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।" इति कुमारसंभवे मयाऽधीतम्। रघुवंशस्य द्वितीयः सर्गो भगवत्कृपया श्रृङ्गारकथारहितः। तृतीये सर्गे च "तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ" इत्यादि रसिकराजस्य महाकवेः किंचन ईषद्गूढमिङ्गितं विद्यालयीयैरस्मद्गुरुभिः स्पृष्टमपि न। यतो नासीदिदमावश्यकं परीक्षायै। "दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम्" इत्यादि प्रौढासुलभानि लक्षणानि तु मदीयाया मतेरगम्यान्येवाऽऽसन्। किन्तु कुमारसम्भवे प्रथमसर्गस्थस्य पार्वतीवर्णनस्य कः किं करोतु? अस्माकं गुरवो जीवनस्य परे पारे स्थिता आसन्। संस्कृतस्य ते विद्वांसोऽभूवन्। अतः सरलैरनुग्रैश्च सामान्यपर्यायैस्ते सर्वमपीदमपाठयन्। अहं स्मरामि—कुमारसंभवस्य तृतीये सर्गे—

"बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।"

इति श्लोकः पाठ्यमानोऽभूत्। श्रेण्याः सर्वा अपि किशोर्यः आधुनिकजीवनस्य सामान्यानां कतिपयप्रवृत्तीनामभिज्ञा आसन् तथापि श्लोकस्यास्य कमप्यर्थं--प्रयत्यापि--न बोद्धुमपारयन्। स्वाभाविकं चेदमासीत्। अतो नितान्तमकपटेन मनसा एकया पुनः पृष्टम्—"महोदय, नावगतम्।" प्रयत्नशतमतिक्रम्य गुरुमहोदयस्य स्मितमधरपुटाद् बहिर्भूतम्। ततश्च तैश्चातुर्येण भूयानर्थो बोधितः, अस्माभिश्चावबुद्धः।

किन्तु गृहशिक्षकस्य युवकस्य वराकस्योपरि सुमहती समस्या सेयमभूत्। भगवत्कृपयाऽस्मिन् वर्षे जनन्या मम पाठसमयसाहचर्यं परित्यक्तमासीत्। तथापि राकेशः कालिदासीयकाव्यानां पाठनसमये संकोचेन किंभूतकिमाकार एवाभवत्। "नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः।' इति श्लोकं पाठयतस्तस्य कपोलौ गाढरक्तवर्णौ समभूताम्। एतावता कालेन किंचिदवगतवत्या ममापि साहसं मुखमुत्थाप्य द्रष्टुं नाऽभवत्। भगवानेव जानाति किमस्य युवकस्य हृदये संस्फुरितं भवेत्तेषु तेषु समयेषु किन्तु इयदवश्यं स्मरामि

113542

यन्मम वपुषः कणे कणे लज्जाया अरुणिमा, अन्तराले च कैशोर्यसुलभा उत्सुकता जागरूकाऽभूत्। राकेशस्य गांभीर्यमहमधुनाऽपि प्रशंसामि—तस्य संस्कृतभारत्यां भक्तिः, मयि च निश्छलः स्नेहो मां संस्कृतं प्रति उन्मुखां, सौत्सुक्यां चाकरोत्। एतस्मिन् समये च तदिदं लिखन्ती अहं नात्र संकोचमनुभवामि यन्मदीये हृदयेऽनुरागस्य प्रवेशः कविकुलगुरोः कालिदासस्य काव्यमाधुर्या सहैवाऽभवत्। राकेशो युवकोऽभूत्—मदीयः शिक्षकोऽभूत्, सुशीलः, कमनीयश्चाभूत्—किन्तु तस्य कस्मिन्नपि वाक्ये, कस्यामपि चेष्टायां, कस्मिन्नपि भावे न कदाप्यनुरागस्य दर्शनं मया कृतम्। मया विचारितम्—"पुरुषजातेरेवायं दोषः।"

किन्तु अयमासीत्प्रभावः संस्कृतभारत्या अथवा मदीयस्य भाग्यस्य यत् तप्ताङ्गारस्य साहचर्येऽपि घृतकुम्भे न कापि विकृतिरवलोकिता। अधुनाऽहं कतिशः कथयामि यत् ये संस्कृतसाहित्यस्य शृङ्गारमुग्रं विभावयन्ति, अश्लीलतायाः कृते संस्कृतसाहित्यं च निन्दन्ति ते संस्कृतभाषायाः स्वाभाविकीं शुचितां, गंभीरतां च न पश्यन्ति, न जानते। "शृङ्गारः शुचिरुज्ज्वलः" इति साहित्यं मन्यते। अहमधुना कल्पयामि—यद्यदि राकेशः संस्कृतसाहित्यस्य स्थाने उर्दू साहित्यमपाठयिष्यत्—तर्हि किमहं तथाविधाऽस्थास्यम्? ज़ाम, साकी, मैखाना-इत्यादिमद्यपवातावरणे पुष्टस्य "इश्क" देवताकस्य तत्साहित्यस्य हृदयं यथा तामसं, तथैव शुद्धस्नेहवतः संस्कृतसाहित्यस्य हृदयं निसर्गत एव सात्त्विकम्।

—क्रमशः

पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम् ४

(नियमः ८)

१.	प्रकाशनस्थानम्	जयपुरम्
२.	प्रकाशने कालावधिः	मासिक पत्रम्
३.	मुद्रकस्य नाम	श्री शङ्कर आर्ट प्रिण्टर्स
	नागरिकता	राजस्थानी
	संकेतः	त्रिपोलिया बाजार, जयपुरम्
४.	प्रकाशकस्य नाम	श्री जयबहादुरसिंह
	नागरिकताः	भारतीयः
	संकेतः	भारती–भवन, गोपालजी का रास्ता, जयपुर
५.	संपादकस्य नाम	कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री
	नागरिकता	भारतीय
	संकेतः	मञ्जु निकुञ्ज, सी. स्कीम, जयपुर
६.	पत्रस्य संपत्तेः अधिकारिणां अधिकारस्यांशभाजां वा जनानां संस्थाया वा नाम, संकेतश्च	'संस्कृत प्रचार परिषद्' जयपुर द्वारा प्रकाशितम्

अहं श्रीजयबहादुरसिंहः घोषयामि यत् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनाङ्कः १५ जनवरी १९५८

स्वराज्यम्

(ले० श्रीदा०सातवलेकर अध्यक्ष स्वाध्याय मंडल, पारड़ी)

वयं तावत्स्वराज्यं प्राप्ताः स्मः। स्यात् निःस्वः धनिकः वा, उभयोरपि तत्स्वराज्यप्राप्तिः प्रकृतिसिद्धा साधारणी च। वयम् एतादृशः स्वराज्यस्य शासनं तंत्रयामहै शत्रुसात् वा करवामहै। स्वराज्यस्य सुष्ठु शासनमेव सर्वेषां नः वांछितम् अस्ति।

कुतः अस्माकम् इदं स्वराज्यम्। उत्तरयितव्यं चेत् एवम् उत्तरं देयं यत् स्वराज्यम् अस्माकं शरीरे एव तिष्ठति इति। तदर्थं न हि किंचित् विप्रकृष्टं स्थानम् आश्रयणीयम्। जन्मसमकालं प्राप्तम् एतत् शरीरम् अस्माकं स्वराज्यरूपेण स्थितं वर्तते। अत्रत्यः राजा आत्मा, अतः इतः एव अनुशिष्यम्।

बलवताम् अधिकारः

अनुशासनं बलवतामेव विधेयम्। कः वा अनुमन्येत असमर्थानां शासनम्। यः हि ईशजशक्तिसंपन्नः, स एव विश्वेषाम् अनुशासनाय अलम्, न तु असमर्थः नरः। तस्मात् यदि एतादृक् शरीरम् अस्माकम् ईशितव्यम्, तर्हि प्रथमम् अन्तःसामर्थ्यं सम्पादनीयं भवति। विश्वं वै बलवताम् अधीनम्।

शतं विज्ञानवताम् एको बलवान् आकम्पयते—

छा० उ० ७।८।१

बलेन विना अस्मिन् जगति किंचिदपि न सिध्यति अतः बलं सम्पाद्यम्। स्यात् शरीरान्तर्गतं शरीरबाह्यं वा स्वराज्यम् उत साम्राज्यम्, तद् नूनं बलेनैव तंत्रयितव्यं भवति। असमर्थस्तु सर्वेषां परिभवास्पदम्। अस्मिन् जगति असमर्थस्य नैराश्यमेव शरणमस्ति। अतः कार्यकारि बलं सम्पाद्यम्। बलेनैव स्वराज्यानुशासनं सुशकम्।

एतत् शरीरम् अस्मदीयं स्वराज्यम् एव। अस्मिन् राज्यशासने कीदृशाः अधिकृताः नियुक्ताः भवंति, तेषां वर्णना उपनिषदा सुष्ठु कृतास्ति—

यथा सम्राट् एव अधिकृतवान् विनियुक्ते……
मध्ये तु समानः।

प्रश्न० उ० ३।४।५

सम्राजः अधिकृतपुरुषाणां नियुक्तेः ईदृशं वर्णनौपम्यं प्राणानां यथास्थानं नियुक्तिहेतुकमेव। ईदृश्या उपमया एवमपि भाव्यम् यद् यथा प्रधानाप्रधानाः प्राणाः शारीरिकेषु विभिन्नप्रदेशेषु मुख्येन प्राणेन नियोज्यंते, तथैव सार्वभौमो राजा नैजान् जनपदाधिकृतान् तत्तज्जनपदेषु नियुनक्ति। इतः एतद् अर्थापन्नं भवति यद् कस्यचित् सार्वभौमस्य कस्मिंश्चित् पृथिवीप्रदेशे अधिकारः, प्रान्ताधिकृताः, नगराधिकारिणश्च, तथैव एष शरीराध्यक्ष आत्मा शारीरिकेषु विभिन्नस्थानेषु स्वान् अधिकारिणः व्यापारयति यथा शारीरं साम्राज्यं तथा भौममपि भवति। किमुत यादृशं भौमं साम्राज्यं लघीयः, पार्थिवं च गरीयः। परिमाणभेदम् अन्तरेण द्वयोरपि अशेषं साधारण्यं वर्तते।

	राष्ट्रतालिका
१. त्रयस्त्रिंशत्कोटयः जन्तवः विधंते।	१. मनुष्या त्रयस्त्रिंशत्कोटयः।
२. सर्वेषाम् अणुजन्तूनां स्वातन्त्रेण जननस्थितिलयाः भवन्ति	२. सर्वेषां मनुष्याणां स्वातन्त्र्येण जन्मस्थितिलया नियताः
३. शरीरस्य इन्द्रियाणि अवयवाश्च अनेके।	३. राष्ट्रस्य प्रान्तादिसदृशाः विभागा अनेके।
४. सर्वाणि इन्द्रियाणि तदधिष्ठातारश्च परस्परं भिद्यंते।	४. प्रतिप्रदेशम् अधिकारिणः विभिन्नाः।
५. शरीरे तावत् इन्द्रियाणि भोक्तॄणि प्राणाश्च अभोक्तारः	५. राष्ट्रे वैतनिकाः सेवकाः अवैतनिकाः स्वयंसेवकाः सन्ति।
६. आत्मा एव शारीरः शासिता।	६. सार्वभौमः राष्ट्रस्य शासिता।

राष्ट्रशरीरयोः ईदृशं साम्यं दृश्यते। तत्साम्यं क्रान्तदर्शिभिः ऋषिभिः उपलब्धम् उपवर्णितम् च। एते हि साधारणा नियमाः प्रकृतिसिद्धाः सुखावहाश्च।

त्रयस्त्रिंशत्कोटयः प्रकृतयः

अधुना वयं शरीरस्य अवयवान्वर्णयामः। त्रयस्त्रिंशत्कोट्यः अणुजन्तवः शरीरे अवतिष्ठन्ते। एते विभिन्नेषु शारीरिकप्रदेशेषु स्थिता दृश्यते। विभागश एते इत्थं व्यपदिश्यन्ते।

(१) नासिका (२) जिह्वा (३) नेत्रे (४) त्वक् (५) कर्णौ इदं विभागपञ्चकं ज्ञानेन्द्रियाणाम्। अथ श्रमिकाणां प्रदेशविभाजनं दृश्यताम्। हस्तपादपायूपस्थं नाम कर्मेन्द्रियत्वेन श्रमिकक्षेत्रे अन्तः पतति। एतन्मुक्त्वा पञ्च प्रधानप्राणान् पञ्च उपप्राणान् संपीड्य दश प्राणविभागा भवंति। प्रधानः प्राणः हृदयतदूर्ध्वस्थाने तिष्ठति। अपानः नाभिनिम्नस्थानस्थितः। व्यानश्च स्वशरीरसंचारी। उदानस्तावत् ऊर्ध्वगामी, समानश्च जठरस्थितः सन् भुक्तमन्नं रसपरिणतं करोति। गौणप्राणपंचककार्यक्षेत्राणि एवंविधानि एव भवन्ति अस्मिन् शरीरे। एतदन्तरेण मस्तिष्कपृष्ठवंशहृदययकृत्प्लीहामूत्राशयोदरमलाशया नाम प्रधानक्षेत्राणि। एतानि मनोबुद्धिसमावेशतः त्रयोदशस्थितानि। पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्राणाः, पञ्च उपप्राणाः समाहृताश्चेत् विंशतिः भवन्ति। उपरिपरिगणितत्रयोदशक्षेत्रविभागान् अन्तर्भाव्य समुदिता इमे त्रयस्त्रिंशत् भवन्ति। एवम् आत्मनः स्वराज्यं स्वस्मिन्नेव शरीरे स्थितम्। अत्र शासिता आत्मा एव। प्रतिप्रान्तं च कश्चित् प्रशासिता अधिकृतो भवति।

वैतनिकः सेवकः

यथा राज्यशासने प्रान्ताधिकारिप्रभृतयः अनेके वैतनिका राजार्थकराः सन्ति तथैव अस्मिन् शरीरेऽपि वर्णितचराणां प्रान्तानां नियता अधिकारिणः। येषां साहायकं विदधति इतरे राजपुरुषाः। सर्वे इमे वैतनिकाः। भोगरूपम् एतेषां वेतनम्। एतेषां भोगविषयाः परस्परं विभिद्यन्ते। शरीरभुक्तम् अन्नं रसपरिणतम् एतेषां भरणार्थं भवति। तादृशो रसः एतैः परिमाणम् अनतिक्रम्य सेव्यते। अपरान् भोज्यान् अर्थान् अपि एते आप्नुवन्ति। नासिका पृथ्व्याः गन्धम् आजिघ्रति। सुगन्धाघ्राणतः नासिका विषयी संतुष्यति। दुर्गन्धसेवनेन उद्विजति। अस्य कार्यालयं प्रविशतु यथाकामं सुगन्धः। यः सुखं नासिकया सेव्येत। परं स्वल्पेनापि दुर्गन्धोपलम्भेन इयं खेदं भजेत। एतादृशः अयं भोगी अधिकृतः। अपरः अधिकारी रसनारूपं कार्यालयम् अधितिष्ठति। स स्वादुपदार्थभोगे आसंजति। केचिद् अधिकारिणः कटवम्लतिक्तरसान् अपि रोचयन्ते। रसषट्कान्यतमस्य यथाकामम् उपलब्ध्या अयं सन्तुष्यति। तदभावे च उद्विजति। इत्थं रसषट्कमस्य भोगविषयः। एतस्मिन्नेव एष विहरति।

अत्रत्यः तृतीयः अधिकारी नयनम् आस्ति। नयनविषयी अयं सौंदर्यासक्तः कस्मिन्नपि रामणीयके रममाणः विरूपवस्तुदर्शनेन च खिद्यन् अवतिष्ठते। चतुर्थस्त्वगधिकारी यः पेशलस्पर्शप्रियः सन् तत्प्रतीपकठोरस्पर्शार्थसेवनेन झटिति क्रुध्यति। पञ्चमस्तु कर्णः महावीर्यः स्वादुस्वराभिमुखः कर्कशस्वरपराचीनः भवति। एष गानमाधुर्येण भृशम् आनंन्दति। कर्णकटुस्वरापातेन च अतीव उद्विजति।

इत्थमेते राज्याधिकारिणः भोगैकप्रवणा वेतनैकवश्याश्च। वेतनभोगलाभालाभहेतुकौ एतेषां हर्षामर्षौ कार्याकार्ये च। एतेऽनिशं भोगैकदृष्टयः, शरीररूपराष्ट्रस्य किम् आपतेत्, किं नु खलु तस्य भद्रं स्यात्, स्वस्य कार्योपरमे सति अस्य अखण्डस्य शरीरराष्ट्रस्य का वा अवस्था भवेत् इत्यत्रं भौगेकप्रवणा अधिकारिण उदासते। मम पर्याप्ता भोगा अपेक्षिताः। मदितरराष्ट्रं कीदृशीं वा दशाम् आपद्येत इत्यत्र पिहितलोचनास्ते।

भोगिन अधिकारिणः

वारंवारम् एते स्वकार्यभारं परिहरन्ति क्वचिद् उपरुध्यन्तेऽपि। एष एव रोगः। नेत्रयोः तिमिरम् उत्पद्यते। नासिकाया गन्धाघ्राणे सामर्थ्यं नास्ति। शब्दश्रवणं कर्णयोरपि स्थगितं दृश्यते। एवम् एते मुहुर्मुहुः संघर्षनैपुणं दर्शयन्ति। एतेषां कलहान् समादधत् आत्मा बहुकष्टम् अनुभवति। अस्माभिः सर्वभूतहितरतैः भाव्यम्। स्वस्य देहमात्रिकं भोगैकप्रवणत्वं परित्याज्यम् इति शृण्वन्तोऽपि एते स्वार्थैकसाधनाः वैतनिकाः सेवकाः तत्सर्वं पृष्ठतः कृत्वा इव व्यव-

सम्पादकीयम्

संस्कृतभाषा न कठिना, तस्या प्रचारः सर्वत्राऽपेक्षितः

(बम्बईराज्यपालस्य श्रीश्रीप्रकाशमहोदयस्य भाषणम्)

मुम्बईनगरस्थ 'भारतीयविद्याभवने' पदवीप्रदानस्य यः किल महोत्सवोऽभूत्तत्र राज्यपालमहोदयेन संस्कृतविषये यत्किल समुदीरितं तद्धि शिक्षाविभागीयैः सर्वैरेव अवधारणीयं नूनम्। महाभागेन प्रोक्तं यत्—"मम सुदृढ़ेयं भावना यत्सेयं संस्कृतभाषा तादृशी शक्तिरस्ति या हि समग्रमपि देशमेकतासूत्रे संबध्नाति। बहवस्तामिमां कठिंनां घोषयन्ति किन्तु तदिदमनृतम्। कठिनता सरलता वा शिक्षाप्रणाल्या उपरि निर्भरा। संप्रति स प्रकारः प्रचलितोस्ति यद्द्वारा सरलतया संस्कृतं शिक्षितुं शक्येत।

अस्मिन्विषये न कश्चिदपि संदेहो यत् अस्माकमुत्तमोत्तमाः शक्तिशालिनश्च विचाराः संस्कृतभाषायां सन्ति। अस्माकमखिलाः प्रान्तीयभाषा अपि संस्कृतादेव उद्भूताः। अतएव संस्कृताध्ययनं विना स्वमातृभाषायामपि वयं पारंगता न भवितुमर्हामः। अहं सुतरामाशासे यत् संस्कृतस्य प्रचारः प्रसारश्च भविष्यति, तद्द्वारा च भारतस्य प्रत्येकव्यक्तिः न्यूनाधिकरूपेण संस्कृतं जानीयात् इति। मम सोयं व्यक्तिगतोनुभवोऽस्ति यद् देशस्य प्रत्येकप्रान्ते एवंविधाः पुरुषाः सन्ति ये हिंन्दीम् अंग्रेजीं वा न बुध्यन्ते, किन्तु संस्कृतं सम्यक्तया बुध्यन्ते ब्रुवन्ति च। यद्यपि देशः साम्प्रतं स्वतन्त्रः तथापि कतिपयाः शक्तयो देशं छिन्नं-भिन्नं कर्तुं वाञ्छन्ति। एवं दशायां संस्कृतमेव तादृशी शक्तिर्याऽस्मान् एकसूत्रे निबध्नाति। यतो हि सर्वेषामेव समादरः प्रेमा च भाषायामस्यामस्ति। एवंविधा संयोजिका शक्तिरस्मत्तो दूरगता न भवेत्।

अहं दृढतमम् आशासे यदस्माकं मध्यतो बहूनामेव संस्कृताभिज्ञता भविष्यति। एवंविधं दिनमहमिदानीमेव पश्यामि यस्मिन्दिने संस्कृतं विना कोपि जनः शिक्षितो न गणयिष्यते। हन्त तदिदं कियद्दुःखकरमस्ति यद् वयं वैदेशिककथाः इतिहासांश्च जानीमः, किन्तु स्वदेशकथानामनभिज्ञाः। योरपीयसमाजे यदा वयं स्वदेशीयकथाकथनार्थं प्रेरिता भवामस्तदा वयं लज्जया नतमस्तका भवामः। एकापि कथा धर्मस्य संस्कृतेश्च विषये नाऽस्माकं स्मृतिरूढा। हन्त कियदिदं दयनीयम्, उपहासास्पदं च। मम संप्रति पूर्णो विश्वासोऽस्ति यत् सेयं स्थितिर्नाधिककालं तिष्ठेत्। बुद्धिमन्तो जना निजसंस्कृतेः परिचयार्थं संस्कृतभाषाध्ययनं निश्चितमावश्यकं मंन्यन्ते।

भारतीयशिक्षाविभागे संस्कृताध्ययनार्थं समये समये मुहुर्मुहुर्बोध्यन्ते जनाः। 'आयोगाः' अपि स्थिरीक्रियन्ते। तेषां कार्यकलापोऽपि प्रचलति। किन्तु यादृशी सफलता आशास्यते न तदनुकूलं फलं साम्प्रतमपि। अस्तु, यदि साम्प्रतमपि शिक्षिताः प्रबुध्येरन् तर्हि भारतस्याऽदृष्टं निश्चितमेव प्रसीदेत्। भवतु भगवतोऽनुकम्पा नूनम्।

दृश्यन्तो दृष्टिपथम् आरोहंति। वेतनैकदृग्भ्यः स्वकार्यकरणे पिहितलोचनेभ्यः अधिकारिभ्यः कष्टाद् इतरद् किं वा उत्पत्तुमर्हम्।

क्वचिद् एते शत्रुसात् भवन्ति। स्वान् स्वान् विषयान् अरक्षतः एतान् आस्कंद्य शत्रवः तत्तद्विषयस्वामिनो भवन्ति। ईदृशः व्यसनस्य हेतवः एते एव सुखार्थिनो वैतनिकाः। महाप्रयत्नेन तादृशं आस्कंदनं विचारणीयम्। एतदेव रोगचिकित्साव्यपदेशतः प्रसिद्धम्।

* * *

गणितस्य उच्चशिक्षाया महत्त्वम्

कलिकात्तास्थ 'गणितसमाजस्य (मैथेमैटिक्स) स्वर्णजयन्तीसमारोहः दिसंबरमासस्य २६ षड्विंश्यां तारिकायां महंता संभारेण निरवर्त्यत। अवसरेऽस्मिन् भारतप्रधानमान्त्रणा श्रीनेहरूमहोदयेन संस्थायै एतस्यै संप्रैष्यत संदेशः। तत्र महाभागेनाऽनेन समर्थितं यत् विज्ञानस्य प्रगतौ गणितेनाऽनेन अतिमहत्त्वपूर्णो भागः पूरितः।

कलकत्ताविश्वविद्यालयस्य सीनेटभवने सोयमुत्सवः समभूद् यस्योद्घाटनसमारोहो महता संभारेणाऽऽसीत्। सभापतिरभूत्

कलकत्ता-उच्चन्यायालयस्य प्रधानन्यायाधीशः श्री के. सी. गुप्तामहोदयः। स्वर्णजयन्त्यामस्यां भारतस्य विभिन्नभागेभ्यः समागताः सर्वतः ख्यातिमाप्ताः अनुमानतः त्रिशतं प्रतिनिधयः समवेताः। गणितसमाजस्यास्य प्रारम्भः १८८३ तमखिष्टवत्सरे कतिपयैरुत्साहिभिर्विद्वद्भिर्वङ्गैरक्रियत यस्य नेताऽऽसीत् श्रीआशुतोषमुकर्जीमहोदयः। विंशतिवर्षानन्तरं च नियमानुसारं समाजस्याऽस्य प्रतिष्ठापना समभूत्।

महोत्सवेऽस्मिन् प्रधानन्यायाधीशश्रीदासगुप्तमहोदयेन निजभाषणे साग्रहं प्रतिबोधनमदीयत यत् सांप्रतं समाजो गणितस्य विज्ञानस्य च प्रशिक्षणं भारतस्य प्रादेशिकभाषास्वपि प्रारभेत। समारोहेस्मिन् भारतीयराष्ट्रिय-गणितसमितेर्मन्त्री डा० डी० चन्द्रशेखरमहोदयप्रभृतयः उल्लेखनीयाः। गणितशास्त्रमिदं भारतीयानामादिधनम्, एतस्य प्रवर्द्धनं सर्वतः प्रचारणं च देशस्य लाभायैवेति को न मन्येत ?

भारतीयज्ञानभाण्डागारस्य चिरजीवनाय संस्कृतशिक्षा आवश्यकी

दिसम्बरमासस्य २८ दिवसे 'पञ्चनदीयसंस्कृतसाहित्यसंमेलनस्य' तृतीयवार्षिकमधिवेशनम् अमृतसरनगरे समभूद् यस्योद्घाटनं पञ्चाम्बुराज्यपालश्रीनरहरिविष्णुगाडगिलमहोदयेनाक्रियत। अवसरेऽस्मिन् देशस्य संस्कृतविद्वांसो नागरिकाः प्रभूतसंख्यायां समवायन्त।

राज्यपालमहोदयेन भाषणे समर्थितं "यत्—भारतस्य लोकप्रियभाषा (राष्ट्रभाषा) संस्कृतमेव सम्भवेत् न अंग्रेजी भाषा। संस्कृतस्य प्रवर्तनं प्रवर्द्धनं च देशेऽस्मिन् सुतरामावश्यकं यतो हि भारतीयानां धार्मिकं सांस्कृतिकं च साहित्यं सम्पूर्णं संस्कृते। किं च सेयं संस्कृतभाषा संपूर्णभारतस्य संयोजकं सुमहत् सन्धिसूत्रम्। प्रादेशिकभाषाश्चापि संस्कृतं विना न जीवेयुः, यतो हि संस्कृतमेव तासां जननी। अवश्यं प्रचलिताः शब्दाः अन्यान्यभाषाभ्योऽपि नूनं संग्राह्याः। संस्कृतशिक्षणाय अस्माकं प्राचीना गुरुप्रणाली एव पुनर्जीवनीया, वर्तमानया शिक्षापद्धत्या तु वयं संस्कृतस्यापारभाण्डारतो वञ्चिता एव भविष्यामः। ममाऽनुमानमस्ति यदि सर्वेष्वेव माध्यमिकशिक्षालयेषु संस्कृतं पाठ्येत तर्हि एकलक्षसंस्कृतपण्डितानां जीविका प्रचलेत्, संस्कृतस्य च ज्ञानभाण्डागारं सुरक्षितं स्यात्। महोदयेन एम्. ओ. एल. उपाधेः स्पष्टं विरोधः कृतो यत् उपाधिनाऽनेन न संस्कृतवैदुष्यमधिगम्यते। अत एव गुरुकुलशिक्षैव सर्वतः साधीयसी।

संस्कृतस्योपेक्षणं देशस्य कृते सुतरां घातकम्। कुरुक्षेत्रविश्वविद्यालयस्योल्लेखं कृत्वा प्रोक्तम्-'अहं विश्वविद्यालयस्य कुलपतिरस्मि। अतएवाऽहं स्वयं वाञ्छामि यत् एतस्य शिक्षापद्धत्यो परिवर्तनं कुर्याम्। विश्वविद्यालयश्चायं नवीनेष्वेव आदर्शेषु प्रचलेदिति च। इत्यादि।" संस्कृतविद्वद्भिः कतिधा प्रबोधिता नेतारः, बहुधा प्रयतितं च भाषाया अस्याःसर्वतः प्रवर्तने। अस्तु, यदिदानीमपि देशनायकाः प्रतिबुध्येरन् तर्हि देशस्य, तन्निवासिनां चाभ्युदयो भवेदिति किं वा भूयसा।

अखिलभारतीयं संस्कृतसाहित्यसंमेलनम्

'अखिलभारतीयस्य संस्कृतसाहित्यसम्मेलनस्य पञ्चविंशमधिवेशनं चित्तौड़दुर्गे भविष्यतीति' बहुकालात्पूर्वं संवादपत्रपाठकैः पठितम्। तदिदमधिवेशनं चित्तौडदुर्गे गुरुकुलस्य मुख्यप्राङ्गणे जनवरीमासस्य विंश्यां तारिकायां महता संभारेण संपन्नम्। असीदेतस्याऽध्यक्षो भारतकेन्द्रीयगृहकार्यमंत्री श्रीबलवन्तनागेशदातारमहोदयः। उद्घाटनकर्त्ता च केन्द्रीयशिक्षामन्त्री डा० कालूलालश्रीमाली महोदयः समभूत्। प्रमुखप्रमुखेषु अतिथिषु पञ्चाम्बुराज्यपालश्रीनरहरिविष्णुगाडगिलमहोदयादीनां नामान्युल्लेखनीयानि। अधिवेशनेऽस्मिन् भारतस्य समस्तप्रान्तेभ्योऽनुमानतः ३०० संख्यकाः प्रतिनिधयः समभिलन्।

प्रारम्भे स्वागताध्यक्षश्रीजनार्दनरायनागरमहोदयेन स्वभाषणे चित्तौडस्यैतिहासिकं महत्त्वं घोषितम्। शिक्षामन्त्रिश्रीमालीमहाभागेन संस्कृतभाषायाः सुमहद्गौरवं स्वीकुर्वता सूचितं यत् केन्द्रीयसर्वकारः संस्कृतस्योन्नयनार्थं प्रयत्नशीलः 'संस्कृतायोगस्य' प्रबोधनानां क्रियान्वितीकरणार्थं गाम्भीर्येण विचारयति। एतदर्थं समितिरेका स्थापयिष्यमाणा। अहमाशासे भारतस्य तत्तद्राज्यानां सर्वकाराः स्वमातृभाषाभिः सार्द्धं संस्कृतभाषाध्ययनाय अनिवार्यं स्थानं देयासुः, ततश्च भविष्यति संस्कृतस्य स्थानमधिकाधिकं प्रतिष्ठायुक्तं संभवेत्। सम्मेलनस्य संस्थापकः महामहोपाध्यायश्रीगिरिधरशर्मा चतुर्वेदमहोदयः समभाषत—'सम्मेलनमिदं नानाबाधाः परा-

उच्चकक्षायाः, नवीनतायाः, दृढतायाश्च कृते

मुरारजी गोकुलदास, स्पिनिंग एण्ड वीविंग कं. लि.

निर्मितानां वस्त्राणां क्रयः कार्यः

सुपारी बाग रोड़
टेलीफोन नं० ६००२१
(थ्री लाइनस)

परेल बम्बई नं० १२
टेलीग्रामस 'मोगोको'
बम्बई

= सर्वाधिकं सन्तोषप्रदं संस्थानम् =

विशेषता—

(मिनिरल खाकी तथा अन्य ड्रिलस, धोती तथा साडी, गाइलापेट, डोब्बी चाटर लांगक्लाथ, कौटिंग, शर्टिङ्ग, वायला, मुल्स तथा अन्य फाइन मर्सराइजड वस्त्र)

अभिकर्तारः (एजेंट्स)—**पीरामल सन्स प्राइवेट लि०**

सेलिंग एजेंट्स—पीरामल एण्ड कं० प्राइवेट लि०
चन्द्रचोक, मूलजी जेठा मार्केट बम्बई २.
टेलीफोन नं० २६३५३

फोन—२६११६३ मिल्स—६२५४३ ग्रामस—'हिन्द' ग्राम

हिन्द मिल्स लिमिटेड

१५, दुगल रोड, बैलार्ड एस्टेट
बम्बई १

निर्मातारः—

कुञ्चुकवस्त्रं (शर्टिङ्गस), शय्यावस्त्र (शीटिंगस-लिपाई), लम्बवस्त्र (लांगक्लॉथ ड्रिलस, मुलस, क्रेप-मुजरी वस्त्राणां धौतानां, शाटिकानाम्, 'काकेट चिन्हितानां' तथा स्पेशल फाइबर सूत्राणां च।

हत्य संस्कृतसेवाक्षेत्रे ४५, ४६ वर्षेभ्यो महत्त्वपूर्णं कार्यं करोति । अग्रे च केन्द्रे संस्कृतविश्वविद्यालयस्य स्थापनम् अनुसंधान—प्रकाशनविभागयोः स्थापनम्, संस्कृतस्य शताब्दीतिहासग्रन्थस्य प्रकटनम्, संस्कृतभवनस्य निर्माणम्, एतदादीनि विशिष्टकार्याणि सम्मेलनमिदं कर्तुं प्रयतते, यत्रहि केन्द्रीयसर्वकारस्य परमसहयोगस्याऽपेक्षा ।

एतस्य समर्थनं कुर्वता पञ्चाम्बुराज्यपालश्रीनरहरिविष्णुगाडगिलमहाभागेन प्रोक्तम्—केन्द्रीयसर्वकारेण संस्कृत संवर्द्धनमिदं कर्त्तव्यमेव । मार्मिकशब्दैस्तेन सर्वेभ्योऽपि राज्यसर्वकारेभ्यः अनुरुद्धं यत् कार्यमिदं तेषां पवित्रं कर्तव्यं नूनम् ।

ततः सभापतिना स्वर्गंगतानां डा० भगवान्दास-नागेशोपाध्याय—शिक्षामन्त्रि मौ. श्रीअब्दुलकलाम आजाद—कविरत्न श्रीअखिलानन्द, श्रीदेवनायकाचार्य, पं० रामेश्वरप्रसादानां शोकप्रस्तावः प्रास्तूयत, यः स्वीकृतोऽभवत् । मध्याह्ने "भारतीयसंस्कृतपरिषदः," अधिवेशनं कलिकाताविश्वविद्यालयप्राध्यापकस्य श्रीपट्टाभिरामशास्त्रिमहोदयस्य अध्यक्षत्वे समपद्यत, यस्य हि उद्घाटनकर्त्ता राज्यपालश्रीगाडगिलमहोदयेन समर्थितं यद् "भारतस्य सविधे यदि कश्चिन्महामहत्वपूर्णो निधिरस्ति तदीयं संस्कृतिर्नाम । अत एव एतस्याः संरक्षणं प्रसारश्चास्माकं प्रथमं कर्तव्यम् ।" परिषदध्यक्षेण संस्कृतेः शास्त्रीयानि रहस्यानि महत्त्वपूर्णया पद्धत्या प्रकटीकृतानि ।

ततो रात्रौ अष्टवादनोत्तरं कविरत्नश्रीदेवव्रताचार्यस्याध्यक्षतायां 'कविसम्मेलनम्' समभूद् यस्योद्घाटनं दिल्लीनगरीय पं.श्रीप्रभुदत्तशास्त्रिणाऽक्रियत । यस्मिन्ननेकप्रान्तानां कविभिः भागो गृहीतः, एकवादनपर्यन्तं चेदमचलत् । २०जनवरीदिवसे 'संस्कृतशिक्षापरिषदः,' समभूदधिवेशनं, यत्र कार्यवशादनागतस्य "वाराणसीसंस्कृतविश्वविद्यालयस्योपकुलपतेः" श्रीआदित्यनाथझामहोदयस्याध्यक्षीयं भाषणमपठ्यत । परिषदि प्राचीनशैलीम्, एवं नवीनशैलीं चावलम्ब्य संस्कृतशिक्षाविषयः सुमहद् व्यचार्यत । अन्ते निश्चितमभूद् यत् संस्कृतशिक्षायाः प्रारम्भिकपरीक्षासु आवश्यकान्विषयान् समावेश्य, उच्चपरीक्षासु प्रौढपाण्डित्यस्य संरक्षणं ध्येयं भवेत् येन हि संस्कृतशिक्षा सुतरां व्यापिनी भवेत् । संस्कृतविद्वांसश्च वर्तमानकाले समस्तकार्यसंचालनचतुराः सिध्येयुः ।

ततः श्रीगिरिधरशर्मचतुर्वेदमहाभागस्याध्यक्षत्वे प्रधानमधिवेशनमभूद्, यत्र द्वाविंशतिः प्रस्तावाः पारिता अभूवन् । १. दिल्लीराजधान्यां संमेलनभवनस्य निर्माणम् । २. गतशताब्द्याः संस्कृतेतिहासप्रकाशनम् । ३. संस्कृतस्य अनुसंधानालय-पुस्तकालययोः स्थापनम् । ४. संस्कृतशिक्षासंबन्धिनीतेः निर्धारणाय याः समितयो भवेयुस्तासु संस्कृतसंमेलनस्य प्रतिनिधित्वम् । ५. कन्यासंस्कृतविद्यालयेषु संस्कृतस्याऽनिवार्यता भवेत् । ६. राजस्थाने स्वतन्त्रसंस्कृतविभागस्य स्थापनार्थं सर्वकाराय धन्यवादाः, एतदादयः ।

अन्ते संमेलनस्य स्वागतमन्त्री श्रीरघुवीरसिंहशक्तावतो धन्यवादान् प्रदाय सविनयं प्रार्थयत यत् चित्तौडस्याऽस्य सांस्कृतिकमहत्वं यद्यस्ति तर्हि तत्संरक्षणस्य दायित्वं श्रीमत्सु (सम्मेलनकार्यकर्तृषु) अस्ति, मन्ये तदिदं न विस्मर्येत श्रीमद्भिरित्यलम् ।

गर्दभ गर्वोक्तिः

ले.श्रीदीनानाथत्रिवेदी'मधुपः' जयपुरम्

स्वल्पांकुशप्रहरणव्यथया वृथैव,
भो भीमकाय किमु वारण ! बृंहसि त्वम् ?।
दीर्घातिपीनसुमहल्लगुडाहतोऽपि
किं शब्दमात्रमपि तात ! कदापि कुर्वे ?॥
एतेन दन्तयुगलेन मुखस्थितेन,
शक्तो ग्रहीतुमपि नो द्विरदाऽत्तुमेव ।
गृह्णामि यत् किमपि तन्न जहामि दन्तैः,
रवादाम्यपि, त्वमिव नो रदभारवाही ॥

वनं रे जीवनं गहनम्

(ले० पं० उमाकान्तशास्त्री)

वनं रे जीवनं गहनम् !
नित्यसंतमसे निलीनम् ।
नेत्र--निर्झर--नीर--लीनम्
सतत--संतत--ताप--तापित
लोक-कोलाहल-विलीनम् ।
वनं रे जीवनं गहनम् !
या सुखाशा, निर्गता सा
नाधुना शान्ता पिपासा
वर्त्म कण्टकितं च या
तरितुं बलं धीरपगता सा
गतं मे सर्वतोऽध्ययनम् !
वनं रे जीवनम् गहनम् !
यौवने सुखमेतुकामः
बाल्यकष्टमतीत्य वामः
ऊर्णनाभो निजरचित–
जाले निबद्धो ह्येष कामः
विधत्ते वञ्चने व्यसनम् !
वनं रे जीवनं गहनम् !

गोहत्यानिरोधसम्मेलनम्

देहलीराजधान्यां दिसम्बरमासस्य त्रयोदशतारिकायां 'अ. भा. गोहत्या–निरोध–सम्मेलनम्' अभूत यस्याध्यक्षः श्रीपाददामोदरसातवलेकरमहोदय आसीत्। उद्घाटनं द्वारकापीठाधीश्वरश्रीशङ्कराचार्यचरणैः कृतम।



अध्यक्षमहाभागेन वैदिकप्रमाणैः साधितं यद् गौः कदाचिदपि हननीया नाऽभूत्, न चास्ति। अतएव सा 'अघ्न्या'पदेन आर्यशास्त्रेषु व्यवहृता। माननीय गुरुजी श्रीगोलवालकरमहाभागेन प्रमाणितं यत "मांसभोजनमन्तराऽपि मानवोयं सुखं जीवति। ततः किमित्यधुना मांसमेव किम्, गोमांसमावश्यकं घोषयन्ति ? सर्वथा तदिदमनुचितमशोभनं च।"

हन्त ! आर्यसभ्यतायां मातृस्थानीया गौः सर्वकार्येषु प्रथममर्हणीया, सर्वसंपदामावासः। अद्य सेयं मांसार्थं हन्यते ? प्रबुध्यतां देशनेतृभिः भारतस्य शिक्षितमहाभागैश्च।

बालोपदेशमालायां

गुरुजनवन्दनम्

द्वितीयो मणिः

(ले० साहित्यमहोपाध्याय आशुकविः कविभूषणं श्रीहरिशास्त्री दाधीचः, जयपुरम्)

पूर्वानुवृत्तम्

यद्यपि पितृमातृप्रणाम एवात्र उपदिष्टः तथापि गुरोः प्रणामोऽपि समाहर्तव्यः। गुरुशब्देस्मिन् मातुः पितुश्चापि संगृहीतत्वात्। मातुः पितुः पूजनं प्रणामादि च गुरुपूजने प्रणामादिष्वेव गृह्यते। पित्रोः गुरुरूपत्वात्—तथाहि माता गुरुः प्राथमिकः पिता तदपरो गुरुः। विद्याप्रदस्तृतीयश्च त्रिधा हि गुरवः स्मृताः। इति शास्त्रकाराणां सम्मतम्। अनेन इदमायाति मातृपितृचरणवन्दनवत् गुरुचरणौ अपि वन्दनीयौ। यदि प्रत्यक्षो गुरुस्तत्र स्यात्, तदा तु सर्वप्रथमं तच्चरणयोः प्रणामः कार्यः। तदाशिषश्च संग्राह्याः। शास्त्रेषु सर्वत्र गुरोः प्रथमं पूज्यत्वात्। यदि न प्रत्यक्षता तस्य तदा मनसि शयनत उत्थानसमय एव प्रणामं ध्यानं च गुरोः कुरुत। तत उत्थाय मातुश्चरणयोरभिवादनं ततः पितुश्चरणयोरिति क्रमोऽनुसन्धेयः।

इदंसर्वमुद्दिश्यैवास्माभिः गुरुवन्दनं नाम शीर्षकं चास्य लेखस्य लिखितम्। तेन गुरुवन्दने मातृपितृगुरूणां वन्दनं ज्ञातव्यम्—

अनेन गुरुजनाभिवन्दनेन ये लाभास्तेपि प्रोक्तास्तेषां द्वित्रानेवात्र निर्दिशामः—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः
चत्वारि सम्प्रवर्धन्ते आयुः कीर्तिर्यशो बलम्।

इति प्रसिद्धा सूक्तिः स्मृतिकाराणाम्।

अभिवादनं कुर्वतां आयुः कीर्तिर्यशश्च बलं च वर्धते जीवतां गुणानुप्रशंसा च यशः मरणानन्तरं गुणोत्कर्षकथनं कीर्तिरिति कीर्तियशसोर्भेदोवधारणीयः। विद्यास्मृतिप्रतिभादिविवेकसाधन भूतानां गुणानां प्राप्तयेतु सोयं गुरुजनप्रणाम नामा। अनुभूतः प्रयोग एव ज्ञायताम्—अस्माभिर्नैके मन्दा श्छात्रा- बाला उपदिष्टा मातृपितृप्रणामाय, ते च तथा कुर्वन्तः परं प्रज्ञावन्तो विशिष्टा विवेकिनः शास्त्रिणः कर्मठाः याजका वृत्तिकरा वरणपाठानुजीविनोऽपि विप्राः क्षत्रिया

यद्यपि पिता और माता को ही प्रणाम यहाँ उपदिष्ट हुआ है, फिर भी गुरु का प्रणाम भी इससे ग्रहण करना चाहिये क्योंकि गुरुशब्द से ही माता पिता का संग्रह हुआ है। माता पिता का पूजन गुरु के पूजन प्रणामादि में ही संगृहीत होता है। माता और पिता गुरुस्वरूप हैं। जैसा शास्त्रकारों ने कहा है, देखिये—

माता गुरुः प्राथमिकः पिता तदपरो गुरुः।
विद्याप्रदस्तृतीयश्च त्रिधा हि गुरवः स्मृताः। इति।

इससे यह सिद्ध होता है मातृपितृचरणों की भांति गुरु के चरण भी वन्दनीय होते हैं। यदि गुरु प्रत्यक्ष हो तब तो सर्व प्रथम गुरु को प्रणाम करै क्योंकि सभी शास्त्रों में उसको प्रथम पूज्य कहा है। और यदि प्रत्यक्ष न हो तो मन में ही गुरु का स्मरण कर उन्हें प्रणाम करो, पीछे माता के चरणों में प्रणाम करो, पीछे पिता के चरणों में प्रणाम करो यह क्रम ध्यान में रखने का है।

इत्यादि बातें ध्यान में रख कर ही हमने इस लेख का शीर्षक गुरुवन्दन नाम से ही लिखा है। गुरुवन्दन से माता पिता और गुरु का वन्दन समझिये।

इस गुरुवन्दना से जो लाभ होते हैं वे बहुत शास्त्रकारों ने बताये हैं २–४ हम भी आपको बताते हैं—देखिए

अभिवादनशीलस्य नित्यं वृद्धोपसेविन।
चत्वारि सम्प्रवर्धन्ते आयुः कीर्तिर्यशो बलम् ॥१॥

जिसका गुरुजन वृद्धजनों को अभिवादन का स्वभाव पड़ जाता है और जो नित्य ही वृद्धसेवा करते हैं उनकी आयु कीर्ति बल और यश ये चार गुण बढ़ते हैं। ऐसा स्मृतिकार कहते हैं यह प्रसिद्ध है।

अभिवादन कहने वालों की आयुः कीर्ति यश और बल बढ़ता है। यहां जीवितों के गुणों की प्रशंसा यश और

वैश्या अन्येऽपि च संजाताः अद्यापि वर्तन्ते इति प्रत्यक्षानुभव एव मन्यताम्। सोऽयं योगः सफल एव सिद्ध एव इति निश्चयेन ब्रूमः। अस्मिन् विषये कथानकमप्येकं प्राचीनं शास्त्रसम्मतं सुविख्यातमिदं पठ्यतामवधार्यतां च—

महाभारते वनपर्वणि मार्कण्डेययुधिष्ठिरयोः संवादे तदेतत्कथानकं भवति। मार्कण्डेयो महर्षिर्वदति मिथिलापुर्यां धर्मव्याधनामक एकः मांसविक्रेता (खटिक) आसीत्, स हि मातुः पितुश्च परमो भक्तः महान् श्रद्धावान् विनीतश्च बभूव। सर्वप्रथमं सः प्रभातपूर्वम् उत्थाय नित्यकर्म शौचस्नानादि कृत्वा मातरं पितरं च सेवते स्म। पूर्वं तयोः पादाभिवन्दनं कुरुते स्म। आशिषश्च ताभ्यां प्राप्य परं प्रसन्नो भवति स्म। नित्यं नवा नवा आशिषो लभते स्म कदाचन दीर्घायुष्यार्थं कदाचन विवेकप्राप्तेः कदाचन तत्त्वज्ञानस्य कदापि च कालज्ञानस्य कदापि च भविष्यवेदनस्य कदापि च भूतार्थज्ञानस्य कदाचन अदृष्टज्ञानस्येति नित्यं विविधान् वरानिव स्वशुभाशिषः प्रातःकाले प्रबुद्धाभ्यां मातृपितृभ्यां प्रथमं भाषिताः सत्यार्थाः प्राप्नोतिस्म। आशीर्ग्रहणानन्तरमिष्टदेवतासमं तयोः सेवां पूजां च कृत्वा भोजनादि कारयित्वा स्वयं भुक्त्वा स्वकीयापणे गत्वा कुलक्रमागतां मांसविक्रयरूपां वृत्तिं करोतिस्म। एवं गच्छति काले तेषां सत्याशिषां प्रभावतः तस्य व्याधस्य विकसिता मतिः विस्तृतं च ज्ञानं समुज्जृंभितश्च विवेकः, उदंचिता स्मृतिः उद्भूता प्रतिभा प्रवर्धिता मेधा प्रकाशितमौदार्यं प्रथितं च सौजन्यं उदितं नैपुण्यं विदितंच वैदुष्यं बभूव तन्माहात्म्यं सर्वत्रः स हे व्याधो धर्मव्याधनाम्ना ख्यातिमाप। इयत्तस्य ज्ञानं प्रवृद्धं यदेकदा कोऽपि कौशिकनामा ब्राह्मणो निजतपोबलाद्गर्वमाप्नुवन् पथि गच्छन् कयापि बक्या विष्ठां मुञ्चन्त्या मस्तके मलिनीकृतः। उपरि उड्डीयमानां तां दृष्ट्वा तपोबलगर्वितः भस्मीभवेति शशाप। शापप्रभावात् तत्कालमेव सा बकी पथि भस्मीभूता पपात। ईदृक् तपोबलं स्वस्मिन्नवधार्य तु स ब्राह्मणः पूर्वतोऽप्यधिगर्वं समवाप्य तद्गर्वगन्धत उल्लासितः स स्वगृहं गच्छन् पथि बुभुक्षितत्वात् एकस्मिन् निकट प्राप्ते ग्रामे कस्यचिद्गृहस्थस्य गृहे एकां सतीं पत्नीं पत्युः सुप्तस्य पादसंवाहनं कुर्वन्तीं भिक्षायै प्रार्थयामास भिक्षां देहीति।

मरण के बाद गुण गायन कीर्ति कहलाती है यह यश और कीर्ति का भेद समझिये।

विद्या स्मृति प्रतिभादि विवेक के साधन रूप गुणों की प्राप्ति के लिए तो यह गुरुजनवन्दननाम का योग अनुभूत चमत्कारी समझिये।

हमने अनेक मन्दमति छात्रों को जो ठसबुद्धि थे। बालक थे उन्हें यह योग समझाया उपदिष्ट किया। वे माता पिता और गुरुजनो को नित्य सविधि प्रणाम करते हुए कुछ ही काल में बुद्धिमान कई तो विशिष्ट विवेक वाले कई शास्त्री अनेक कर्मठ और यजन याजन करने कराने वाले वृत्ति वाले भी तथा वरण पाठ अनुष्ठान करने वाले बन गये हैं। उनमें बहुत से ब्राह्मण हैं कुछ क्षत्रिय तथा कई वैश्य भी हैं। अभी ऐसे प्रमाण विद्यमान हैं। इसको प्रत्यक्ष अनुभव ही मानिए।

यह प्रयोग सिद्ध और सफल ही है, यह निश्चत ही हम कहते हैं।

इस विषय में यह एक प्राचीन शास्त्रसंगत प्रख्यात कथानक है इसे पढ़िये और विचार कीजिए।

महाभारत के वनपर्व में मार्कण्डेय और युधिष्ठिर का संवाद है—मार्कण्डेय महामुनि कहते हैं मिथिला पुरी में धर्मव्याध नाम का एक मांस का व्यापारी खटीक रहता था। वह माता और पिता का परम भक्त बड़ी श्रद्धावान् और विनयशील था। वह सर्व प्रथम प्रभात में उठ कर शौच स्नानादि नित्य कर्म कर माता पिता को प्रणाम करता और उनकी सेवा करता था। वह उनसे आशीर्वाद पाकर बहुत प्रसन्न होता। नित्य नये नये आशीर्वाद पाता कभी दीर्घायु का तो कभी विवेक प्राप्ति का तो कभी तत्वज्ञान के और कभी भविष्यकाल ज्ञान के कभी अदृष्ट और कभी भूतार्थसंवेदन के, इस क्रम से वह प्रातःकाल जगते ही माता पिता से वरो की तरह आशिषे पाता रहा।

नित्य ही वह उनकी सेवा इष्टदेव के समान समझ कर करता। उनकी पूजा कर भोजनादि करा पीछे स्वयं भोजन कर अपनी परंपरागत मांस की दुकान पर जीविकोपार्जन करने जाता।

सा पतिसेवापरायणा कथमपि तत्क्षणं प्रत्युश्चरणौ निद्राभंगभयान्नोत्सृष्टवती शनैः शनैर्दशपञ्चदश मिन्टानन्तरं भिक्षान्नं गृहीत्वा कौशिकब्राह्मणसंमुखमागता प्राह च गृहाण भगवन् भिक्षामिति । स तां विलम्बेनोपस्थिता तपोवलगर्वतः क्रोधदृष्ट्या प्रेक्षितवान् । अतिथिं मा न पश्यसि गृहस्थैरतिथिरेवं नोपेक्ष्यः, इत्येवं करणात् विनाशः प्राप्यते गृहस्थैरिति वदन्नेव तया पतिव्रतया प्रोक्तः—भोः भोः शृणु ज्ञातं सर्वं तवतपः, अहं सा बकी नास्मि यां तपोवलदृष्ट्या भस्मीकृतवान् पतिपदपरायणाहं यथावकाशं भिक्षान्नमादाय समुपस्थितास्मि नैध मयिदोष उपैतीति । क्रमशः



स्मृति-बल-पुष्टिवर्धकं रसायनम् ।
धूतपापेश्वर इण्डस्ट्रीज लि०

पनवेल मुंबई
पणिकः—श्री हाथी बन्धुः
(अ) जोहरी आपणः जयपुरम्
(आ) जालोरीद्वारम् जोधपुरम्

इस प्रकार कुछ काल बीतने पर वह उन आशियों के प्रभाव से उस व्याध की मति विकसित हुई प्रतिमा जगी। स्मृति अंकुरित हो उठी ज्ञान विस्तृत हुवा। विवेक बढा मेधा समृद्ध हुई उदारता प्रगट हुई भक्ति प्राप्त हुई दर्शन फैलने लगा सज्जनता विख्यात हुई वैदुष्य उदित हो गया और उसकी महिमा सब तरफ विदित होने लगी। वह व्याध धर्मव्याधनाम से प्रख्यात हो गया।

उसका ज्ञान इतना बढ गया था कि एक दिन कोई कौशिक नाम का ब्राह्मण अपने तपोबल पर गर्व करता हुवा रास्ते में चलता हुआ किसी बगुली के उडते हुए विष्ठा कर देने से शिरपर मलिन हुवा। अपने ऊपर उडती हुई उस बगुली को देख क्रुद्ध हो 'भस्म होजा' ऐसा शाप दिया।

शाप के प्रभाव से वह बगुली तत्काल भस्म हो गिर पड़ी। इस तपोबल को अपने में देख कर तो वह ब्राह्मण पहले से भी अधिक घमण्ड में छा गया। उस गर्वगन्ध से उभर पडा। वह अपने घर को आ रहा था कि मार्ग में भूख लगने से निकट ही एक ग्राम में किसी गृहस्थ के घर पहुँचा और एक सती पत्नी को जो अपने पति की चरण संवाहना में लगी थी भिक्षा देने के लिए आह्वान किया।

वह स्त्री पति सेवा में लगी किसी प्रकार पति के निद्राभंग हो जाने के भय से तत्काल भिक्षा न ला सकी। दश पंद्रह मिनट होने के बाद वह धीरे से पति को निद्रित देख उठी और भिक्षान्न लाकर कौशिक ब्राह्मण के संमुख आई और बोली लीजिये भगवान् भिक्षा लीजिये ! उस ब्राह्मण ने उसे विलम्ब से आई समझ तपोबल के गर्व के कारण क्रोध दृष्टि से देखा और कहा क्या मुझ अतिथि को नहीं देखती हो, गृहस्थों को इस प्रकार अतिथि की लापरवाही नहीं करनी चाहिए। ऐसा करने से गृहस्थी का बिगाड़ हो जाता है, ऐसा कहता ही था कि पतिव्रता ने कहा सुनिए सुनिए जान लिया आपका सारा तप, मैं वह बगुली नहीं हूँ जिसे तुमने तप से भस्म कर दिया। मैं पतिपरायणा हूँ अवसर पाकर भिक्षान्न लाकर उपस्थित हुई हूँ इसमें मेरा दोष नहीं है। क्रमशः

सूक्ति-सुधा

समुद्रावरणा भूमिः प्राकारावरणं गृहम् ।
नरेन्द्रावरणा देशाश्चरित्रावरणाः स्त्रियः ॥१॥

इस भूमि की रक्षा के लिये समुद्र का चारों तरफ आवरण (लपेटा) है। घर की भी रक्षा के लिये प्राकार (परकोटा) का आवरण दिया जाता है। देशों की रक्षा के लिए राजा ही आवरण (रक्षक) हैं। इसही तरह स्त्रियों की रक्षा के लिए उनका चरित्र ही आवरण है [चाहे जितनी शिक्षित और गुणी हों, किन्तु उनके चरित्र अच्छे न हों तो वो सुरक्षित और अच्छी नहीं समझी जातीं।] ॥१॥

अवंशपतितो राजा मूर्खपुत्रश्च पण्डितः ।
अधनेन धनं प्राप्तं तृणवन्मन्यते जगत् ॥२॥

नीचे वंश में पैदा हुआ यदि राजा हो जाय, जिसके पिता पितामह आदि मूर्ख हों, और वह पण्डित हो जाय, जिसने कभी धन नहीं पाया हो उसको धन मिल जाय, वह जगत् मात्र को तृण के समान समझता है। ऊपर कहे हुए तीनों को अत्यन्त अभिमान हो जाता है जिससे सब का तिरस्कार करने लगते हैं ॥२॥

पादपानां भयं वातात्पद्मानां शिशिराद्भयम् ।
पर्वतानां भयं वज्रात्साधूनां दुर्जनाद्भयम् ॥३॥

वृक्षों को हवा से डर है, (तेज हवा में वृक्ष टूट जाते हैं) कमलों को जाड़े से डर है वह कुमला जाते हैं। पहाड़ों को बिजली से डर है (बिज़ली पडने से यह टूट जाते हैं) सज्जन पुरुषों को दुर्जनों से भय है ॥३॥

यस्य क्षेत्रं नदीतीरे भार्या वापि परप्रिया ।
पुत्रस्य विनयो नास्ति मृत्युरेव न संशयः ॥४॥

जिसका घर नदी के किनारे पर है, जिसकी स्त्री दूसरों की प्यारी है, पुत्र यदि नम्र नहीं हो, कहना नहीं मानता हो तो, ऐसी दशा में मृत्यु ही समझिये। इसमें संदेह नहीं [ऐसी तीनों दशा में अनिष्ट होना स्वाभाविक है] ॥४॥

सुभिक्षं कृषके नित्यं नित्यं सुखमरोगिणि ।
भार्या भर्तुः प्रिया यस्य तस्य नित्योत्सवं गृहम् ॥५॥

जो कृषक है, स्वयं खेती करता है, उसके लिये सदा सुकाल है [अर्थात् अन्न सदा सोंघा रहेगा] जो सदा नीरोग है उसको सदा सुख है। जिस पति की भार्या (स्त्री) प्रिय है अर्थात् स्त्री पुरुषों में पूरा प्रेम, स्नेह है, उसके घर में नित्य, उत्सव, आनन्द होते हैं ॥५॥

असंभाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते ।
शिला तरति पानीयं गीतं गायति वानरः ॥६॥

अनहोनी बात अपने प्रत्यक्ष हो रही हो तो भी उसे न कहें (लोग उसको नहीं मानेगें) जैसे कि शिला पानी में तैर रही है। बन्दर गीत गा रहा है ॥६॥

प्रकाशक — जय बहादुरसिंह
पता: — गोपालजी का रास्ता, जयपुर (राजस्थान)
मुद्रक: — श्री शङ्कर आर्ट प्रिंटर्स, त्रिपोलिया बाजार, जयपुर

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

स्वामिविवेकानन्दप्रभृतीनां यो गुरुर्गरीयान् वै ।
श्रीरामकृष्णनामाऽर्पितधामा परमहंसः ॥

वर्षम् ६ पञ्चमोऽङ्कः वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्र


सर्वश्रेष्ठ
मालवा फैब्रिक
कोरा, धुलाहुवा लट्ठा, कोरी, रंगीन तथा
धुलीहुई जीन, शर्टिंग, चादरें,
कम्बलें व दरियें

दी इन्दोर मालवा युनाइटेड मिल्स लि.

पता: मिल प्रेमिसेस इन्दोर, (मध्य भारत)
फोन: जनरल ऑफिस - ६०६३
" सेल्स मैनेजर - ६००७
तार: मालवामिल

रजिस्टर्ड ऑफिस: सेकसरिया चेम्बर्स,
१३९, मेडोज स्ट्रीट, फोर्ट, बम्बई १
फोन: २५-२३१४-५-६
तार: इन्दोरमिल

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारै-स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	फाल्गुन-महोत्सवः	सम्पादकः	९९
२.	स्वराज्यम्	श्रीदा०सातवलेकर अध्यक्ष स्वाध्याय मंडल, पारडी	१००
३.	वेदानामपौरुषेयता	श्रीमल्लिनाथशर्मा चौमालः, चूरू	१०३
४.	नारीशरीरे नवग्रहाः	श्रीपत्नीप्रियः	१०३
५.	किमिदमेव जनतन्त्रम् ?	श्रीव्रजमोहन झा	१०४
६.	यवनसमाजः कुमार्याः मर्मस्पृशो विचाराः	श्रीवृद्धिचन्दशर्माशास्त्री, व्याकरण-धर्मशास्त्राचार्यः	१०५
७.	संस्कृतस्य लोकप्रियतोपायाः	गोस्वामी श्रीहरिकृष्णशास्त्री, जयपुरम्	१०६
८.	श्री डा० केशवबलिरामहेडगेवारमहाभागस्य संस्मरणानि	श्रीसातवलेकरः	१०७
९.	श्री राष्ट्रध्वजं वन्दे !	श्रीगणेशरामशर्मा झालावाड़ (राजस्थानम्)	१०८
१०.	सद्योमुक्तिः	श्रीविनोदी, झालावाड़ः	१०९
११.	विनोदवाटिका	सम्पादकः	११०
१२.	वसन्त-विलासः	श्रीशिवशरणझा, झांसी	१११
१३.	परमपूज्याः श्री डाक्टरकेशवरावहेडगेवाराः	श्रीसीतानाथ गोस्वामी, कलकत्ता	११३
१४	संस्कृत-समाचाराः	सहसम्पादकः	११४
१५.	जीवनस्य पृष्ठद्वयम्	श्रीमानसी	११५
१६.	सम्पादकीयम्	सम्पादकः	११६
१७.	लोभाविष्ट-चक्रधर-कथा	प्रबन्धसम्पादकः	११७
१८.	'भारती' पत्रिकायै सन्देशः	श्रीमध्यप्रदेशराज्यपालस्य	११८

सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुर

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् ९ फाल्गुनशुक्ला प्रतिपद्, स० २०१५ अङ्कः ५

फाल्गुन-महोत्सवः

[संस्कृतसाहित्ये विक्रमस्य प्रथमशताब्दीमारभ्याधुनिककालपर्यन्तं समुद्भूतैर्जनकविभिः कृतं मदनमहोत्सव-(होलिकामहोत्सव)स्य वर्णनम्]—सहसम्पादकः

रङ्ग-जल-क्रीडा :–

आदाय चूर्णमुष्टिं हर्षौत्सुक्येन वेपमानायाः ।
प्रियमवकिरामि पुर इति हस्ते गन्धोदकं जातम् ॥

(घेत्तूण चूण्णमुट्ठिं हरसूससिआइ वेपमाणाए ।
भिसिणोमित्ति पिअअमें हत्थे गन्धोदअं जाअम ॥)

ग्रामतरुण्यो हृदयं हरन्ति घनकुचभरा विदग्धानाम् ।
मदने कुसुम्भरञ्जितकञ्चुलिकामात्रमण्डनाः सपदि ॥

(गामतरुणीओ हिअअं हरन्ति छेआणँ थणहरिल्लीओ।
मदने कुसुम्भरञ्जिअकञ्चुइआहरणमेत्ताओ ॥)

विलास :–

दयितकरग्रहलुलितो धम्मिल्लः सीधुगन्धितं वदनम् ।
एतावदेव मदने प्रसाधनं हरति तरुणीनाम् ॥

(दयिअकरग्गहलुलिओ धम्मिल्लो सीहुगन्धिअं वअणम
मअणम्मि एत्तिअं विअ पसाहणं हरइ तरुणीणाम् ॥)

फाल्गुनमहनिर्दोषं दत्तं केनापि पङ्कमण्डनकम् ।
स्तनकलशाननविलुठत्स्वेदविधौतं हि किमिति धावयसि?

(फागुच्छणणिद्दोसं केण वि कद्दमपसाहणं दिण्णम् ।
थणअलसमुहपलोट्टन्तसेअधोअं किणो धुअसि ।)

गाथासप्तशतीकारस्य श्रीसातवाहनस्य (समयः—प्रथमशताब्दी वि०)
संस्कृतगाथासप्तशतीकारस्य मथुरानाथशास्त्रिणश्च

स्वराज्यम्

(ले० श्रीदा० सातवळेकर अध्यक्ष स्वाध्याय मंडल, पारड़ी)

—पूर्वानुवृत्तम्

शरीरमेव नाम राष्ट्रम् । शरीरवर्णनं राष्ट्रवर्णनपरकं भवति अस्मान् कथंकारं राष्ट्रश्रेयो भवति तदपि अस्माभिः अधिगतमस्ति । अथ वेदेषु शरीरस्य अभ्यधिकं वर्णनं कथं कृतं तद् दृश्यताम्—

"सप्तर्षीणाम् आश्रमः"

वेदेषु शरीरं तावत् सप्तर्षीणाम् आश्रमेण उपमितम् ।
एतद् औपम्यं कथं बोधकमस्ति तद् अवलोक्यताम् ॥

सप्त ऋषयः प्रतिहिताः शरीरे
सप्त रक्षंति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुः
तत्र जाग्रतो अस्वप्नजौ सत्रसदौ च देवौ ॥

वा० य० ३४-३५

"प्रतिशरीराश्रमं सप्त ऋषयः तिष्ठंति । अप्रमत्ताः ते यज्ञियं स्थानं त्रायंते । अत्र सप्त स्रोतांसि स्वपतः लोकं प्रतिगच्छंति । अस्मिन् यज्ञिये स्थाने देवद्वयी किञ्चिदपि अविश्रम्य जागर्ति ।" एवं एतद् शरीरं वर्णितमस्ति । इतः पूर्वं तदेव राष्ट्र-रथ-व्यपदेशेन वर्णितम् । अत्र च वेदाः शरीरं आर्षाश्रमव्याजेन वर्णयन्ति । राष्ट्रौपम्यपुरःसरवर्णननिमित्तक एव अस्माकं राष्ट्रसुरक्षार्थः उपदेशः, रथाश्वादिवर्णनं च अक्षगणस्य नियमविनयौ ज्ञापयति । अथ आर्षस्य आश्रमस्य वर्णनेन वयं पावित्र्यं ज्ञाननिष्ठा च उपदिष्टाः ।

अमुं शरीराश्रमम् अधिवसन्तः सप्त ऋषयः तपः तप्यन्ते । अत्र एते ऋषयः स्वम् स्वम् उटजम् अधितिष्ठंति । ज्ञानसत्राणि च प्रारभंते । प्रतिशरीरम् इमे सप्तर्षयः अवस्थिताः प्रतिमानुषशरीराश्रमम् एते अधिवसंति । एवं पशुपक्षिशरीरवर्तिनोऽपि एते तिष्ठंति । परं मानुषशरीरवर्तिनः एते यथा प्रगल्भाः क्षमाः च न तथा पशुशरीरभाजः । किंतु तत्रापि एते संति एव । सप्तर्षीणामावासः प्रतिशरीरं वर्तते ।

नेत्रे कर्णौ नासिकारंध्रे जिह्वा इति सप्तर्षयः प्रतिशरीरं विद्यंते । ऋषयः क्रान्तदर्शिनः भवंति । ते दिव्यबलोपेता दूरात्पश्यंति । नेत्रे दूरात्पश्यतः, कर्णौ अपि दूरात् शृण्वन्तौ स्तः । नासिका विप्रकृष्टा अपि गन्धं जिघ्राति । दूरादपि श्रूयमाणं शब्दं जिह्वा करोति । इत्थम् एते ऋषयो दूरं द्रष्टारः ये विप्रकर्षेणापि ज्ञानं गृह्णन्ति वितरन्ति च । ज्ञानं प्रसारयद्भिः एतैः नूनं ज्ञानयज्ञः एव प्रस्तुतः । अवसानाद् अकार्यमपि ज्ञानविषयमेव कुर्वाणाः सन्ति । अतएव एते ऋषिव्यपदेशभाजः । ऋषयस्तु आश्रमपदवासिनः । तस्मात् एतत् शरीरमपि आर्षाश्रमशब्देन संज्ञितमस्ति ।

पिष्टातकम् (गुलाल) :—

कार्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरैर्-
हेमालंकारभाभिर्भरनमितशिरःशेखरैः कैङ्किरातैः ।
एषा वेषाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोशा
कौशाम्बी शातकुम्भद्रवखचितजनेवैकपीता विभाति

("रत्नावली"कारस्य श्रीहर्षस्य, समयः सप्तमशताब्दी)

भ्राम्यन्ती सुपिष्टातकपूरघनघोरघटा
सेयं निष्कुटान्तर्वत सर्वतस्तिरोदधाति ।
भृशमनुरागरसरागभृता मण्डलीयं
राजद्व्रजनागरीणां क्रीडन्ती मुदं ददाति
मञ्जुनाथ निपुणतमोऽपि वामलोचनानां
कामसन्तराले धृतो दयितो वशं प्रयाति ।
अङ्गनाभिरद्य रङ्गनालिकाभिराकुलितो
नूनमङ्गनान्तमौनमास्थितोऽयमाविभाति ॥

("जयपुरवैभव" कारस्य मथुरानाथशास्त्रिणः)
समयो विंशी शताब्दी

ऋषयः पावनाः निरवद्याचाराश्च । अतः अस्मदीयैः इन्द्रियैः विविक्तैः निरवद्यवृत्तैश्च भाव्यम् ।

एते सप्त ऋषयः न जातुचित् स्वाचारेभ्यः प्रमाद्यन्ति । अमुं च यज्ञियं मण्डपं सुष्ठु रक्षंति । एवं मनुष्येण दत्तचित्तेन शरीरं रक्ष्यम्, राजपुरुषैश्च स्वराष्ट्रम् । दूरात् पश्यती नेत्रे सूचयतः यत् सज्जो भव, शत्रवः अभिपतंति । शब्दादेव हिताहितौ अभिजानन्तौ कर्णौ सूचयतः "संनह्यस्व तावत् रिपुः अनया दिशा आस्कंदति । गन्धं जिघ्रंती तेन प्रतीपकं अवगच्छंती नासिका इतः अभिधावन्तम् अहितं पिशुनयति । एवम् एते ऋषयः शत्रून् अभिजानन्तः आरक्षकेभ्यः निवेदयंति यद् अपवाहय एनं रिपुम् ।

एवमपि राष्ट्रे वर्तितव्यम् राष्ट्रं च रक्षितव्यम् । दूरदेशेषु यत्किंचित् वर्तमानं विज्ञाय शत्रूणां गूढस्थानानि अन्विष्य तेषां विनाशः कार्यः । वर्णरूपशब्दगतादिवशात् दूरस्थिताहितानां परिज्ञानम् उत्सारणं च विधीयते । ऋषीणाम् आश्रमं राक्षसाः आस्कंदंति, क्रतुं च नाशयंति । तान् बलवत् प्रतिषेधन्तः ऋषयः आश्रमम् अवंति । इयं दृष्टिः शरीरे अपि प्रसरतु । आर्षाश्रमान् नाशयामासुः दानवाः, अथ राष्ट्रमपि अभिपातुका राक्षसा एव शरीराश्रमं शरीरराष्ट्रं वा रोगादयः बाह्यशत्रवः, असत्संकल्पादयः अन्तःशत्रवः प्रसह्य अभिभुंजंति, एतं शतवार्षिकं यज्ञं च विलुम्पंति । पाठकैरत्र एतत् शत्रुशातनमेव विचारणीयम् । आस्माकेन शरीरराष्ट्रेन यथा उत्तमेन भाव्यं तथैव अस्मदीयेन महता राष्ट्रेण समुज्ज्वलदवस्थेन भवितव्यम् ।

"आश्रमसरित्सप्तकम्"

"सप्त आपः स्वपतः लोकम् ईयुः" सप्त स्रोतांसि स्वपतः लोकं प्रतिगच्छंति अत्र स्वपदन्तःकरणसहवर्ती आत्मा दृश्यते । स तु मनसः परः । एतानि सप्त स्रोतांसि नाम त्वक्चक्षुःकर्णनासिकाजिह्वानां स्पर्शदर्शनश्रवणगन्धग्रहणरसनप्रवाहाः जाग्रदवस्थायां बहिः सरंति । इन्द्रियाणि बहिर्दर्शनानि संति । तेषां कर्मप्रवाहाः अन्तः प्रदेशात् बहिः प्रसरंति । परं यदा सुषुप्तिस्थानप्राप्तिर्नाम निद्रा प्राप्नोति तदा एतान्येव स्रोतांसि अन्तर्मुखानि संपद्यंते ।

एतेषाम् इंद्रियस्रोतसां बाह्यजगदाभिमुख्यमेव जाग्रदवस्था इति मन्यते । एतेषां [illegible] भिमुखता तल्लीनता वा सुषुप्त्यपरपर्याया भवति । अस्मादेव कारणात् एतदुक्तं यत् सप्तर्षीणाम् आश्रमीयाणि स्रोतांसि जाग्रदवस्थायां बहिर्मुखानि सुषुप्तौ च प्रतिनिवृत्य आत्मनि विलीयन्ते ।

जागरूका वीराः

अस्मिन्समये आर्षस्य आश्रमस्य (द्वौ) देवौ नियतम् उन्निद्रौ नित्योद्यतौ सन्तौ जागृतः । आश्रमसंरक्षणार्थम् एतौ सततयत्नशीलौ स्तः । एतौ श्वासोच्छ्वासापरपर्यायौ । एतद्रक्षणार्थम् एतौ देवौ अविरतं यतेते । एतौ हि अवैतनिकौ स्वयंसेवकौ ।

शरीरस्य एतद् वर्णनं बह्वर्थं रमणीयं च । यदि इदं शरीरं वास्तवः यथार्थो वा ऋष्याश्रमः संपत्स्यते तर्हि अतीव शोभनं भविष्यति । ऋषीणां ज्ञाननिष्ठा तु प्रथितचरैव । एतदन्तरेण आचारशुचिता धार्मिकता ब्राह्मीलिप्सादीन् सद्गुणानपि ऋषिशब्दः ज्ञापयति ।

ज्ञानात् सत्कर्मप्रवृत्तिः जायते सत्कर्मभ्यश्च ऐहिकामुष्मिकसुखलाभः असंशयं भवति । परिणामतः दीर्घं जीवनम् उत्साहयुता च वृत्तिः सम्भविनी । शरीरस्य तावत् ऋष्याश्रमव्यपदेशात् इदम् अनुमितं भवति यत् मनोबुद्ध्यादीनां शुद्धिरक्षणं अत्रत्यस्य अध्यक्षस्य कर्तव्यम् इति । अस्माभिरपि एवमेव वर्तितव्यम् । शरीरराष्ट्रयोः सुरक्षा सावधानं सम्पाद्या । काचिदपि त्रुटिस्तत्र पदं मा दध्यात् । अनिद्रितयोः, अविश्रान्तयोः अविरतयामिकयोः एतयोः स्वयंसेवकयोः राष्ट्रस्य सुरक्षाकार्यभरः आपतति । अस्मादेव व्यक्तिराष्ट्ररक्षणविषयि ज्ञानम् आपातसिद्धम् । यथा व्यक्तिगतं पावित्र्यं रक्षणीयं तथैव राष्ट्रिया शुचितापि रक्षणीया ।

दिव्यं संस्थानम्

शरीरस्य राष्ट्राश्रमत्वे विना दिव्यसंस्थानत्वमपि भवति ।

एतद्विषये ऐतरेयोपनिषदि उक्तम्—

अग्निः वाग् भूत्वा मुखं प्राविशत्,
वायुः, प्राणो भूत्वा नासिके प्राविशत्,
आदित्यश्चक्षुः भूत्वाऽक्षिणी प्राविशत्,
दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्,

ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन्
चन्द्रमा मनो भूत्वा हृदयं प्राविशत्
मृत्युः अपानो भूत्वा नाभिं प्राविशत्
आपो रेतो भूत्वा शिश्नं प्राविशन् ॥४॥

रो० उ० १/२

अनया रीत्या सर्वासां देवतानां शरीरप्रवेशः स्थितः। त्रयस्त्रिंशद्देवतानाम् अवस्थितिः अस्मिन् शरीरे भवति। एवम् एतद् शरीरं देवमन्दिरं व्यपदिश्यते। इतः पूर्वं तदेव शरीरं राष्ट्रर्थष्याश्रमनामभिः निर्दिष्टम् अस्ति, अत्र च तद् शरीरं देवमन्दिरम् इति अभिधीयते। नैतत् केवलं देवस्य मन्दिरम् अपि तु त्रयस्त्रिंशद्देवानां मन्दिरं वर्तते। अतः आथर्वणे एतद् "देवानां पूः" इति व्यपदिष्टम्।

अष्टाचक्रा नवद्वारा देवानां पूः अयोध्या।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः॥

अथर्व १०।२।३१

अष्टचक्रा नवद्वारा इयं देवनगरी अरीणां दुर्जया अपरिभाव्या च। अस्यां हिरण्यमयः कोषो विद्यते यः तेजसा आवृतः नाम आच्छादितः तिष्ठति।" इत्थमियं शरीरनगरी वर्णितास्ति। रामचन्द्रेण अनुशिष्यमाणा इयं नगरी यथातथम् अयोध्या। यथार्थं रामराज्यं नाम शरीरस्य स्वराज्यम्। एतत्संरक्षणार्थः चतुर्दिक् महान् प्राकारः। यथासमयं शत्रुशातनानि उल्हाटादीनि यंत्राणि धारयंति अष्ट चक्राणि अस्मिन् महाप्राकारवति विशालदुर्गे संति। इयम् अयोध्या सती शत्रुभिः दुर्जया दुरभिपाता वा। दुर्गप्राकारवती इयं नगरी एतावती दुरधिगमा यत् कोऽपि महाबलो रिपुः तां पराजित्य आत्मसात् कर्तुं न प्रभवति। इयं तथा संरक्षिता वर्तते यथा खलु दुष्प्रवेशा संवृत्ता। इयं सर्वतः तेजोमयी। तमोऽत्र गंधमात्रमपि नास्ति। अस्यां धनरत्नपूर्णः हिरण्मयः कोषः अस्ति। देवताः स्वयमत्र आगत्य निवसन्ति। उपरितननिर्देशानुसारेण सूर्यादिदेवानाम् अत्रागमनादिदं प्रतीयते यत् तदंशा एव प्रतिप्रान्तं प्रतिविभागं वा आधिपत्यभाजः इति एते देवा अत्र केन पथा प्रविष्टाः तस्य पथः ज्ञापकं चित्रम अधस्तात् निरूपितम। यद् ब्रह्माण्डे तदेव अंशतः पिण्डे तिष्ठति।

—क्रमशः

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे०] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—
मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—
२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—
'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रिस्टल ★ फेन सूगर

वेदानामपौरुषेयता

(ले० श्रीमल्लिनाथशर्मा चौमालः, चूरू)

एतत्प्रमाणं जगन्मान्यं वर्तते विश्वस्य समस्तसाहित्यात् वैदिकसाहित्यं प्राचीनम् । एतत् पश्चिमीयविद्वांसोऽपि मन्यन्ते तथा कथयन्ति च यदि कस्यापि सृष्टिविकासस्य आश्चर्यजनकः अनुभवः करणीयः स्यात्तर्हि वेदानुशीलनम् परित्यज्य अन्यत् किमपि साधनं नास्ति भारतीयविद्वांसः वेदानामपौरुषेयत्वं मत्वा तेषां समयस्यान्वेषणं न कुर्वन्ति, तथा पाश्चात्यविदुषां अस्मिन् विषये उपयुक्तसाधनानामभावात् ते तत्र किमपि कर्तुं शक्ता न बभूवुः । तैः मिथ्यैवानुमानं प्रसारितम् ।

अथात्र बहुभिर्विद्वद्भिः भाषायाः पौरुषयत्वेन प्रमाणेन वेदानां समयो निश्चितः । भाषां दृष्ट्वा एतत् प्रमाणं अकाट्यम् अस्ति यत् भाषाया प्राचीनार्वाचीनत्वमेव सर्वतः श्रेष्ठतरं प्रमाणम् ।

अथात्राथर्ववेदस्य रचनाकालो वा तस्यां पौरुषेयता च निश्चीयते । अथर्ववेदेपि कृत्तिकानक्षत्रादेव नक्षत्रगणना कृता यथा ।

"सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः समार्द्रा ।
पुनर्वसुः सूनृता चारुपुष्यो भानुराश्लेषा अयनं मघा मे ॥"

अथर्ववेद १६।१।७।२

पूर्वोक्तमन्त्रे नक्षत्राणां गणना कृत्तिकात एवारम्य भरणीनक्षत्रोपरि समाप्तिः कृता अतोज्ञायते अथर्ववेदस्य निर्माण कालेपि नक्षत्रगणना कृत्तिकात एव भवति स्मेति ।

यदि अथर्ववेदस्य समये कृत्तिकात एव भवतिस्म तर्हि तस्मिन् समये वसतसम्पातोपि कृत्तिकानक्षत्र एवासीदित्यनुमीयते । अथववेदसमये वसंतसम्पातो यदि कृत्तिकानक्षत्रे आसीत् तथा अथर्ववेदस्य भाषा ब्राह्मणग्रन्थानां भाषातः प्राचीना तर्हि स्वल्पादपि स्वल्पं ब्राह्मणग्रन्थेभ्यः षड्विंशति सहस्रवर्षपूर्वं अथर्ववेदस्य रचनासीदिति प्रतीयते । यदि एकस्मिन् चक्रे पूर्वमथर्ववेदस्य रचना जाताः तर्हि अथर्ववेदो ब्राह्मणग्रन्थेभ्यः षड्विंशतिसहस्रवर्ष पूर्वं निर्मित आसीदिति तथा पूर्वं ब्राह्मणग्रन्थानां रचनाकालः एकत्रिंशत्सहस्रवर्षात्मकः सिद्धान्तितः । एवं यदि ब्राह्मणग्रन्थानां ३१००० वर्षात्मके अस्मिन् काले २६०००योज्यन्ते तर्हि अथर्ववेदस्य रचनाकालः ५७००० सहस्रवर्षात्मकः प्राचीनः सिद्धयति । एष काल एकस्मिन् चक्रे निर्मिते आयाति यदि कस्मिंश्चित् अन्यस्मिन् चक्रे निर्माण जातं तर्हि अथर्ववेदस्यायं काल अनंतताम् धारयति । कालस्यानन्ततैव अपौरुषेयता भवति अतः अथर्ववेदो अपौरुषेयः ।

नारीशरीरे नवग्रहाः

(ले० श्रीपत्नीप्रियः)

कोपे भानुः 'स्फुरति' सुतनोः शीतरश्मिः स्मितास्ये
प्रेमोद्रेके धरणितनयः, स्विङ्गिते त्विन्दुसूनुः ।
जीवो यस्या ललितवलिते, श्रोणिदेशोऽसुरेज्यो
माने मन्दश्चिकुरनिकरे राहुराभोगकेतुः ॥१॥

सेयं रम्या ग्रहगणमयी कामिनी कापि कान्तं
कञ्चित्कालं कलयति कलाकेलिकल्लोललोलम्
कोपाविष्टा सुकृतसरणी सैव सौभाग्यसीमा
भीमाक्षी वा भवति भुवनं भक्षितुं भद्रकाली ॥२॥

गेहस्थिता सृजति सर्वसुखानि पुंसां
सौख्यञ्च नन्दनभवं प्रणयावलोकैः
वंशाभिवर्द्धनकलाकुशला दयार्द्रा,
नारी नवग्रहमयी भविकाय भूयात् ॥३॥

किमतदेव जनतन्त्रम् ?

—ले० श्रीव्रजमोहन झा

शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥

राज्यं राज्ञामपि विलयमाप, वैदेशिकशासनमस्तमद्य ।
सत्यं बिभर्ति जनतैव सर्वमामूलचूलमधिकारमद्य ॥
किं तेन ? दीनजनजीवनन्तु तदवस्थमेव जर्जरितमस्ति ।
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥१॥

किन्नाद्य युवानो जीवितार्थमपराधिजीवनं यापयन्ति ।
जठराग्निशान्तये युवतयोऽपि किम्वा न शीलमभिपातयन्ति ॥
व्ययबहुलसाध्यांशक्तामुपेक्ष्य शिशुजीवनं न किमु रुद्धमस्ति ।
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥२॥

नाद्यापि भेषजाभावमेत्य किमकाल एव जनता परैति ?
किम्वा गृहवैकल्यं विभाव्य न च विस्थापितजीवनमुपैति ॥
गौराङ्गकुटिलशासनमपेक्ष्य सम्प्रत्यपि किं वैशिष्ट्यमस्ति।
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥३॥

नवनवा योजना उल्लसन्तु, नगराणि चमत्कुर्वन्तु नाम ।
अन्ताराष्ट्रियविख्यातिरस्तु नेतारो वा जल्पन्तु नाम ॥
किन्तेन समस्या भोजनस्य वा वसनस्यैव समाहितास्ति ?
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥४॥

कथयानि कियन्नेतार एव यत्रवमनृतपथमाश्रयन्ति ।
शरटा इव सत्तामाश्रयितुं रङ्गं विविधं परिवर्तयन्ति ॥
कः कथयतु कं कथयतु विशिष्य किमिदं कस्याप्यज्ञातमस्ति ।
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥५॥

धनिका धनानि सम्वर्धयन्तु दीना अतिदैन्यमुपाश्रयन्तु ।
वाचाला नेतारो भवन्तु मन्त्रित्वं केऽपि विडम्बयन्तु ॥
अर्थो जनतन्त्रस्यायमेव सत्ताश्रयिभिर्न किमाश्रितोऽस्ति ?
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥६॥

विक्रीय राष्ट्रपितुरुच्चनाम, कियदवधि चलेदन्यायकर्म ?
सर्वावदातमभितो बभूव शुभपञ्चशीलसिद्धान्तमर्म ॥
चेतन्तु तिर्यगुष्णीषिकाश्च नो चेत्क्रान्तिः सम्भाविताऽस्ति ।
शतकृत्वो मे प्रणतिश्चकास्तु यद्ये तदेव जनतन्त्रमस्ति ॥७॥

यवनसम्राजः कुमार्याः मर्मस्पृशो विचाराः

(ले० श्रीवृद्धिचन्द्रशर्माशास्त्री, व्याकरण-धर्मशास्त्राचार्यः)

आसीद् भारतवर्षस्य महावैभवशाली विलासप्रतिमूर्तिः सम्राट् शाहजहां नाम । महामहिम्नस्तस्य रमेवाद्भुतसुन्दरी 'जहांनारे' ति नाम सुता बभूव । सा बाल्यात् प्रभृत्येव सुविलक्षणा विचारचतुरा चासीत् । एकदा तया स्वकीया सुशीला दासी समाज्ञप्ता मुखावलोकनाय दर्पणमानेतुम् । हा हन्त ! तदाज्ञया त्वरया दर्पणमानयन्त्यास्तस्या वराक्या हस्तादकस्मान् निपतितः स भूमौ विशीर्णतां चागमत् । आसीत् स चीनदेशीयो बहुमूल्यो मुकुरः । तस्य प्रणाशाद् भीतभीता दासी राजकुमार्याः संमुखमागत्य दैन्यभावेन स्वापराधं सूचयन्ती शनैरिदमवोचत् स्वीयया पारस्या भाषया—

"अज़ कज़ा आइनेरा-चीनी शिकस्त"—'हन्त, दौर्भाग्यात् चीनदेशीयोऽयं दर्पणो मद्धस्ताद् विस्खलितस्त्रुटितश्चेति' । तस्याश्चेतसि कृतमासीत् साध्वसेन पदम् । न जाने कीदृशः कठोरो दण्डः शिरसि मे समापतितो भवेदपराधस्यास्य कृते-इति । किन्तु भयाद् वेपमानामाश्वासयन्ती तामुवाच मन्दस्मितं 'जहाँनारा'—"खूब शुद असबाबे खुदबीनी शिकस्त" अहा, कीदृशं मनोहरं विद्वत्तापूर्णञ्चेदमुत्तरम् । ब्रवीति सा—'खूब शुद' समुचितमेव संजातं यद् 'असबाबे खुदबीनी शिकस्त' स्वसौन्दर्यदर्शकत्वेन अहंकारसाधकोयमादर्शस्त्रुटित इति । परिपक्वा दार्शनिका विचाराः । प्रौढा कवि-सरणिः, पश्यन्तु भवन्तः खुदबीनी-शब्दे वर्तते कीदृशश्चमत्कारपूर्णः श्लेषः । स्वात्मदर्शनमित्येकोर्थः । अहङ्कार इत्यपरः । तेन आपाततः स्वात्ममुखदर्शकोयं दर्पणस्त्रुटितः त्रुट्यतां नाम । उचितमेव संजातमिति प्रतीयतेऽर्थः किन्तु अहंकारसाधनहेतोरस्य नाशः सर्वथोचित एवेति चेतसि चतुराणां चमत्कृतिमाधत्ते नितराम् ।

दर्पणोऽयमहंकाराभिवर्द्धनस्यैकं प्रमुखं साधनं नु ! अहंकारसाधनस्य भ्रंशाद् हर्षप्रकाशनं नाम आत्मदिदृक्षोदयः । यावन्ति खल्वहंकारसाधनानि वस्तूनि तेषां प्रणाश एव वास्तविकमात्मदर्शनं यद्धि मानवजीवनस्य प्रधानं लक्ष्यम् । अहन्ता-ममतानाश एव सच्चिदानन्दप्राप्तिरिति भारतीयदर्शनशास्त्राणां समुद्घोषः । अत्रैकमाभाणकं सुप्रसिद्धं स्मर्यते पाठकमनोविनोदाय प्रस्तूयते च—

आसीद् गुर्जरप्रान्ते धनाढ्य एकः श्रेष्ठी । प्रौढे वयसि शान्ता तस्य जननी । देशाचागत् श्वेतमुष्णीषं शिरसि धृत्वा उदासीनः स बहिः प्राङ्गणे समुपविष्टोऽपराह्णे । एकः साधुर्विचरन् तत्र संप्राप्तः । तेन तादृशं तं वणिक्पुत्रमवलोक्य पृष्टः सः । भोः कथमुदासीनेन भवता स्थीयते ? किं नाम कष्टमापतितम् । कथं त्वया धारितं श्वेतोष्णीषमेतदिति । समुत्तरितं श्रेष्ठिना—भ्रातः । स्वः प्रयाता मे माता तेनैवमुदासे किन्तु त्वमपि मादृश एव दरीदृश्यसे। कोत्र हेतुरिति । झटिति तेनोत्तरितम्—आयुष्मन् ! त्वदीया मृता माता किन्तु मदीया खलु विलयं गता ममता । तेनाहमीदृशः । समानावावाम् । तात्पर्यम्-अहंताममतानाशे जगन्नाशः । सौन्दर्यदिदृक्षा ह्युपभोगसाधनम् । "न जातु कामः कामानामुपभोगेन शाम्यति ।" यावन्न कामशान्तिस्तावन्न न मनस आत्मदर्शने प्रवृत्तिरिति सकलं मनसि निधायैव प्रोक्तं तया--'खूब शुद असबाबे खुदबीनी शिकस्त' इति सहृदयानां चेतसि चमत्काराधायकमेवेत्यलम् ।

संस्कृतस्य लोकप्रियतोपायाः

(ले० गोस्वामी श्रीहरिकृष्णशास्त्री, जयपुरम्)

सर्वकाराय प्रार्थनाः–

"क"–प्रथमोपायस्तु भारतसर्वकारस्य सर्वतोभावेन सहयोगावलम्बितः। यदि सर्वकारः सद्य एवाद्य यत्र कुत्रापि विद्यालय–महाविद्यालयेषु सन्नियुक्तानां संस्कृताध्यापकानां वेतनादिकं तत्रतत्रैवनियुक्तानां अन्यविषयाध्यापकानां समानमेव कुर्यात् तेभ्यश्च विलम्बं समानमेव वेतनं दद्यात्—येन सद्य एव लोकः संस्कृतस्य पठने पाठने च प्रवर्तितः स्यात्।

"ख"—यदि संस्कृतच्छात्राणां कृतेऽपि अन्यविषयाध्येतृणां समानं, मानं, पारितोषिकप्रदानं. छात्रवृत्तिविधानं, अनुसन्धानादिकर्मसु–प्रणिधानं, अन्वेषणा (रिसर्च) दिकार्यार्थञ्च विशेषवृत्तिं दत्वा-नियोजनम्, अन्यसर्वविधासु शिक्षणोपशिक्षणप्रशिक्षणक्रियासु-प्रशासनिकाद् विशेषप्रकारकादनु शिक्षण (ट्रेनिङ्ग) परीक्षासुच सन्निवेशादिव्यवस्था भवेत्। यथा (" आर. ए. एस." या "आई ए. एस." आदिषु सन्निवेशप्रवेशानुमतिर्वा दीयते)।

"ग"–यदि च प्रतिवर्षं सर्वत्र भारते नवनवान्यविद्यालयस्थापनेन सममेव (यावत्संख्याकाः अन्यनवीना विद्यालयाः स्थापिता भवन्ति तावन्त एव ततोऽल्पसंख्याका वाऽपि संस्कृतविद्यालयाः समुद्घाटिता भवेयुः। तत्रत्यानां संस्कृतछात्राणां कृतेऽपि सर्वविषयिष्यः सुविधाः दीयेरन्। छात्रवृत्तिदानाद्यारभ्य राजसेवायां (सर्विसकर्मणि) प्रवेशाऽनुमतिः सर्वविधराजसेवायां संस्कृतज्ञानां निर्वाचनं च यदि विशेष रूपेणभवेत्।

"घ" यदि च वस्तुतः सद्य एव व्यवहारे संस्कृतज्ञाः शास्त्रिणः आचार्या वा "बी. ए." "एम. ए." समानमानाः सेवायां वेतनादिदानेऽपि भवेयुः। एवमेव-प्रथमा (प्रवेशिका) उपाध्याय (मध्यमा) परीक्षोत्तीर्णा अपि मैट्रिक–इन्टरपरीक्षोत्तीर्णजनसमानाः व्यवहृता वा स्युः। सद्यः एव संस्कृतस्योन्नतिः निर्निरोधा भवेत्।

"ङ"–यदि च संस्कृतपरीक्षाः प्रथमा (प्रवेशिका) मध्यमा (उपाध्याय) शास्त्री, आचार्य-परीक्षाः क्रमेण मैट्रिक इन्टर बी. ए. एम. ए. समानाः सर्वथा मन्यमानाः स्युः तर्हि स्वतः तत्तत्स्तरीयाः (समानकोटिस्थाः) पाठशालाः (विद्यालयाः वा समानमानाः भविष्यन्त्येव। ततः सर्वेषां आंग्लादिविद्यालयानां तत्तत्समानकोटिस्थानां संस्कृतपाठशालानाञ्च समानमाने जाते तत्रत्यानां अध्यापकानामपि समानमानं वेतनादिकमपि तुल्यमेव भवितव्यम्। तेन च संस्कृतविषयमवलम्ब्य एम. ए. पदभाक एव यदि आंग्लविद्यालयेषु संस्कृताध्यापनाय नियुक्तो भविष्यति, न संस्कृते आचार्यपदवीभाक तत्र निर्वाचितश्चेत् ततोऽपि न काचित् क्षतिः। यतोहि—तस्य: आचार्यपदवीभाजः संस्कृताध्यानार्थं संस्कृतविद्यालयेषु निर्वाचनं भविष्यति—वेतनादिक तु समानकोटिस्थानाम् सर्वेषां विद्यालयानां उपरिस्थातनोक्तक्रमेण समाने कृते सति समानमेव लप्स्यत एव। अर्थात् प्रवेशिका अथवा प्रथमा स्तरिया संस्कृत पाठशाला (हाईस्कूल) वेतनादिकमपि समानमेव निर्धारणीयं दानव्यञ्चेति। एवमेव उभयविधानां संस्कृताङ्गलमहाविद्यालयानां समानस्तरीयाणां समानमेव मानं वेतनादिदानविधानञ्च विधातव्यम्।

तथैव प्रतिवर्षम् समानभागे एव नवनवविद्यालयानां उभयविषयकाणां (संस्कृत एवं आङ्गलादीनां) समुद्घाटनञ्च कर्त्तव्यम्। तेन सर्वत्र सुलभा सुव्यवस्था, सर्वेषामाकांक्षापूर्तिश्च स्यात्।

अतः सर्वतः प्रथमं संस्कृतविद्यालयानां समुन्नतिः कर्त्तव्या। तेषाञ्च समानाधिकरण्ये जाते वर्गीकरणं, समानस्तरसमासादनम् समानोपकरणैः सुसज्जीकरणम् समानभवनादिषु स्थापन-सञ्चालनादिव्यवस्था च विधातव्या।

श्री डा० केशवबलिरामहेडगेवारमहाभागस्य संस्मरणानि

(ले० पं० सातवलेकर:)

राष्ट्रीयस्वयंसेवकसंघस्य संस्थापक उपरिलिखितसुगृहीतनामा महोदयो राष्ट्रियकार्यकर्तॄणां सुपरिचितः। अयमपि महोदयो विक्रसंवत्सर प्रारम्भस्य प्रथमदिने चैत्रशुक्लप्रतिपदि (१९३५ तमे खि० वत्सरे) जन्म लेभे। एष महाभागः संपूर्णेऽपि निजजीवने गृहस्थाश्रमं विहाय संघटनद्वारा हिन्दुराष्ट्रनिर्माणस्य संकल्पमकरोत्, नानाकष्टानि सहमानोऽपि तत्प्रतिपालनं चाकरोत्। तज्जीवनस्य कतिचित्संस्मरणानि तस्योद्धतहृदयतां सूचयेयुरित्यधस्ताद्दीयन्ते—

तद्दिनं आङ्गलसम्राजो जन्मदिनमासीत्। सर्वेऽपि विद्यालयाः कार्यालयश्चा निरुद्धा आसन्। यदाऽहं गृहे प्राविशं तदा दृष्टं यन्मोदका अवस्करे पतिताः सन्ति। अन्वेषणेन मया ज्ञातं यत्—'केशवस्य पाठालये सम्राजो जन्मदिनोपलक्ष्ये मोदका इमे वितीर्णा आसन्, किन्तु केशवेन ते एवं प्रक्षिप्ताः। पृष्टो मया केशवस्तदुत्तरमदात्—"नाहमेवंविधान्मोदकान् अभिरोचयामि। वैदेशिकस्य राज्ञो जन्मदिवसे प्राप्तान्मोदकान् भुक्त्वा नाहं प्रमोदं भावयामि!" आसीत्तस्मिन् समये केशवस्य अष्टवर्षात्मकं वयः। बालकस्य भावं विज्ञाय मनसि नानालहर्यः प्रावहन्।"

आबाजी हेडगेवारः

१९२९ तमस्य खिष्ठवत्सरस्य सेयं घटना। माननीयः श्रीमदनमोहनमालवीयमहाभागो नागपुरमागच्छत्। डाक्टर महाभागाः संघशाखां द्रष्टुं मालवीयमहाभागं संघशाखास्थाने आमन्त्रयन्। 'मोहिते' संघस्थाने समागत्य मालवीयमहोदयः शाखाकार्यदर्शनेन भृशं प्रभावितोऽभूत्। किन्तु 'मोहिते' वाटकस्य जीर्णशीर्णां दशां दृष्ट्वा संघस्य धनापेक्षां तत्कालमसौ वेत्ति स्म। ततश्च युक्त्या मालवीयमहोदयः प्रावोचत्—'लोकेष्वहं सफलो धनसंग्राहकः प्रथितोऽस्मि। यदि भवति भवेद्वाञ्छा तर्हि भवदर्थेऽप्यहं धनं संगृह्णीयाम्।' डाक्टरमहोदयस्तत्कालं प्रत्यवोचत्—"पण्डितमहाभाग! न मे धनस्यावश्यकता। अहं तु भवतां केवलमाशीर्वादं वाञ्छामि।" एतदुत्तरं मालवीयः परमं प्रासीदत्। प्राचदच्च "यत्राऽहं गमिष्यामि तत्रैव भवतः कार्यं श्लाघिष्ये। अन्यसंस्थासु धनस्य प्रमुखं स्थानं भवति, मनुष्याश्च द्वितीये स्थाने किन्तु भवान् पूर्वं व्यक्तीः संगृह्णाति, ततो धनस्य चिन्ता।"

श्रीवाईकरः

एकदा डा० हेडगेवारमहोदय औंधनगरमगात्। औंधनरेशः परमं स्निह्यतिस्म महोदयमिमम्। अतएव डाक्टरमहोदयं निजस्थाने न्यवासयत्। औंधनरेशस्य सभापतित्वे संघशाखायाः कार्यक्रमो नियतोऽभवत्, यत्र डाक्टरमहाभागस्य बौद्धिकवर्गः स्थिरीभूतः। अत्यधिककार्यव्यस्ततया डाक्टर नितान्तं श्रान्तोऽभूत्। महाभागस्याऽस्य स्वास्थ्यवैगुण्यं दृष्ट्वा नरेशेन तथाऽन्यैश्च सभ्यैस्तद्दिने भाषणार्थं निषिद्धोऽभूद् डाक्टरमहोदय, भूयानाग्रहश्चापि कृतोभद्भाषण निरोधायः किन्तु डाक्टरमहोदयः शाखायामवश्यमभाषत। बौद्धिकवर्गो यथावत् संपादितः। अन्ते साग्रहं प्रोक्तं चापि—"मम स्वास्थ्यं विगुणमिति कारणादेव संघस्य कार्ये बाधा भवेदिति नोचितम्, नाऽपि चाहमेतदभिरोचयामि।"

⁂

"च" सहैवास्य संस्कृतप्रचाराय प्रवर्धनाय च सर्वत्र भारते प्रतिप्रान्तं तत्रत्य-ग्राम-जन-संख्यानुपातं विलोक्य संस्कृतप्रचारकाणां नवीनानि पदानि पञ्च सप्त दश वा स्थापनीयान्येव तेषांञ्च प्रचारकर्मनिधायकानां सर्वत्र वेतनादीनां भारते परिभ्रमणार्थं प्रतिगामं प्रतिजनपदं शिबिरस्थापन याताऽऽयातादिमार्गव्ययार्थकधनराशेः समुचिता व्यवस्था च सत्वरमेव विधातव्येति। तेनाविलम्बमेव संस्कृतोद्धारः स्यात्।

श्री राष्ट्रध्वजं वन्दे !

ले० श्रीगणेशरामशर्मा, झालावाड (राजस्थानम्)

अये, राष्ट्रध्वज ? त्वां वन्दे !! त्वमस्माकं भारतराष्ट्रस्य विजय वैजयन्ती श्रियां विस्फूर्जत् प्रतीकमसि । त्वं पराधीनपाशावच्छेदनाय तीव्रतममसि शस्त्रम् । त्वं राष्ट्रगौरवस्य देशभक्तेः, स्वराज्यसिद्धेः, स्वातन्त्र्यभावनायाः, स्वदेशात्मगौरवस्य च भव्यं, भद्रं, भास्वरमसि हि कलकेतनम् । त्वं भारतीयस्य गणतन्त्रस्य, यशसः, श्रियः, प्रतापस्य, प्रभावस्य, पुरुषार्थस्य चासि प्रेरणाप्रदं किमपि विजयशीलं महत्तत्त्वम् ! अतस्त्वामहं वन्दे !!

अयि, भोः ! राष्ट्रध्वज !! त्वं प्रजातन्त्रात्मकेऽभ्युदीयमानेऽस्माकं भारतीये रम्ये राष्ट्रे कोटिकोटिसंख्यकानामोजोबलस्फूर्तिदायकं स्वातन्त्र्यसौभाग्यसिन्दूरबिन्दुरिव विराजसे प्रजानां सौभाग्यसर्वस्वम् ! तव पुण्यदर्शनं राष्ट्रत्वचेतनायाः समाजधर्मस्य, कर्तव्यकर्मकलापस्य, महत्त्वाकाङ्क्षाया, विजयस्पृहायाः कमपि नवनवोन्मेषं, भावावेशं, सदुद्देश्यं, भावनाभ्युदयाभ्युत्थानोद्रेकं च जनयति । त्वद्दर्शनं नाम विराट् दर्शनं खलु राष्ट्रविश्वात्मनः !! त्वयि मे ममत्वपूर्णोऽनुरागः । त्वं मम मनुष्यतायाः प्रेरणात्मकं दिव्यं भौमं च महत्तीर्थधाम । अतस्त्वां वन्द्यमभिनन्द्यं, परमपूज्यं, प्रेयश्रेयःसर्वस्वं, श्रद्धेयं, वरेण्यं चाहमनन्येन चेतसा भूयोभूयः प्रणमन् वन्दे !!!

भोः ! भोः ! राष्ट्रध्वज !!! त्वं चिरात् स्वच्छन्दं समुद्धूयमानो भारतीयानामार्याणां, महात्मनां, महाप्राणानां, त्रैलोक्यैकवीराणां, स्वाभिमानधनानां, देशगौरवरक्षणाय हुतात्मनां, बलिदानान्यर्पयतां, क्रान्तिकारिणां, शूराणां, वीरकुमाराणां, सतीशिरोमणीनां रमणीनां, विदुषां च शौर्य्यं, वीर्यं, साहसमुत्साहं, मनस्वितामात्मविश्वासं च समन्ततः समुद्घोष्योद्घोष्य ससम्मानं प्रस्फुरन् विराजसे । त्वमेवास्माकं राष्ट्रस्य, धर्मस्य, सभ्यतायाः, संस्कृतेर्वैदुष्यस्य चानुत्तमोऽसि स्मारकः । त्वामन्वस्माकं सर्वे शुभोदर्काः समारम्भा भव्या भद्रा बोभूयन्ते । त्वामनु सर्वा राष्ट्रनिर्माणयोजनाः प्रवर्तन्ते । त्वामनु सर्वेऽस्माकं सत्याः सङ्कल्पाः शुभाशाः सफलाः सिद्ध्यन्ति, त्वामनु भारतराष्ट्रस्यास्याध्यात्मिकोपदेशाः, शिक्षादीक्षासदाचाराश्चारित्र्यं, पञ्चशीलं, विश्वसौहृदमुद्योगीकरणं, विश्वशान्तिसन्देशाः प्रसरन्ति हि जगत्प्रजाभ्यः । अतस्त्वामहं सविनयं सश्रद्धं सादरं च वन्दे !!

अये, राष्ट्रध्वज ! जानीमहे वयं भारतीयाः प्रजाजनाः यथात्वं शांतेरग्रदूतानां, धैर्यधनानां धार्मिकाणां, सर्वस्वार्पणोद्यतानां वदान्यानां, न्यायनीतिधुरन्धराणां उद्धर्षबलवीर्यप्रचण्डानां शूराणां, तपोधननानां, सुधारकाणां, शांतचेतसामप्यन्तस्तेजसां महामनसां, नीतिप्रवणानां विदुषामनल्पकल्पनाविचक्षणानां, प्रगल्भधिषणानां, कूटनीतितत्त्वविदां, च बुद्धिबलेन प्रतिभाप्रकर्षेणाहिंसासिद्धान्तेन, सत्येन, शक्त्या, प्रभावेण, तपसा, त्यागेन, सदा सर्वदा कोटिकोटिबलिदानैः प्राणार्पणैस्तितिक्षया च शश्वत् साभिमानं समुद्धृतोऽसि । तव गौरवरक्षणायैव हि कुसुमकोमलवपुषो भारतीया रमण्योऽनिस्नाताः कर्कशरणचण्डिकारूपं प्रपेदिरे । तव प्रभावमक्षुण्णं रक्षितुमेवार्या महात्मानो दुष्करं तपस्तेपुः । तव सम्मानमर्यादां दिग्दिगन्तेषु संस्थापयितुमेव हिमालयोत्तुङ्गशिखरमारुरुहुर्भारतीयाः साहसवन्तोऽद्वितीया वीराः । स्वराष्ट्रस्वातन्त्र्यसंरक्षणायैव वैदेशिकैर्दस्युभिर्मुहुर्मुहू रणोद्यमाः प्रावर्तन्त । तवात्मगौरवं निर्मलमभिरक्षितुमेवानेकशो भारतीया बालाः, किशोराः कुमारा, युवानो, युवतयो, वृद्धाश्चापि क्रान्तेरणचण्डिकां सप्राणार्पणमाराधयामासुः । त्वदर्थमेव हि रक्तसन्तर्पणम्, त्वत्कृत एव कारागारेषु लोहशृङ्खलाधारणम, त्वदर्थमेव निर्ममदारुणा यन्त्रणाः, पाशविकमुत्पीडनं राष्ट्रदेवानां नेतॄणामात्मोत्सर्गस्तस्मात्त्वामहं वन्दे राष्ट्रध्वजम् ।

अयि, राष्ट्रध्वज ! त्वं सर्वतन्त्रस्वतन्त्रं स्वच्छन्दं निर्बाधमव्याहतं सर्वतोदिक् परिस्फुरन् कामात्यभूतपूर्वां स्फूर्तिस्फारां नवजागरणप्रेरणां वितनुषे । न त्वं केवलं स्वराज्यस्य, स्वराष्ट्रस्य, स्वकीयस्य प्रजातन्त्रामकस्य गणराज्यस्यैवाभ्युन्नतये नवनिर्माणयोजनात्रयीं सोद्योगं प्रवर्तयितुं प्रेरयसि, प्रत्युत

विश्वास्यास्य सर्वराष्ट्रप्रजानां तास्ताः समस्याः समाधातुं दिव्यान् शांतिसन्देशान् सादरं सस्नेहं च निष्कामं वितरसि। त्वं हि बुहर्विज्ञानास्त्रबल दृप्तेभ्यो बर्बरेभ्योमानवताया विरोधितत्त्वेभ्यो विप्लववादिभ्यः प्रबलेभ्य उग्रेभ्यश्च युद्धविभीषिकाभिस्त्रस्तां मनुष्यजातिमुद्धर्तुं कमपि शांतिमहामन्त्रं प्रयच्छन्विराजसे स्वार्थनिर्व्यपेक्षमपि चाकुतोभयम्। तवेत्थमुत्स्फुरणमस्माकं योगक्षेमाय, श्रियै, यशसे, कीर्त्यै, धर्माय, कर्मकौशलाय, प्रोद्योगाय, रक्षाशिक्षाविचाराय, सदाचाराय, सुखायोत्कर्षाय च कल्पते! भोः राष्ट्रध्वज!! संस्फुर त्वमाकल्पम्!!! उत्तम्भय मानवताविरोधिनीर्न्यायनीतिप्रतिगामिनीर्दुःशक्तीः पाशवीर्वृत्तीर्विध्वंसोद्यतानां पशुताप्रयाणां साम्राज्यवादिनां लोकानां। चारित्र्यदौर्बल्यात् यत्किञ्चिनतावादिनां मदोन्मत्तानां दुर्विज्ञानरणोत्सुकानां दुस्सहसं स्थगय!! राष्ट्रप्राङ्गणे स्वच्छन्दमुद्धूयमानस्त्वं सर्वान्तर्यामीवान्ताराष्ट्रप्रजानां कर्मप्रवृत्तीर्गतिविधींश्च निष्पक्षं निर्भयं च परिपश्यन् संतिष्ठसे! समदर्शी त्वं प्रक्षेपणास्त्रविद्योद्धतानां गरीयसां विज्ञानगुरूणामपि समस्ताश्चेष्टाः कूटस्थोपि न्यायनीतिनिपुणं निरीक्षसे! त्वं कूटनीतिपटूनामपि तांस्तान् प्रयोगकर्मक्रियाकालापान् परीक्षसे!! त्वं सर्वभूतसाक्षी विश्वजनसुहृत् शांतः प्रशांतो विराजसे!!! अयि, भोः! राष्ट्रध्वज!! विजयस्व, लभस्व कीर्तिम्, श्रेयोऽवाप्नुहि, वर्द्धस्व त्वमहं वन्दे, पुनर्वन्दे, भूयोऽपि वन्दे त्वां राष्ट्रध्वज! जय! जय!! जय!!! त्वामहं वन्दे!!!

हास-परिहासाः—

सद्योमुक्तिः

ले० विनोदी, झालावाडः

कस्यचित् पोस्टमास्टरस्य गृहिणी गर्भवती पुनः आसन्नप्रसवासीत्। रविवासरे सा स्वभर्तारं तं पोस्टमास्टरं प्राहांग्लभाषायाम्—"सम्भाव्यते, कदाचित् अद्यैव मे प्रसवमोक्षः स्यात्।"

एतत् गृहिण्या वचनं श्रुत्वापि स खलु पोस्टमास्टरो विषयेऽस्मिन् नातिमहत्वं, अवधानं च दधानः क्वचित् मित्रमण्डलीं प्रति गन्तुं गृहात् प्रस्थितः।

दैवयोगात् तदानीमेव गृहात् बहिर्निर्गते भर्तरि सा पोस्टमास्टरस्य गर्भिणी प्रसवपीडामनुभवन्ती स्वपतिं तं गृहान् निवर्तितुमात्मीयमेकं सेवकं प्राहिणोत्। स च भृत्यो राजमार्गेषु नगरवीथीषु च यत्र तत्र तमन्विष्य पोस्टमास्टरमवदत्—'श्रीमन्! शीघ्रमेव गृहं प्रति निवर्तस्व! श्रीमत्या गृहदेव्या अधुनैव प्रसवमोक्षो जायमानोऽस्ति!!'

पोस्टमास्टरो भृत्यस्य तद्वचनमाकर्ण्य क्षणं विमृश्य प्राह—'अये! त्वं किमिति मृषा भाषसे? न कदापि रविवासरेऽद्य मोक्षो (Delivery)भवितुमर्हति। त्वं गृहिणी च मे न जानाते किं नियममिमम् यद्धि–'No delivery on Sundays.!'

अथ तस्य चतुरः सेवकः पोस्टमास्टरस्य नियमशरणस्य कार्यालयनियमानां सततं चिन्तनादनुवर्तनादतिशयाभ्यासवशाच्चार्थग्रहणे जातां भ्रान्तिं ज्ञातवान्। तेनान्तर्मनसि हसतापि कार्यगौरवात् तत्क्षणमेवोक्तम् 'श्रीमन्! अयं तु श्रीमतां गृहे सद्योमोक्षस्य प्रसङ्ग उपस्थितोऽस्ति! (Sir! An express delivery is due in the house!!) श्रीमान् जानात्येव सद्योमोक्षस्तु रविवारेऽपि च तत्कालमेव भवितुमर्हति!! ततः श्रीमान् त्वरितमेवागच्छतु गृहान्!!!

श्रुत्वैवैतत् भृत्यवचनं स नियमशरणः पोस्टमास्टरोऽब्रूत—'आम्! साधूक्तं त्वया। सद्योमोक्षस्तु (Express Delivery) रविवारेऽपि भवेन्नाम नूनम्!! मयाधुनैव परिपालनीयो नियम एषः। कार्यालयस्य नियमसंहितायां सोऽयं नियमस्तत्कालमेव परिपाल्यो मया। चल त्वम्। अहमपि चागच्छामि।' इत्युक्त्वा स मार्गमध्यादेव परावर्त्य गृहाभिमुखं गन्तुं प्रावर्तत।

★★

विनोदवाटिका

अद्य विद्यालयस्य समस्तायामपि श्रेण्यां सर्वतोऽपि नीरव-निस्तब्धताऽऽसीत् । शिक्षकमहोदयेन प्रश्न एव एवंविधः कृतोऽभूद् यस्योत्तरं दातुं न कोऽपि प्राभवत् । सर्वेऽपि मूकाः, इतस्ततः परस्परं मुखं प्रेक्षन्ते स्म । अध्यापकस्य प्रश्न आसीत्—"एकस्य प्रकोष्ठकस्य आयामः पञ्चहस्तमितः, विस्तारश्च दशहस्तात्मकस्तर्हि प्रोच्यतां मम वयः कियद्वर्षात्मकमस्ति, इति ।"

सर्वेऽपि विद्यार्थिनः अतीव निस्तब्धाश्चासन्—'हन्त किमस्य प्रश्नस्योत्तरं भवेत्' इति । कियति समये व्यतीते एको विद्यार्थी निजहस्तमुत्थापयामास । शिक्षकमहोदयाः स्वयं सविस्मयः आसीत् । सोत्कण्ठं च सर्वतोऽपि विलोकते स्म, यत्कोऽप्यास्य किमुत्तरं ददातीति । अधुना विद्यार्थिनोऽमुष्य तथाविधमुत्साहं विलोक्य शिक्षकमहोदयः सविस्मयः सन् तं प्रत्युत्तरं दातुमाज्ञापयत् ।

विद्यार्थी सरभसमुत्थाय प्रावदत्–"श्रीमन् ! भवत आयुः पञ्चाशद्वर्षात्मकमस्ति" । वस्तुतः शिक्षकमहोदयस्य वयः पञ्चाशद्वर्षात्मकमेवाऽऽसीत् । अध्यापकमहोदयःसुभृशं चकितोऽभूत् यदनेन विद्यार्थिना समञ्जसमुत्तरं कथमिव प्रादायि । अन्ते पृष्टमेव शिक्षकमहाभागेन—"भवतः प्रत्युत्तरं तु सम्यगेव । किन्तु तदिदमुत्तरं भवता केन प्रकारेण निस्सारितमिति साधनप्रक्रियां ज्ञातुमिच्छामि ?

अवादीच्छात्रः—'अस्माकं गृहस्य प्रतिवेशे एको मुंशी महोदयो निवसन्ति यो ह्यर्धविक्षिप्तः । तस्य वयः पञ्चविंशतिवर्षात्मकम् । स हि प्रायः एवंविधान् प्रश्नानेव बहुधा पृच्छति । अद्य भवता सोयमकारि प्रश्नः । ततश्च तदाधारेण मया गणितमकारि यद् भवतोऽवस्था ततोपि द्विगुणीभूता ।

दार्शनिकमहोदयः

एको दार्शनिकमहाशयो धूमशकट्या यात्रां कुर्वन्नासीत् । मार्गे 'टिकिट' निरीक्षकस्तस्य टिकटं दर्शयितुं तमेनं प्रैरित् दर्शनविचारमग्नः स एकद्विवारयोस्तु शब्दमेव नाऽशृणोत् अन्ते कर्णसमीपागतस्य तस्य शब्दं निधार्य स प्रावदत्—"अहं तत्पत्रमन्विष्यामि ।" भूयान् समयोऽभूद्, यदाऽन्विष्यमाणमपि टिकिटपत्रं न तेन दर्शितं तदा शिष्टेन तेन निरीक्षकेण प्रोक्तम्—"एतदवध्यपि न लब्धं चेत् साम्प्रतमवधानपूर्वकमन्विष्यताम्, परावर्तनसमयेऽहं तद् द्रक्ष्यामि ।"

किञ्चिद् विलम्ब्य पुनः परावर्तिष्ट पत्रनिरीक्षकोऽसौ । किन्तु तावत्पर्यन्तमपि दार्शनिकमहोदयेन न प्राप्तं पत्रम् । स हि दार्शनिकमहाशयं नितरां परिचिनोति स्म । अत एव संकुचितः, किञ्चित्खिन्नो विषण्णश्च स प्रावदत्—'अस्तु, महाभाग ! यदि न लभ्यते तन्माऽस्तु, न कापि हानिः ।'

इदनीं प्रावदद्दार्शनिकशिरोमणिः—"महोदय ! हानिः कथं नास्ति ममन्तिरिकं भवता कथं ज्ञातम् ? पत्रेस्मिन् तदिदं मया ज्ञातव्यम् यदहं कुत्र गच्छन्नस्मि । कस्मिन् स्थानेऽहमव तरिष्यामि ।"

भ्रातृप्रेम

शिक्षकमहोदयो "दया" विषयमवलम्ब्य छात्राणां संमुखे व्याख्यानं ददाति स्म । भाषणस्य मध्ये एव शिक्षणीविषयं दृढीकर्तुं तेनैकं छात्रं प्रति प्रौढभावेन पृष्टमेव—"मोहन ! यद्येकश्छात्रः कञ्चन गर्दभं निर्दयभावेन संताडयेत्, मुहुर्मुहुः कशाघातैश्च खेदयेत् अहं च तमेनं छात्रम् एवं कर्तुं निवारयेयं तर्हि मयि कीदृशो गुणो भवद्भिर्बुध्येत ?"

मोहन :—"आम्, सुस्पष्टमिदं भ्रातृप्रेम !"



वसन्त-विलासः

मधुऋतोः मदिरागमेन मधुमया आराम-तरवः ।
उल्लसति कलिकाऽधरोष्ठेयौ वनारुणिमाप्यखर्वः ॥१॥

सुरभिरनिलः संसरति वासन्तगतिमादाय मन्दम् ।
दूरयति, मधुभावनामुद्भावयन् बहु-मान-द्वन्द्वम् ॥२॥

मञ्जु मधुकर-गुञ्जनं सततं पिकाः कलमालपन्ति ।
दूर-दयिता माधवीमुद्वञ्चिता नियतिं शपन्ति ॥३॥

प्रियमुखे कुंकुम-विलासो मनसि मनसिज-मदिर रागम् ।
अलसलोचनयोः मदारुणयोः वितनुते ह्रियस्त्यागम् ॥४॥

विरहि-मनसीया व्यथा या युवक-गोष्ठी-गेय-विषयः ।
ऋतुपतौ प्राप्ते तया सहसा कृतः सर्वत्र निलयः ॥५॥

मत्त-कोकिल-गायनं कृत्वा च रुचिरोपायनम् ।
प्रियोत्सुक-चेताः प्रवासी आश्रयति गेहायनम् ॥६॥

आगता प्रिय-मिलन-वेला संचलति संश्लेप खेला ।
प्राणिभिः मधुपर्वणः कथमपि विधेया नावहेला ॥७॥

ले० श्रीशिवशरणझा, झांसी

दूरभाषः—
कलिकाताः ३४-५१५६
,, ३४-२६५७
,, ४६-१६११
जयपुरे ७३५
गांधीधामे ८८

तडित्संकेतः—
ओरेक्यानाइट, कलिकाता
हेमेनाइट, जयपुर
,, गाँधीधाम

मयूरभंज मिनरल सिंडीकेट, प्राइवेट लिमिटेड़

[मयूरभंज-खनिज-प्रतिष्ठानम् निजम्, मर्यादितम्]

—खनिज-स्वामिनौ निर्यातकर्तारश्च—

(माइन ओनर्स एण्ड़ एक्सपोर्टर्स)

मुख्यकार्यालयः—
५५, एज़रामार्गः (एज़रास्ट्रीट)
कलिकाता (कलकत्ता)

शाखाकार्यालयः—
जयपुरम (राजस्थानम)
गांधींधामः (मोहमयीप्रदेशः)
रायरङ्गपुरम् (उड़ीसा)

लोहखनिजाः (आइरन ओर) चूर्णाश्म (लाइमस्टोन) चूर्णः (लाइम) फेनकाश्म (सोपस्टोन)
कालसाइट–चीनमृत्तिका (चाइनाक्ले) कियानाइट, मैगेनीजखनिजाः (मैगनीज ओर)
विवरणार्थं कृपया लिख्यताम् (एनक्वाइरीज सोलीसीटैड)

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्

(प्रायवेट लिमिटेड़)

कलिकाता ★ पटना ★ झांसी ★ नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यन्ते

परमपूज्याः श्री डाक्टरकेशवरावहेडगेवाराः

ले० श्री सीतानाथ गोस्वामी, कलकत्ता

सरलवचनदक्षो हास्यचाञ्चल्यपूर्णः
सकलसुभगशून्यो दैन्यतापेन दग्धः ।
उपहसनविविद्धः किन्तु कार्याधिरूढः
स खलु भवति नाम्ना केशवो हिन्दुरत्नः ॥१॥

यवनकलुषक्लिष्टं मातृपादाम्बुजं हि
विशुपदजुषमाणा भीषणं यातनां च ।
प्रददति नितरां नः क्षुब्धचित्तो जहाति
निखिलसुखसमृद्धिं केशवो हिन्दुरत्नः ॥२॥

अखिलकुशलमुख्यै राजनीतिज्ञमैश्च
भवतु परिचयो मे काङ्क्षति प्रत्यहं नु ।
विगतशतविपत्तिर्याति वङ्गप्रदेश-
मिह पठति चिकित्सां केशवो हिन्दुरत्नः ॥३॥

विहरति स च देशे प्रे तते सर्वदोपान-
नियमनिपुणतां हा वर्जयन्तीह सर्वे ।
प्रशमय हर दोषं देव यस्याभिलाषः
स इह यतनयुक्त; केशवो हिन्दुरत्नः ॥४॥

परमसमणकामी हिन्दुधर्मावलम्बी
मलिनमतिविशिष्टो नास्ति देशस्य चिन्ता ।
कलहपटुरिति त्वेतादृशस्येह सघं
रचयति यदि कोऽसौ केशवो हिन्दुरत्नः ॥५॥

★★★

संस्कृत-समाचाराः

संस्कृतपरिषद्

मध्यप्रदेशे 'झांसी-हरपालपुर' सविधे, 'बुन्देला' वीरक्षत्रियाणां प्राचीनराजधानी छत्रपुरमिदं सुप्रसिद्धं मध्यप्रदेशे। अत्र हि उन्नतोन्नतः आङ्गलविद्याकालेजः (पोस्टग्रेजुएटकालेजः) बहोः कालात्प्रचलतीति विदितमेव शिक्षितानाम्। एतेन सहैव, संस्कृतविदुषामपि छत्रपुरेऽस्मिन् साधीयान् समाजः। अत्रत्या 'संस्कृतपरिषद्' भूयसा उत्साहेन संस्कृतसेवामाचरति। पूर्वोक्तकालेजे संस्कृतविभागस्याध्यक्षः श्रीकृष्णगुप्तमहोदयः संस्कृतपरिषदोऽस्य मन्त्री। अस्मिन्वर्षे मार्चमासस्य षष्ठतारिकामारभ्य अष्टमीपर्यन्तम् [६-७-८ मार्च (१९५९)] दिनत्रयं यावत् परिषदोऽस्यास्तृतीयं वार्षिकाधिवेशनं समपद्यत।

६ मार्चदिवसे सायं अधिवेशनेऽस्मिन् समागतानां शोभायात्रा। तदनन्तरं वैदिकमङ्गलाचरणं स्वस्तिवाचनं च छत्रपुरीय पं० रामप्रसादत्रिपाठिमहोदयेनाऽकारि। ततः स्वागताध्यक्षः डाक्टरश्रीहरिराममिश्रमहाभागः स्वागतभाषणमकरोत्। साहित्याचार्य पं० श्रीहरिकृष्णगोस्वामी (शुद्धाद्वैतवेदान्ताचार्यः) नवनिर्मितैः संस्कृतपद्यैः स्वागतमकार्षीत्। ततः परिषन्मन्त्री श्रीकृष्णगुप्तमहोदयः परिषदो वार्षिकविवरणमपठत्। ततः उद्घाटनसमारोहे निर्वृत्ते, परिषदधिवेशनस्य प्रधानसभापतिः कविशिरोमणिभट्टश्री मथुरानाथशास्त्रिमहाभागः (जयपुर-राजस्थानस्य) सभापतिपदात् स्वीयं भाषणमपठत्। यस्मिन् हि संस्कृतभाषायाः प्राचीनता—साहित्यसमृद्धि—संस्कृतिरक्षा-एकतासंघटनादयो विषयाः सौष्ठवेनाऽऽसन् वर्णिताः। ततो रात्रौ शिवनारायणखरेमहाभागस्य निरीक्षणे संस्कृतिकसमारोहः संवृत्तो यत्र विद्यालयीयबालिकाभिः शास्त्रीयज्ञानेन सर्वेऽपि सदस्याः सुतरामनुरञ्जिताः।

प्रातः:—७ मार्चदिवसे 'वेदगोष्ठी' समवर्तिष्ट, यस्या अध्यक्षे देहरादूनमहाविद्यालयस्य आचार्यः श्रीबृहस्पतिशास्त्रिमहाभागोऽभूत्। सायंकाले साहित्यगोष्ठी समघटत अत्र हि प्रधानसभापतिना, हरिकृष्णगोस्वामिना, अन्यान्यैश्च स्वीयकविता तथा अन्यान्ये साहित्यप्रसङ्गाः सोत्साहं प्रवर्तिताः। रात्रौ (नववादनतः) स्थानीयविद्यालयानां छात्र-छात्राभिः भासकवेः 'दूतवाक्यस्य' अभिनयः प्रदर्शितः।

८ मार्चदिवसे-खजूरपुर ('खजुराहो') पर्यवेक्षणमभूत् इदं स्थानं भारते पाषाणशिल्पकृते सुप्रसिद्धम्, यत्रहि बुंदेलाक्षत्रियवीरैर्निजकलाप्रणस्य प्रदर्शनार्थं बहूनि देवमन्दिराणि निरमीयन्त। अस्मिन्नेव दिने सायं 'दर्शनगोष्ठी' समघटत, यस्या अध्यक्षोऽभूत् श्री बृहस्पतिशास्त्रिमहोदयः (देहरादूनस्थः) तस्याः संयोजकोऽभूत् श्रीराजीवलोचनअग्निहोत्रिमहोदयः। अग्निहोत्रिमहोदयः सर्वेष्वेव कार्येषु सहायकः, स्वीयमन्वेषणकार्यपाटवं च प्रादर्शयत।

अधिवेशनमिदं महता समारोहेण समवर्तत, सफलं चाऽभूदिति संस्कृतज्ञाः प्रहृष्येयुः। एवमेव भारतस्य अन्यान्यप्रान्तेष्वपि संस्कृतज्ञाःनिर्वर्तयेयुस्तर्हि संस्कृतप्रचारे भूयानुत्साहः स्यादिति किं बहुना।

विश्वसंस्कृतपरिषद्

अप्रेल मासस्य ३-४ तारिकयोः विश्वसंस्कृतपरिषद् षष्ठाधिवेशनं जगन्नाथपुर्यां डा० राजेन्द्रप्रसादस्याध्यक्षत्वे संपत्स्यते एतदर्थं धूमशकट्या अर्धव्ययपत्राणि ६ मार्च पूर्वमावेदनं प्रेष्य कार्यालयात् प्राप्तव्यानीति मन्त्रिणः सूचना भारतीकार्यालये २० मार्चदिवसे प्राप्ताऽभूत्। संस्कृत स्नेहिनः श्रीजयन्तकृष्ण दवेमहाभागेन (मन्त्रिणा) अत्रोपस्थातुं सादरमामन्त्र्यन्ते।

*

धारावाहिकं कथानकम् :-

जीवनस्य पृष्ठद्वयम्

—ले० मानसी

पूर्वकथा :-

[आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा "इण्टर" परीक्षायां संस्कृतविषयं गृहीतवती किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत् अतोऽस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः, एकस्याङ्गलविद्यालयस्याध्यक्षश्चाऽऽसीत्—एकम् एम्. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः, सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्—तस्मै च मनस्येव श्रद्धां समर्पितवती । बी. ए. परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत ।]

सायंकाले भ्रमणायोद्यानं गन्तुं कनीयसी स्वसा मत्प्रकोष्ठे समागत्य आग्रहं कृतवती । 'चाय' चषकं तया पितुः, मम च संमुखे स्थापितम् । "अद्य भवतः मुखमुद्रा गंभीरा किमिव !" मया पृष्टम् । पित्रा उक्तम् "राकेशः विना सूचनामेव न जाने कुत्र गतः ? तेन नगरं परित्यक्तम्, तस्याभिभावकोऽद्य तदेव ज्ञातुं विद्यालये मयाऽप्यमिलत् । मया कथितं, अन्यथं कुत्रचन गतः स्यात् । क्षणेनैव दृश्यं विपरिवृत्तम् । मदीयं शरीरं मन्ये प्राणा नासन्नेव । मदीयस्य शरीरस्य स्थितेः समवायिकारणं किमपि भवतु—किन्तु असमवायिकारणं राकेशस्य नगरेऽस्मिन् स्थितिरेव आसीत् । यद्यपि परीक्षानन्तरं, परीक्षापरिणामस्य च पूर्वं स न मां कदाऽप्यपश्यत् न चाहं तमपश्यम् किन्तु जीवनस्याधार एकः सर्वदाऽस्थात् । दर्शनेन किं भवति ? किं दर्शनसमये सांनिध्ये वा मया किमपि कथितम् ? किन्त्वासीत् स कश्चन मूकः स्नेहजडिमा यः सर्वेषु भवति, सर्वासां कुमारीणां हृदि वयस आरंभे सकृदुदयते, किन्तु विस्मर्यते । यदि चेन्न विस्मर्यते तर्हि अपरजीवने तदीया स्मृतिः एकमपूर्वं कम्पं, अपूर्वां मादकतां च पुष्णाति । तद्धि अनिर्वचनीयं भवति, केवलमनुभवगम्यम् । कर्कशजटिलान्तःकरणाः पुराणपंडिताः किमिदं जानन्तु—"नैयायिकास्तु रंगान्तर्वेश्मकुड्याश्मसंनिभाः ।" यद्यस्यानुभवोऽपेक्ष्यते तर्हि मीमांसका, नैयायिका वैद्याश्च न पृच्छ्यन्ताम्, सहृदयस्य रसिकस्य कस्यचन कवेर्भावुकं हृदयमापृच्छ्यताम्, कस्याश्चन नवलायाः किशोर्याः मानसं वा पृच्छ्यताम् । वयःसंधिरयं तथाविध एव, अत्र हि सर्वासामपि मधुयुक्ते हृदि स्नेहस्य दीपावली सकृत् प्रज्वलति किन्तु धर्मध्वजिनां धर्मधूमेन श्वासावरोधके वातावरणे पुष्टाः कन्यकास्तथाविधान् भावान् अपलपन्ति, गोपयन्ति, सरलमानसा आधुनिक्यः कन्यकाश्च तत्प्रकटीकुर्वन्ति यदुपरि पाखण्डप्रदर्शनप्रियाः, पुराणपण्डिताः कटुकं समालोचयन्ति, निन्दन्ति । अस्तु

चायचषकाय प्रहितो मदीयोऽग्रहस्तश्चित्रार्पितारंभ इवावतस्थे ! कालिदासीयायां कवितायां "मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ" इति दशा स्मृतिपथमारूढा । तस्मिन् दिने नाहमगां भ्रमणाय, रात्रिमें विचारचक्रपतिताया नेत्रयोरेव निर्जगाम । राकेशस्य सांनिध्ये मया सर्वं साहित्यमधीतम्, तस्य सांनिध्य एव मया कौमारं परित्यज्य द्वितीये वयसि पदं निहितम् । तस्य कृते मम हृदयस्य गंभीरतमे प्रदेशे स्थानं निर्मितमासीत् । एकः श्रद्धाप्लुतः स्नेहमधुरिमा जनिं लेभे । अधुना तस्य दर्शनमसंभवं संवृत्तमासीत् । न जाने यस्य जीवननौका कां दिशं गृह्णीयात् ! कस्मिन् तटे सा लग्ना भवेत् ! सर्वस्यापि ग्रीष्मावकाशस्योत्साहो मत्कृते विलीनः । तप्तकुम्भ इव गृहे खरकिरणस्य तीव्रैः-करैस्ताप्यमाना निदाघस्य दीर्घा दिवसाः, शून्या व्यतीताः । दिवसानन्तरं प्रदोषः, प्रदोषानन्तरं रजनी, रजन्या अनन्तरं प्रभातं, पुनर्दिनम्, सायं, रजनी, सर्वं चिरनमिव व्यतीयाय ।

परीक्षापरिणामो निर्गतः । मया द्वितीयश्रेणी लब्धा—समीचीनाः अङ्काः अधिगताः । किन्तु परीक्षापरिणामस्य [illegible]मुखाऽभूत् । यदि तदा सोऽभवि-

सम्पादकीयम्

संस्कृतस्य सम्बन्धे केन्द्रीयमण्डलं शीघ्रं स्थाप्येत

लोकसभाया अध्यक्षः श्रीअनन्तशयनम् अय्यंगारो 'विश्वसंस्कृतपरिषदः' पञ्चाम्बुशाखाया अधिवेशने 'जगाधरी' नगरे संस्कृतभाषासम्बन्धे समुचितमभाषत—"यत् सर्वकारनियमितस्य 'संस्कृताऽऽयोगस्य' सूचनानुसारं संस्कृतशिक्षायाः कृते शीघ्रमेव एवं केन्द्रीयमण्डलं नियतं भवेत्। समर्थितं तेन "यत्सेयं संस्कृतभाषा भारतीयसंस्कृतेः सर्वभावेन संरक्षिका। अतएव एतस्या अध्ययनं विशेषतः प्रोत्साहयितुं मण्डलमिदं संस्कृतसंस्थाभ्यः 'अनुदान' प्रदानं स्वीकुर्यात्। इयमेव भाषा संस्कृतेरादिस्रोतः। अस्यामेव भाषायां भारतीयं प्राचीनं महत्त्वं, असाधारणी तत्ख्यातिश्च सम्यग्रूपेण प्रतिपादिता। देशस्य भावनात्मकस्य एकीकरणस्याऽऽधारो भाषायामस्यामेव निहितम्। एषा हि समस्तभारतीयभाषाणां जननी। अतएव भाषयाऽनया देशस्य सांस्कृतिकविकासे सुमहान् योगो विहितः। सर्वतस्तथ्यं त्विदमस्ति—"यत्संस्कृतमेव तत् स्रोतः, यस्य कारणात् प्रादेशिक्यो भाषाः साम्प्रतमपि प्राणवत्यः सिध्यन्ति।

अय्यङ्गारमहोदयेन सोत्साहमाभाषितम्—यत् 'भारतीया युवकाः लक्षलक्षलोकानामार्थिकोत्थानस्य संघर्षेऽस्मिन् सर्वतोऽप्यग्रसरीभूय सोत्साहं प्रवर्तेरन्। कदाचित्कदाचिन्मम विचारोभवति यत् वैदेशिकशासनाद् विमुक्तिरासीत् कठिना। कठिना। किन्तु तत्त्वतो विचारे देशस्य पुनर्निर्माणकार्यमपि तादिदं नास्ति सहजम्। एतदर्थमपि भूयसस्त्यागस्य, महतोऽध्यवसायस्य चाऽऽवश्यकता। प्रसङ्गप्राप्तं तदिदमपि निन्दितमय्यङ्गारमहोदयेन यत्—'यत्र कुत्रचिद्विषये असहयोगस्य ('हड़ताल') सेयं कुप्रवृत्तिर्विद्यार्थिषु साधारणतः प्रवृत्ता।'

यमुनानगरस्य 'मुकुन्दलालकॉलेजस्व 'छात्रसंसदः' उद्घाटनावसरे अतिमार्मिकमुदीरितम् अय्यङ्गारमहोदयेन—"अद्याऽस्माकं भारते राष्ट्रिय-एकताया अतितमामावश्यकता। किन्तु अस्माकं कर्णयोः नादाः प्रविशन्ति—"इयं दक्षिणा, एषा उत्तरादिक्, इदं सिक्खस्थानम्, इदं द्रविडस्थानम्" इति भेदभावनानां जागरयितारः। एतत्परिवर्ते यदि अस्मासु देशभक्तैः, एकतायाश्च भावना नोत्पद्येत तर्हि अस्माकं तदिदमुपलब्धं स्वातन्त्र्यं संकटग्रस्तं भवेत्। सारनश्च तदिदमेव निवेद्यं यत्सर्वैरस्माभिः संघटनं विधाय यावत्कार्याणि ऐकमत्येन साधनीयानि।

संस्कृतभाषाया आयोगैः, चिरात्संस्कृतसेविभिश्च तदिदं बोधितं मुहुर्मुहुः नवीनशिक्षितमहोदयेभ्यः 'यत्संस्कृतभाषैवाऽस्माकं संस्कृतेः सर्वस्वम्। अनयैवाऽस्माकं संपूर्णेपि जगति महत्वमास्थापितम्। अस्याः शिक्षाविस्तारं विना देशस्य संघटनं, महत्वसंरक्षणं च सुतरां कठिनं, किन्तु पश्चिमदेशीयो मन्त्रप्रभावः सर्वमिदं न शृणोति। अस्तु, भगवान् साम्प्रतमपि हितबुद्धिं जनयेदिति मुहुः प्रार्थयामहे।

ष्यत् तर्हि मम स्नेहस्य, प्रेमपीडाया मूकभावना धैर्यबंधे अतिभिद्य मुखराऽभविष्यत्। मया हि स्मृतिपटस्थायै राकेशस्य मूर्त्यै श्रद्धापुष्पाणि समर्पितानि। अग्रिमे वर्षे पुनरपि मयाऽध्ययनं न परित्यक्तम्—यस्याशङ्का मे पूर्वतश्चिरादभूत्। स्वाभाविकमिदं भवति यदाधुनिककन्यका बी० ए० पर्यन्तं, यथाकथंचित्—अभिभावकानां सहमत्या असहमत्या वा अधीयते—यस्योद्देश्यमपि नैव ज्ञानार्जनम्, न वा विद्याप्रेम, न च जीविकायाः साधनमेव—किन्तु अधिकतरं विवाहस्य, सुयोग्यवरेण सह विवाहस्य संभावनासु वृद्धिरित्येव। आधुनिकभारतीयसमाजे तदिदमेव परम्परागतम्—यदि बालिकाऽत्यन्तं मनोज्ञा, सुन्दरी च तर्हि सामान्यशिक्षिताया अपि तस्या विवाहस्य संभावनाः सन्ति—यदि न सा सुन्दरी तर्हि तत्रोपायद्वयम्—अत्युच्चशिक्षयोद्वाहः, पुष्कलेन धनेन वा। त्रयमेतत् संभाव्यते—"चतुर्थोक्तं न विद्यते।" अतएव मध्यवित्ता गृहस्थाः कन्यकानां शिक्षां तावदेव प्रचालयन्ति यावत् कश्चन सुयोग्यो वरस्तासां शिक्षया संतुष्यात्ल्पेनापि यौतुकेन ताः परिणेतुं न संमन्यते—तदनन्तरं शिक्षाया उद्देश्यं पूर्णं मन्यते—इदमेव तु शिक्षाया उद्देश्यम्। अवश्यं शते चतस्रः पञ्च वा भारतीयमहिलाः स्वतन्त्रं जीवनमपि यापयितुं कटिबद्धाः, उच्चशिक्षामधिगत्य वृत्तिमारभन्ते परं तास्वपि काश्चन तासां मासिकेनायेन लुब्धं कंचन मनुष्याभासं परिणयन्ते। एतद्धि रामायणम्। क्रमशः

बालोपयोगि-लघु-कथाः-

लोभाविष्ट-चक्रधर-कथा

—प्रबन्धसम्पादकः

अतिलोभो न कर्त्तव्यो लोभं नैव परित्यज्येत् ।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ।

यथा—

चत्वारो ब्राह्मणपुत्राः दारिद्र्योप हताः विदेशयात्रायै तथा च धनप्राप्त्यै मतिं चक्रुः । अथ नगराद्बहिर्गच्छन्तः ते भैरवानन्दं सिद्धमेकं प्राप्तवन्तः । तेन पृष्टाः ते स्वनिर्धनत्वमाख्याय तस्मात् कांचित् मन्त्रादिसिद्धिं प्रार्थितवन्तः । तेनापि करुणार्द्रहृदयेन सिद्धिवर्तिचतुष्टयं तेभ्यः प्रदत्तम् । आह च हिमालयदिशि गम्यताम् । तत्र सम्प्राप्तानां यत्र वर्तिः पतिष्यति तत्र भूमिस्थं धनं प्राप्स्यथ । तत्र स्थानं खनित्वा निधिं गृहीत्वा परावर्त्य आगम्यताम् ।

तथानुष्ठिते तेषां गच्छतां एकतमस्य हस्तात् वर्तिः निपपात । अथाऽसौ यावत् तं प्रदेशं खनति तावत् ताम्रमयी भूमिः प्राप्ता । ततः तेन अभिहितम्—'अहो, गृह्यतां स्वेच्छया ताम्रम् । अन्ये प्रोचुः—'भो ! मूढाः किम् अनेन क्रियते, यत् प्रभूतमपि द्रारिद्र्यम् न नाशयति । तदुत्तिष्ठ, अग्रतो गच्छामः सोऽब्रवीत् 'यान्तु भवन्तः नाऽहं अग्रे यास्यामि ।' एवं अभिधाय यथेच्छया ताम्रं गृहीत्वा प्रथमो निवृत्तः ।

ते त्रयोप्यग्रे प्रस्थिताः । अथ किञ्चिन्मात्रं गतस्य अग्रेसरस्य हस्तात् वर्तिः निपपात । सोऽपि यावत् खनितुं आरब्धः तावत् रूप्यमयीं क्षितिं (भूमिं) प्राप्तवान् । ततः प्रहर्षितः प्राह भो! भो ! गृह्यताम् यथेच्छया रूप्यम्, नाग्रे गन्तव्यम् ।'

तौ ऊचतुः 'भो ! पृष्ठतः ताम्रमयी भूमिः अग्रतो रूप्यमयी तन्नूनन् अग्रे सुवर्णमयी भविष्यति । किञ्च अनेन प्रभूतेनाऽपि दारिद्र्यनाशो न भवति । तदा आवाम् अग्रे यास्यावः ।

अधिक लोभ नहीं करना चाहिए, बिलकुल ही लोभ को छोड़ना भी नहीं चाहिए । अत्यधिक लोभ करने वाले के मस्तक पर चक्र घूमने लगता है जिस प्रकार—

गरीबी से पीडित चार ब्राह्मणपुत्रों ने विदेश यात्रा के लिए और धन की प्राप्ति के लिए विचार किया । पश्चात् नगर से बाहर जाते हुए उन्होंने भैरवानन्द नामक एक सिद्ध को प्राप्त किया । भैरवानन्द से पूछे गये उन्होंने अपनी गरीबी बतला कर उससे किसी मन्त्रादि की सिद्धि मांगी । उस दयालु भैरवानन्द ने चार सिद्धिवर्तिकायें उनको देदीं । और कहा कि—हिमालय की ओर चले जाओ । वहां प्राप्त हुए तुम लोगों की जहां पर वर्तिका गिर जावेगी, वहां भूमि में गड़े हुए धन को तुम प्राप्त हो जाओगे । वहां जमीन को खोदकर खजाने को लेकर वापिस आना ।

वैसा करने पर चलते हुए उनमें किसी एक के हाथ से वर्तिका गिर गयी । इसके बाद इसने ज्योंही उस स्थान को खोदा त्योंही तांबे की जमीन प्राप्त हुई । पश्चात् उसने कहा—खुशी की बात है, अपनी इच्छा से (सभीलोग) तांबा लेलो । दूसरे साथियों ने कहा—अरे मूर्ख ! इससे क्या करें ! जो बहुतसा भी गरीबी को नष्ट नहीं कर सकता, इस कारण खड़ा हो , आगे चलें । उसने कहा—आप जायें, मैं आगे नहीं जाऊंगा । ऐसा कहकर इच्छानुसार तांबा लेकर पहला वहां से वापिस आगया ।

वे तीनों ही आगे को चल दिये । पश्चात् कुछ ही दूर गये हुए अगले (ब्राह्मण) के हाथ से वर्तिका गिर गई । उसने भी ज्योंही खोदना आरम्भ किया त्योंही चांदी की जमीन मिली । प्रसन्न होते हुए उसने कहा—हे हे (भ्राताओं) इच्छानुसार चांदी ले लो, आगे नहीं जाना चाहिए ।

उन दोनों ने कहा—अरे पीछे तो तांबे की जमीन निकली थी, आगे चांदी की । अतः निश्चय से आगे सोने की जमीन होगी, बहुत सी भी इस चांदी से दरिद्रता का नाश नहीं हो सकता है । तब हम दोनों आगे जावेंगे । ऐसा

एवम् उक्त्वा द्वावपि अग्रे प्रस्थितौ । सोऽपि स्वशक्त्या रूप्यमादाय निवृत्तः ।

अतः तयोरपि गच्छतोः एकस्याग्रे वर्तिः पपात । सोऽपि प्रहृष्टः यावत् खनति तावत् सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह । 'भो ! गृह्यतां स्वेच्छया सुवर्णम्, सुवर्णात् अन्यत् न किञ्चिदपि उत्तमं भविष्यति । स प्राहः 'मूढ ! न किञ्चित् वेत्सि । प्राक् ताम्रं, ततो रूप्यम्, ततः सुवर्णम्, तन्नूम् अतः परं रत्नानि भविष्यन्ति । येषां एकतमेनापि दारिद्र्यनाशो भवति तदुत्तिष्ठ अग्रे गच्छावः । किम् अनेन भारभूतेनाऽपि प्रभूतेन स आह, गच्छतु भवान् । अहं अत्र स्थितः त्वां प्रतिपालयिष्यामि ।

तथा अनुष्ठिते सोऽपि गच्छन् एकाकी ग्रीष्मार्कप्रतापसंतप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युतः इतस्ततो बभ्राम । अथ भ्राम्यन् स्थलोपरि पुरुषम् एकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत् । ततो द्रुततरंगत्वा तं अवोचत् 'भोः ! को भवान् किम् एवं चक्रेण भ्रमता शिरसि तिष्ठसि तत् कथय मे यदि कुत्रचित् जलमस्ति । यतः तृष्णार्तोऽस्मि' इति ।

एवम् तस्य प्रवदतः तत् चक्रं तत्क्षणात् तस्य शिरसः ब्राह्मणमस्तके अधिरूढम् । स आह, भद्र किम् एतत् ।' स आह ममाप्येवम् एतत् शिरसि अधिरूढम् । स आह—तत् कथय कदैतत् उत्तरिष्यति । महति मे वेदना वर्त्तते । स आह 'यदा त्वमिव कश्चित् धृतसिद्धवर्तिः एवं आगत्य त्वाम् आलापयिष्यति, तदा तस्य मस्तके अधिरूढं भविष्यति ।' स आह 'कियान् कालः तव एवं स्थितस्य । स आह साम्प्रतम् को राजा धरणीतले ?'' स आह—वेणावत्सराजः । अहं तावत् कालसंख्याम् न जानामि । परं यदा रामो राजा आसीत् तदाऽहम् दारिद्र्योपहतः सिद्धवर्तिमादाय अनेन पथा समायातः । ततो मया अन्यो नरो मस्तकधृतचक्रः दृष्टः, पृष्टश्च, ततश्चैतत् ज्ञातम्'

कह कर वे दोनों आगे चल दिये । वह भी अपनी शक्ति के अनुसार चांदी लेकर (वहां) से वापिस आगया ।

इसके बाद जाते हुए उन दोनों में से एक के हाथ से सामने वर्तिका गिर गई । प्रसन्न हुआ वह भी जब तक (जमीन को) खोदता है, तब तक सोने की जमीन को देख कर दूसरे से बोला—अरे इच्छानुसार सोना लेलो । सोने से और दूसरी कोई वस्तु उत्तम नहीं होगी ।

वह बोला—'मूर्ख ! तू कुछ नहीं जानता है ?' पहले तांबा, पश्चात् चांदी, फिर सोना प्राप्त हुआ है । तो निश्चय से इसके आगे रत्न होंगे । जिनमें किसी एकसे भी दरिद्रता दूर हो सकती है, आगे चलो । बहुत से भी भार रूप इससे क्या फायदा ? उसने कहा—'आप जाइये । मैं यहां बैठा हुआ तुम्हारी प्रतीक्षा करूंगा ।

वैसा करने पर वह भी अकेला जाता हुआ गर्मी के सूर्य की घाम से जिसका शरीर तप गया है, प्यास से पीड़ित और सिद्धि (स्वर्णभूमि) के मार्ग से भ्रष्ट हुआ इधर उधर भटकने लगा ।

इसके बाद घूमते हुए उसने एक जगह पर खून से जिसका शरीर भीगा हुआ है, और घूमता हुआ चक्र जिसके मस्तक पर है, ऐसे एक पुरुष को देखा । पश्चात् तेज़ी से उसके पास जाकर उसको कहा—अरे, आप कौन हैं ? जिनके मस्तक पर घूमता हुआ चक्र है । कहिये, कहीं जल है ? क्योंकि मैं प्यासा हूँ ।

ऐसे कहते कहते वह घूमता हुआ चक्र उसके सिर से हटकर ब्राह्मण के मस्तक पर चढ गया । वह बोला—"कहो ये मेरे सिर से कब हटेगा ? मुझको बहुत पीड़ा है ।" वह बोला—"जब तुम्हारी तरह सिद्धवर्ती को धारण करने वाला यहाँ आकर तुमसे बात करेगा, तब तुम्हारे सिरसे उसके मस्तक पर चला जायगा । उसने पूछा—इस तरह बैठे हुए तुमको कितना समय हुआ ?' उसने पूछा—इस समय पृथ्वी पर कौन राजा है ?" वह बोला—'वेणावत्सराजः' । मैं काल गणना नहीं जानता । जिस समय राम राजा थे, उस समय मैं सिद्धवर्ति लेकर इस रास्ते आया था । तब मैंने एक

भारती-पत्रिकायै—

मध्यप्रदेशराज्यपालस्य

माननीय-श्रीपाटस्कर-महाभागस्य

सन्देशः

राजभवनम्, भोपालः
६ मार्च, १९५९

"भारती" संस्कृतमासिकपत्रं संस्कृतभाषायाः प्रचाराय प्रयत्नशीलमस्ति येन शिक्षितजनाः अवकाशसमये पुरातनीममूल्यां भाषां संस्कृतं पठितुमवसरं प्राप्नुयुः। आधुनिकभाषासु प्रायः सर्वा अपि संस्कृतादेव जनिमलभन्त। यदि वयं पुरातनभारतीयमस्तिष्कसम्पत्तेरध्ययनं कर्तुं वांछामस्तर्हि संस्कृतस्याध्ययनमनिवार्यम्।

संस्कृतस्य परिज्ञानं विना भारतीयसंस्कृतेः परिज्ञानमसम्भवम्। अतः एवाऽहं भारत्याः सम्पादकमण्डलस्य प्रयत्नान् पूर्णतः प्रशंसामि यत्तदिदं महामहिमशालिन्या भाषाया अस्याः पुनरुत्थानाय पूर्णतः प्रयतते। भारतीमासिकपत्रिका सुतरां प्रोत्साहनं प्रशंसाञ्चार्हति।

एच. वी. पाटस्करः
मध्यप्रदेशराज्यपालः

स आह, 'भद्र कथं तथैवं स्थितस्य भोजनजलप्राप्तिरासीत्।' स आह—सखे! धनदेन निधानहरणभयात् सिद्धानाम् एतत् चक्रपतनरूपम् भयं दर्शितम् तेन कश्चिदपि नागच्छति। यदि कश्चित् आयाति स क्षुत्पिपासानिद्रारहितः जरामरणवर्जितः केवलमेवं वेदनाम् अनुभवति। तदा आज्ञापय मां स्वगृहाय, इति उक्त्वा गतः।

अथ तस्मिंश्चिरयति स सुवर्णसिद्धिः तस्य अन्वेषणपरः तत्पदपद्धत्या यावत्किञ्चिद्वनान्तरम् आगच्छति तावत् रुधिरप्लावितशरीरः तीक्ष्णचक्रेण मस्तके भ्रमया सवेदनः कश्चन उपविष्टः तिष्ठति इति ददर्श।

ततः तत्समीपवर्तिना भूत्वा सबाष्पं दृष्टः 'भद्र किम् एतत्। स आह, 'विधिनियोगः। स आह कथं तत्, कथय कारणम् एतस्य। सोऽपि तेन पृष्टः सर्वं चक्रवृत्तान्तम् अकथयत्। तच्छ्रुत्वा तं विगर्हयन् इदम् आह—भो! निषिद्धस्त्वं मया अनेकशः न शृणोषि मे वाक्यम्, तत्, किम् क्रियते। विद्यावान् अपि कुलीनोऽपि बुद्धिरहितः।

आदमी को मस्तक पर चक्र रखे देखा था। मैंने उससे पूछा और पूछते ही यह होगया।"

उसने कहा—"भद्र! इस तरह रहने पर तुमको भोजन और जल कैसे मिलता था?"

वह बोला—"मित्र! कुबेर ने अपने खजाने के हरण के भय से यह चक्र फिरने का भय दिखाया है। इस डरसे कोई नहीं आता यदि आता है तो भूख-प्यास-नींद से रहित बुढ़ापा-मृत्यु से वर्जित रह कर, केवल इस दुःख को भोगता है। अब, मुझको आज्ञा दो घर के लिए," यों कह कर चला गया।

इसके बाद उसके देर करने पर वह सुवर्णसिद्धि उसको खोजता हुआ उसके चरणचिन्हों पर जैसे ही आगे बढ़ता है वैसे ही रुधिर से सने हुए शरीर को लिए मस्तक पर तीखे चक्रको घूमते हुए लिए बड़ी तकलीफ से कोई आदमी बैठा है, यह देखा।

उसके पास जाकर उससे पूछा—"भद्र! यह क्या है! उसने कहा—"विधाता की इच्छा।" उसके पूछने पर उसने चक्र के घूमने का सब वृत्तान्त कहा। यह सुनकर उसकी निन्दा करता हुआ बोला—"अरे! मैंने तुमको कई बार मना किया। तुमने मेरा वाक्य नहीं सुना। अब क्या किया जाय। विद्यावान्, कुलीन भी बुद्धिरहित हो तो यह परिस्थिति होती है।

⁂

सूक्ति-सुधा

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
अपूर्वः कोपि कामान्धो दिवा नक्तं न पश्यति ॥१

दिन में उल्लू नहीं देखता, कौआ रात में नहीं देखता। कामदेव से अन्धा मनुष्य दिन और रात दोनों में ही नहीं देखता। इस तरह यह अन्धा अपूर्व (अजीब) है ॥१

प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः ।
कर्मान्ते दास-भृत्याश्च पुत्रा नैव तथा स्त्रियः ॥२

गुरुलोग अपने से जो बड़े हैं उनकी प्रत्यक्ष में अर्थात् सामने बड़ाई करनी चाहिए। जो अपने मित्र और भाई-बन्धु हैं, उनकी परोक्ष अर्थात् पीठ पीछे बड़ाई करनी चाहिये। संमुख में तो सभी बड़ाई करते हैं किन्तु पीठ पीछे बड़ाई करता है उसीको मित्र समझो। अपने नौकर चाकरों की बड़ाई तभी करना चाहिए जब वो अपना काम कर चुकें। काम के पहिले बड़ाई करने से वह प्रमत्त होसकता है। किन्तु पुत्र और स्त्रियों की बड़ाई न करें, क्योंकि ये अभिमान में आकर अपने काम में गलती कर सकते हैं ॥२

मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ।
न कल्पमपि कृष्णेन लोकद्वयविरोधिना ॥३

अच्छा काम करते हुए एक मुहूर्तभर (थोड़े समय) भी जीना अच्छा है। किन्तु खराब काम करके यदि प्रलय-पर्यन्त भी जीवन मिले तो भी वह अच्छा नहीं। क्योंकि वह काम इस लोक और परलोक दोनों में विरोधी अर्थात् विरुद्ध हानि देने वाला होता है ॥३

विषं चङ्क्रमणं रात्रौ विषं राज्ञोऽनुकूलता ।
विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः ॥४॥

रात्रि में निरन्तर घूमना, सदा राजा की अनुकूलता (अर्थात् राजा की मरजी के माफिक सदा काम करना), अन्य को जिनने अपना हृदय दिया है, अर्थात् अन्यासक्त ऐसी स्त्रियां, और जिस व्याधि (रोग) की देख रेख न की जाय, वह रोग ये सब जहर के समान हैं, घातक हैं ॥४॥

प्रदोषे निहतः पन्थाः पतिता निहताः स्त्रियः ।
अल्पबीजं हतं क्षेत्रं भृत्यदोषाद्धतः प्रभुः ॥५॥

रात्रि के समय का मार्ग चलना नष्ट समझिये (उस समय का मार्ग कभी कभी घातक हो जाता है) नीच स्त्रियां भी नष्ट समझिये, (खोटे चरित्रवाली स्त्रियां नष्ट और नाशक हैं), थोड़ा बीज जिसमें डाला गया है ऐसा खेत भी नष्ट है, नौकरों के दोष से मालिक भी नष्ट हो जाता है ॥५॥

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
मुद्रकः—श्री [illegible] आर्ट प्रिंटर्स, त्रिपोलिया [illegible], जयपुर

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

LIBRARY

किरीटकान्त्या लसदुत्तमाङ्गा,
गृहीतकुम्भैः करिभिः स्नुताङ्गा ।
लोकानपाङ्गांशुभिरार्द्रयन्ती,
स्यान्मङ्गलाढ्या जगतां रमेयम् ।।





ताजे गुणकारी आवलों से तैयार

वैद्यनाथ च्यवनप्राश के सेवन से फेफड़ों के विकार, कफ, खांसी, श्वास, (दमा), शारीरिक और मानसिक दुर्वलता, रक्तहीनता, कैल्शियम की कमी, स्वर-भंग, मन्दाग्नि, अम्लपित्त, कब्जियत आदि रोगों में तत्काल और आशातीत लाभ होता है।

यह वचपन, जवानी और वुढ़ापे में सव के लिये सदा सेवनीय रसायन है।

बैद्यनाथ
च्यवनप्राश
अष्टवर्गयुक्त

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना
बैद्यनाथ आयुर्वेद भवन प्राइवेट लि॰
कलकत्ता · पटना · झाँसी · नागपुर · इलाहाबाद

विषय-सूची

क. सं.	लेखाः	पृ. सं.
१.	श्रीमहालक्ष्मीर्विजयते	१
२.	नूतनवर्षारम्भः	२
३.	श्रीबदरिकाश्रमयात्रावृत्तान्तः	५
४.	राजस्थानशासनं संस्कृतभाषा च	८
५.	वेदस्य सर्वविद्यानिधानत्वम्	१०
६.	दीपावलिः	१३
७.	खगोलवर्णनम्	१७
८.	वेदानां भारतीयसंस्कृतेश्चाभिनवो व्याख्याकारः	२०
९.	वातयन्त्र-प्रणाली	२६
१०.	बालोपयोगी लघुकथा	
११.	सूक्ति-सुधा	

* * *

आभारप्रकाशनम्—

भारतीपरिवारो निम्नलिखितमहानुभावानां सादरमाभारं स्वीकुरुते—

संरक्षकाः—

१. मान्यवर श्री कुडीलालजी सेक्सरिया

आजीवन सदस्याः—

१. श्री चिरञ्जीलालजी मिश्रमहोदयाः कलकत्ता
२. श्रीछोटीलालजी कानोडिया महोदयाः कलकत्ता
३. श्री केशवदेव बावरी महोदयाः गौहाटी

भारत्याः सहायकाः—

१. मान्यवर श्री राजासाहब नारायणलालजी पित्ती महोदयाः, बम्बई
२. ,, श्री ,, मुकुन्दलालजी पित्तीमहोदयाः ,,
३. ,, श्री गोपीकृष्णजी बगडका महोदयाः ,,
४. मान्य. श्रीशिवकुमारजी भुवालकामहोदयाः बम्बई
५. ,, वैद्यराज श्रीवेणीशंकरजी शर्मा कलकत्ता
६. पूज्य स्वामीजी श्री अखण्डानन्दजी महाभागाः वृन्दाबन
७. ,, वेणीशंकरजी वकील महोदयाः कलकत्ता
८. ,, वैद्यराज श्री श्रीरामजी महोदयाः बम्बई
९. ,, ,, श्री बैजनाथजी ,, ,,
१०. ,, लक्ष्मीकान्तजी शास्त्री ,, ,,
११. ,, साण्डू ब्रदर्स चैम्बर ,,
१२. ,, नाना साहिब पौराणिकमहोदयाः धूतपापेश्वर ,,
१३. ,, रामप्रसादजी पोद्दार महोदयाः सेन्चुरी मिल्स, बम्बई
१४.स्व० ,, श्रीमोतीलालजीशास्त्री महोदयाः जयपुर

सम्पादकः
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर (राज०)

वर्षम् ११ | कार्तिकमासः, सं० २०१७ (नवम्बरमासः सन् १९६०) | अङ्कः १

श्रीमहालक्ष्मीः

घनाक्षरीवृत्तम्

यस्याः करुणालवेन जगति जघन्यो जनो
लोके धन्यधन्यो भाति परितः परीक्ष्यताम्
किं बहुना दैत्यदलनाय देवनायकोऽपि
यत्कृपां प्रतीच्छतीति कोऽपि कृती वीक्षताम् ।

सर्वविधसौख्य-सर्वसम्पत्समवापनाय
सपदि समीपागता दीपाली प्रतीक्ष्यताम्
क्लेशनिकुरम्बादिह संबाधेत किं वा भयं
लक्ष्मीर्जगदम्बा कृपाऽऽलम्बात्क्षणमीक्षताम् ॥

दोहा

सदा सन्निधिं विदधती भूरि भारतीं पातु ।
महितमहालक्ष्मीर्मुदं सुखसंपदं ददातु ॥२

नूतनवर्षारम्भः

सृजती सर्वसौख्यानि दधती सर्वसंपदः ।
भारती भारतीयानां सर्वदा सर्वदाऽस्तु नः ॥१

चिरकालाद् भारतीसेवामादधतीमिमां भारतीमनुगृह्णतां भवेदेव सुविदितं तत्र भवतां यत् प्रथमसंख्ययाऽनया सेयं 'भारती' साम्प्रतमेकादशे वर्षे पदं विन्यस्यतीति । दशमेऽस्मिन् संवत्सरे–यां संस्कृतभाषामवलम्ब्य सेयं भारती, तस्याः प्रसाराय प्रचाराय च यथाशक्यमुद्यमं प्रादर्शयत्, भाषायामस्यामनुरागप्रवर्द्धनाय यथा किल नानानिबन्धान् प्राकाशयत्, तदिदमखिलमवगतमेव पाठकमहोदयैः । यतः प्रभृति भारतेऽस्मिन् स्वराज्यघोषणा प्रवृत्ता, तत एव संस्कृतानुरागिणामखिलानामासीत्सेयमेव प्रत्याशा यदिदानीमस्माकं भारतीयानामेव शासनं प्रवृत्तम् । किमिदानीम् आर्याणां जीवितस्थानीया सेयं भाषा स्वानुकूलां प्रतिष्ठाँ नाऽऽसादयेत् ? किन्तु पाश्चात्यानां शासनकालाद् आरभ्य शिक्षाविभागशासन-प्रचारादिषु या पद्धतिः प्रारब्धा सा हि साम्प्रतमप्यक्षुण्णा प्रचलतीति प्रतिपदमनुभूतं स्याद् विवेकिभिः पाठकमहोदयैः ।

अत एव हि सभामञ्चमलं कुर्वद्भिर्देशस्य कर्णधारैः संस्कृतभाषाप्रचारविषये भूयस्तरां हृदयहारिण्यो वार्ताः प्रकटीक्रियन्ते, नानासमितीर्निर्माय संस्कृताभ्युन्नतये विविधान्याश्वासनानि प्रदीयन्ते, किन्तु कार्यरूपे परिणामस्तत्र कियान्वा भवनीति जानीयुः सर्वे एव संस्कृतसेवामाचरयन्तः सज्जनमहाभागाः । भारतीया संस्कृतिः संस्कृतभारतीमेवाऽऽश्रित्य पूर्वमप्यतिष्ठत्, साम्प्रतमपि च तस्या एव समाश्रिता । स्वीया संस्कृतिश्च सर्वैरपि सभ्यमानिभिर्देशैः सयत्नं संरक्ष्यते, संवर्द्धयते च । भारतप्रधानमन्त्री श्रीनेहरूमहाभागोऽपि बहुधा समर्थयते स्म यत् भारतीया संस्कृतिरस्माभिः शतप्रयत्नैरपि संरक्षणीयेति । एवं बहुधा समर्थनेऽपि संस्कृतिप्राणभूता सेयं संस्कृतभाषा उन्नति विषये कार्यात्मना नाऽधुनापि भारते परिणतिमवाप्ता । संस्कृतसेवयैव स्वात्मसमुन्नतेः स्वप्नानभिपश्यन्तः कतिचित्समाजाः साम्प्रतमपि बहुधा निराशाया एव दीर्घनिश्वासान्समुत्सृजन्ति ।

प्राकृतः प्रकोपः

एवं कार्यपरिस्थितावेव प्राकृतः प्रकोपोऽपि भारतीयानां व्याघातकः संवृत्तः । अस्मिन् वत्सरे सोयं वर्षर्तुर्विचित्रविचित्रदृश्यानि दर्शयति । उडीसाप्रान्ते जलोपप्लवेन ('बाढ') महती धन-जनहानिः संवृत्तेतिविज्ञातमेव पाठकमहाभागैः । १३अक्टूबरस्य संवादोऽस्ति यद् गोमतीनद्याः पूरोपप्लवेन लखनऊनगरस्य सर्वं यातायातं, कार्यजातं चाऽवरुद्धम् । विमानद्वारा भोज्यं, जलं च प्राप्यते । बहिर्जनसाहाय्येनाऽद्यावधि द्विसहस्रमनुजा जलाऽऽप्लावितस्थानाद् बहिरनीयन्त । कानपुरनगराद् द्विसहस्रबोरका मृत्तिकापूर्णा विमानद्वारा आनीय निपात्येरन् येन हि राजकीया बहुमूल्यगृहा उपप्लवात्संरक्ष्येरन् । एतत्सर्वमासीदेव । किन्तु १४ अक्टूबरतारिकायाः संवादोऽस्ति यद् भगवत्या गोमत्यास्तथा पूरोपप्लवः प्रवृद्धो येन लखनऊनगरस्य नवीनतमः सुदृढलोहनिर्मितः ('आइरन ब्रिज') सेतुरपि न केवलं त्रुटित एव, अपि तु प्रवाहेणाऽपवाहितः । स्वयंसेवकानां साहाय्याय बहुधा शारीरिकश्रमानातिष्ठद्भिः सैनिकैः 'मंकी ब्रिज'–हार्डिङ्गब्रिजयोः' संरक्षणमवश्यं कर्तुमपार्यत । तैः संपूर्णा रात्रिं

जागरित्वा विंशतिसहस्रं मृद्चोरिकाः स्थाने स्थाने निपात्य जलस्य प्रवाहः संरुद्धः ।

उत्तरप्रदेशस्य मुख्यमन्त्रिणा डा० संपूर्णानन्दमहोदयेन विमानद्वारा 'बाढ़'ग्रस्तानां क्षेत्राणां संपूर्णतया निरीक्षणं कृतम् । तेन हि निश्चितमभूत्—"भिन्नभिन्न प्रान्तानां १,६५८ संख्यकग्रामाणां सार्द्ध षड्लक्ष 'एकड' मिता भूमिः जलमग्नाभूत् । ७५% मानवा गृह-जन-धन-हीनाः समभवन् । सेयं बाढविनाशलीला अधिकतरं पीलीभीत—शाहजहांपुर, बरेली, एटा, मैनपुरी-सीतापुर-फर्रुखाबादप्रान्तेष्वभवत् । पञ्चाशत्सहस्रतोप्यधिका गृहाः निपतिताः, क्षतिग्रस्ताश्च । उत्तरप्रदेशीयसर्वकारेण जौनपुर-सुलतानपुर-वाराणसीनामधिकारिभ्यः सूचना दत्ता यत्—"पूरोपप्लवः साम्प्रतं निम्नाभिमुखं प्रसरेत् । अतएव तत्प्रतीकारे वीरतया संनद्धव्यं स्यात् ।"

रोहतकनगरं तु 'बाढेन' बाढमेवासीद् ग्रस्तम् । हन्त अद्याऽपि [१४ तारिकायाम्] तत्र अष्ट'फुट'मितं पानीयं सर्वतोऽपि भृतम्—येन हि नानारोगाणां प्रसारसंभावनेति स्वास्थ्यविभागीयास्तत्प्रतीकाराय प्रयतन्ते ।

अस्तु, एकतः सेयं लीला प्रकाममतिवृष्ट्या सर्वतोऽपि महान् हाहाकारः । अपरतश्च—बीकानेरादिप्रान्तेषु, यत्र हि सर्वदैव न्यूनपरिमाणा वृष्टिर्नियता, तत्र अस्मिन् वर्षे सा न्यूनतमापि वृष्टिर्विलुप्ता । जलं विना लोकानां महाहाहाकारः । राजस्थानस्य बहुषु प्रान्तेषु शलभानां (टिड्डी)महदभूदाक्रमणं, येन संवृत्ता महती शस्यहानिः । यत्र चाऽपि वृद्धिरभूत्तत्रापि सा आकालिकी वृष्टिरगण्यत, यया हि लाभस्य स्थाने, हानेरेव महान् संभवः । अस्तु, एवं किल प्रकृतिकृतः प्रकोपः सहनीयोऽभवत् । अनेन सहैव स्थाने स्थाने दस्युकृतं लुण्ठनम्, निर्घृणतया हत्या, अन्ये चाप्यपराधाः प्रावर्द्धन्त, यैर्देशे शान्तिरक्षा दुर्लभा समवर्तत । इदानीं विवेकिभिः साहित्यसेविभिः स्वयमनुमातव्यं स्याद यत् एवं परिस्थितौ देशे विद्याप्रचारस्य साहित्यसंवर्द्धनस्य च का स्याद् दशा ? तत्रापि भगवत्याः सुरसरस्वत्याः संवर्द्धनस्य का स्यात् परिस्थितिः ? या हि नवीनशिक्षा-दीक्षापरिनिष्ठितैर्नवशिक्षितैरेकप्रकारेण विस्मृतेव ।

साहित्यपरिस्थितिः

देशस्य बहुषु प्रान्तेषु संस्कृतविद्यालयस्थापनाय यतस्ततः सुबहुना प्रयत्नेन अक्रियन्त प्रार्थनाः, किन्तु न कोपि सफलः परिणामः । नवीनसाहित्यसर्जनाय बहुषु प्रान्तेषु 'साहित्य-एकाडमी' संस्थाः समायोज्यन्त, किन्तु तासु हिन्दीभाषायाः, प्रान्तीयभाषाया वा साहित्यमेव प्राकाश्यत । उपेक्षिता सेय संस्कृतभाषा तत्रापि नावकाशमलभत ।

अस्मिन् प्रसङ्गे भारतराजधान्यां'नवदेहल्यां' प्रतिष्ठापिता 'साहित्य अकादमी' न किल विस्मृतिमर्हति । अनया हि गतवर्षात् (१९५९) "संस्कृतप्रतिभा" नाम्नी उत्तमोत्तमा संस्कृतपत्रिका प्रकाशयितुमुपक्रान्ता । एतस्याः संपादकः श्रीमान् वे० राघवमहाभागः । पत्रिकायामस्यां सर्वेषामपि प्रान्तानां प्रसिद्धप्रसिद्धविदुषां निबन्धाः समवलोक्येरन् । निबन्धानां संकलनं चातुर्यपूर्णम्, यत्र हि एकाङ्किरूपकम्, व्यायोगः, खण्डकाव्यम्, सूक्तिसंचयः, प्रकृतिपर्यवेक्षणम्—प्रभृतयः सर्वे एव विषयाः प्राप्येरन् । सत्यमियं संस्कृतप्रतिभा+ चिरकालतः प्रारभ्य, अद्यावध्यपि न केवलं भारतस्यैव कृते, अपि तु संपूर्णसहृदयसमाजस्य कृते अभिनन्दनीयतमा । वे० राघवमहाभागस्य सूक्तिमिमां सर्वात्मनाऽनुमोदे—

"मनुं व्यासं च वाल्मीकिं कालिदासं च शंकरम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन् मतदेशिकान् ॥
उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥
धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥"

+ संस्कृतभाषाया नवनवोन्मेषशालिनी बुद्धिः । प्रकृता पत्रिका चाऽपि ।

सहयोगिसाहित्य

वर्तमानकाले साप्ताहिक–मासिकादीनि कतिचित् संस्कृतपत्राणि 'भारती'पत्रस्य परिवर्तने प्राप्यन्ते, किन्तु एतेषां संचालकाः पत्राणां नियमं जानन्तोऽपि पत्राणीमानि 'भारतीप्रबन्धकार्यालये' प्रेषयन्ति, न संपादकसविधे। सर्वे चैते चिरकालात्संपादकेन सह परिचिताः, सुपरिचिताः। किन्तु नैते संपादकसंकेतेन पत्राणि प्रहिणवन्ति, येन हि पत्राणि कर्मचारिणां प्रमादात्समये न समवाप्यन्ते।

तेषु साप्ताहिकानि—

'संस्कृतम्'—अयोध्यातः

'संस्कृतसाकेतः'—,,

'भवितव्यम्'—नागपुरात्

पाक्षिकम्

'शारदा'—पूनातः

मासिकपत्राणि

'मञ्जूषा'। 'साहित्यपरिषत्पत्रिका', इति द्वयं कलकत्तानगरात्।

'दिव्यज्योतिः'—जाखू (शिमला)तः

गुरुकुलपत्रिका— गुरुकुलकाङ्गडीतः

'विद्या'—बेलगांवतः। 'बालसंस्कृतम्—बम्बईतः। 'भारतवाणी'—पूनातः, एतानि हि कदाचित्कदाचिद् दर्शनं ददतीति कार्यालयस्थाः सूचयन्ति।

वाराणसेय—संस्कृतविश्वविद्यालयस्य त्रैमासिकी पत्रिका "सारस्वती सुषमा" अपि मन्दमन्दं समवाप्यते। अखिलभारतीयसंस्कृतसाहित्यसंमेलनस्य मासिकं मुखपत्रं 'संस्कृतरत्नाकरः' पूर्वं देहलीतः प्रकाशमाप, यस्य हि संपादकोभूत् संमेलनप्रधानमन्त्री स्वर्गीयः श्रीकेदारनाथसारस्वतमहाभागः। किन्तु सारस्वतमहोदयस्य स्वर्गवासोत्तरं 'संस्कृतरत्नाकरः' संप्रति डा॰ श्रीमण्डनमिश्रशास्त्रिणो मीमांसाचार्यस्य प्रकाशकत्वे जयपुरात् प्रचरति। एतस्य हि प्रधानसंपादको व्याकरणधर्मशास्त्राचार्यः पं॰श्रीवृद्धिचन्द्रशर्माशास्त्री, सहसंपादकश्च व्याकरणसाहित्याचार्यः पं॰श्रीदुर्गादत्तशर्मा मैथिलः। फर्वरीमासात्प्रारभ्य जुलाईमासान्तं यावत् 'भीलवाडाङ्कः', 'चित्तौडगढाङ्कः', 'स्व॰ पं॰केदारनाथसारस्वतस्मृत्यङ्कः', इति विशेषाङ्कत्रयं ग्राहकमहाभागानामङ्कमुपगतम्। अग्रे चाप्यस्य कार्यं सुचारुरूपेण प्रचलेदिति संमेलनसदस्यानामास्था।

राजनैतिकचक्रम्

अस्तु नायमवसरः साहित्यसमीक्षणस्य। गतवर्षे, अस्मिंश्चाप्यब्दे भारतस्याऽस्य का परिस्थितिरासीत्, प्राक्तनश्च कीदृशः सदवसरोऽभूदिति, च साधारणतया साहित्यसेविनां समाजे समावेदितं तावत्। किन्तु राजनैतिकचक्राण्यपि न नाम साहित्यसेवां साधयितुं साहाय्यमस्मिन् संवत्सरे समपादयन्। भारतस्योत्तरदिशि हिमाचलसीम्नि चीनराष्ट्रेण समुत्थाय, भूयान् भूभागः आत्माधिकारे संदर्शितः, सैनिकाश्च तत्र प्रेषिताः। येन भारतीयानां कृते विषमसमस्या सेयं समुपस्थिता। अद्यावधि चीनदेशोऽस्माकं मित्रराष्ट्रेष्वेकतममासीत्। अस्माकं देशे चीनयात्रिणः समागत्य बौद्धधर्मस्य जिज्ञासितम्, अन्यान्यांश्च सांस्कृतिकविषयान् एतद्देशीयेभ्यो विद्वद्भ्यः समये समये समधिजग्मुः। भारतादेव तन्त्रशास्त्रस्य भूयान् भागश्चीन-तिब्बतप्रदेशेषु गत इत्यन्वेषकमहोदयानां गवेषणा। भारतेऽपि चीनांशुकाश्चिरादिह समागच्छन्, राजकीयवर्गाणामभिरुचिताश्चाऽभवन्। एवं चीनः प्राचीनकालादेव भारतस्यासीन्मित्रम्, किन्तु उपजापकानां पश्चिमराष्ट्राणां चातुर्यबलात्साम्प्रतं सोयं विरोधहुंकारमातनोति। अस्तु, सेयं वातावरणस्य परिस्थितिः। 'शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते।' "स्वस्थे चित्ते बुद्धयः संस्फुरन्ति", इति हि सर्वेषामप्यवगतम्। एवं परिस्थितावपि गभीराशयः शान्तिसंरक्षकश्चायमस्माकं देशो न नाम विचलति, न चाप्यपथे पदं निदधाति। साहित्यसेवा, आध्यात्मिकी विचारधारा चाप्यस्य यथावत् प्रचलत्येव।

उपसंहारः

व्यतीते वर्षे भारतस्य शिक्षासंचालकैः संस्कृतभाषाविषये तत्तत्प्रान्तेषु नानाविधान्याश्वासनानि, नानासमि-

तयश्च कल्पिताः। संस्कृतपत्राणां विषयेऽपि शासनतन्त्रेण प्रकाममुदारता व्यक्तीकृता। तेभ्यः प्रतिवर्षमार्थिकी पर्याप्ता सहायता दीयेत, यया हि तेषां जीवनं सुस्थिरं सेवोपयोगि च संपद्येत। तदनुसारं भारतभारत्योः सेवामादधती सेयं भवतां 'भारती' मुद्राणां सार्द्धद्विसहस्रं लभेत, इति लब्धा सूचनेति सूचयन् वार्षिकवक्तव्यमिदं मधुरेण समापयामि। सकलसहायकश्चराचरनायकः पूरयतादस्माकमिव पाठकमहाभागानामपि सकलमनोरथानिति जगन्नियन्तारमर्थयमानाः प्रवर्तामहे अनन्तरकर्तव्यायेति शम्—

"दर्शितवर्षोत्कर्षे + वर्षे हर्षप्रकर्षः स्तात्"

+ दर्शितः जलवर्षाणामुत्कर्षो यस्मिन्।

❋

श्रीबदरिकाश्रमयात्रावृत्तान्तः

(ले॰ वैद्य श्रीकन्हैयालालभेडा, बम्बई)

जूनमासस्य द्वितीये तारकादिने श्रीमुम्बापुरीतः श्रीहरिद्वारनामकं क्षेत्रमागतवान्। इदं हि हिमाचलश्रेण्याः पाददेशे श्रीजाह्नव्याः दक्षिणे तीरे वर्तते। हरिद्वारमेव गङ्गाद्वारमित्यपि व्यवहरन्ति। इत एवारभ्य पुण्यशीत सलिला भगवती जान्हवी समतलभूभागे प्रवहति। श्रीहरिद्वारस्य जलस्थलरामणीयकं वाचामगोचरम्।

हरिद्वारमिति संज्ञाकरणे हेतुस्तु श्रीनरनारायणाश्रमद्वाररूपत्वमेव, श्रीभगवत्प्राप्तिद्वाररूपत्वं वा। अत्र "हरकी पेडी" गङ्गायां स्नानकरणं महत्पुण्यावहम्भवतीति। अस्यैव "ब्रह्मकुण्ड" इति नाम। अत्रैव "हरकी पेडी" ब्रह्मकुण्डनामकस्थाने स्वीयस्वीयमातापित्रस्थिभारान् वहन्तः परस्सहस्रं मनुजा नानादिग्भ्यः प्रक्षेप्तुमनसः प्रत्यहमायान्ति। अत्रास्थिप्रक्षेपेण पितरः स्वर्गं गच्छन्तीति। एवमेव पुराणान्यपि उद्घोषयन्ति। प्रमाणार्थं सगरराजस्य सुतानां वृत्तान्तवर्णनम्।

हरिद्वारस्य दक्षिणतः श्रीकनखलं नाम क्षेत्रमस्ति। "को नु खलो गङ्गायां न स्नायात्" इत्यभिप्रायकशब्दराशिगतस्य कोनुखल इति पदद्वयस्यापभ्रंशः "कनखल" मित्यवगम्यते। अत्र गङ्गास्नानस्य महत् पुण्यफलमनुवर्ण्यते। अत्र स्व॰ श्रीसूरजमलजी रुइयाश्रेष्ठिभिर्निर्मिता काचन रम्या महती धर्मशाला विद्यते तत्रैवाऽस्माकं निवासः।

भूयः शम्भुजटाविभूषणमणिर्जन्होर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते।

ममानुभवः—धन्यास्ते सुकृतिनो ये चोभयत्र निवसन्तो भगवच्चरणाम्बुजनिष्यन्दिनीं भगवतीं जान्हवीं सततमवलोकयन्तस्तस्या एव पूतशीतलसलिलमुपयुञ्जानास्तत्तरङ्गसङ्गतेन शीतेन वातेनाप्यायिताः कालं यापयन्ति। हरिद्वारादुत्तरपूर्वभागे चतुर्दशार्धक्रोशदूरे हृषीकेशक्षेत्रमस्ति। इदं हि क्षेत्रं श्रीभागीरथ्या दक्षिणे तीरे वर्तते। अस्यैव कुब्जाभुकमिति संज्ञान्तरम्।

ऋषीकेशक्षेत्राच्छ्रीबदरिकाश्रमस्य पन्थाः प्रचलति। ततः स्थानात् मोटरद्वारा यात्रा प्रभवति। मध्ये देवप्रयागं प्रापम्। देवप्रयागे चोत्तरतः समायान्त्याः श्रीजान्हव्याः पूर्वोत्तरतः समायान्त्याः श्रीअलकनन्दाया दक्षिणे तीरे देवप्रयागग्रामो विद्यते। अत्र हि उभयोः सङ्गमो भवति। सङ्गमस्थाने सोपानपंक्तिर्विद्यते। सङ्गमतीरगमनाय भागीरथ्या उपरि अयःकाष्ठमयो डोलासेतुर्विद्यते। भागीरथी चात्र महता वेगेन प्रवहति, अलकनन्दा च परं शान्ता। देवशर्मनामकेनात्र पुरा महत्तपोऽनुष्ठितमिति देवप्रयाग इति संज्ञा सञ्जातेति पुराणविदः। अत्र पिण्डदानादिभिः सम्पूज्य पितॄन् सत्कृत्य च ब्राह्मणान्, तथाऽनुज्ञातः प्रस्थितश्च पुरातनं श्रीनगर नामकं स्थानं प्रापम्। ग्रामस्यास्य सन्निवेशो रमणीयः।

मोटरस्थाने विद्यते विश्रामार्थं राजकीयमतिथिगृहम् । समीपवर्ति बाबाकालीकमलीवालाधर्मस्थानमपि । आवश्यकानि सर्वाणि वस्तूनि मिलन्ति । अस्य समीपे प्रवहत्यलकनन्दा ।

ततः प्रस्थितोऽहं रुद्रप्रयागनगरं प्रापम् । अस्मादेव स्थानादलकनन्दां सेतुना समुत्तीर्य भगवत्याः श्रीमन्दाकिन्यास्तीरेण श्रीकेदारनाथक्षेत्रं यान्ति ।

यस्य च द्वादशज्योतिर्लिङ्गेषु नाम श्रूयते–तद्यथा–

महाद्रिपार्श्वे च तटे रमन्तं
सम्पूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैर्यक्षमहोरगाद्यैः
केदारमीशं शिवमेकमीडे । इति ।

"हिमालये तु केदार" मिति ।

श्रीबदरिकाश्रमं जिगमिषवः श्रीअलकनन्दामनुत्तीर्य कर्णप्रयागादिमार्गेण गच्छन्ति ।

रुद्रप्रयागे भगवत्योर्मन्दाकिन्यलकनन्दयोश्च भवति समागमः । तत्र स्नानसन्ध्यातर्पणादिभिर्भवति महानानन्दः ।

रुद्रप्रयागान्मोटरद्वारा ज्योतिर्मठमागतवान् । ज्योतिर्मठपर्यन्तं मोटरमार्गो विद्यते । ज्योतिर्मठोऽयं पर्वतीयनगरेषु प्रधानतया परिगण्यते । अत्रैव प्रातराराध्यानां साक्षाच्छ्रीशङ्करावताराणां महनीययशसां भगवत्पादानां जगद्गुरु श्रीशङ्कराचार्याणां मठो विद्यते । यदा षण्मासान् हिमान्या समावृतो भवति श्रीबदरिकाश्रमस्तदा श्रीबदरिकाश्रमवासिनः सर्व एव जना अत्रैवागत्य निवसन्ति । षण्मासपर्यन्तं भगवतः श्रीबदरीनाथस्य अर्चनादिकमत्रैव भवतीति । इत एकोनविंशतिक्रोशेषु श्रीबदरिकाश्रमः ।

अतः स्थानाद् भक्ता जनाः पद्भ्यामेव यात्रां कुर्वन्ति । अशक्तानान्तु कृते दण्डी-अश्वादयो विद्यन्ते । ज्योतिर्मठात् क्रमशः—विष्णुप्रयाग–पाण्डुकेश्वर, लाम्बगढ़–हनुमान्चट्टी–द्वारा चिराभिलषितं मनोरथसिध्दिदं किन्नराकीर्णं बहुप्रस्रवणौषधं त्रिविधस्निग्धपादपैर्मधुरच्छायां वहन्तं सर्वतः समलंकृतं श्रीबदरिकाश्रमं प्राविशम् । अस्याश्रमस्य पूर्वतः पश्चिमतश्च द्वौ नगाधिराजौ दक्षिणोत्तरेण दीर्घौ तिष्ठतः । तयोर्मध्यभागे पाश्चात्यपर्वतस्योपत्यकायां विराजते श्रीबदरीनाथः । अत्र धर्मशाला आपणाश्च बहवः सन्ति । महामहिमप्रतिभाशालिभिर्महनीयकीर्तिभिर्जगद्गुरुभिर्भगवत्पादैः श्रीशङ्कराचार्यैः प्रतिष्ठापितोऽयं दिव्यो देवालयः ।

दिव्यालयमध्ये श्रीभगवान्नारायणो विराजते । श्रीशालिग्रामशिलामयी बद्धपद्मासना योगमुद्रालंकृतकरद्वयी भगवतो नारायणस्य मूर्तिर्मध्यतः, तस्या वामभागे नरनारायणयोः शिलामय्यौ मूर्ती, अग्रभागे श्रीउद्धवस्य नारदस्य च मूर्ती, दक्षिणभागे गरुत्मतो मूर्तिर्धातुमयी कुबेरस्य सुवर्णमयी मुखप्रतिकृतिश्च, विद्यन्ते । भगवतः पूजको दक्षिणदेशीयो विप्रः । चिरादेतज्जातीयदेशीयैरेव पूजकैर्भाव्यमिति नियमः प्रचलति ।

प्रातः षड्वादनकाले भगवानुत्थाप्यते । ततोऽनन्तरमभिषेको भवति तप्तजलेन । अभिषेकसमये पुरुषसूक्तपाठो भवति । श्रीविष्णुसहस्रनाम्नश्चापि । पुजारी चात्र "रावल" पदवाच्यः ।

क्षेत्रेऽस्मिन् तप्तकुण्डः । कुण्डोऽयं पञ्चदशहस्तदीर्घो द्वादशहस्तविस्तारः । शिलामय उपरि लोहमयेन मण्डपेनाच्छन्नः । कुण्डस्य जलं सुखोष्णम्भवति । प्रायः सर्वे दर्शनार्थमायाता जना अत्रैव स्नान्ति ।

देवालयस्यैशान्ये नातिदूरे श्रीअलकनन्दायास्तटे ब्रह्मकपालीनाम्नी काचिदस्ति शिला । अस्या उपरि पितॄनुद्दिश्य पिण्डदानं क्रियते । प्रायशः सर्वोऽपि जनः श्रीनारायणनिवेदितमन्नं मन्दिरतो गृहीत्वा पिण्डार्थं ददाति । अत्र हि विधिवच्छ्राद्धं विधाय ब्रह्मकपाले पिण्डदानं कुर्वन्ति कर्मकाण्डकोविदा विपश्चितिः । पितृपितामहप्रपितामहादीन् समुद्दिश्य श्राध्दं क्रियते । पिण्डदाने परमप्रसिद्धान् इमान् श्लोकान्तुच्चारयन्ति—

अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय पिण्डमेतं ददाम्यहम् ॥१॥

इत्यादि त्रिंशच्छ्लोकैः पिण्डदानं कुर्वन्ति । पिण्डदानानन्तरं परिषिच्य, प्रणामादिभिः सम्पूज्य, विसृज्य च पितॄन्—इमान् श्लोकान् पठन्ति—

साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मयाऽगतेन बदरीं पितॄणां निष्कृतिः कृता ॥
पितृकार्याय बदरीं नारायणं समागतः ।
त्वमेव साक्षी भगवन्ननृणोऽहं नृणां क्रमात् । इति ।

परितो वदरिकाश्रमं पर्वतशिखरेषु हिमानी परिलोक्यते । अत्र रजतताम्रमभ्रकमुत्पादयन्ति पर्वतशिखराणि । शीतमाधिक्यमत्र ।

प्रत्यहमेव दिनान्ते मेघाः सञ्चरन्ति आकाशे, वाति च वायुः । तदा महदेव शीतमनुभूयते !

महासिद्धिप्रदमिदं स्थानम् । अत्रत्यप्राकृतिकवर्णनं कर्तुं न कोऽपि प्रभुः । अत्र महाश्चर्याणि वसुधारा—सत्यपथ–महापथ–नारदकुण्ड–कर्मधारा–प्रह्लादधाराः–ऋषिगङ्गादिबहूनि स्थानानि सन्ति । सर्वथा चिरकालमुषित्वा श्रीभगवतो नारायणस्य पूजादिभिरनुभवैकवेद्योऽस्य बदरिकाश्रमस्य महिमातिशय इति ।

केदारखण्डे "श्रीबदरिकाश्रममाहात्म्यम्" विशेषतो वर्णितमस्ति । सनत्कुमारसंहितायामपि बदरिकाश्रममाहात्म्यमेकमपरमपि विद्यते । अत्र चैकादशाध्याये तन्माहात्म्यवर्णनम् । इदञ्च संस्कृतज्ञैरवश्यमधिगन्तव्यम् ।

निष्कर्षः

बदरीवासिनो जना विष्णुतुल्याः सन्ति । तेषां दर्शनमात्रेणैव पापनाशो भवति । अतश्च यावत् प्राणा ध्रियन्ते, यावच्चेन्द्रियाण्यविकलानि, अशिथिलञ्च वपुः, तावदेव बदरीं गच्छेत् पुरुषः । नात्र कार्यो विलम्बः । स च प्रत्यक्षं पापिनामपि मुक्तिदश्च । विज्ञाः ! श्रीबदरिश्रमयात्रावृत्तान्तश्चातिसंक्षेपेण यथामतिबलं विलिख्य निवेद्यते । भूतभावनो भगवांञ्छ्रीबदरीनारायणः सर्वेषां मङ्गलाय भूयात् ।

अत्र समागत्य हिमालयदर्शनेन महाकविश्रीकालिदासस्य कुमारसम्भवे हिमालयवर्णनं स्मृतिपथमायाति—

ततोऽप्यधिकश्चानन्दः कालिदाससदृशवर्णनपरः श्रीनावनीतकनामके प्राचीनायुर्वेदग्रन्थे हिमालयवर्णनात्मकः कविना चातुरीचणो विदुषां प्रीतिप्रदो विशेषशब्दैरलंकृतः षट्श्लोकमयो रचनाविशेषः ।

तद्यथा—

यः सेव्यते मुनिगणैरनिशं सशिष्यैः
नैकैः समित्कुशफलोदकपुष्पहस्तैः ।
स्वर्गाङ्गनाभिरथ च प्रविमृष्टशाखाः
कुञ्जेषु यस्य तरवः कुसुमार्थिनीभिः ॥१

यत्र त्रिलोचनजटामुकुटैकदेश–
नित्यस्थितोडुपतिदीधितिसम्प्रयोगात् ।
शीतान् दिवापि हिमवत्स्फटिकोपलाभ ।
मद्बिन्दुकान्तमणयः प्रचुरं स्रवन्ति ॥२॥

यस्याब्दमुक्तजलधौतशिलातलेषु
कुञ्जेषु नैकविधवीगणनादितेषु ।
रम्येषुपुष्पफलदद्रुमसङ्कटेषु
रात्रौ हुताशनवदौषधयो ज्वलन्ति ॥३॥

चन्द्रांशुगौरतरकेशरभारभृद्भिः
मत्तेभमस्तकतटक्षतजोत्क्षितांशैः ।
सिंहैः शिलोच्चयगुहावदनाट्टहासै र्न
क्षम्यतेऽम्बुधरवृन्दरवोऽपि यत्र ॥४॥

आत्रेयहारितपराशरमेडगर्ग—
शांवन्यसुश्रुतवसिष्ठकरालकाद्याः ।
सर्वौषधीरसगणाकृतिवीर्यनाम
जिज्ञासवः समुदिताः शतशः प्रचेरुः ॥५॥

तस्मिन् गिराववनिमण्डलमण्डभूते,
सर्वातिथाविव जगद्विभवप्रदानैः ।
सर्वर्तुपुष्पफलवद्द्रुमरम्यसाना-
वेते विधूततमसो मुनयो वसन्ति ॥६॥
इत्यादि ।

सम्पादकाय पत्रम्--

राजस्थानशासनं संस्कृतभाषा च

(सवाईमाधवपुरस्य श्रीबुद्धिप्रकाशशर्मणः पत्रमिदं राजस्थाने संस्कृतपरिस्थितिं समालोचयति। लेखकस्योत्तरदायित्वे तदिदं प्रकाश्यते। सह०)

सुविदितमेवैतत्तत्रभवतां भवतां यत् यादृशी समुन्नतिः सुरगिरः आंग्लशासनात्पूर्वं देशेऽस्मिन् आसीत् तादृशी ब्रिटिशशासने न कदापि लोचनगोचरी-भवत्यद्यावधि। आंग्लशासने नागेशभट्टोजिदीक्षित-जगन्नाथप्रभृतीनां दर्शनं सुदुर्लभतरं समजनि। परं तस्मिन्नपि समये देववाण्याः प्रखरः प्रकाशः सूर्यस्यापराह्ण इव जनमनांस्यालोकयितुमासीत् पर्याप्ततरः। तदात्वे काश्यां संस्कृतविदुषां विपुलः समाज आसीद् दृष्टि-गोचरः। संस्कृतकालेजेषु पाठशालासु च सहस्रावधिका संख्या छात्राणां बभूव।

एवमेव राजस्थाने विशेषतो जयपुरराज्ये शताधिकाः संस्कृतशालाः कालेजाश्चाभवन्। जयपुरनगर एव कालेजे दादूविद्यालयेऽन्यत्र च विपुलतरा संख्याऽन्तेवासिनां विदुषां चासीत्।

परमद्यत्वे विचारणीयोऽयं विषयः यत् राजस्थान-निर्माणानन्तरं सा संख्या अमाचन्द्रकलेव कथंकारं क्षीण-तरा? इति। अद्य शेखावाटीप्रान्तस्थाः संस्कृतशालाः प्रत्यहं क्षीयन्ते। यश्च संस्कृतशालाराशिः केवलं जयपुर-राज्य आसीत् स समग्रेऽपि राजस्थाने नाद्यत्वे वर्तते इति सुस्पष्टतरम्। किं बहुना जयपुरस्थे लक्षरूप्यतोऽप्य-धिकव्ययावहे संस्कृतकालेजे छात्राणां प्राध्यापकानां च संख्या समाना वर्तते। न्याये व्याकरणे साहित्ये अन्यत्र च छात्राणां सर्वथाऽभाव एवावालोक्यते। कार्याभावे च तत्रत्याश्छात्रा तथैव अध्यापकाः प्रधानाध्यक्षश्च सर्व एव परस्परं कलहायमानाः कलुषीकुर्वन्ति संस्कृतसरो-वरमिमम्।

अत्र को हेतुः? इति प्रश्नव्याकुले मानसेऽयमेव निश्चयः समुदेति यत् 'सर्वारम्भास्तन्दुलप्रस्थमूलाः' 'अर्थस्य पुरुषो दासः'।

'अर्थेन हि विमुक्तस्य पुरुषस्याल्पमेधसः।
विशुष्यन्ति क्रियाः सर्वाः ग्रीष्मे कुसरितो यथा॥

संस्कृतज्ञानामर्थाभाव एवात्र मुख्यो हेतुः। यद्यपि भावात्मके मनसि अस्माकं मातृगिरः सुरभारत्या अस्ति महत्स्थानं परं सम्मानेन केवलेन नोपलभ्यतेऽन्नवस्त्राद्या-धुनिकोपस्करणसामग्री। तथा च

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः॥

इत्याभाणकानुसारेण पुनः पुनः प्रबोध्यमानाऽपि वराकी जरत्तरी च देववाणी मुमूर्षुशय्यायां निपतिताऽ-वशिष्टश्वासगणनां विदधाति।

क्षम्यतामयं जनः, विनाऽर्थेन न भविष्यति कल्पशा-तेऽपि पुनर्जागरणमस्याः। अयमेवार्थः भारतसर्वकार-राजस्थानसर्वकाराभ्यां नियुक्ताभ्यामायोगाभ्यामपि सुनि-श्चित इति नाविदितं विचक्षणानाम्। भारतसर्वकारेण तु इदानीं विचार एव क्रियते स्वनियुक्तसमितिप्रतिवेदने। न जाने कदा तत्पत्रमागत्यास्मांस्तारयिष्यति।

परं राजस्थानसर्वकारेणाऽवश्यं संस्कृतायोगप्रस्तुत्य-नुसारं काचन ऐतिहासिकी घोषणा समुद्घोषिता उदय-पुरसंस्कृतसम्मेलनावसरे। तत्रोक्तमासीत्—ये जनाः सन् १९५४ वर्षीयपाठ्यक्रमानुसारं विहिताचार्याः स्युः, ते एम०ए०सदृशाः स्युः इति। ये च शास्त्रिणस्ते बी०ए० सदृशा इति।

परमत्र विचार्यतां भवद्भिः घोषणेनानेन पूर्वोक्ताः दोषाः किं परिमार्जिताः ? किं संस्कृतशालासु छात्रवृद्धिः संजाता ?

किं बहुना ये संस्कृतपण्डिता इदानीं संस्कृतेनोपजीवन्ति, तेषां सन्ततिः संस्कृतशालासु समधीते ? नहि नहि कदापि नैव । संस्कृतपण्डिताः संस्कृतलब्धद्रव्येण आंग्लकालेजच्छात्रसंख्याया वृद्धिं विदधति स्वपुत्रप्रेषणेन । जयपुरकालेजप्राध्यापकानां सन्ततिः महाराजाकालेजेऽधीते किं पुनरन्येषाम् ?

अस्त्यत्र कोऽपि महान् भयहेतुः ।

वस्तुस्थितिनिरीक्षणे दशा अन्यादृशी विलोक्यते । राजकीयघोषणा वस्तुतो निरर्थिका, निःसारा, प्रचारमात्रप्रसरा च । वयं पृच्छामस्तान् चाटुकारान् स्वार्थकलुषीकृतमानसान् भूयो भूयश्च बद्धाञ्जलीन् स्तुतिपरान् पण्डिताभासान्, यत् भो महाशयाः अनया घोषणया कस्य नाम्नोद्दिष्टस्य जनस्यैकस्यापि लाभः समजनि ?

मया सतालास्फोटं समुद्घोष्यते यः कश्चनैतत्साधयितुं शक्नुयात् ।

भवेत् यस्य कस्य लाभो यदा कदा भविष्यत्काले परं नैष सार्वजनीनः नियमः । इदानीं राजस्थानराज्यस्य संस्कृतप्रेम्णः परीक्षा क्रियते—राज्यघोषणाऽनुसारं सन् १९५४ वर्षीया आचार्याः M. A. सदृशाः सन्ति, न सन्ति चेत् राजकीयलेखपत्रे तु सन्त्येव परं ये विद्वांसः ततः पूर्वं लब्धाचार्याः सन्ति, अध्यापयन्ति च तेषां कृते काचन रीतिर्निर्धार्य्या दशवर्षाधिकानुभविनां कृते सद्यो लाभदायकं किं संजातम् ? किं ते एवमेव मरिष्यन्ति ? किं तेषां सन्ततिः संस्कृतपुस्तकानि विक्रीय, इतस्ततो निक्षिप्य तैः पुस्तकैश्च चुल्हीज्वालनं विधायांग्लभाषाशरणमेव गच्छेयुः ?

एतदप्यवधेयं यत् तादृशानां पण्डितानां संख्या ५४ वर्षीयेभ्यो विपुलतराऽस्ति । तेषां का सेवा स्वीकृता राज्येन । अन्यच्च ये आचार्याः वाराणसेयाः विद्यन्ते तेषां का गतिः ? मन्ये पूर्वकालस्थाचार्याः राजसेवाभिलाषिणः पदलाभायांग्लभाषां पठेयुः, परं ये स्वपदे एव प्राचीनकालतः कार्यं कुर्वन्ति ते किमहिफेनसेवनं विदध्युः ?

अपरमपि—अत्र सर्वस्मिन् विषये को दोषी अस्ति? किं राज्यमन्त्रिणः ? किं विधानसभ्याः ? किं राजनैतिकाः ? नहि२ न तेऽपराध्यन्ति । अत्रापराध्यन्ति विश्वविद्यालयस्नातकाः ग्रेजुएट्पोस्टग्रेजुएट्पदवीकाः महाशयाः । ते नेदं सहन्ते यत्, परिहितधौताः समुत्तोलितोत्तरीयाः धृततिलकाः पण्डिताः अस्मत्सदृशा भवेयुरिति तस्मात् ते सज्जनाः सर्वकारस्य निश्चयं वितथं कर्तुं बद्धपरिकराः संतिष्ठन्ते । ते जनाः संस्कृतपण्डितेभ्य एव संस्कृतमधीत्य तेषां बहिष्कारं विदधते—इत्यहो आश्चर्यमहो कृतघ्नता । अलं तावत् परदोषदर्शनेन । भगवान् सर्वेश्वरः श्रोष्यत्येव समुचिते समये ।

* * *

दिव्यज्योतिषः अपूर्वमायोजनम्
पद्म-पुरस्कारः
संस्कृतवाङ्मयस्य प्रसारमधिकृत्य तथा अस्य नाटकीय-उपन्यासीय-कथाक्षेत्रेषु सामयिकविकासाय १९६१ वर्षीया अखिलभारतीयसंस्कृत-उपन्यास-प्रतियोगिता समायोज्यते ।
सफलप्रतियोगिभ्यः पुरस्कारद्वयं प्रदास्यते
प्रथम पुरस्कारः ५००)रु०, द्वितीय ३००)रु०
उपन्यासः मौलिकः सरलशुद्धप्रवाहपूर्णभाषायां लिखितः पुस्तकरूपः स्यात् । उपन्यासानां निरीक्षणपरीक्षणं प्राचीननवीन-उपन्यासीयतत्त्वसमालोचनपूर्वकं भविष्यति । तेषामेव परीक्षणं भविष्यति ये कर्गजस्य पृष्ठैकदेशे सुन्दरसुवाच्याक्षरैर्लिखिता अथवा टङ्किता भविष्यन्ति । पुरस्कृता उपन्यासा दिव्यज्योतिषि प्रकाशयिष्यन्ते । पुस्तकस्य प्रतित्रयमपेक्ष्यते । असत्यां प्रथमपुरस्कारोपयुक्तायां रचनायां ६००) रु० द्वितीयं पुरस्कारद्वयं प्रदास्यते । प्रतियोगिभ्यः दिव्यज्योतिषः ग्राहकत्वमावश्यकम् ।
प्रेषणस्यान्तिमा तिथिः १३ मार्च १९६१
व्यवस्थापकः
दिव्यज्योतिः कार्यालयः, शिमला १ (पंजाब)

वेदस्य सर्वविद्यानिधानत्वम्

पूर्वानुवृत्तम्— मान्याः स्व० श्रीमोतीलालशर्माणः, मानवाश्रमः, दुर्गापुरा

प्रकारान्तरेण विद्याविवर्त्तं विचार्य्यताम्। प्रथमं तावद् विद्या निगमागमभेदाद्द्विविधा प्रत्येतव्या। चत्त्वारो वेदाः, चत्त्वार उपवेदाः, षट् तदङ्गानि, सपुराण इतिहासः, योगः, न्यायः, मीमांसेति चत्त्वार्य्युपाङ्गानि, तदित्थं चत्वारश्चत्वारः षट्चत्वारीति सम्भूयाष्टादशशास्त्राणि निगमा विद्या सर्वमूलभूता प्रथमा। तेषां चावान्तरा अनेके भेदा इति न प्रच्छन्नं विदुषाम्।

निगममूला, निगमादेवागता अत एवागमनाम्ना प्रसिद्धा द्वितीया तु विद्या विंशोत्तरशतविधा। तथाहि संहिता, सिद्धान्तः, कल्पः, यामलं, डामरः, तन्त्रमिति कृत्वा षट् प्रधानविभागाः। तेषु च—संहिता अष्टादशधा विभक्ता। सिद्धान्ताश्चतुर्दश। कल्पाः खलु-ऊर्ध्वाधरपूर्वपश्चिमोत्तरदक्षिणदिग्भेदतः षड्विधाः। वृष्टिविज्ञानादीनि नैमित्तिकविज्ञानशास्त्राणि यामलानि दशधा विभक्तानि। अभिचाराः सनिवर्त्तना डामरा अष्टौ। मणिमन्त्रौषधिविज्ञानप्रधानानां तन्त्राणां चतुः षष्टिरित्थं सम्भूय विंशोत्तरशतविधा आगमविद्या। क्रीडाकौतुकविद्या, रत्नपरीक्षा, पुरुषपरीक्षा, सामुद्रिकं शास्त्रं, शकुनपरीक्षा, पशुतन्त्रं, मुकुटभूषादि, मरु-अनूप-जाङ्गल-भेदात् त्रिकाण्डा दगार्गलविद्या, इत्येवमादयः प्रकीर्णकविद्याविभागा वाराहीसंहितायां संक्षेपेण निरूपिताः संहिताविभागे-एवान्तर्भूता अवगन्तव्याः।

निगमागममूलैव चतुःषष्टिभेदभिन्ना दिव्या विद्या त्वपरा। सैषा दिव्यविद्या आत्मबलादुत्पन्ना द्रष्टव्या। अनयैव च भारतस्यास्य सर्वमूर्द्धन्यत्वं, सर्ववैशिष्ट्यं च। तदेतदात्मबलं मानस-अधिदैवत-इन्द्रिय-शिल्पकला-भेदतश्चतुर्द्धा विभक्तम्। विज्ञानघनो ह्येष आत्मा-इति हि-श्रौतसिद्धान्तः। तत्र प्रज्ञानमनसा, ज्ञानकर्म्मेन्द्रियग्रामेण, भूताभागेन, योगेन चात्मनि विज्ञानमये बलातिशयः-उत्पाद्यते। तदिदमात्मबलं नामापूर्वं बलम्। तदित्थं मानस-दैविक-याज्ञिक-भौतिक-भेदनिबन्धना आत्मबलानुग्राहिणी दिव्या विद्या स्थूलरूपेण चतुर्द्धा विभक्ता भवति। तासु च प्रत्येका पुनः षोडशविधेति कृत्वा संभूयासां चतुःषष्टिः संपद्यते। तासामासां प्रथमद्रष्टा भारतवर्ष एवेति महद्गौरवमस्माकं भारतीयानाम्। तासामत्र नामनिर्द्देशो नाप्राकृतिक इति तासां नामानि निर्द्दिश्यन्ते। आत्मनि मनःसंयमादुत्पन्ना योगबलसिद्धयोऽष्टौ—

अणिमा, महिमा, गरिमा, लघिमा,
प्राप्तिः, प्राकाम्यम्, ईशित्वं, वशित्त्वमित्येताः।

इन्द्रियसंयमादुत्पन्ना दिव्यदृष्टिसिद्धयोऽष्टौ—

अतीतानागतज्ञानं, दूरपरोक्षज्ञानं, सर्वभूतरुतज्ञानं, मनोविज्ञानं,
भूगर्भविज्ञानं, भुवनज्ञानं, ओषधिप्रभावज्ञानं, ताराज्योतिःप्रभावज्ञानमित्येताः।

तान्येतानि षोडशमानसबलानि आत्मबलोदयौपयिकानि भाव्यानि। स एष प्रथमो विभागः॥१

हृदयसंयमादुत्पन्नास्तपोबलसिद्धयोऽष्टौ—

देवसाक्षात्कारः छायापुरुषसिद्धिः, कृत्याभिधाना वल्गा, आत्मोत्क्रमसाक्षात्कारः, विश्वरूपदर्शनं, मायाव्यामोहनं, उपश्रुतिविद्या, संस्कारोपाधानीत्येताः।

प्राणसंयमादुत्पन्ना देवबलसिद्धयोऽष्टौ—

कायव्यूहः, परकायप्रवेशः, प्राणहारिणी, मृतसंजीवनी दैवीशक्तिः, स्थाणुसंजीवनी, छायानिग्रहणी, आकृतिपरिवर्त्तिनी, लिङ्गपरिवर्तिनीत्येताः। तान्येतानि दैविकानि षोडश धीन्द्रियबलान्यात्मबलोदयौपयिकानि। स एष द्वितीयो भागः॥२

नैगमीयमन्त्रबलसिद्धयोऽष्टौ—

सर्पाकर्षिणी. अग्निजलस्तम्भिनी,
अक्षयकरणी, निग्रहानुग्रहणी,
पुत्रसंजननी, प्रावृषेण्या जलवर्षिणी,
आपोनप्त्रीयं, मधुविद्येत्येताः।

आगमीयमन्त्रबलसिद्धयोऽष्टौ—

मारणम्, मोहनम्, उच्चाटनम्, वशीकरणम्,
विद्वेषणम्,स्तम्भनम्,आकर्षणम्,संरक्षणमित्येताः।

तान्येतानि षोडश याज्ञिकानि कर्म्मेन्द्रियबलान्यात्मबलोदयौपयिकानि। स एषस्तृतीयो विभागः।

महौषधिबलसिद्धयोऽष्टौ—

मृतसञ्जीवनीगुटिका, सञ्जीवनकरणी,
विशल्यकरणी, सावर्ण्यकरणी,
सन्धानकरणी, अरिष्टभैषज्या,
डिम्भप्रसविनी, बलातिबले—इत्येताः।

यन्त्रबलसिद्धयोऽष्टौ—

दिव्यविमानं त्रिचक्रं रथाकारं, पुष्पकविमानं
हंसरथो वर्द्धिष्णुः,
सोभविमानं नगराकारं, हर्य्यश्वविमानं हययुग्माकारं
प्लवविमानं पद्याकारं, अमृतगवी विश्वरूपा,
सूतविमानं नौकाकारं, शिलासंतरणी-संतरणशिलेत्येताः।

तान्येतानि भौतिकानि भूतबलानि—आत्मबलोदयौपयिकानीति चतुर्थो विभागः ॥४॥

तासामासां दिव्यविद्यानां प्रयोगोदाहरणानि तु श्रीगुरुप्रणीते—इन्द्रविजयाख्यग्रन्थे विस्तरतो निरूपितानीति विशेषजिज्ञासुभिस्तत्रैव द्रष्टव्यानि।

अन्याः सिद्धयः। अन्याश्च निधयः। सिद्धीनां साधने बहुप्रयासोऽपेक्षितः। परन्तु निधीनां गृहे स्थापनादेव सिद्धिवदुपकारः सञ्जायते। तत्र नवनिधयः शास्त्रेषु प्रसिद्धाः। तथाहि—

[१] महापद्मश्च, [२] पद्मश्च, [३] शङ्खो, [४] मकर-[५] कच्छपौ।
[६] मुकुन्द-[७] कुन्द-[८] नीलाश्च-[९] खर्वश्च निधयो नव॥

अङ्के वा गृहे वा निधानादेव—एते लक्ष्मीं, सपरिच्छदान्नवस्त्रप्राचुर्य्यं, भोगसौभाग्यं सम्पादयन्तीति कृत्वा 'निधयः' आख्यायन्ते। तथैव निधिविशेषा अष्टौ मणयोऽपि श्रूयन्ते। ता यथा—इन्द्रमणिः, जाङ्गिड़मणिः प्रतिसरमणिः, वरणमणिः, दर्भमणिः, औदुम्बरमणिः, शतवारमणिः, अस्तृतमणिरित्येताः। तासामासामथर्ववेदस्याथर्वाङ्गिरा-प्रकरणे सुविशदं निरूपणम्। प्रयोगपद्धतिश्च तत्रैव वैशद्येन निरूपिता द्रष्टव्या।

पूर्वोक्तं सर्वमपि विद्याबलं ब्रह्मबलम्। सैषा ब्रह्मविद्या प्राधान्येन ब्रह्मवीर्य्यसंवर्द्धिनी सती ब्राह्मणवर्णायैवोपयुज्यते। अन्यच्च क्षत्रवीर्य्यसम्पादकं क्षत्रबलम्। सैषा क्षत्रस्वरूपसमर्पिका क्षत्रविद्या क्षत्रियाणामेव प्राधान्येन बलप्रवर्द्धिकेति तत्रैव वर्णे प्रतिष्ठिता इत्यवगन्तव्यम्। तदिदं क्षत्रबलं, क्षत्रविद्या वा दैव—यौन—भौत—कर्म्म—भेदतश्चतुर्द्धा विभक्ता भवति। एकैकं बलं पुनः षोडश—षोडशेति कृत्वा सम्भूय क्षत्रबलानामपि चतुःषष्टिरेव सम्पद्यते। स एष अस्त्रविभागो मन्त्रप्रधानः। अन्यश्च शस्त्रविभागः। तान्येतान्यमोघवीर्य्याणि मन्त्रशक्तियुतान्यव्यर्थानि—दैव—यौन—भौत—कर्म्म—भेदभिन्नानि महास्त्राणि नामतो निर्द्दिश्यन्ते। दैवास्त्रविभागः प्रथमः। स च षोडशविधः। तथाहि—

[१] ब्रह्मशिरोऽस्त्रम्, [२] ब्रह्मास्त्रम्, [३] पाशुपतास्त्रम्,
[४] वैष्णवास्त्रम्, [५] वारुणास्त्रम्, [६] नारायणास्त्रम्,
[७] ऐन्द्रास्त्रम्, [८] प्राजापत्यास्त्रम्, [९] आग्नेयास्त्रम्,
[१०] वायव्यास्त्रम्, [११] कौवेरास्त्रम्, [१२] पार्जन्यास्त्रम्,
[१३] त्वाष्ट्रास्त्रम्, [१४] कालास्त्रम्, [१५] याम्यास्त्रम्,
[१६] दानवास्त्रमित्येतानि दैवास्त्राणि षोडश।

यौनास्त्रविभागो द्वितीयः षोडशविधः । तथाहि—

स्कान्दास्त्रम्, प्रथमास्त्रम्, वैनायकास्त्रम्,
कूष्माण्डास्त्रम्, गणास्त्रम्, गान्धर्वास्त्रम्,
राक्षसास्त्रम्, पैशाचास्त्रम्, भौतास्त्रम्,
वैतालास्त्रम्, शरभास्त्रम्, तार्क्ष्यास्त्रम्,
शाबरास्त्रम्, फैरवास्त्रम्, मातङ्गास्त्रम्,
नागास्त्रमित्येतानि यौनास्त्राणि षोडश ।

भौतास्त्रविभागस्तृतीयः षोडशविधः। तथाहि—

मकरास्त्रम्, सार्पणास्त्रम्, भारुण्डास्त्रम्,
उलूकास्त्रम्, गालणास्त्रम्, पाषाणास्त्रम्,
कालकूटास्त्रम्, चाक्रास्त्रम्, ऐषीकास्त्रम्,
बलास्त्रम्, अतिबलास्त्रम्, औदुम्बरास्त्रम्,
राजसास्त्रम्, हैमनास्त्रम, गुह्यास्त्रम्,
शौरास्त्रमित्येतानि भौतास्त्राणि षोडश

कर्म्मास्त्रविभागश्चतुर्थः षोडशविधः । तथाहि—

उन्मादास्त्रम्, स्तम्भनास्त्रम्, कम्पनास्त्रम्,
जृम्भणास्त्रम, जम्भकास्त्रम्, मूर्च्छनास्त्रम्,
निमीलनास्त्रम्, उत्पातास्त्रम्, प्रस्वापनास्त्रम्,
ज्वरास्त्रम्, भ्रामकास्त्रम्, अचेतनास्त्रम्,
मोहनास्त्रम्, वैद्युतास्त्रम्, तिमिरास्त्रम्,
तामसास्त्रमित्येतानि षोडश कर्म्मास्त्राणीति संभूयेतैषां चतुःषष्टिः ।

अस्त्राणामेषां—सत्यवान्, सत्यकीर्त्तिः, घृष्टः, विमलः, योगधरः, विनिद्रः, इत्येवमादयः पृथक् पृथक् संहाराः श्रीरामभद्रं प्रति विश्वामित्रेणोक्ता यथायथं द्रष्टव्या वाल्मीकीये । 'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायतः पाश्चात्यानां नरसंहारकारकं सर्वमपि विषाक्तं गैसाभिधं तत्त्वमस्त्रविज्ञानस्य प्रान्तभागे एव निमग्नं द्रष्टव्यम् । शस्त्राणि तु साधारणान्यष्टादश । तानि यथा—

सहचर्म्मखड्गभेदाः, सधनुर्बाणश्च परिघश्च ।
पट्टिश-तोमर-कुन्ताः, खेट-गदा-परशु-चक्रशूलानि ॥१
शक्ति-मुद्गरपाशौ, हलमुसलभिन्दिपालमसिपुत्री ।
सशतघ्नी च भुशुण्डीत्येते शस्त्रास्त्रभेदाःस्युः ॥२॥
एषामेकैकस्य च भेदाः पुरातनैः क्लृप्ताः ।
प्राधान्यतस्त्वमन्त्राण्येतान्यष्टादशास्त्राणि ॥३॥

तदित्थमुक्तेन शस्त्रास्त्रयुतेन क्षत्रवीर्य्येण परिरक्षितया पूर्वोक्तया ब्रह्मविद्यया, पदार्थविद्यया वा भूसुरवंशावतंसो ब्राह्मणः साक्षाद् ब्रह्म इव विद्यमानः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः । नेदानीं युगे, किन्तु पूर्वयुगे—त्वस्या ब्रह्मविद्याया माहात्म्यमुद्भावयन्नाह भगवान् याज्ञवल्क्यः—

"तदाहुः—

'यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या-मन्यन्ते' इति ।

एवञ्च ब्रह्मक्षत्रवीर्य्यपरिवृद्धिहेतुभूताः पूर्वोक्ताः सर्वा अपि विद्याः परम्परया साक्षाद्वा वेदमूला एवेति साधूक्तं केनचित्—'भूतं भव्यं भवच्चैव सर्वं वेदात् प्रसिद्ध्यति' इति । स एष प्रथमः प्रसङ्गो पदार्थविज्ञानात्मकः संक्षेपेण प्रदर्शितः ॥१॥

इति—पदार्थविज्ञानं नाम प्रथमं पर्व ।

साण्डू
च्यवन-प्राशावलेह
(अष्टवर्गयुक्त)
थण्डकालमे लेने के लिये अुत्कृष्ट टॉनिक. साथमे "चतुर्मुख" लेनेसे जलद गुण आता है.
दत्तात्रेय कृष्ण साण्डू ब्रदर्स चेम्बूर प्रायव्हेट लि.
चेम्बूर-बम्बई-७१
CHYAVANA PRASHA
च्यवन-प्राश
दत्तात्रेय कृष्ण साण्डू ब्रदर्स
SANDU BROS

दीपावलिः

[ले० श्रीहजारीलालशास्त्री, नवलगढ]

विस्तृते भूमण्डलेऽस्मिन् सर्वेषु देशेषु मानवमानससंतोषाय नानानामभिः विविधा महोत्सवा मान्यन्ते तत्तद्देशवासिभिः ।

अस्माकमार्यावर्तेऽपि अनेके उत्सवा यथासमयं सोत्साहं मान्यन्ते । प्राधान्येन निर्देशा भवन्तीति न्यायमनुसृत्य ब्राह्मणादिवर्णाश्रमप्रधाने देशेऽस्मिन् प्राधान्येन चत्वारो महोत्सवाः प्रचलिताः सन्ति ।

ब्राह्मणानां मुख्याः श्रावणीकर्म, रक्षाबन्धनम्, क्षत्रियाणां विजयादशमी (दशहरा), वैश्यानां दीपावलिः शूद्राणाञ्च होलिका ।

यद्यपि सर्वेषु महोत्सवेषु सर्व एव सोल्लासाः सम्मिलिता भवन्ति, तथापि वर्णानुसारेण एष विभागः कृतोऽस्ति । इदानीञ्चैवं कुर्वन्ति च, अस्माकं देशे प्राचीनकाले वर्णानां पार्थक्येऽपि सर्ववर्णानां पूर्णतया संघटनमासीत् । एकस्य कार्ये महोत्सवे च अन्ये सोत्साहाः सहयोगं कुर्वन्ति स्म । एतत् प्रत्यक्षमेवालोक्यते यथावसरं महोत्सवावसरे ।

उपाकर्मणि ब्राह्मणक्षत्रियवैश्या विहितोपनयनसंस्काराः सम्मिलिता भवन्ति, रक्षाबन्धने च ब्राह्मणादिशूद्रपर्यन्ताः सम्मिलिता भवन्ति । एवमन्येषु विजयादशमी, दीपावली, होलिकाभिधेषु महोत्सवेषु तत्तद्वर्गप्राधान्येऽपि सर्ववर्णीया मानवाः सम्मिलिता भवन्तीति ।

अधुनैष विचारः समुल्लसति मानसे मानवानाम्, यत् कुतः कालात् किमर्थमेष उत्सवो दीपावलिनामा प्रचलित आसीत् ।

अत्र बहुविधा जनश्रुतिः पुराणोक्तिश्च । केचित् कथयन्ति यद् यदा श्रीरामचन्द्रः राक्षसं रावणं हत्वा स्वराजधानीमागात्, तदा विजयहर्षप्रदर्शनाय गृहमार्जनम्, विपणिसज्जा, दीपपंक्तिप्रदर्शनञ्चाकारि । केचिच्च "यदा भगवता श्रीकृष्णचन्द्रेण गोपगोकुलरक्षणाय सप्तदिनपर्यन्तं गोवर्धनो गिरिरधारि कराङ्गुल्यग्रे, तदा श्वः श्रीगोवर्धनदेवपूजनं मवितेति प्रसन्ना गोकुलवासिनः श्रीकृष्णाभिमतानुयायिनो नन्दप्रभृतयो गोपाः दीपावलिमकार्षुः । कैश्चिच्च नवान्नभोजनयागाय प्रारब्ध एव उत्सव आसीत् । एवंविविधप्रकारेणास्य दीपावलिमहोत्सवस्य प्रचारकारणमुपन्यस्यन्ति पुरातत्वविदः ।

अस्तु वा किमपि प्रधानं कारणमस्य प्रचालनपरम्परायाः, वस्तुतोऽयं महोत्सवो विचारदृष्ट्या सर्वजनानां कल्याणकारी मनोहारी च वर्तते । उत्सवदिनात्पूर्वमेव वर्षाजनितगृहजीर्णताया मालिन्यस्य च दूरीकरणाय सुधालेपनं गृहभित्तीनाम् गोमयमृत्तिकया च लेपनं निवासभवनप्रांगणानां सर्वथा स्वास्थ्यलाभाय महोपकारि वरीवर्ति । प्रधानतया लक्ष्मीप्राप्त्यर्थमनुष्ठीयते । उचितमपि एतत्, लक्ष्मीस्तत्रैवायाति यत्र सर्वत्र स्वच्छता, प्रसन्नता प्रकाशता च ।

अस्मिन् दिने स्वस्वविश्वासानुसारं श्रद्धापूर्वकं गणेशगौरीपूजनं, नवग्रहपूजनं, कलशस्थापनं, पुण्याहवाचनञ्च विधाय श्रीलक्ष्मीपूजनं षोडशोपचारैर्विधीयते। पूजनानन्तरं यथाशक्ति ब्राह्मणान् भोजयित्वा स्वयमपि गृहस्वामिनः सपुत्रदारभृत्यवर्गाः स्वादु भोजनं कुर्वन्ति। रात्रौ जागरणं मध्ये२ लक्ष्मीपूजनमारार्तिक्यञ्च कुर्वन्ति। ब्राह्मणद्वारा स्वयञ्च लक्ष्मीप्राप्त्यर्थं गोपालसहस्रनामपाठं कारयन्ति कुर्वन्ति च। प्रातः पूजनं विधाय स्थापितदेवानां विसर्जनं विदधति, प्रसादञ्च प्रयच्छन्ति लक्ष्म्याः। स्वस्वमर्यादानुसारं बाला युवानो वृद्धाःस्त्रियश्च स्वपूज्यानां गृहे गत्वा प्रणत्याशीर्वादान् गृह्णन्ति।

अस्मिन् उत्सवे हर्षप्रकर्षप्रदर्शनाय मनोविनोदाय च विस्फोटकपदार्थानामपि प्रयोगं कुर्वन्ति। परन्त्वेतत् सर्वथा हानिकरमेव। प्रथमन्तु निरर्थको धनव्ययो भवति, पुनश्च विस्फोटकपदार्थानां चालनेऽसावधानतया देहदाहः प्राणहानिश्च जायते। अतः सर्वथा हेयमेतत् कल्याणमभीप्सुभिः।

अस्मिन् उत्सवे द्यूतक्रीडनं, लक्ष्मीवृद्धिकरं मत्वा, अक्षैर्दीव्यन्ति धनराशिं व्ययीकृत्य मानवाः।

तत्र चेत्थं पौराणिकीं कथां कथयन्ति।

दीपावलीदिवसे भगवान् शिवो भगवत्या पार्वत्या सहाक्षैरदीव्यत्, पराजितश्चाभवत्। दुःखितः कैलाशं विहाय गङ्गातटमासाद्य वसतिं चकार। कार्तिकेयः शिवपार्वत्योर्वृत्तान्तमुपलभ्य पार्वत्या सह अक्षैर्देवितुमक्षक्रीडायां चातुर्य्यमाप, गत्वा च पार्वत्या सह अक्षैरदेवीत्। अस्मिन् समये भगवती पार्वती सर्वमहारयत्, श्रीकार्तिकेयश्च विजयं लेभे।

मातरं पराजितां दृष्ट्वा श्रीगणेशो भ्रात्रा षडाननेन सममक्रीडदक्षैः। इदानीं सेनानीः पराजितोऽभवत्। पार्वत्याः आह्वानाय शिवः गणेशं प्रेषितवान्। गणेशो मूषकमारुह्य गङ्गातटं गच्छति स्म। श्रीनारदमुनिर्वार्तामिमां ज्ञात्वा श्रीविष्णोः सविधे वैकुण्ठमासाद्य श्रीपार्वतीसमीपे श्रीगणेशगमनवृत्तान्तमचकथत्। श्रुत्वा च भगवान् विष्णुः पार्वत्या पराजयाय स्वमक्षरूपं चकार। अक्षेण तेन क्रीडद्भिः शिवनारदादिभिः पराजिता भगवती पार्वती। विष्णोः कपटाक्षरूपं बुद्ध्वा पार्वती क्रुद्धाभवत्। यथाकथञ्चित् शान्तिं प्रापिता सुतुष्टा वरं ददौ 'यो दीपावलीदिनेऽक्षैर्देविष्यति, स वर्षपर्यन्तं समृद्धो भविष्यति' इति।

परन्त्वेतत् क्रीडनं परिणामेऽसुखकरमलाभप्रदञ्चामानि नीतिविन्मानवैः। प्रथमन्तु द्यूतक्रीडायां सर्वकारस्य (सरकार) अनुशासनभंगापराध आपतति शिरसि। कश्चिद्राजपुरुषोऽवलोकयेत्, तत्परितोषाय स्वोन्मोचनाय च तस्मै कियद्द्रव्यमवश्यं देयं भवतीति। अन्यथा दृढबन्धनेन बंदीकृत्य कारागारं प्रापयेत्। तत्र च न्यायाधीशैः कारागारसेवनं सापमानमाज्ञाप्यते। तत्र च कष्टप्रदान् नियमान् पालयन् समयं यापयति, पश्चात्तापञ्च करोति। इत्थञ्चाऽमार्गेणोपार्जितं द्रव्यमिह परत्र न सौख्यदं भवति। द्रव्यार्जनञ्च कीर्त्यै समुत्पाद्यते, उक्तपरिणामेन च कीर्तिह्रासः, किमनेन हस्तगतं स्यात्?

अपरम् प्रायेण तत्र द्यूतक्रीडने पराजिता धनहीनां एव निर्गच्छन्ति। यदि कश्चिद्दैववशात् कियत् प्राप्नोति तस्मात् तत्रत्याः क्रीडनयोजका गृह्णन्ति समीपस्थाः चाटुकाराश्च। अवशिष्टेन विपणेः अधिकमूल्यानि वस्तूनि क्रीणाति, बालकेभ्योऽन्येभ्यश्च पुरस्काररूपेण कियद्ददाति, अन्ते किमपि नावशिष्यते। अतश्च पूर्ववदेव तिष्ठति। अतोऽनया द्यूतक्रीडया सर्वथा हानिरेव न कोऽपि लाभः।

सर्वगुणसम्पन्नैरप्रतिभटैरपि पाण्डवैर्युधिष्ठिरादिभिरस्यैव द्यूतस्य परिणामो राज्यलक्ष्म्यास्त्यागो वनगमनञ्चान्वभावि, निषधाधिपते राज्ञो नलस्य भ्रात्रा पुष्करेण द्यूतेन क्रीडतो या दशाऽजनि तां महाभारताऽभिज्ञो विज्ञः को न वेत्ति।

अतो द्यूतक्रीडनं सर्वथा त्याज्यम्। विशेषतयास्मिन् आनन्दप्रदे दीपावलिमहोत्सवे।

अवसरेऽस्मिन् व्यापारनिपुणैः धानकैः स्वीयायव्ययौ निरीक्षणीयौ, व्यापारवृद्धयै नवीनः पन्था गेवषणीयः। नवीना नवीना योजनाश्च विचारणीयाः, देशस्य निर्यातव्यापारो वर्धनीयो येन देशस्य धनवृद्धिः स्यात्। अर्जितेन द्रव्येण विविधैर्यन्त्रसाधनैः वस्तुनिर्माणोद्योगो वर्धनीयः। श्रमजीविनश्च पोषणीयाः। इतस्ततो महाविद्यालयस्थापनेन स्वदेशीया जनाः शिक्षणीयाः। दीनेभ्यश्छात्रेभ्यो वृत्तिप्रबन्धं विधाय ते चोच्चशिक्षया शिक्षणीयाः।

एवंविधानेनैवास्माकं दीपावलिमहोत्सवः सफलः स्यात्। अनयैव रीत्याऽस्माकमुन्नतिः, लक्ष्मीप्राप्तिश्च निश्चप्रचा।

अस्माकमेष भारतीयमानवसिद्धान्तोऽपि—

सर्वत्र सुखिन

सर्वे कुशलिनः सन्तु सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।

भव्यानि नैजभवनानि निजाङ्गणानि
कृत्वा सुधाधवलितानि मनोहराणि।
स्वतन्त्र्यमोदमुदिता जनता इदानीं
दीपावलिं वितनुयुर्महतीं महेऽस्मिन्॥
ओं शान्तिः, शान्तिः, शान्तिः।

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा–रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्–

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेनरक्षुगर

राजस्थान हस्तकला का केन्द्र है

राजस्थानी कला के नमूने खरीद्कर अपने घरों को सुशोभित कीजिये

तथा

गृह उद्योगों को प्रोत्साहन दीजिये

- ★ हाथीदांत के खिलौने
- ★ लाख व नगीनों के कंगन
- ★ बंधाई व छपाई के स्कार्फ
- ★ जोधपुर की बनी शीतल जल की झारियां
- ★ चन्दन की लकड़ी के खिलौने
- ★ रंगीन एवं बंधेज की साड़ियां
- ★ पक्के रंग की चादर
- ★ लकड़ी एवं खश की बनी वस्तुएं
- ★ कलापूर्ण सामान
- ★ नीले व सफेद पाटरी के सामान
- ★ आकर्षक नमूने की दरियां
- ★ सांगानेरी रंगाई व छपाई के वस्त्र इत्यादि
- ★ उदयपुर के सुन्दर लकड़ी के खिलौने
- ★ जयपुर की कशीदा की हुई जूतियां व जूते
- ★ जयपुर की प्रसिद्धि-प्राप्त चूड़ियां व चूड़े
- ★ कोटा के सुन्दर डोरिये

प्रत्येक सरकारी विक्रय केन्द्र पर प्राप्त

राजस्थानी हस्तकला के नमूने अन्तर्राष्ट्रीय प्रदर्शनियों में भी ख्याति प्राप्त कर चुके हैं

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
क्वीन्स वे लेन, नई दिल्ली

राजस्थान हैण्डीक्राफ्टस एम्पोरियम
जयपुर, जोधपुर व उदयपुर

राजस्थान राज्य द्वारा प्रसारित

खगोलवर्णनम्

पूर्वानुवृत्तम

(ले० श्रीमल्लिनाथ चौमालः)

अथ सौरपरिवाराध्यायः तृतीयः

अथ किंन्नाम सूर्य इत्याह

सूर्यः प्रसिद्धो निरपेक्षचार—
स्तन्निघ्नचारा ग्रहनामभाजः ।
उपग्रहास्तु ग्रहनिघ्नचारा—
ग्रहाः सपुच्छा इह केतुसंज्ञाः ॥१॥
तेषां धराया अतिसन्निकृष्ट—
स्तापप्रदोऽयं किल सूर्य एकः ।
अन्ये तु सूर्या अतिविप्रकृष्टाः—
स्फुरन्ति रात्रौ दिवसे त्वदृश्याः ॥२॥

सूर्यः सर्वेषु ग्रहेषु प्रसिद्धो मुख्यो भवति, तथा निरपेक्षचारः स्वाश्रयगतिको वा भवति तन्निघ्नचाराः तेन सूर्येण प्राप्ता गतिर्येषां ते, ग्रहनामभाजो ग्रहनामधारिणो भवन्ति । ग्रहनिघ्नचारा उपग्रहा भवन्ति । तथा सपुच्छा ग्रहा इह केतुसंज्ञका भवन्ति । यस्य परितो ग्रहोपग्रहकेतवो भ्रमन्ति स सूर्य इत्यभिप्रायः ॥ १ ॥ तेषां तारात्मकानां सूर्याणां मध्ये धरायाः पृथिव्या अति सन्निकृष्ट अत्यन्तसमीपस्तापप्रदोपयमेक एव सूर्योऽस्ति । योऽस्मदुपाश्रितः अस्माभिः सेव्यते सः । अन्ये तु सूर्या अतिविप्रकृष्टा अतिदूरस्थिताः सन्तो रात्रौ स्फुरन्ति, दिवसे त्वदृश्या एव भवन्ति । अतो योऽस्मदीयः सूर्यस्तस्य यद्राज्यन्तत्सौरचक्रमिति कथ्यते । तस्मिन् सौरचक्रे ये ग्रहास्तेषां वर्णनमग्रे भविष्यति ।

अथ सूर्यवर्णनम्

महत्त्वं सूर्यबिम्बस्य पृथिवीतलवासिनः ।
बुद्धिमन्तो विजानन्ति वैज्ञानिकयुगर्षयः ॥३॥
आत्मा वै स्थावराणां यो जंगमानां तथैव च ।
आख्यातो वेद वाक्येषु तन्महत्त्वं कथं वदेत् ॥४॥
तेजसामपि तेजस्वी शासकानां च शासकः ।
सृष्टिप्रलयहेतुर्यो लोकानां चैव पालकः ॥५॥
सूर्य बिम्बात समायाति प्रकाशो दिवसे भुवम् ।
रात्रावपि निशानाथो यस्मात् प्राप्य प्रयच्छति ॥६॥
सायं प्रातस्तु या शोभा रक्तरागप्रदर्शिनी ।
यमाश्रित्य जगत्सर्वं सिंचति प्रेमवारिणा ॥७॥
तेजसा सूर्यबिम्बस्य बाष्पराशिः समुत्थितः ।
उदधेर्वार्दलं भूत्वा कृषिं सर्वत्र सिंचति ॥८॥
क्षोभं तु चुम्बकीयस्य विद्युच्छक्तिं तथैव च ।
सम्पादयति यो भूमौ विशेषं लांछनान्वितः ॥९॥

स्वयंप्रकाशो निरपेक्षचार—
केन्द्रस्वरूपो निजमण्डलस्य ।
आकृष्टशक्त्या परिकर्षयन् यो—
लोकान् बिभर्ति ग्रहपिण्डरूपान् ॥१०॥
व्यासो रवेरभ्रखशैलरुद्रेन्दुतुल्य—
उक्तोऽस्य तु मध्यकर्णः ।
खादित्यलक्षघ्नसमः, प्रभातो—
धरां समायातिपलैर्द्विविंशैः ॥११॥

घनीकृतव्यास इहैशनिघ्नः—
स्वर्गैर्विभक्तोऽत्र घनं फलं स्यात् ।
अतो भुवोऽर्कः कुकृताभूचन्द्रा—
शिव विश्व तुल्यै गुणितोऽधिकः स्यात् ॥१२॥

सूर्य एव जगतः सर्वस्वम्, आत्मा च "सूर्य आत्मा जंगतस्तस्थुषश्च" इति श्रुतिः । सूर्येणैव सर्वे ग्रहा आकर्षणरज्जुभिर्वशीकृताश्च

भ्रमन्ति। "प्रजानन मित्रो दाधार पृथिवी मुतद्यां मित्रः कृष्टीरनिमिषाभिचेष्टे" ऋ० ३-४-५। तथा ग्रहमण्डलमध्यगतः सूर्यः "अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम्। इति भागवते। अस्तु, सूर्य एका ताराऽस्ति। स च स्वयं न कस्यापि पिण्डविशेषस्य परिक्रमां करोति। परं तेन सह तस्य परिभ्रमणकारका अनेकग्रहादि पिण्डाः सन्ति। ते च स्वयं प्रकाशशून्याः सन्ति सूर्य एव तेभ्यः प्रकाशं ददाति। सूर्यस्तु स्वयं प्रकाशरूपः। आश्चर्यकरं कृत्स्नं सूर्यवृत्तान्तम्। ज्योतिर्विद्भिर्निश्चितं खल्वेतत् यत्, कतिपयास्तारास्तु अति विप्रकृष्टा बिन्दुसदृश्यः प्रतीयन्ते, परन्तु ताः सूर्यान्महत्यस्तथा ततोऽप्यधिकप्रकाशवत्यश्च सन्तीति। परन्तु बुद्धिगतकरणमतीव कठिनम्। पूर्वोक्तवत् एकस्मिन पलात्मके काले प्रकाशस्य गतिः ५५८०००। अनेन भीषणवेगेन गच्छतः प्रकाशस्यापि, सूर्याद् भूमीपर्यन्तमागमने सार्धैक विंशति २१$\frac{१}{२}$ पलात्मक समयः लगति यथा $\frac{१२००००००}{५५८०००} = २१\frac{२८२०००}{५५८०००} = २१\frac{१}{२}$।

श्लोके यद्द्वाविंशैः पलैरित्युक्तं तत्स्थौल्यात्। तथा सूर्यस्य घनफलम् $= \frac{११}{२१} \times १११७०० \times ११७००$। पृथिव्या घनफलम् $\frac{११}{२१} \times १०१८ \times १०१८ \times १०१८$। अत्र सूर्यघनफले पृथिवीघनफलेन भक्ते

$$= \frac{\frac{११}{२१} \times १११७०० \times १११७०० \times १११७००}{\frac{११}{२१} \times १०१८ \times १०१८ \times १०१८} = \frac{११\times२१}{११\times२१}$$

$$\times \frac{१११७०० \times १११७०० \times १११७००}{१०१८ \times १०१८ \times १०१८}$$

$$= \frac{१११७०० \times १११७०० \times १११७००}{\frac{११}{२१} \times १०१८ = १०१८ = १०१८}$$

$$= \frac{१३६३६६८६१३००००००}{१०५४६७७८३२} = १३२१०४१,$$ लब्धा इमे पृथिवीतुल्यपिण्डाः। अर्थात् आकाशस्य यावत् स्थानं सूर्येणाधिकृतं, तत्स्थाने पृथिवीतुल्या १३२१०४१ एते पिण्डाः समायान्ति। अतः किम्वक्तव्यं सूर्यमहत्त्वस्य। परन्तु सूर्यस्य यथा विस्तृतेर्महत्त्वं, तथा तौल्येन। अत्र तु तस्यापेक्षिकगुरुत्वं, पृथिवीगुरुत्वस्य चतुर्थांशम। अस्यायमर्थः एकं सूर्यस्य शकलं त्रोटयित्वा तत्तुल्यमेव यदि पृथिवीखंडं त्रोट्यते तदा सूर्यखण्डात पृथिवीखंडं चतुर्गुणं भवति। अतः सूर्यः, तौल्ये पृथिवीतः $\frac{१३२१०४१}{४}$ एतद्गुणो भवति। सूर्यस्यैतस्यास्तौलिकलघुतायाः कारणं चैतत यथा पृथिवी घना तथा सूर्यो न। सूर्यस्य गुरुत्वादेरन्तरम तस्य तापो द्रष्टव्यः, यदि १२०००००० एतत्तुल्ययोजनान्तरे स्थितोऽपि सः घर्मेणाऽस्मान् विह्वलीकरोति, तदा तस्य तले तु का दशा भवेत्, एवंभूतस्य धर्मस्य वयं कल्पनामपि कर्त्तुमसमर्थाः। यदि कस्यापि ज्वरमायाति तदा वैद्या घर्ममातृ यंत्रं (थर्मामीटर) प्रयुंजन्ति, यदि ११० अंशेभ्योऽधिको घर्मः स्यात्तदा स रोगी कदापि न जीवति। परन्तु सूर्यस्य तले तु १५००० एतेभ्योंऽशेभ्य २०००० एतत्पर्यन्तम् घर्मस्तिष्ठति। तदात्र किंवक्तव्यम्। अथ खगोलवर्त्तिपिण्डानां मध्ये सूर्याचन्द्रमसावेवैवं भूतौ स्तो, यौ स्वस्वपृष्ठं अस्माकं दर्शयतः। परं, अनयोर्मध्ये महदन्तरम्। चन्द्रस्य प्रकाशः शीतलः तत्र कष्टप्रदस्तापो नास्ति। तत्र किंचित् समयपर्यन्तं चक्षुषा द्रष्टुं शक्यते। परन्तु सूर्यस्य स्थितिरस्माद्विपरीता। अस्य तापोऽसह्यः। अत्र चक्षुर्न स्थिरीभवति। अतः सूर्यस्य दर्शका दूरदर्शकयंत्रे कृष्णवर्णकाचं प्रयुंजन्ति। तथा साधारण्येन तु, धूमावृतं, काचशकलमपि कार्यं निर्वहति, अनेनापि सूर्यं द्रष्टुं शक्यते। परन्तु धैर्यमवश्यमेवालंब्यम्। एवंदृश्यमाने प्रथमं द्वित्रिदिने एव, यत्कृष्णत्वं चिन्हरूपेण दृश्यति तत्र, तान्येव सूर्यलांछनानि

सन्ति। न हि च ते आकारेण सदृशाः, एक स्थाने वा सूर्यमध्यमरेखातो, ऽत्यन्तयाम्योत्तरभागेषु दृश्यन्ते,ऐषां परितः प्रचण्डः प्रकाशो दृश्यते, तन्मध्ये घोरांधकारकूपाः प्रतीयन्ते। कदा कदा तु इमे लक्षयोजनमिता भवन्ति। परन्तु सदैव एतत् परिणामं पर्यन्तं न गच्छन्ति। तथाऽमीषां सम्बन्धेऽत्यन्तं वैचित्र्यमेकम। एतेषां ह्रासो वृद्धिश्च नियमेन भवति। प्रत्येकद्वादशवर्षानन्तरम् वा सार्धैकादशवर्षानन्तरं एतेषां वृद्धिर्भवति। यथा वैक्रमीय सम्वत् १९८९ अधिकलंघन समयः। तथा सम्वत् १९९७-९८ एवमेवाग्रेऽपि। एभ्योऽतिरिक्तसमाः स्वल्पलांछनाः। एतेषां दर्शनेन एकोऽन्योऽपि सिद्धान्तो निश्चीयते सूर्योऽपि पृथिवीवत अक्षभ्रमणं करोति। परन्तु तस्य घनाभावात् सर्वे भागाः पृथिवीवत् सदैव न भ्रमन्ति,तस्य मध्यभागस्य, अक्षभ्रमणे पंचविंशतिदिवसा लगन्ति। तथा उत्तरदक्षिणभागानां तु सार्धसप्तविशतिदिनानि। अतो वक्तव्यं पृथिव्या दिनमानात् सूर्यस्य दिनमानं पंचविंशतिगुणमिति। तथामीषां लांछनानां संख्या वर्धते, तदा पृथिव्यां विद्युत्क्षोभाः, चुम्बकीयक्षोभाश्च भवन्ति। यत्र तत्र सूक्ष्माणि चुम्बकयंत्राणि भवन्ति तत्र तत्र तानि स्वयमेव क्षुब्धानि भवन्ति, तदा अनुभूयते विद्वद्भिः, अत्र कस्याश्चिन्महत्याश्चुम्बकीयशक्तेः प्रभावः पततीति। तद्वर्षे दक्षिणायनसमये उत्तरीध्रुवसमीपे व्योम्नि विद्युत्प्रकाशो दृग्गोचरीभवति। एष दुर्भिक्षकारकः प्रायः। परन्तु तद्वर्षेऽतिवृष्ट्या दुर्भिक्षं पतनीति मन्मतम्, यतः सम्वत् १९७४ वैक्रमीसंवत्सरे एवमेवासीदिति। सूर्यास्याधिकपरिचय, स्तस्य सर्वग्रासग्रहणसमये मिलति। अथावरणानि। सूर्यस्य प्रथमावरणं तत् यद् वयं यहं पश्यामः यच्च प्रकाशमण्डलमिति प्रचक्षते। सूर्ये प्रकाशस्य मुख्यं क्षेत्रमेतदेव। एतत् अत्यंतगम्भीरं निश्चलं च प्रतिभाति। अतोऽस्य क्षोभस्य यथार्थं प्रमाणं न मिलति। अस्योपरि आवरणद्वयं वर्त्तते। एकं प्रत्यादर्शकतराख्यं, अन्यद्वर्णमण्डलम। अनयोर्मध्ये वर्णमंडलं अधिकं महत्त्वपूर्णम। यद्यपि अस्य गांभीर्यमधिकं न, तथापि अग्निसमुद्रोऽयमिति वक्तव्यम। इदं सूर्यताप स्याकरस्तथा समुद्र इव सदैव रंजितो दृश्यते। तथेदमेवं प्रतीयते यथा तप्तवाष्पसमुद्राणां समुद्रः। यथाऽग्नौ प्रज्वलल्लोलशिखाः समुत्तिष्ठन्ति तथैव अस्मादपि पावकशिखराणि समुत्तिष्ठितानि भवन्ति। इमानि रक्तज्योतिःपर्वता, स्तथा वार्दलानीव प्रतीयन्ते। यदा चेमानि शिखराणि लक्षांतरे योजनानि उच्छ्रितानि भवन्ति, तथा त्रुट्यन्ति च, तदा विचित्रं भैरवदृश्यं भवति "ज्वालाव्याप्तदिगन्तरं" मिव प्रतिभांति। अथामीषां सर्वेषामावरणानामनन्तरे सूर्यस्यान्तिमं प्रभामंडलाख्यमावरणं वर्त्तते। अत्र प्रभाशब्देन सूर्यस्य शीतल ज्योतिर्गृह्यते। एतन्मण्डलमत्यन्तं शान्तं निश्चलं च भवति। अस्य ज्योतिः, चन्द्रज्योतिषा सह मिलति। तथा सूर्यतो लक्षान्तरयोजनपर्यन्तं विस्तृतास्ति। इमानि सूर्यस्य मुख्यान्यावरणानि। परन्तु किं वस्तु सूर्यो यश्चैभिरावरणैरावृत इति चेत्प्रश्नस्तदास्य सम्यगुत्तरंमतिकठिनमेव न, किन्तु नास्त्येव। परन्तु विद्वद्भिरनेकधातुमयवाष्पसमूह एव निश्चीयते। यदा चै प्रकाशमंडलं विदीर्यते, तदा तन्मध्यै महान् घोरान्धकारो दृश्यते। किं सूर्योऽपि पृथिवीचन्द्रवत् अन्धकारमयं जगत्। य उपरितः प्रकाशप्रदैः, तापप्रदैरावरणैश्चावृतः। अस्य सन्तोषजनकमुत्तरं नहि मिलति कुत्रापि। परंञ्च यश्च लांछनरूपः सूर्यपृष्ठेऽन्धकारो दृश्यते स जलमयवाष्पसमूहः। यथार्द्रकष्ठस्य दहनसमये तस्मादुत्तिष्ठन् वाष्पः, काष्ठसमीपे तस्य धूम्रवर्णो भवति, तथोपरितो ज्वलच्छिखारूपो भवति। तथैव यथा विवाहादौ गैसस्य प्रकाशः क्रियते, तदा यदि

वेदानां भारतीयसंस्कृतेश्चाभिनवो व्याख्याकारः

स्वर्गतः पं० श्री मोतीलालशास्त्री

हिन्दीमूल ले० श्री शिवकुमार गोयलः
अनुवादको दीनानाथत्रिवेदी "मधुपः" जयपुरम्

गतसितम्बरमासस्य २० तारिकायां सुप्रसिद्धो वेदव्याख्याता पं० मोतीलालशास्त्री दुर्गापुरा (जयपुर) स्थित–राजस्थान–वैदिकतत्त्वशोधसंस्थानस्य मानवाश्रमे स्वर्गतोऽभूत् । शास्त्रिमहोदयस्यास्य स्वर्गमनाज्जातेन महता शोकेनाखिलेऽपि भारते साहित्यसेविनां धर्मप्राणानां जनानां मनस्सु स्थानमक्रियत । अतीव कष्टप्रदं समाचारमिमं श्रुत्वा राष्ट्रपति डा० राजेन्द्रप्रसाद महाभागोऽप्येकत्र शोकसंदेशेऽभाषत—

पण्डितमोतीलालशास्त्रिणः सुरलोकयानस्य समाचारं लब्ध्वाऽहममन्दं दुःखमनुभवामि । शास्त्रिमहोदयो वेदादिशास्त्राणां भारतीयसंस्कृतेश्चासीत् प्रकाण्डपण्डितः । तस्य च वेदविज्ञानविषयकाणां प्रभावशालिनां भाषणानां श्रवणस्य मयाऽवसरो लब्धः । अतोऽहं निःसंकोचमिदं वक्तुं शक्नोमि यत् स शास्त्रिमहोदयोऽसाधारणव्यक्तित्वस्य तथाऽप्रतिमप्रतिभायाश्चासीन्महापुरुषः" इति ।

जन्माध्ययनादिकम्

पण्डितराजस्य तस्य जन्म जयपुरस्थ–सुप्रतिष्ठित–ब्राह्मण–परिवारे श्रावणशुक्लपक्षे ३ तिथौ १९६५ तमे वैक्रमाब्दे जातम् । स्वर्गतपण्डितबालचन्द्रशास्त्रिणः कनिष्ठः पुत्र आसीत्सः । प्रारम्भे चतुर्दशवर्षाणि निजगृह एव संस्कृतस्य ज्ञानमधिगतवान् । अनन्तरं च जयपुरस्थ-महाराज-संस्कृत-कॉलेजे व्याकरणशास्त्रिपरीक्षा उत्तीर्णा तेन ।

किञ्चैकदा शास्त्रिमहोदयः स स्वस्य दर्शनगुरुभिर्महामहोपाध्याय--पण्डितश्रीगिरिधरशर्मचतुर्वेदमहाभागैः सह वाराणसेय–ब्राह्मणसम्मेलने भागमगृह्णात् ।

गैसयंत्रस्य नलिकायां वाष्पो (गैस) वेगेन निःसरति, तदा नलिकामुखात् एकद्वयंगुलान्तरे ज्वलितो दृश्यते, नलिकामुखसमीपे तु धूम्ररूप एव प्रतिभाति । तथैव सूर्येऽपि तद्रूपा एव वाष्पसमूहाः सन्ति, ये उपरितो ज्वलन्ति, तस्याभ्यन्तरे तु धूम्ररूपा एव, अतएव लांछनसमयेऽन्धकाररूपाः प्रतिभान्तीति मन्मतम् । क्रमशः

तत्र च सम्मेलने विद्वन्मूर्द्धन्यस्य महामान्यस्य स्वर्गीयपण्डितमधुसूदनझामहोदयस्य वैदिकविज्ञानसम्बन्धिनामतिप्रभावोत्पादकानां व्याख्यानानां श्रवणस्य शोभनोऽवसरः संप्राप्तस्तेन। तत्र तदानीमोझामहाभागस्य व्याख्यानमालां श्रावं-श्रावं मन्त्रमुग्धेनेवाभूयत च। तदैव तेषां शिष्यत्वमङ्गीकृत्य तेषामेव श्रीचरणयोः समुपविश्य यथाविध्यध्ययनमारब्धम्। एवं क्रमेण तेभ्यः समधीयानेन–सर्वास्वप्युपनिषत्सु, पुराणेषु वेदेषु तथान्यान्यशास्त्रेष्वपि प्राप्तं परमं प्रावीण्यम्।

विदेशभ्रमणम्

अथाध्ययनानन्तरं चैतेन समस्तस्य भारतस्य प्रायः सर्वेष्वपि वाराणसी-मोहमयी-कलकत्ता-कानपुरप्रभृतिषु मुख्यतमेषु नगरेषु परिभ्रमणं विधाय स्वस्य प्रभावोत्पादकैर्वैदिकविज्ञानविषयकैर्मनोहरै र्व्याख्यानैः कालेजानां व्याख्यातारः, प्राध्यापकाः, प्राड्विवाकाः, द्राक्तराः, विद्वांसः, साहित्यकारास्तथा विशिष्टाश्छात्राश्चातिप्रभाविताः समकारिषत। व्याख्यानैरेभिः पण्डितवरस्य तस्य प्रतिभायाः प्रभावो दिनकरस्य रश्मिनिकर इव सर्वत्र देशस्य कोणे–कोणेऽपि प्रासरत्।

डॉ० वासुदेवशरण–अग्रवालमहोदयश्च यदा शास्त्रिवर्येण क्रियमाणस्य कृतस्य च वैदिकविज्ञानविषयकस्य कार्यजातस्य चर्चां राष्ट्रपति डा० राजेन्द्रप्रसादस्य पुरतः कृतवान्, तदा राष्ट्रपतिमहानुभाव ऐच्छत्–यदिहैव स्वनिवासस्थाने पण्डितमोतीलालशास्त्रिणं समाहूय तन्मुखाद् व्याख्यानानि शृणुयामिति। तदैवं विनिश्चये जाते श्रीवासुदेवशरणमहानुभावः शास्त्रिमहोदयं सह नेतुं जयपुरमागतः। अथाऽग्रवालमहोदयेन सार्धं १९५६ ख्रिष्टाब्दे दिसम्बर मासस्य १४ दिने नव्यदेहलीस्थितं राष्ट्रपतिभवनमयासीत्सः। राष्ट्रपतिमहाभागश्च शास्त्रिणो भव्यं कृतवान् स्वागतम्। तथा व्याख्यानानामायोजनञ्चाभूत्। ततश्चावसरेऽस्मिन् राष्ट्रपतिमहोदयेनानेके स्थानीयाः सुप्रतिष्ठिता विद्वांसोऽप्यामन्त्रयन्त। दिसम्बरस्य १४ तारिकातः १८ तारिकां यावद् राष्ट्रपतिभवने व्याख्यानानां रसौघः प्रावहत्।

भाषमाणेन शास्त्रिवरेणानेन प्रथमव्याख्याने 'संवत्सरमूला–अग्नीषोमविद्या' स्वरूपस्य विशदं विवेचनमकारि, द्वितीये च 'पञ्चपर्वा विश्वविद्या' सम्यग् विवेचिता, तृतीये मानवस्वरूपस्य परिचयो दत्तः, पञ्चमे च वेदशास्त्रेण सह पुराणशास्त्रस्य समन्वयः, प्रभावोत्पादकरीत्या सम्यङ् निरूपितः।

शास्त्रिमहोदयस्य पञ्चानामप्येषां व्याख्यानानां टेप रिकार्डमप्यकार्यत। तथा राष्ट्रपति महोदयस्येच्छानुसारेण 'सांस्कृतिक–व्याख्यानपञ्चकम्' इति नाम्नैकः संग्रहः प्राकाश्यं नीतः। ग्रन्थस्यास्य भूमिकायां राष्ट्रपतिमहोदयेनाप्यलेखि—

"मया पण्डितमोतीलालशास्त्रिणः पञ्चव्याख्यानानि स्वस्यावासभवन एव कारितानि। तदर्थमन्येऽपि विद्वांसः समाहूताः। शास्त्रिणोऽस्य विषये च मया विचारितमासीद्यत्–भारतीय–संस्कृति–विषये काश्चिच्छोभना वार्ताः श्रोष्यामि, ताश्च मनःकृते लाभप्रदा भविष्यन्तीति। परं भाषण–श्रवणानन्तरं मया समनुभूतं यत्–यावन्मयाऽनुमितमासीत् ततोऽप्याधिका मौलिकी व्याख्येयं प्रासिध्यत्। भारतीयसंस्कृतेर्मौलिकानां विचाराणां वर्ततेऽत्र तालिका। श्रीवासुदेवशरणमहोदयेन प्रबोधितोऽभवमहं यद् देशे विदेशेषु चाधुना कुत्रापि वैदिकसाहित्ये नैवंविधमनुसन्धानविषयकं कार्यं जायमानं विद्यते। एतदपि च परिज्ञातं यच्छास्त्रिमहोदयेन संभवतोऽशीतिसहस्रपृष्ठात्मकं साहित्यं समुपनिबद्धं विद्यते। निधिरयं सर्वथा संरक्षणीयः। आशासे च शासनं संबन्धेऽस्मिन् स्वकर्तव्यं पालयिष्यतीति।"

कार्यक्षेत्रम्

किंच पण्डितप्रवरेण वैदिकसृष्टिविद्याया विषयेऽनेका नवीना वार्ताः समुल्लिखिताः। प्रभावशाली वक्ता

एव केवलं न, लेखनकलापरमपण्डितोऽप्यभूत्सः । अथ च शास्त्रिणा 'शतपथ ब्राह्मणस्य' व्याख्या १८ अष्टादशसहस्रपृष्ठेषु कृता । इदानीमस्य १५०० सार्धैकसहस्रपृष्ठानामेव प्रकाशनं जातम् । डा० सम्पूर्णानन्दमहाभागेन च 'शतपथब्राह्मणस्य' भूमिकायां लिखितं यत्–'शास्त्रिणा विरचिता सरलेयं व्याख्या नूनमद्वितीयैवेति ।

अपि चानेन गीताया भाष्यमप्यतिसरलं विस्तृतं च विरचितम् । गीताभाष्यस्य ८ अष्ट खण्डानि प्रकाशितानि जातानि । एवमुपनिषदां भाष्यमप्यभाषि । भारतीयधर्ममहोत्सवानां वैज्ञानिकं महत्त्वमधिकृत्यापि ग्रन्था अनेके व्यरचिषत । येषु–'रक्षाबन्धनस्य वैज्ञानिकं रहस्यम्, दीपावल्या वैज्ञानिकं रहस्यम्, गोपाष्टम्या वैज्ञानिकं रहस्यमित्यादीनां प्रकाशनमभूत् ।

किंच शास्त्रिणा रचिता अनेके ग्रन्था विदेशेष्वपि लोकप्रियतां प्राप्तवन्तः । फ्रांसस्य सुप्रसिद्धो विद्वान् मि० पी० लेवेस्टिनमहोदयः शास्त्रिणः साहित्येनानेनाति प्रभावितो जातः । तेनाऽस्य "सांस्कृतिक संघर्ष के लिए आमन्त्रण" इति नामकं पुस्तकं फ्रेंचभाषायामनूद्य प्रकाश्यं प्रापितम् । केषाञ्चिच्च ग्रन्थानामंग्रेज्यामप्यनुवादो जातः । सुप्रसिद्धेन पत्रकारेण श्री ऋषिकुमार मिश्रेण 'वेदानां वैज्ञानिक–परिभाषां" नामकस्यास्य ग्रन्थस्यांग्रेज्यामनुवादः प्रकाशितः ।

सुप्रसिद्धो दार्शनिको विद्वान् स्व० डा० भगवान् दासोऽपि शास्त्रिणः साहित्यस्य विषये लिखितवान्– "शास्त्रिमहोदयस्य साहित्यं विलोक्याहं विश्वसिमि–यद् वेदस्य शब्दानां मन्त्राणाञ्च येऽर्थाः समुल्लिखिताः शास्त्रिवर्येण सन्ति, ते विचारशीलानां विपश्चितां नूनं मननार्हाः प्रकाशनीयाः संरक्षणीया" श्चेति ।

वयोवृद्धो वैदिकप्रवरो वेदमूर्तिः श्री सातवलेकरोऽप्येकदाऽभाषत–यद् "भवतां लेखनशैली भवत्यत्युत्तमा, यस्याः प्रभावेण नास्तिकोऽपि वेदे श्रद्धातुं परवशो जायते"–इति ।

स्व० पण्डितमदनमोहनमालवीयमहोदयस्यापि शास्त्रिणां विषये मतमासीत् यत् "शास्त्रिणः सर्वाणि व्याख्यानानि शास्त्रीयप्रमाणविभूषितानि युक्तियुक्तानि रुचिकराणि च विद्यन्ते" इति ।

सुप्रसिद्धः पत्रकारः पराडकरमहोदयोऽपि 'आज' नामकपत्त्रस्य सम्पादकीये प्रतिपादितवान् यत्– "शास्त्रिमहोदयस्य व्याख्यानं येन सकृदपि श्रुतं, स तन्न कदापि विस्मर्तुं शक्नोती" ति ।

संस्कृतस्य प्रचारे प्रयत्नः

किं च संस्कृतस्य प्रचारायातिप्रयत्नशील आसीत् । असकृच्च प्रोक्तं तेन यत् सर्वाभ्योऽपि भाषाभ्यः संस्कृतभाषाऽतिसरलतमा । अथ संस्कृते योऽयं महान् दोषः समारोप्यते कैश्चित्संस्कृतद्वेषिभिर्यत्–संस्कृतभाषा रटनस्य भाषा, अस्याः कण्ठस्थीकरणञ्चावश्यकम्, सहैव विज्ञानशून्याऽपि, अतएव मृतभाषेयमिति ।

अत्र विकल्पद्वयं परिकल्प्य शास्त्रिमहोदयेन सम्यक् खण्डितोऽयं विपक्षिणां पक्षः । यथा हि–संस्कृते रटनन्तु वर्तत आवश्यकम् । परं यस्या भाषायाः शब्दैः सह-सह अक्षराण्यपि रट्येरन्, सा भाषा कठिना भवति, आहोस्वित्–यस्याः केवलं शब्दा एव घुष्येरन् ? । रामः, मानवः, मार्जारः–इत्यादिरूपेण संस्कृतस्य शब्दा एव रट्यन्ते न तु वर्णा अपि । यदाऽन्यत्र आर–ए–एम=राम, एम–ए–एन=मैन, सी–ए टी=कैट–इत्येवं रूपेण शब्दैः समं तदवयवरूपाः स्वरा वर्णा अप्यनिवार्यरूपेण रट्यन्ते । अवशिष्यते च वार्ता विज्ञानस्य । एतत्सम्बन्धे च वयमद्य वर्तमाने युगे किञ्चिन्निवेदयितुमधिकारमेतदर्थं न रक्षेम–यत् स्वमूर्खतया वयं शताधिकेभ्योऽपि वर्षेभ्य एव निजज्ञानविज्ञानपरिभाषा

स्मृतिविमुखाः स्मः सम्भूताः । भाषा–विज्ञानस्य दृष्ट्या संस्कृतभाषेव अर्थगभीरा, बोधगम्या, सरला, प्राञ्जला भाषाऽखिले ऽपि लोके संभवतो नान्या भाषेति ।

अथ शास्त्रिमहोदयस्य समधिकः समयो ग्रन्थलेखन एव व्यत्येति स्म । एवं सततपरिश्रमासेवनवशात् शरीरं बहोः कालात् प्रागेवाऽस्वस्थं जातमासीत् । अतएव हा हन्त ! गत सितम्वरमासस्य २० तारिकायां सायमायुषः ५२ द्विपञ्चाशत्तमे वर्षेऽसारमिमं संसारं परित्यज्य स्वर्गं गतवान् ।

प्रकाशितग्रन्थ–सूची

	रु० न०पै०
१–गीताविज्ञानभाष्यभूमिका–'बहिरङ्गपरीक्षा' प्रथमखण्ड	१५·००
२– ,, 'आत्मपरीक्षा' द्वितीयखण्ड 'क'	२०·००
३– ,, 'ब्रह्मकर्म्मपरीक्षा' तृतीयखण्ड 'ख'	२०·००
४– ,, 'कर्म्मयोगपरीक्षा' चतुर्थखण्ड 'ग'	२०·००
५– ,, 'ज्ञानयोगपरीक्षा' पञ्चमखण्ड 'घ'	३·००
६– ,, 'भक्तियोगपरीक्षा (पूर्वखण्ड) षष्ठखण्ड 'क'	२०·००
७– ,, 'भक्तियोगपरीक्षा' (उत्तरखण्ड) सप्तखण्ड 'ख'	२०·००
८– ,, 'बुद्धियोगपरीक्षा' अष्टमखण्ड 'ग'	२०·००
९–उपनिषद्विज्ञानभाष्यभूमिका—प्रथमखण्ड	२०·००
१०– ,, —द्वितीयखण्ड	१५·००
११– ,, —तृतीयखण्ड	१५·००
१२–ईशोपनिषत्-हिन्दी-विज्ञानभाष्य–प्रथमखण्ड	१५·००
१३– ,, ,, —द्वितीयखण्ड	१५·००
१४–श्राद्धविज्ञानग्रन्थानुगत–'आत्मविज्ञानोपनिषत्' नामक प्रथमखण्ड	२०·००
१५– ,, 'सापिण्ड्यविज्ञानोपनिषत्' नामक तृतीयखण्ड	१५·००
१६–"भारतीय-हिन्दू मानव और उसकी भावुकता" नामक खण्ड चतुष्टयात्मक ग्रन्थ का 'विश्वस्वरूप- मीमांसा' नामक प्रथमखण्ड	१५·००
१७–संस्कृति और सभ्यता शब्दों का चिरन्तन इतिवृत्त, एवं भारतीय–सांस्कृतिक आयोजनों की रूपरेखा	२५·००
१८–दिग्देशकालस्वरूपमीमांसा	२५·००
१९–शतपथब्राह्मणहिन्दीविज्ञानभाष्य—प्रथमकाण्डानुगत प्रथमखण्ड	२५·००
२०–शतपथब्राह्मणहिन्दीविज्ञानभाष्य—प्रथमकाण्डनुगत द्वितीयखण्ड	३०·००
२१–भारतीय-दृष्टिकोण से 'विज्ञान' शब्द का समन्वय	१·५०
२२–वेद का स्वरूपविचार	२·००
२३–क्या हम मानव हैं ? (सांस्कृतिक–आमन्त्रणम्)	२·५०
२४–'वेदस्य सर्वविद्यानिधानत्वम्' (संस्कृतनिबन्ध)	१·५०
२५–राष्ट्रपतिभवनानुगत–व्याख्यान पंचकम्	६·००

(१) सम्वत्सरमूला–अग्नीषोमविद्या
(२) पञ्चपर्वात्मिका–विश्वविद्या
(३) मानव का स्वरूप परिचय
(४) 'अश्वत्थविद्या का स्वरूप–परिचय
(५) वेदशास्त्र के साथ पुराणशास्त्र का समन्वय

श्रीशः

सम्पादकः
भट्ट श्री मथुरानाथ शास्त्री
सहसम्पादकः
देवर्षि कलानाथ शास्त्री

भारती

संस्कृतस्य प्रमुखं मासिकम्

आरोग्याङ्क विशिष्ट सम्पादकाः
१–वैद्य जयरामदास स्वामी भिषागाचार्यः
२–वैद्य सुदेवचन्द्र पाराशरी शास्त्री D.I.M.S.
३–वैद्य जसराज जोशी भिषागाचार्यः

नितान्तं प्रमोदस्थानमेतद् यद् विगतदशवत्सरैर्देववाण्याः प्रचारप्रसारे सचेष्टं संस्कृतमासिकपत्रम् “भारती” आरोग्याङ्क रूपमेकं विशेषाङ्कं प्रकाशयितुमुपक्रमते ।

“भारती” मासिकस्य सरलं रुचिरञ्च संस्कृतमुपयोगिलेखसामग्री चतूरूप्यकमात्रञ्च वार्षिकं शुल्कं नियमितञ्च प्रकाशनं, समेषां राजस्थान–पञ्जाब–उत्तरप्रदेश–बिहार–आन्ध्र–मद्रास–बम्बई–मध्यप्रदेश राज्यानां कृते नूनमाकृष्टिविषयः। अतः एतेषां राज्यानां विद्यालयमहाविद्यालयानां पुस्तकालयानां कृते ‘भारती’ पत्राय मान्यता प्रदत्तास्ति राज्यसर्वकारैः ।

अस्मिन् ‘भारती’ मासिके उच्चस्तरीय साहित्यिकाः समालोचनात्मका लेखाः, गद्यकाव्यम्, निबन्धाः, एकाङ्किनाटकादीनि च सुष्ठु प्रकाशितानि प्रकाश्यमानानि च दृष्ट्वा सर्वप्रदेशानामनेके संस्कृतज्ञाः विद्वांसो वैद्याः संस्कृतानुरागिणश्च नियमितं ‘भारती’ मासिकं प्रापयन्ति ।

भारत्याः समग्रे भारते सहस्रशो ग्राहका अनुग्राहकाश्च अद्यतनीयास्वास्थ्यकरवातावरणे स्वस्था रोगमुक्ताश्च भूत्वा यथा जीवितस्य चरमोद्दश्यमैहिकमामुष्मिकञ्च श्रेयः सम्पादयितुं प्रभवेयुरिति लक्ष्यीकृत्य भारती परिवारेण आरोग्याङ्क इत्यन्वर्थाभिधानं प्रथमंविशेषाङ्कं प्रकाशयितुमेव निश्चयः कृतः ।

नूनं तत्रभवन्तो भवन्तः, भारतीयसंस्कृतेः पोषकाः, संस्कृतभाषाया अनन्यानुरागिण, आयुर्वेदस्य सुविख्यातकीर्तयो विद्वांसश्च, वयमतोऽभ्यर्थयामो यच्छ्रीमन्तो मासाभ्यन्तर एवात्र समुल्लिखितेषु विषयेषु कतमं विषयमवलम्ब्य स्वकीयं सरलं, सारगर्भितं संक्षिप्तं च देवभाषामयं निबन्धं सम्प्रेष्यास्मिन् सुकृत्ये स्वकीयं बहुमूल्यं योगं दत्त्वाऽनुगृहणन्तु कं विषयमवलम्ब्य श्रीमन्तः श्राम्यन्तीति पूर्वसूचनाऽस्माकं कार्यसौकर्यं करिष्यतीति संसूच्यानुग्राह्या वयम् ।

आगामिनि दिसम्बरमासि ‘आरोग्याङ्क” प्रकाशयिष्यते इति सुनिश्चितम्, अतो नवम्बरमासारम्भ एव लेखसामग्री मुद्रणालये प्रदेयास्ति । श्रीमतां लेखान वम्बरमासं यावदस्मत्सकाशे समागच्छन्त्विति तथा यतनीयं श्रीमद्भिः ।

पत्रमेतत् कविशिरोमणि भट्टश्रीमथुरानाथ शास्त्रिणां सम्पादने प्रकाश्यते, अस्य आरोग्याङ्कविशेषाङ्कस्य शिल्पिकविषयत्वेन सम्पादनाय विशिष्य वयं निम्न हस्ताक्षरकर्त्तारोऽस्मिन्कर्मणि व्यापृताः पुनरपि श्रीमतः सहयोगसत्परामर्शदानाय च साञ्जलिबन्धमभ्यर्थयामः ।

भवतां विधेयाः

१. वैद्य जयरामदास भिषागाचार्यः प्राचार्यः
२. वैद्यराज सुदेवचन्द्र पाराशरी शास्त्री D.I.M.S. प्राध्यापकः
३. वैद्य जसराज जोशी भिषागाचार्यः ”
गवर्नमेन्ट आयुर्वेद कालेजः,
जयपुरम्

प्रबन्धसम्पादकः
गिरिराज शर्मा शास्त्री
भारती भवन
गोपालजी का रास्ता, जयपुरम्



सीमा शुल्क

और

केन्द्रीय उत्पादन

शुल्क में

मैट्रिक प्रणाली



The Metric System of Weights and Measures has come into force in Customs aud Central Excise from October 1,1960.

Rates of duties are expressed in terms of metric units. The rates have been converted to their nearest practicable equivalents in metric units.

मैट्रिक प्रणाली

सरलता व एकरूपता के लिए

भारत सरकार द्वारा प्रचारित

DA 60/390

वात-यन्त्र-प्रणाली (NERVOUS SYSTEM)

ले०–वैद्य सुदेवचन्द्र पाराशरी शास्त्री D. I. M. S.

सामान्यतो वयं ब्रूमः 'भुक्तं देहः पाचयतीति' अस्य कोऽर्थ इति जिज्ञासायामुच्यते निःसृतापचितैर्देहधातुभिर्वातपित्तश्लेष्मेत्याख्यैरात्मभुक्तमात्मीकरणाय स्वोपचयार्थं पाच्यत इति। एतच्च सर्वं क्रमशोऽवस्थापाकत्रयेण महास्रोतसि सम्पाद्यते। एवं हि भुक्तापाकक्रियया समुपचितत्रिधातुसंघातरूपोऽन्नरसो निष्पद्यते, अयं ह्यन्नरसस्त्रिधातुप्रवाहः कृत्स्नदेहचरोऽहरहस्तर्पयति जीवयति यापयति च प्रत्येकशो नियतांशेन प्रतिनियतमन्यतमं धात्वंशं तर्पयन्नेवञ्च स्थायिदेहधातूनुपचिन्वन् पुष्णाति पोष्यधातून्। शरीरकार्यज्ञानाय त्रिधातुप्रवाहस्यैष राद्धान्तो नितरां व्यावहारिक इतिकृत्वा त्रिधातूनां प्राकृत कर्माणि तुलनात्मकदृष्ट्या वयमग्रे निरीक्षामः। तत्रादौ परमगहनातिसंघटितस्य च वायोः संस्थानमेत्र तावद् गृह्णीमः।

नूतनक्रियाशारीरसिद्धान्तानुसारं देहस्य सर्वांगावयवानां चेष्टाः नाडीतन्त्र (nervous system) द्वारेण नियन्त्रिताः वर्तन्ते नाडीतन्त्रञ्च नाडीकोषाणु (nerve cells) श्रेणिभिः संघटितमास्ते। एभ्यो नाडीकोषाणुभ्यः सूक्ष्मा लघवो दीर्घा वा नाडीप्रताना (tendrils or processes) निर्गताः सन्तः स्वकीयचरमप्रान्तैः देहस्य विभिन्नावयवैः सम्बद्धाः सन्ति। एकस्मन्नाडीकोषाणोरेकमेकाधिकानि वा प्रतानानि निर्गतान्युपलब्धुं शक्यानि। आयुर्वेदज्ञास्तु–एतान्नाडीकोषाणूनेव वातयन्त्राणीत्याहुः। एभिरेव नाडीतन्त्रसंबन्धीनि सूक्ष्ममध्यस्थूलयन्त्राणि (apparatus) निर्मितानि सन्ति। एतान्येव यन्त्राणि वायोर्विशिष्टस्थानानीतिकृत्वा तन्त्रकारैर्वर्णितानि तथाहि चरकः– 'वायुस्तन्त्रयन्त्रधरः–' इत्याह। देहस्य सर्वाः क्रियाः वातद्रव्यविक्षेपेणैव प्रवर्त्तन्ते–सर्वाणि नाडीकार्याणि (nervous action) पोषकान्नरसस्थवाताणुविक्षेपणेनैव निर्भरिताः प्रवर्तिताश्च आसत इत्याशयः।

नैतद् वातद्रव्यं केवलो वायुः, प्रत्युत वायुप्रधानं वातपित्तकफात्मकं धातुर्व्यपदेशेन वात इति संज्ञायते। वातयन्त्राणि (nerve cells) नाडीकोषाण्वाख्यानि च वातप्रधानानि त्रिधातुसंयोगात्मकानि विशिष्टसंघटितोपधातुविशेषा एव शिरास्नायुअस्थिमज्जादिधातूपधातुविशेषवत्।

वातयन्त्राणां (nerve cells) धारणपोषणे प्रवहद्भिस्त्रिधातुभिरितरशारीर धात्वणूनामिव (body tissue cells) भवतः। किन्तु इमानि वातयन्त्राणि (nerre cells) मुख्यतो धातोपादानानि सन्ति त्रिधातुप्रवाहात् पित्तकफापेक्षया वातद्रव्याणूनेव प्राधान्येन गृह्णन्ति। वातयन्त्राणां विशिष्टव्यापारयोग्यताधारणार्थन्तेषामपेक्षितवायुसंघटनाधीनत्वात्। अत इदं सुनिश्चितं यत् वातयन्त्राणां (nerve cells) कार्यसम्पादनन्तेषां प्रीणनप्रकृत्यनुसारि भविता। प्रवहत्सु त्रिधातुषु वातकणानां प्रकृत्यनुरूपं, अथवा तृतीयावस्थापाककालेऽन्त्रेषु समुत्पन्नवातद्रव्यप्रकृत्यनुसारि वा भवतीत्येकोऽर्थो वक्तुं शक्यते–यत् आन्त्रेषूत्पद्यमानवायुधातुमूलकमेव शारीरसकलवायुप्रीणनं शारीरवायुक्रियाभिनिर्वर्त्तनञ्च। अतो यदीदं वातद्रव्यमान्त्रेषु सुष्ठु निर्मीयते तदा सर्वाणि वातयन्त्राणि स्वप्राकृतावस्थायां वर्त्तमानानि स्वकर्माणि सम्यक्कुर्वन्ति तथा चोक्तं–प्राणोदानसमानव्यानापानात्मेति, सम्प्रति रसरक्तवहानि स्रोतांस्यधिकृत्य वक्ष्यामः–एषा हि सम्वहनसंस्थाऽतिशयमहत्त्वपूर्णा यतस्त्रिधातव एषां स्रोतसां द्वारेणैव प्रवहन्तो देहाङ्गावयवांस्तर्पयन्ति नाडीप्रतानचरमभागा (the ends of nerve tendruls) स्रोतोभित्तिभि (wall of the channels) स्संबध्दाः सन्ति। वातयन्त्राणि प्रतिगच्छद्वातधातुर्नाडीप्रान्तानां (nerve ungins) द्वारेण यथार्हं स्रोतसां संकोचप्रसारे नियन्त्रयति। स्रोतःसु प्रवहतस्त्रिधातुप्रवाहस्य

वेगः (velocity), धातुद्रव्ययोर्द्रवस्यायतनञ्च (rolume) कस्मिंश्चिदपि स्रोतोदेशे प्रवहनप्रेरणाय स्रोतसां सङ्कोचं प्रसारं वापेक्षते। एवं प्रकारेण देहस्य विशिष्टांगावयवाय प्रदीयमानपोषकद्रव्यमात्रा तात्कालिकतदावश्यकतानुसारिणी निर्वाह्यते। अस्माभिरुक्तं–एषा क्रिया स्रोतोबहिर्गतवातकर्मणा हि नियन्त्रिता भवति।

स्रोतसि प्रवहति त्रिधातुप्रवाहेऽपि वातकणा भवन्त्येव। ते हि स्वतन्त्रतया यान्त्रिकाः क्रियाः कुर्वन्ति। तथाहि–स्रोतोभित्तिषु अन्तश्चापद्वारेण ते परिवर्त्तनानि कर्त्तुं शक्नुवन्ति। अतो वयं पश्यामो यत्–देहस्य विभिन्नावयवेषु गच्छतो वातस्य द्विधा क्रियाः परिलक्ष्यन्ते। एका तु आन्तरिका भौतिकी, अन्या च बाह्या जैवरासायनिकीति, द्वे अपि क्रियेऽन्योऽन्याश्रिते स्तः।

स्रोतसां कर्मणोऽन्यदर्थवदुदाहरणम् चेष्टाधर्मि हि मांसम्-मांससूत्राण्याकुञ्चन्ति, इत्थं हि शक्तिमुत्पादयन्ति। एवं हि तत्कृते प्रीणयितृद्रव्यस्यापेक्षा भवति सा च निःस्रुतत्रिधातुभिरात्मीकृतत्रिधातुद्रव्यद्वारेण पूर्यते। मांसाकुञ्चनन्तु तत्सम्बद्धनाडीप्रान्तैर्नियन्त्रितं भवति। एष एव हि वातस्य चेष्टाप्रवर्त्तनव्यापारो यश्च मांसपेशीसम्बद्धवातयन्त्रविशेषै (nerve cells) र्नियन्त्रितो भवति। उक्तं हि–'प्रवर्त्तकश्चेष्टानामुच्चावचानामिति। अन्यच्च–यदुक्तं–समीरणोऽग्निरिति। तद्व्याख्यायते–वायुर्हि देहस्याग्निकर्माणि प्रेरयति। तथाहि–महास्रोतसि 'कस्याश्चिदपि ग्रन्थेर्निःस्रावोपलब्धये तस्याः कार्यप्रवृत्त्युद्योजनाय, वायुरेव निमित्तमिति। तत्तदवयवनियन्त्रकवातयन्त्रक्रियाद्वारेण तत्कालमेव तदवयवं त्रिधातुप्रीणनमुपलभ्यते। एतत्कर्म च पुनर्देहस्य संग्रहतो वातद्रव्यस्य प्रकृतिमनुसरति। यतोऽस्माभिरसकृदुक्तं यद् वातयन्त्राणि त्रिधातुप्रवाहादेव वातभूयिष्ठं पोषकद्रव्यमात्मसात्कुर्वन्ति। अत एतद् वक्तुं युज्यते–यद् सर्वस्याः वातयन्त्रसंस्थायाः क्रियाः संग्रहतो वातधातोरेव नियन्त्रणे प्रवर्त्तिता आसते। सर्वे निःस्रावाः किमपि रासायनिकपरिवृत्तिमधिकृत्य प्रवर्त्तन्ते। एतदेव चायुर्वेदेऽग्निकर्मेति नाम्ना वर्णितं भवति, अतो वयं वदामः–वायुर्देहस्याग्निं समीरयतीति।

किञ्च 'प्रवर्त्तकश्चेष्टानामित्यत्र चेष्टाशब्देन कर्मेन्द्रियचेष्टा (motor actireties) उच्यन्ते। 'इन्द्रियार्थानामभिवोढा'-इन्द्रियविषय (sense object) वाहको यथा प्रकृतिः शब्दस्पर्शयोरित्यादि।

'सर्वेन्द्रियाणामुद्योजकः' इन्द्रियाणां प्रेरयितेत्यर्थः। एतानि कतिचन वातयन्त्रद्वारेण निष्पद्यमानानि वातधातोः कर्माणि भवन्ति। साधारणतो वातशब्दस्यायुर्वेदे (१) वातधातुः (२) वातस्थानानि (३) वात कर्माणि चेति त्रयो वाचका भवन्ति। वातस्य क्षयवृद्धी त्युभावपि वातनाम्नैवाभिधीयेते। प्रसंगादेव यथार्थवाचकमुन्नयन्ति भिषज इति तत्त्वम्।

शरीरस्य प्रवहति त्रिधातुप्रवाहे वायोः पित्तस्य कफस्य कणाः समुदिता अपि परस्परमसंहता गच्छन्ति। तत्र वायुः पञ्चधा विभक्तः। वायुर्हि वातयन्त्रद्वारेण स्वक्रियाः करोति, वातयन्त्रैश्च विभिन्नाः वातप्रणालिकाः निर्मीयन्ते। देहस्य विभिन्नप्रदेशेषु विशिष्टानि वातयन्त्राणि विभिन्नक्रियाः सम्पादयन्ति। एतेषां वातयन्त्राणां पञ्चविभागाः कृताः सन्ति। त एव वायोर्भेदा उच्यन्ते। तदेवं नाभिप्रदेशे वातयन्त्रसमूहः (the group of nerve cells) अत्र वहस्रोतासि बहून् स्राविग्रन्थीनुदीरयति। तेन मुखे आमाशये च कफस्राविग्रन्थयः कफं, अधश्चापक्वाशयं पित्तस्राविग्रन्थयः पित्तं, तदधश्च वातस्राविग्रन्थयश्च वायुं समुदीरयन्ति) पाचनार्थम्। तदेषां वातयन्त्राणां स्वस्वकार्यं तत्र विक्षिप्यमाणवातद्रव्येण रभसा सम्पाद्यते। एवं यन्त्रसमूहनिष्ठो वायुः समानेति नाम्ना प्रथन्ते शास्त्रकृतः।

वृद्धवाग्भटे पञ्चानामपि वायूनां स्थानकर्माणि सुष्ठु निरूपितानि- (अ० सं० सू० अ० २०)–"तत्र प्राणो मूर्धन्यवस्थितः कण्ठोरश्चरः"। कार्यं च धमनी धारणं, एवंमस्य स्थितिः मस्तिष्के, सञ्चरणं च कार्यप्रवृत्तये, तत आरभ्य कण्ठोरःपर्यन्तं श्वासोच्छ्वासकर्मप्रयोजनायः, हृदिन्द्रियकार्यनियन्त्रणं च तद्द्वारेण–

तदेवं मस्तिष्कस्थ प्राणवायुकेन्द्रादारभ्य कण्ठ, फुफ्फुस, हृदयपर्यन्तं तत्सूत्राणि (nerve tendrils) वातयन्त्रात्मकानि (of nerve cells) प्रसृतानि सन्ति । शिरोग्रीवास्थरक्तसंवहनादिमानि यन्त्राणि वातद्रव्यं गृह्णन्ति । तदेनद् वातद्रव्यं निशिष्टस्थानस्थविशिष्टयन्त्रप्रणालिकाद्वारेण कार्यविशेषं कुर्वन्प्राणयायुरिति संज्ञाविशेषं लभते बोधसौकर्ययि । तदे तदमिधानमौपचारिकम् ।

एवमेव शार्ङ्गधरानुसारं उदानवायुरित्यभिधानं उरःकेन्द्रादारभ्य कण्ठनासानाभिपर्यन्तं प्रसृतस्य वातयन्त्रसमूहस्य सञ्चारिणो वातद्रव्यस्य । एतत्कार्यं वागुद्गारादिप्रवृत्तिः । व्यानवायोश्च केन्द्रं हृदयं–तत्प्रसृतवातयन्त्रसमूहकार्यक्षेत्रं च केवलं सर्वतः शरीरम् । तस्य कार्यं च संवहनगतिनियन्त्रणम् । अपानवायुकेन्द्रं च श्रोणिदेशे तत्रैवाभितस्तद्यन्त्राणि प्रसृतानि यतो विसर्गकर्माणि सम्पाद्यन्ते ।

सुस्पष्टमुन्नेतुं शक्यते–यद् वातद्रव्यं वातयन्त्रेभ्यो भिन्नं, वातयन्त्राणि हि वाताधिकति धातुनिर्मितत्वाद वातकोषाणुनाम्ना व्यपदिश्यमानानि । इमानि यन्त्राणि प्रवहमानवातधातुद्वारेणैव कर्मसमर्थानि, वायुधातुरपि त्रिधात्वात्मको बाहुल्याद् वायुरिति व्यपदिश्यते । बातचेष्टाः हि वातयन्त्र (nerve cells) निर्मितनाडीसूत्र (nerve fihres) द्वारेण तद्व्यापि प्रदेशमभिधावन्ति । तदेतानि सूत्राणि वातवहनाड्यइति कथ्यन्ते । वातवहधमन्यस्तु त्रिधात्वात्मकवायुबहुल वातेति व्यपदिश्यमानवातद्रव्यवाहिन्यो रक्तवाहिन्यो धमन्य इति बोध्यम् । मूत्रवहधमनीति संज्ञया मूत्रवह नाडीकार्यसम्पदनाय तत्पोषिकां वातवहां धमनीं द्योतयति । वैशिष्टयमेतदायुर्वेदस्य यन्नाडीकार्यं धमन्याधीनं निरुपितं–नाडीसञ्चालकवातद्रव्यस्य धमनीद्वारेण तदनुग्राहकत्वात् ।

वातयन्त्राणामिव पित्त–कफयन्त्राणामपि पञ्च पञ्च भेदा भवन्ति । येषां द्वारेण पित्त–कफधातू शरीरे तत्क्रियमाणानि भिन्नभिन्नानि कार्याणि सम्पादयतः ।

फोन—२६११६३ मिल्स—६२५४३ ग्रामस्—'हिन्द' ग्राम

हिन्द मिल्स लिमिटेड

१५, दुगल रोड, बैलार्ड एस्टेट

बम्बई १

निर्मातारः—

कुन्चुकवस्त्रं (शर्टिङ्गस), शय्यावस्त्रं (शीटिंगस–लिपाई), लम्बवस्त्रं (लांगक्लॉथ
ड्रिलस, मुलस, क्रेप–मुजरी वस्त्राणां धौतानां शाटिकानाम्,
'काकेट चिन्हितानां' तथा स्पेशल फाइबर
सूत्रांणा च ।

बालोपयोगी लघुकथा

नन्दप्रयागे यथैव वयम् आवासस्थलम् (चट्टी) प्राप्नुम तथैव अस्मत्समूहस्य प्रमुखेन श्रेष्ठिमहोदयेन भोजनादिप्रबन्धार्थं रूप्यकाणि आनायितानि । अहं द्रव्यपेटिकामुद्घाट्य आवश्यकानि रूप्यकाणि पाचकाय, तत्सहायकेभ्यो भृत्येभ्यश्च तत्कालमहमदाम् । किन्तु यस्याः स्थलिकाया रूप्यकाणि निःसारितानि, सा पेटिकातो बहिरेव मया विस्मृता । श्रेष्ठिनी द्वितीयकार्यार्थमतिशीघ्रतया प्रकोष्ठकाद्बहिरभवम् ।

जलाद्याहरणार्थं यः पर्वतप्रदेशीयः कर्मकरस्तस्मिन्नावासे नियमितोऽभूत्, स हि द्रव्यस्थलिकामिमां बहिः पतितां विलोक्य सहसा निजहस्तेनाऽगृह्णात् । तां भारपूरितां ज्ञात्वा केवल कौतुकादेव तामुदघाटयत् । आसन् तस्यां शतशो रूप्यकाणि, शुल्क (‘नोट’) पत्राणि चाऽसंख्यानि । स हि भयापन्नस्तां तत्रैव निधाय तद्रक्षार्थं तस्मिन्नेव प्रकोष्ठके न्यषीदत् । संयोगस्य वार्तास्ति, श्रेष्ठिमहोदयेन द्वाभ्यां कर्मकराभ्यां सह अहम् अग्रिमे विश्रमस्थले प्रेषितः । अतएव द्रव्यग्रन्थिमिमां विस्मृत्यैव, तत्कालमहमग्रिमविश्रमस्थाने निवासादिप्रबन्धार्थमचलम् ।

द्वितीयदिने अग्रिमेऽस्मिन् विश्रामस्थाने, भोजनादिप्रबन्धार्थं श्रेष्ठिना द्रव्यं यथैव वाञ्छितं, तथैव मदधीनं भृत्यं मम द्रव्यपेटिकामानेतुमहमाज्ञापयम् । पेटिकामुद्घाट्य यथैव स्थलिका मया अन्विष्टा, न तां कुत्रापि प्राप्नवम् । सर्वाणि आयव्ययपत्राणि वस्त्रादीनि च मया गवेषितानि, किन्तु मुद्रास्थलिकामिमां कुत्रापि नापश्यम् । मम शरीरं शून्यमिवाऽभवत् । हृदयं गतिशून्यमिवाभवत् । अहं विचेतन इव इतस्ततः पश्यन्नासम्, एतस्मिन्नेव समये पर्वतप्रदेशीयः स भृत्यो मामाह्वयत् । किञ्चित्क्रुद्धः, किञ्चिद्विमनाश्च तस्य प्रकोष्ठकेऽहमगच्छम् । एकं कोणं निर्दिश्य तेन प्रोक्तं स्वामिन् ! पश्य, इयं स्थलिका भवतैव विस्मृता, अथवा अन्यस्याऽस्ति ? परदेशे एवं विस्मरणेन का वा भवेत्परिस्थितिः ?

अभून्मम आन्तरिकी चेतना—‘‘हन्त मया प्रदेशस्य मार्गमध्ये कीदृशः प्रमादः कृतः’’ ।

कर्मकरेण प्रोक्तम्—नैवं स्वामिन् ! स्थलिकामुद्घाट्य पूर्वं तव द्रव्यं सर्वं परिगणय !’’

नन्द प्रयाग में जैसे ही हम चट्टी पर पहुंचे, हमारे समूह के मुखिया, सेठजी ने भोजन प्रबन्ध के लिए रुपये मँगवाए । मैंने रुपयों की पेटी खोलकर आवश्यक रुपये रसोइये के लिए, उसके नौकर को उसी समय दे दिए । किन्तु जिस थैली से रुपये निकाले थे, वह तो मैं वहीं भूल गया ।

जलादि लाने को जो पर्वत प्रदेश का नौकर उस चट्टी पर नियत किया गया था, उसने यह थैली बाहर पड़ी हुई देखकर सहसा अपने हाथों से उठा लिया । उसने इसे भारी जानकर ही कौतूहल से खोला । उसमें सैंकड़ों रुपये और असंख्य नोट थे । वह डर गया और थैली को वहीं रखकर उसकी रखवाली के लिए उसी कमरे में बैठ गया । संयोग की बात है, सेठजी ने दो नौकरों के साथ मुझे आगे की चट्टी में भेज दिया । इसलिए रुपयों की थैली को भूलकर ही तत्काल मैं आगे की चट्टी में रहने आदि के प्रबन्ध के लिए रवाना होगया ।

दूसरे दिन आगे वाली इस चट्टी में भोजनादि के प्रबन्ध के लिए, सेठजी ने जैसे ही धन चाहा, वैसे ही मैंने मेरे तैनात नौकर को रुपयों की पेटी लाने की आज्ञा दी । पेटी खोलकर जैसे ही थैली को खोजा, वह कहीं नहीं थी । सब हिसाब के पत्रादि, वस्त्रादि मैंने खोजे किन्तु रुपयों की इस थैली को कहीं नहीं देखा । मेरा शरीर सूना होगया । हृदय मानों चलता चलता बन्द होगया । मैं चेतनाशून्य होकर इधर उधर देख रहा था, तभी उस पहाड़ी नौकर ने मुझे बुलाया । कुछ क्रुद्ध सा और कुछ उदास सा मैं उसके कमरे में गया । एक कोने को दिखाकर उसने कहा—‘‘मालिक, देखो यह थैली आप ही भूल गए थे या और किसी की है ? परदेश में ऐसे भूल जाने पर कैसी हालत होगी !’’

मुझे आन्तरिक चेतना हुई—‘‘हाय ! मैंने परदेश के रास्ते में कैसी भूल की ।’’

नौकर ने कहा—‘यों नहीं मालिक ! थैली खोल कर पहिले आप अपना सब रुपया पैसा गिन लो ।’’

भारती रजिस्टर्ड क्रमांक जे० ७

नदीनां च कुलानां च मुनीनां च महात्मनाम् ।
परीक्षा न प्रकर्तव्या स्त्रीणां दुश्चरितस्य च ॥ ३

नदी, और किसी के कुल (वंश, खानदान) तथा ऋषि मुनि, और महात्मा पहुंचे हुए महापुरुष, इनकी परीक्षा नहीं करनी चाहिये। परीक्षा करना कहीं तो अपने लिये ही हानिकारक हो जाता है और कहीं उनका अपमानजनक होता है। इसी तरह स्त्रियों के दुश्चरित्रों (खराब आचरणों) की भी परीक्षा नहीं करनी चाहिये। वहां आपको सिर्फ उदासी ही मिलेगी, लाभ नहीं।२

अलिरनुसरति परिमलं लक्ष्मीरनुसरति
नयगुणसमृद्धिम् ।
निम्नमनुसरति सलिलं विधिलिखितं
बुद्धिरनुसरति ॥ ४

भौंरा सुगन्ध के पीछे दौड़ता है, लक्ष्मी (धन सम्पत्ति) नीति और गुणसंपत्ति के पीछे चलती है [जो नीति के अनुसार चलते हैं, तथा जो गुणसंपन्न हैं, उन्हीं के पास लक्ष्मी आती है।] जल नीचे के स्थान (ढलाव) की तरफ जाता है। और मनुष्यों की बुद्धि जो विधाता ने लिख दिया है, उसके अनुसार चलती है [विधाता ने जैसा होने को लिख दिया है, मनुष्यों की बुद्धि भी उसही के माफिक हो जाती है। ४

वितरति यावद्दाता तावत्सकलोऽपि भवति कलभाषी।
विरतेपयसिघनेभ्यः शाम्यन्ति शिखण्डिनां ध्वनयः।३

जबतक देने वाला उनको कुछ देता रहता है तब तक सब मनुष्य मधुरभाषी हो जाते हैं (मीठी बातों से खुशामद करते हैं।) मेघों से जैसे ही पानी बरसना बन्द हो जाता है वैसे ही मोरों की ध्वनियां (शब्द) भी बन्द हो जाती हैं। ५

हन्त ! यां लक्ष्मीमालोक्य महान्तोऽपि मुह्यन्ति, तामिमां निष्कण्टकामवाप्यापि यो हस्तेनाऽपि न पस्पर्श, किमहं तस्य महत्तां तुलयेयम्। अश्रुकण्ठोऽहं तस्मै पारितोषिकरूपेण दशमुद्राः प्रदातुमैच्छम् । किन्तु 'स्वामिन् ! मया निजकर्तव्यं निर्वाहितं, नास्मिन् कर्मणि किंचिद् ग्रहीष्यामि' इति स प्रत्यषेधत् ।

हाय जिस लक्ष्मी को देख कर बड़े २ भी मोहित हो जाते हैं, उस लक्ष्मी को निष्कंटक पाकर भी जिसने हाथ से भी उसे नहीं छुआ, उसकी महत्ता की मैं क्या तुलना करूं ! अश्रु गद्गद होकर मैंने उसको इनाम के रूप में दस रुपया देना चाहा किन्तु—"मालिक, मैंने अपना फर्ज अदा किया है, इसके लिए मैं कुछ नहीं लूंगा।" यों कहकर उसने निषेध कर दिया।

प्रकाशकः—जयबहादुरसिंह
पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
मुद्रकः—श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री
•
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

लेखैरुपप्लुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वसम्

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा
•
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार
19 DEC 1969

वर्षम् २० | कार्तिकः, विक्रमाब्दः २०२६ (नवम्बर, १९६९) | अङ्कः १

मङ्गलम्

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

अश्वधाटी छन्दः

एधाय शं[1] किल निषेधाय [2]दुष्प्रकृतिभेदावभेदसुविदे,
द्वेधा विधाय जगदेधा कृते मधुरवेदानुपादिशति यः ।
त्रेधा गुणाढ्यहयमेधादिभिः स सुखसेधां करोति भगवान्
वेधा भवत्वखिलखेदापहा प्रणत मेधाप्रदाननिपुणः ॥१॥

मासावतरणम्

सूर्यं तुलायामुपरोप्य राशौ
तदीयतेजो ह्रसयन्, निशादौ,
आकाशदीपाञ्ज्वलयन्पुरेषु
माः कार्तिकः प्राप्त इमं जुषस्व[3] ॥

---

(१) शमित्यव्ययं–तदस्य सर्वविभक्तिषु समत्वात् शमिति कल्याणानां एधाय वृद्धये इत्यर्थः एवं

(२) दुस् इत्यव्ययस्यापि दुरितानां इति षष्ठीप्रयोगोऽवबोध्यः ।

(३) (हे सखे इति पूर्वमनुयोज्यम्)

जयवंशस्य रघुवंशेन सह साम्यम्

श्रीरामदत्तशर्मा, तिलकनगर, (जयपुरम्)

विश्वस्य समृद्ध-साहित्येषु संस्कृतसाहित्यस्य विशिष्टं स्थानं वर्तते। साहित्येस्मिन् काव्यानि, नाटकानि, कथाः, आख्यायिकाः, चम्पूकाव्यानि च काव्यस्य सम्पूर्णाः भेदाः उपलभ्यन्ते।

रघुवशं संस्कृत-साहित्यस्य अनन्योपासकेन महाकविकालिदासेन विरचितम्। यस्मै काव्यशास्त्रिभिः विद्वद्भिः च 'महाकाव्यम्' इति संज्ञा-दत्ता। जयवंशं श्रीसीतारामपर्वणीकरस्य एका रचना वर्तते या 'ऐतिहासिकंमहाकाव्यं' इति कथ्यते।

इमे उभे काव्ये अनेकेषु स्थानेषु समान एव वर्तेते वा इदं कथ्येत यत् जयवंशकारो रघुवंशकारस्य ऋणी वर्तते तदा अतिशयोक्तिर्न भविष्यति। अस्मिन् लेखे वयं द्वयोः काव्ययोः समानानि स्थलानि प्रति पाठकानां ध्यानाकर्षणं कुर्मः।

सर्वप्रथमं तु द्वयोः काव्ययोः एकोनविंशत्येकोनविंशतिसर्गाणां समुदायौ वर्तेते। द्वयोः काव्ययोः इक्ष्वाकुवंशजानां नृपाणां वर्णनं उपलभ्यते। रघुवंशे इक्ष्वाकुवंशजात् महाराजात् दिलीपमहोदयात् काव्यस्य प्रारम्भो जायते, किंतु प्रमुखरूपेण काव्यं रघुमहाराजस्य वर्णनैः प्रभावितं वर्तते। तत्र जयवंशे वर्णनानि सोढ़देवमहोदयात् प्रारभ्यन्ते किंतु तत्र जयसिंहमहाराजस्य वर्णनानि मुख्यानि सन्ति। रघुवंशे रघ्वजदशरथरामचन्द्रादीनां किया-कलापानां वर्णनं कृतम् तथैव जयवंशे सोढ़देवदुर्लभकालिकहनुमानसिंहभगवन्तदत्त प्रथममानसिंहप्रथमजयसिंहरामसिंहविष्णुसिंह—द्वितीयजयसिंहादीनां कार्याणां वर्णनं कृतम्।

रघुवंशस्य जयवशेन सह कथानकस्य साम्ये तादृशं वैशिष्ट्यं नास्ति यादृशं तयोः काव्यात्मकानां भावानां साम्यं अस्ति। रघुवंशस्य मङ्गलाचरणेन जयवंशस्य मंगलाचरणे यत् साम्यं वर्तते तत् अन्यत्र अतीव दुर्लभम्—

"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः **पितरौ** वन्दे पार्वतीपरमेश्वरौ॥"

(रघुवंशम्०।)

❀ ❀ ❀

प्रणम्य **मातापितरौ** गुरूणां शुभं पदाम्भोरुहयुग्ममस्मि।
वंशावलीं श्रीजयसिंहनाम्नो महीपतेः शासनया प्रवच्मि॥

(जयवंशम्० १–१)

द्वितीय–तृतीयेषु श्लोकष्वपि साम्यं दर्शनीयम्—

'क **सूर्यप्रभवो वंशः** क चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि **सागरम्**॥'

(रघुवंशम्० १–२)

'कासौ पदार्थो **जयवंशः** काहं विमूढोऽल्पमतिः प्रकामम्।
तद्वर्णनेच्छा मयि सेयमस्ति **सिन्धो**स्तितीर्षेव लघुप्लवेन॥'

जयवंशम्० १–२)

'**मन्दः कवियशः**प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव **वामनः**॥

(रघुवंशम्० १–३.)

'**अमन्दसम्बन्धिपदं** लघीयानारोढुमिच्छाम्यतिमन्दबुद्धिः।
सेयं मदिच्छोच्चमहीरुहाणां पुष्पोच्चिचीषा खलु वामनस्य॥'

(जयवंशम्० १–३)

रघुवंशस्य द्वादशे सर्गे भारतस्य दर्शनीयानां स्थलानां वर्णनं अस्ति। जयवंशेऽपि आमेरस्य जयपुरस्य दर्शनीयानां स्थानानां वर्णनम्। सम्पूर्णभारतेन सह सम्बन्धात् रघुवंशकाव्ये अयोध्याचित्रकूटनन्दिग्रामपञ्चवटीकिष्किन्धा–लंकादीनां वर्णनं कृतम् किंतु जयवंशे महाकाव्ये जयपुरामेरब्रह्मपुर्यादीनां वर्णनं कृतम् यत् महाकाव्यस्य अस्य सम्पूर्णेन भारतेन सह ईदृशः सम्बन्धो नास्ति यादृशो जयपुरस्य पार्श्ववर्तिभिः स्थानैः सह। रघुवंशस्य चतुर्थे सर्गे राघोर्दिग्विजय वर्णनं वर्तते तथैव जयवंशस्य त्रयोदशे सर्गे जयसिंहस्य दिग्विजयवर्णनं वर्तते।

एतदतिरिक्तं रघुवंशे जयवंशे च भाषालंकारच्छंदोयोजनादीनां कतिपयानि साम्यानि लभ्यन्ते किन्तु अस्मिन् क्षेत्रे पर्वणीकरमहोदयः महाकविकालिदासस्य सम्यक् अनुकरणं कर्तुं समर्थो न बभूव। तस्य भाषायां सा स्वाभाविकता अलंकारेषु सा सरसता एवं छंदःसु सा सरलता न विद्यते या रघुवंशकाव्ये विद्यते।

यत् जयवंशस्य रघुवंशेन सह अनेकविधं साम्यं अस्ति तत्संस्कृतसाहित्यस्य अन्यकाव्येषु न विद्यते।

– प्रस्तुत है –

एक अद्‌भुत परिधान

(काँटसेल–ओ)

"काँटसेल–ओ" की चमक बढती ही जाती है।
शानदार मनमोहक रंगों तथा आकर्षक डिजाइनों युक्त
"काँटसेल–ओ" आपके व्यक्तित्व में अधिक
निखार लाता है।

निर्माता :
दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०
"सेंचुरी भवन", डॉ० एनीबेजन्ट रोड़
बम्बई—२५ डी डी

श्रीविष्णुस्तवद्वादशी

(चित्रकाव्यम्)

स्वामी श्रीलक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौरः, (राजस्थानम्)

(१)

चराचरात्मा धृतसाधुवेषः,
सदा हरी रक्षति विश्वमेषः।
क्रियान्मनो मे भवभोगलग्नं,
स्वकीर्तिपीयूषसमुद्रमग्नम्।

(२)

सुतो नाभेर्योऽभूज्जगति विदितो नाम ऋषभः,
समुद्धर्तुं लोकान् कुमतिकलितान् योगिवृषभः।
स मां दीनं दुष्टेन्द्रियरिपुविलुप्तेप्सितधनं,
हरिः पायान्नित्यं खलु निखिलदोषैकसदनम्॥

(३)

पुरा वेनस्याङ्गात् क्षुधितजनताक्षेम पिशुनं,
पृथुश्चार्चिर्नाम्ना भुवि समभवत् पुत्रमिथुनम्।
विनश्येत् तन्नाम्ना मम विषयमोहो हि सहजः,
पुनर्नानाजन्मार्जित विविधदुष्कर्मफलजः॥

(४)

श्लाघ्यो बभूवेति विदां वितर्कः,
श्रीरामजन्माङ्कतया हि कर्कः।
यत्संश्रयात् पूज्यतमा च माता,
साकेतराट्स्त्री जगतोऽपि जाता॥

(५)

परोऽश्नुते को रिवधाकृति हः,
स्तम्भात् तथाप्नोत् स्वजनिं नृसिंहः।
रिपून् विजिग्ये च कयाधुपुत्रः,
सदा धृतैतत्करुणातनुत्रः॥

(६)

विचक्षणा कास्ति ततस्तदन्या,
वव्रे पतिं यद्धरिमब्धिकन्या।
तन्नामतो नश्यति सर्वरोगः,
कदापि न स्याच्च सुखैर्वियोगः॥

(७)

चित्रैश्चरित्रैर्विविधैर्विसंस्थुला,
कथा यदीया कथिता तथातुला ।
हरिः स्वभक्ताखिलपापघस्मरः,
पायात्सदैषोऽद्भुतसद्गुणाकरः ॥

(८)

काको वृको दुष्टजनश्च कौशिकः,
सिंहोऽथ सर्पोऽजगरश्च वृश्चिकः ।
पाल्या इमेऽप्यस्य जनिस्तथा मृतिः,
पुसां यतोऽतोऽस्य महाद्भुता कृतिः ॥

(९)

शैवं बभञ्जैष पुरा हरेस्तनुः,
श्रीरामभद्रः स्वजनप्रियो धनुः ।
वक्तुं न चैषाम्प्रभवाम्यहं तपः;
संसाध्यते यैर्हरिनाम सज्जपः ॥

(१०)

तदारक्षच्चासौ निजनुतिकरं तं सुरवरः,
पुराग्रह्लाद यर्हि द्विपकुलपतिं कोऽपि मकरः ।
सदा पायाच्चासौ निखिलजगतामेकजनकः,
कदाचिन्नायं यत् त्यजति करुणां विश्वरचकः ॥

(११)

देव्या यथा वै निहतो निशुम्भः,
श्रीवायुजेनेव हतो निकुम्भः ।
नाश्यात्तथा वारिद निर्मलाभः,
पापानि सर्वाणि ममाब्जनाभः ॥

(१२)

वैवस्वतं यो भजतामधीनः,
पातुं स्वभक्तं हि बभूव मीनः ।
तेषां भवेन्नैव, कदापि हानिः,
प्रीतोऽस्ति येषां च रमैकजानिः ॥

(१३)

या निर्मिता लक्ष्मणशास्त्रिणा श्री-
विष्णुस्तवद्वादशिकातिरम्या ।
पद्यार्थसन्दर्शितराशिभावा,
विदां सदानन्दविधायिनी स्यात् ॥

3,00,000 लोग
अपनी मेहनत की
कमाई
यूनिटों
में लगा रहे हैं—
आखिर क्यों?

कारण ये हैं :

- धन सुरक्षित रहता है।
- अच्छा लाभांश मिलता है।
- कर की छूटें मिलती हैं।
- आसानी से भुनाया जा सकता है।

इन तीन लाख भाग्यशाली लोगों में से प्रत्येक व्यक्ति यूनिट ट्रस्ट की पुनर्विनियोजन योजना से लाभ उठाकर अपनी पूंजी को वर्ष प्रति वर्ष लगभग 7% चक्रवृद्धि व्याज जोड़कर बढ़ा सकता है।

इसलिये आप भी इन तीन लाख बुद्धिमान लोगों में शामिल हो जाइये। यह आप स्वैच्छिक बचत योजना के जरिये बड़ी आसानी से कर सकते हैं। इस योजना में यूनिट ट्रस्ट आपको किस्तों पर यूनिट खरीदने की विशेष रियायत प्रदान करता है। अधिक जानकारी के लिये सम्पर्क कीजिये।

यूनिट पर आप हमेशा भरोसा कर सकते हैं।

यूनिट ट्रस्ट ऑफ इण्डिया

बम्बई ■ कलकत्ता ■ मद्रास ■ दिल्ली

davp 69/279

❀ वामनविजयम् ❀

प्रणेता–श्रीविश्वनाथमिश्रः, शार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

चतुर्थदृश्यम्

(यज्ञशालायां शुक्रद्वारा विश्वजित् यज्ञः)

प्रदक्षिणानन्तरं बलिः शुक्राचार्यं साष्टाङ्गं प्रणमति

शुक्रः—आयुष्मान् भव राजन् ?

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः ॥

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
विप्रवाक् तथा नित्यं निघ्नन्तु तव शात्रवान् ॥

बले—अद्य विश्वजित्यज्ञस्योपलक्ष्ये विपुलधनराशिदानेन यज्ञस्य पूर्णता विधेया । यतो हि—

नास्ति दानसमं कार्यं नास्ति दानसमं तपः ।
नास्ति दानसमं सत्यं यज्ञे दानं विशिष्यते ॥

हुतं पूजितं चैव यच्च कर्म कृतं शुभम् ।
सर्वं वै निष्फलं प्रोक्तं यदि दानं न दीयते ॥

दानेन तप्यते सूर्यः दानेन दीप्यते शशी ।
दानेन वायवो वान्ति सर्वं दाने प्रतिष्ठितम् ॥

बलिः—गुरुदेव ? श्रीमतां वचसि मे पूर्णो विश्वासः, अविचलश्रद्धा, दृढ़ा भक्तिश्च वर्तते । अद्याहं भवतां पुरस्तात् प्रतिज्ञां करोमि यत् आपातालतलं ब्रह्मलोकपर्यन्तं यत्र कुत्रापि निवसन् जनो यदि याचकरूपेण मम समीपमायाति चेत्तदाहं तस्य कामनाम् अवश्यमेव पूरयिष्यामि ।

हस्तद्वयेन याचनां कुर्वते शतहस्तेन च दातुमुद्यतो भविष्यामि ।

शुक्रः—वाढ़म्, वाढ़म् । शोभनं प्रतिज्ञातं दितिसुतेन । अनया तव पुनीतप्रतिज्ञया दैत्यवंशजननी देवी दितिरपि सार्थकनाम्नी भविष्यति । दैत्यकुलं च वर्धिष्यते । किञ्च यः खलु सर्वेषां दाता अस्ति, सोऽपि अघटितघटनापटीयान् परेशः याचको भूत्वा तव द्वारि समागच्छेत् इत्यपि नासम्भाव्यम् । भगवान् यज्ञदेवः तव प्रतिज्ञां पूरयतु ।

येनामिषं दत्तं स्वकं श्येनाय भक्षणहेतवे
चाण्डालगृहभृत्योऽभवत् यः सत्यरक्षणहेतवे ।
अस्थीन्यपि प्रीत्या ददौ शक्रेण योऽसौ याचितः
सन्त्यज्य यैः स्वार्थं सदाऽन्योपकारः साधितः ॥१॥

शिविहरिश्चन्द्रदधीचिभिस्तैः कः समो जातः पुमान्
राजन् बले ? तेभ्योऽधिको विद्योतते दाता भवान्
लब्धा सुकीर्तिर्या त्वया सा केन लब्धा भूतले
त्वादृङ् नृपः सम्मानशाली
नास्ति कोऽपि महीतले ॥२॥

दानेन यज्ञः शोभते पूर्णस्तथैव विधीयताम्,
याचेत यत्त्वां याचकस्तस्मै मुदा तद्दीयताम् ।
हे दैत्यकुलपकजदिवाकर दानवीरशिरोमणे ?
आकल्पमिह ते भासतां सत्कीर्तिभा विद्वद्गणे ॥३॥

प्रियवत्स बले ? त्वयि दुर्दमनीयं तेजः समागतमिदानीं यज्ञप्रभावात् । भूलोकात् स्वर्गलोकपर्यन्तं कोऽपि क्षणमपि तव सम्मुखं स्थातुं न क्षमः । तव शब्दश्रवणमात्रेणैव विगतचेतनाः देवाः स्वात्मत्राणाय इतस्ततो लुक्कायिता भविष्यन्ति । याहि वत्स सर्वत्र विजयं प्राप्नुयाः ।

(बलिः गुरुचरणयोः पतति)

पटाक्षेपः

पञ्चमदृश्यम्

(बृहस्पतिसमीपे देवानां मन्त्रणा)

बलिप्रभावात् भयभीताः देवाः बृहस्पतेः वासस्थानं गच्छन्ति । तत्र स्वाध्यायपरायणस्याचार्यस्याभिवादनं कुर्वन्ति ।

इन्द्रः—गुरुचरणयोः दासानुदासस्य इन्द्रस्य प्रणामाः स्वीकृताः भवन्तु ।

गुरुः—ऐश्वर्यवान् भव ? देवराज ? महेन्द्र ?

वरुणः—वरुणोऽहं भवन्तमभिवादये ।

गुरुः—कीर्तिमान् भव वरुण ?

कुबेरः—मान्य ? आचार्य ? एष खलु कुबेरः प्रणमति भवन्तम् ?

गुरुः—सततमक्षय्यलक्ष्मीको भव धनद ?

पवनः—आपदामपहर्त्तारं दुःखाब्धितरणे तरिम् ।
पूज्यमाचार्यदेवं हि एष नौति प्रभञ्जनः ।

गुरुः–सर्वत्राप्रतिहतगतिर्भूयाः मातरिश्वन् ?

(देवान् सम्यक् निभालयन्)

भो ? भो ? अदितिनन्दनाः ? अस्मिन्नसमये सहैव भवतामत्रागमनस्य किं कारणम् ? अमरावत्यां काचित् बाधा तु न समुपस्थिता कच्चित् ? अपि गमयन्ति कालं देवाः सहामोदप्रमोदभ्याम् ? सविस्तरमागमनकारणं ब्रूत ।

इन्द्रः—गुरुदेव ? दानवराजेन बलिना आतंकितो निखिलः सुरसमाजः ।

गुरुः—(आश्चर्यमुद्रया) दानवराजस्यातंकः ? किमिदम् ? कुत इदम् ? कथमिदम् ? नाधिकं दिनमतीतं जायमाने देवासुरसंग्रामे पराजितो बलिः कथं कथमपि पलाय्य स्वकीयप्रणानरक्षत् । स एवाद्य कथमेवं दुर्दान्तः सम्पन्नः ? (क्षणं विमृश्य) मन्ये किमपि विशेषं तपस्तप्तं तेन । (क्षणं स्थित्वा) कीदृशो वर्तते तस्यातंकः ?

इन्द्रः—आचार्य ? यज्ञादि शुभकर्मभ्यो देवा बहिष्कृताः । असुराश्च मदोन्मत्ताः गजा इव स्वेच्छया विहरन्तो यथेच्छमाचरन्ति । यत्र कुत्रापि श्रूयते तेषामेव विजयदुन्दुभिशब्दाः कर्णकुहराणि स्फोटयन्ति । क्रूराः दानवाः अस्माकं मानमर्दनाय सततं तत्पराः दृश्यन्ते । गुरो ? यदि अस्यानर्थस्य प्रतिकारो न चिन्त्यते तदा अस्माभिः भूयसे कालाय दानवानामधीनता स्वीकर्त्तव्या भविष्यति ।

गुरुः—सुरेन्द्र ? सत्यमेव चिन्तनीयम् अनुपेक्षणीयं खलु दानवानामौद्धत्यम् । समापतितेयं कठिना समस्या भवतां पुरतः । एतदर्थं सर्वैः देवैः एकत्रीभूय संसारस्थितिलयोद्भवकारणस्य योगेश्वरैरण्यविज्ञातमायस्य भगवतो नारायणस्य पुरस्तात् स्वकीयदयनीया दशा वर्णनीया । तं विना नापरोऽवलोक्यते त्रातुं देवान् भीषणसंकटादस्मात् ।

इन्द्रः—अनुल्लंघनीयो गुरुदेवस्यादेशः । श्रीमतामध्यक्षतायां शीघ्रमेव सर्वे देवाः करुणावरुणालयस्याशरणशरणस्य तस्य नारायणस्य प्रार्थनाम् आराधनाम् उपासनाञ्च कर्त्तुमुद्यताः भविष्यन्ति । अस्माभिराराधितोऽसौ शरणागतवत्सलः अवश्यमेव सुरसमाजस्य रक्षां करिष्यति । गुरुदेवो विजयताम् ।

पटाक्षेपः

मनोविनोदकणिका—

आयुस्संवर्द्धनोपायः

दन्तचिकित्सकैः प्रोक्तम् 'आयुर्हासेन वर्धते' ।
पुरुषापेक्षया तस्मात् स्त्रियः प्रायो हसन्त्यलम् ।
ता जीवन्त्यधिकं कालं पुरुषापेक्षया तथा ॥

—मधुपः

"गोपिकाष्टकम्"

रचयिता–श्रीरामचन्द्राचार्यः, भू. पू. सा. प्रा० महाराजसंस्कृतकालेजः, जयपुरम्

गोपाङ्गना दोहनकर्मलग्नाः कृष्णानुरक्ताश्चरितानि तस्य ।
गायन्ति तन्नामयशोऽङ्कितानि 'गोविन्द दामोदर माधवेति ॥१॥

उलूखले संभृततण्डुलादीन् संघट्टयन्त्यो मुसलैर्मनोज्ञाः ।
गायन्ति ताः कृष्णधियः प्रमत्ताः, 'गोविन्द दामोदर माधवेति ॥२॥

धन्याः प्रभाते दधि मन्थयन्त्यो गोपाङ्गनास्ताश्चलकङ्कणाढ्याः ।
गायन्ति कृष्णार्पितसर्वकामाः गोविन्द दामोदर माधवेति ॥३॥

व्रजाङ्गना गोमय-मृत्तिकाद्यैर्गेहान्स्वकीयाननुलेपयन्त्यः ।
गायन्ति गोपाल-पदाब्जभृङ्ग्यो गोविन्द दामोदर माधवेति ॥४॥

दोलासु बालानपि दोलयन्त्यः सर्वात्मना कृष्णगृहीतचित्ताः ।
गायन्ति तास्तद्गतभावमत्ता गोविन्द दामोदर माधवेति ॥५॥

रुदन्तमासाद्य निजं शिशुं तास्तन्मोदकामा अपि तन्मनस्काः ।
उच्चैर्जगुः कृष्णगुणान् गृणन्त्यो गोविन्द दामोदर माधवेति ॥६॥

वृन्दाकदम्बादिकपादपानामासेचने कर्मणि संप्रवृत्ताः ।
गायन्ति नन्दात्मजरूपमत्ता गोविन्द दामोदर माधवेति ॥७॥

गृहाङ्गणस्याऽवकरं हरन्त्यः संमार्जयन्त्योऽपि च नन्दसूनुम् ।
स्मरन्ति गायन्ति च गोपिकास्ता गोविन्द दामोदर माधवेति ॥८॥

नित्यं 'रामेण' रचित यः पठेद् गोपिकाष्टकम् ।
गृहे स्थितोऽपि भूयात्स कृष्णपादाम्बुजाश्रयः ॥९॥

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राकफ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ्रैक्टरीज़ के निर्माता।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता।

DALMIA ENTERPRISES

मुख्य कार्यालय:
४-सिंधिया हाउस, नयी दिल्ली-१

❀ स्वप्नविज्ञानम् ❀

श्रीसूर्यनारायणशास्त्री, व्या. व्याख्याता, दरबार-संस्कृतकालेजः, जोधपुर

लोकेऽस्मिन् जाग्रत्स्वप्नसुषुप्त्याख्यास्तिस्रोऽवस्था दैनिकजीवने पुरुषैरनुभूयन्ते । तत्रात्ममनसोः संयोगे लब्धजीवोपाध्यात्मप्रेरणयेन्द्रियाणां स्वस्वविषयेषु प्रवृत्तिमती रजःप्रधाना जाग्रदवस्था । मनःसहितेन्द्रियाणां श्रान्तावस्थायां तमोऽभिभूतत्वाद् विषयग्रहणाप्रवृत्तिः सुषुप्तिः । तत्र श्रान्तमात्मपरांमुखं मनः पुरीततिनाड्यां प्रविशति तमोऽभिभूतम् । आत्माभिमुखं क्रियाशीलं लब्धविश्रान्तिकं मनो यदा विविधभावात्मकं स्वप्नलोकं कल्पयति सा सत्वप्रधाना स्वप्नावस्था । स्वप्नदृश्यानि च कंचित्कालं यावज्जाग्रदवस्थायामपि स्मृतिपथमधिरोहन्ति त्रिकालज्ञात्मदेवसाक्षितया, प्राणिनां शुभाशुभकर्मफलसूचकानि च जायन्ते । तत्र कतिचिद् दृश्यानि तु कदाचित् जाग्रदवस्थायामपि प्रत्यक्षीक्रियन्ते, कानिचिद् विरुद्धफलानि निष्फलानि च कानिचिद् विलोक्यन्ते । तत्रैतद्विषये जनानां जिज्ञासाशान्तये शास्त्रानुभूत्यनुसारं किंचिद् विलिख्यते । तत्रादौ स्वप्नसाधनाप्रकारः—

तत्र स्वप्नदर्शनार्थी शुचौ देशे स्वदेवतागारे वा दिगीश्वरान् भूवायुसूर्यादिग्रहान् संपूज्य कुशसंस्तृतायां भूमौ शय्यायां शीर्षकश्रियै पदाभ्यां भद्रकाल्यै बलिमुपहृत्य, अक्षतान् सितसर्षपांश्च समन्तात् विकीर्य सर्वरत्नवीजौषधिगर्भान् नवानुदकुम्भांश्चतुरश्चतुर्दिक्षु कल्पयित्वा कृतस्वस्त्ययनः सावधानः शुचिः सूक्ष्मक्षौमाहतवसनः प्राङ्मुखो रुद्रेति हृदि रुद्रं समाधायातिरुद्रं जपेत् । यज्जाग्रतो दूरमुदैति दूरमावर्त्य मन्त्रान् प्रयतस्त्रिरेतान् । लघ्वेकभुग्दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशम् ।

नमः शंभो त्रिनेत्राय रुद्राय वरदाय च ।
वामनाय विरूपाय स्वप्नाधिपतये नमः ॥

भगवन् देवदेवेश शूलभृद् वृषवाहन ।
इष्टानिष्टे समत्रिक्ष्वस्वप्ने सुप्तस्य शाश्वतम् ॥

एकवस्त्रः कुशास्तीर्णे सुप्तः प्रयतमानसः ।
निशान्ते पश्यति स्वप्नं शुभं वा यदि वाऽशुभम् ॥

अथ स्वप्नभेदाः, तत्र वयोऽनुसारं स्वप्नस्य द्वैविध्यमाह सत्याचार्यः—

आयुस्तृतीयाभागे शेषे गतिजः प्रकीर्तितः स्वप्नः । पूर्वे काले त्वागामिकोद्भवास्त्वेव निर्देश्याः फलभेदेन स्वप्नस्य त्रैविध्यमुक्तं पराशरेण, तथा च तस्य त्रिविधं दर्शनमपार्थकं यथार्थमन्यार्थं च । मनो हि निद्रानिहिततत्वविज्ञानं कदाचिदतिहर्ष शोकक्रोधचिन्ताभयमदप्रमोदेर्ष्याकलुषितमतिदृष्ट श्रुतार्थभूतार्थभावितमविशुद्धधातुदोष प्रकोपप्रतापप्रतप्तेन्द्रियमिवोद्भ्रान्तमवशमभिक्षिप्तमतिबहुशोऽतिव्याकुलं दिवावृत्तं वा स्वप्नगतमनुभवति तदनियतमपार्थकं चोपदिशन्ति ।

कायवाङ्मनोविशुद्धानां चातिसत्वानां देवताः प्रत्यक्षवदभिदर्शयन्ति तद्यथार्थमित्याचक्षते । यथार्थदर्शनार्थत्वाद्यथार्थं देवताश्रयं वा । न चानिमित्तभाविनो भावाः । कालो हि भूतार्थं निमित्तमेष्वफलबोधकं स्वप्नाख्यमभिदधाति ।

तदन्यथादृष्टमन्यथा नियतफलमिति भवति चात्र मनोविकारजस्वप्नमभिवाञ्छन्त्यपार्थकम् । यो ह्यन्यदर्शनादन्यफल आत्मनिमित्तजस्तमन्यार्थमनेकार्थमभिदधति चरकस्तु स्वप्नस्य सप्तविधत्वमाह-यथा—

दृष्टं श्रुतार्थभूतं च प्रार्थितं कल्पितं तथा ।
भावितं दोषजं चैव स्वप्नं सप्तविधं विदुः ।
तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत् ।

अथ शुभस्वप्नाः सफला वर्ण्यन्ते—

तत्रावनेर्भुजगचलेनोद्धृत्य स्कन्धारोपणे वा ग्रसनमभिलङ्घनमर्कचन्द्रसंभक्षणं तृणमधिरोहणमुदधि सलिलसकलाभियानमभितरणमवनेश्च रुधिरपरिस्रावनमन्त्ररविकलपरिवारणं भुजापरिष्वञ्जनं वा सकलवसुधाधिपत्याय। तथा स्निग्धहरितफलितसितसुरभिकुसुमकुसुमितप्रशस्ततरुसमधिरोहणम् । बृहदमलदृढहर्म्यश्वेतगजमस्तकक्षितिधरसित शिखरज्वालितरथनृपतिशिरसामपि। नरशिरोभक्षणमसृग्ह्रदावगाहनमभिषेचनपानानुलेपनमवनिविजयाय राज्ञाम्, इतरेषामिष्टधनविद्यासुखाधिपत्याय । तथा चोक्तं वराहमिहिरेण—

स्वाङ्गप्रज्वलनं परोपशमनं शक्रध्वजालिङ्गनं
द्रव्संयुक्तचरैर्निपत्य च तरोः प्रक्षेपणं दिक्षु च,
बद्धो वा निगडैर्ग्रसेच्च दहनं नानाशिरोबाहुना,
छत्रं वा द्विरदोऽभिषिच्य बिभृयाद्दिव्योऽथवा ब्राह्मणः।
उडुपदिनकृद्भृङ्गः शृङ्गच्युताप्स्वभिषेचनं
यदि च महिषीसिंही व्याघ्रीगवां मुखदोहनम्।
जठरनिसृतैश्चान्त्रैर्ग्रामद्रुमादिविचेष्टनं
विशति यदि वा सुश्लिष्टाङ्गीतनुः प्रवराङ्गना॥
नरजहृदयमूर्धाभक्षणं वा स्वदेहे सुतनुभुजगसिंहेभाममांसादनानि।
तृणतरुकुसुमाम्बुप्रोद्भवो वा स्वनाभौ क्षितिगिरिपरिवर्तोन्मूलने वाऽधिराज्यम् ॥
दिनकरशशिताराभक्षणस्पर्शनानि हरणमपि च मूर्ध्नः सप्त पञ्च त्रिधा वा।
वृषभगृहनगेन्द्राश्वेभसिंहाधिरोहा ग्रसनमुदधिभूम्याश्चाधिराज्यप्रदानि॥
विपुलरणविमर्दद्यूतवादैश्च जित्वा पशु मृगमनुजानां लब्धिरध्यासनं वा।
विलसनपरिलेपोऽगम्यनारीगमो वा स्वमरणशिखिलाभः शस्यसंदर्शनं च॥
सितसुरभिमनोज्ञालेपमाल्याम्बराणां द्विजसुरगुरुनृपाणां दर्शनान्याशिषश्च।
मणिरजतसुवर्णाम्भोजपात्रेषु भुङ्क्ते यदि दधिपरमान्ने मज्जतेऽसृग्ह्रदे वा॥
सिततुरगफलध्वजातपत्र व्यजनसरोजमणिद्विजेन्द्रलाभः।
अभय विजय भुङ्क्ष्वेति शब्दाः परिणतराज्यफलप्रदाः प्रदिष्टाः॥
खं लेढि जिह्वया यः स्फुरदक्षो दीर्घयाऽवरः स्वप्ने।
अपि दासकुले जातः स सागरान्तां महीं पाति॥
शाद्वलतीरोपान्तां वसुधां नवशस्यशालिनीमटताम्।
पद्मानि चिन्वतां वा स्वप्नान्ते वृद्धये पुंसाम्॥
शोकश्चिन्ता रुदितं व्याकुलता बन्धनं वधः क्लेशः।
वृद्धिकराण्युक्तानि स्वप्नान्ते वाऽपि मरणानि॥
मुद्राद्दृषदञ्जनी विपञ्चीस्त्रीसङ्गारिषु चाङ्गनाप्तिरुक्ता।
लब्धे सरकेऽथ दर्पणे वा भृङ्गारादिषु चोद्भवं सुतस्य॥
सिद्धिप्राप्तिः स्याद्धि कोषेऽतिभालो वश्यो राजा जायते शासनाप्तौ।

क्रैपिण्यै घनलब्धिरम्बुतरणे शोकस्य नाशो भवेत् ।
वर्षे रोदितशोचतादिषु तथा दाहे विवृद्धिः स्मृता ॥

अथाशुभस्वप्नवर्णनम्—

नाभेरन्यत्र गात्रे तृणतरुकुसुमप्रोद्भवः स्नेहपानं
क्रीडायां नोपभोगाः खरकपिकरभव्यालरौद्रैश्च सत्वैः ।
कायस्यालेपनं वा कलुषजलमसीगोमयस्नेहपङ्कै-
दृँग्जिह्वादन्तबाहुप्रपतनमथवाऽनर्थशोकप्रदानि ॥
गीतक्रीडितभूषितप्रहसित प्रेङ्खोलितास्फोटिता-
न्यर्केन्दुध्वजतारकानिपतनं श्रोतोवहाधोगमः ।
रज्जुच्छेदचिताप्रपातजननीगात्रप्रवेशास्तथा ।
स्वप्ने कांस्यविचूर्णनं च शिरसि क्लेशामयानर्थदम् ॥
स्थलपशुमृगकीटानूपचर्माण्डजानां प्लवनमुदकनाशो स्याद् विवाहोत्सवो वा ।
सरसिजजतुभाण्डक्रीडनं नर्तनं वा मलिनविवसनत्वं वाऽऽशु शोकप्रदानि ॥
पुंद्रव्यनाशेषु हृताद्वियोगश्छेदश्च पाणेः कमलापहारे ।
प्रासादशृङ्गादिशिरोवताराः स्वप्नेषु नेष्टा इति संप्रदिष्टाः ॥
सर्पे कर्णं नासिकां वा प्रविष्टे तच्छेदः स्याद्वेष्टने चाशु बन्धः ।
लास्ये प्राप्नोति वधं रुदिते हास्ये प्रगीतके रोगः ।
पवनं कलहप्रायं प्रतिलोमफलः किल स्वप्नः ॥
चित्रं कर्मविचित्रं यः पश्यति नैव वर्तितं स्वप्ने ।
शोकः समाश्रयेत् पतितं वासार्थमिवाण्डजे वृक्षम् ॥
स्वप्ने पिबतः पुंसो विरेचने स्नेहमौषधं वापि ।
रोगो ग्लयति देहं हिमकिरणपात इव पद्मम् ॥
व्यावल्गितविक्रीडितविलसितसङ्गीतनृत्यहसितानि ।
स्वप्ने प्रतिबुद्धानामायासकराणि ज्ञेयानि ॥
श्मश्रुकेशनखदैर्ध्यकर्तनं वानरी विकृतनार्युपासनम् ।
रक्तवस्त्रसरुजाङ्गनार्दनं रोगमृत्युभयशोकतापदम् ॥
हरिणारोहे भ्रमणं मृत्युर्न चिरेण शूकरारोहे ।
उष्ट्रारोहे व्याधिर्वृद्धिः स्यात् कुञ्जरारोहे ॥

अथारिष्टस्वप्नाः—श्ववानरोष्ट्रखरनकुलमार्जारमहिषवराहद्वीपिश्येनभासाद्यप्रशस्तान्यदंष्ट्रिनखिक्रव्यादानामधिरोहणं नग्नं वाधिरुह्य याम्याशाभिगमनं मज्जनं वा क्वचिद् भस्मस्तुरक्तचन्दनतैलमसीप्रलिप्तगात्राशोकपुण्डरीकभृतो विसानि भक्षयतः पांशुसिकतागोमयेषु महति कलुषह्रदे वा निमज्जनं तथा कुसुमितकिंशुककोविदारकरवीरचैत्ययष्टिरुपाऽधिरोहणं करवीरकमलदलमालाबन्धो वा भृष्टयवमसिभस्मत्तैलवसापानं गात्रानुलेपनं वा मरणाय । सुवर्णरजतमूत्रपुरीषाणां वा स्वप्ने छर्दनं दशमे मासि मरणाय । यक्षरक्षःप्रेतपिशाचानां स्वप्ने दर्शनमतीन्द्रियाणां नवमे मासि मरणाय ।

राजस्थान मुख्यमंत्री
सूखा व बाढ़ सहायता कोष

में

देश के सभी डाकघरों से निःशुल्क मनीआर्डर
द्वारा धन भेजने की सुविधा

कृपया अधिक से अधिक धन भेजकर पीड़ितों की
सहायता कीजिये

●

मनीआर्डर भेजने का पता :

राजस्थान मुख्यमंत्री
सूखा व बाढ़ सहायता कोष,
जयपुर।

राजस्थान सरकार द्वारा प्रसारित

कालावल्यामुक्तं च—

रक्तगन्धप्रलिप्ताङ्गो रक्तमाल्योपशोभितः ।
तैलाभ्यक्तोऽतिभीतश्च–मुण्डितो रक्तवस्त्रधृक् ॥

खरमारुह्य वेगेन दक्षिणां दिशमाव्रजेत् ।
यस्यात्मा दृश्यते स्वप्ने तन्नाशो वत्सरार्धतः ॥

लोहदण्डयुतं कृष्णं नरं कृष्णपरिच्छदम् ।
स्वप्ने च पार्श्वतो दृष्ट्वा त्रिमासान् मृत्युराप्यते ॥

दृष्ट्वाऽऽत्मानं मृतं स्वप्ने द्वादशाहं स जीवति ।
केशाङ्गारं तथा भस्म भुजङ्गान् निर्जलां नदीम् ।
दृष्ट्वा स्वप्नेदशाहत्तु मृत्युरेकादशे दिने ॥

क्षुद्रवानरयुक्तेन रथेनाशां तु दक्षिणाम् ।
गायन्नथ व्रजेत् स्वप्ने विद्यान्मृत्युमुपस्थितम् ॥

चरकः—श्वभिरुष्ट्रैः खरैर्वापि याति यो दक्षिणां दिशम् ।
स्वप्ने पक्षं समासाद्य स जीवन्तं विमुञ्चति ॥

नग्नं श्रवणकं स्वप्ने हसमानं महाबलम् ।
एकं वा वीक्ष्य बहून् विद्यान्मृत्युमुपस्थितम् ॥

आमस्तकतलोयस्तु निमज्जेत् पंकसागरे ।
दृष्ट्वा तु तादृशं स्वप्नं सद्य एव न जीवति ॥
लाक्षारक्ताम्बराभं यः पश्यत्यम्बरमन्तिकात् ।
स रक्तपित्तमासाद्य तेनैवान्ताय नीयते ॥
श्वभ्रे यो निपतेत् स्वप्ने द्वारं चास्य पिधीयते ।
न वोत्तिष्ठति यस्तस्मात् तदन्तं तस्य जीवितम् ॥
स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते पुनः ।
जलप्रवेशादपि वा तदन्तं तस्य जीवनम् ॥
कृष्णाम्बरधरा नारी हसन्ती मुक्तमूर्धजा ।
यं चाकर्षति बद्धा स्त्री नृत्यन्ती दक्षिणामुखम् । तस्य मरणाय ॥
नृत्यन् रक्षोगणैः सार्द्धं यः स्वप्नेऽम्भसि सीदति ।
स प्राप्य भयमुन्मादं याति लोकमतः परम् ॥
कलुषेऽम्भसि पंके वा कूपे वा तमसाऽऽवृते ।
स्वप्ने मज्जति सोद्वेगः स्रोतसां व्रियते च यः ॥
लता कण्टकिनी यस्य दारुणा हृदि जायते ।
स्वप्ने गुल्मस्तु मत्ताय क्रूरो विशति मानवम् ॥
नग्नस्याज्यावसिक्तस्य जुह्वतोऽग्निमनार्चिषम् ।
पद्मान्युरसि जायन्ते स्वप्ने कुष्ठैर्मरिष्यति ॥

मत्तं नृत्यन्तमाविध्य प्रेतो हरति यं नरम् ।
स्वप्ने हरति तं मृत्युरपस्मारपुरःसरः ॥
शष्कुली र्वाऽप्यपूपान् वा स्वप्ने खादति यो नरः ।
स्नेहं बहुविधं स्वप्ने चाण्डालैः सह यः पिबन् ॥
स चेत् प्रच्छर्दयेत् तादृक् प्रतिबुद्धो न जीवति ।
प्रेतैः सह पिबेन्मद्यं यः स्वप्ने कृष्यते शुना ॥
सुघोरज्वरमासाद्य प्रयाति यममन्दिरम् ।
एवं बहुविधं शास्त्रे फलमुक्तं मनीषिभिः ॥

तत्र बृहद्यात्रायामाह वराहः—प्रत्यक्षवद्भवति यः स्फुरतीव चान्तः स्वप्नस्य तस्य नियमात् सदसत्फलाप्तिः । दृष्ट्वा स्वप्नं शोभनं नैव स्वप्यात् पश्चाद् दृष्टो यः स्वपाकं विधत्ते ।
शंसेद् दुष्टं तज्ज्ञसाधुद्विजेभ्यस्ते चाशीर्भिः पूजयेयुर्नरन्तम् ॥

स्वप्नफलपाककालश्चेत्थमुक्तः—

आद्ये वर्षाद् वत्सरार्धाद् द्वितीये पाको वर्षाधभागे तृतीये ।
मासात्पाकः शर्वरीपश्चिमान्ते सद्यः पाको गोविसर्गेषु दृष्टः ॥

दुःस्वप्नफलनाशोपायश्चैवमभिहितः—

भूयः प्रस्वपनं न चास्य कथनं गङ्गाभिषेको जपः ।
शान्तिः स्वस्त्ययनं निषेवणमिति प्रातर्गवां शृङ्गयोः ॥
विप्रेभ्यश्च तिलान्नहोमकुसुमैः पूजा यथाशक्तितः ।
पुण्यं भारतकीर्तनं च कथितं दुःस्वप्नविच्छित्तये ॥

अन्यच्च— नागेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम् ॥
एवं शुभाशुभस्वप्नविधानमुक्तमयुक्तयुक्तं च समूह्य बुद्धया ।
देशादि वर्णाकृतिसंपदश्च तत्तत्फलं संपरिकल्पयेच्च ॥

अत्रानुक्तविशेषशान्तिषु विशेषतोऽवगम्य गुरुलाघवं लक्षहोमचण्डीपाठादिशान्तिः करणीया-इति शम् ॥

दी अवध सूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

अथ श्रीशिवराज्योदये महाकाव्ये

४२ तमः सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथापराम्भोनिधितीरशोभा
महापुरी सूरतनामधेया ।
अगण्यरत्नोपचयप्रकाशा
सिन्धूत्थिता श्रीरिव राजते स्म ॥१॥

यां स्वर्णरत्नैर्धिविशेषरम्यां
स्रोतस्वती सा तपती प्रसिद्धा ।
विलोलकल्लोलमयाक्षिपातैः
समीपतः संततमीक्षते स्म ॥२॥

प्रत्यग्रदूर्वाभहरिन्मणीनां
पलाशपुष्पच्छविविद्रुमाणाम् ।
कर्पूरखण्डद्युतिमौक्तिकानां
यत्र प्रभा नेत्रसुखं वितेनुः ॥३॥

यस्यां विपण्यामनिशं धनाढ्याः
सुवर्णवस्त्रोत्तमरत्नभूषाः ।
सवित्तकोषं स्म परिभ्रमन्ति
क्रेतुं स्ववाञ्छोचितरत्नजातम् ॥४॥

यत्रापणेषु भ्रमतां जनानां
मरीचभङ्गाजतुकादिगन्धाः ।
केषाञ्चिदुद्वेगमथापरेषां
प्रसन्नतां काञ्चन तन्वते स्म ॥५॥

अनेकदेश्या जनता हि यत्र
विचित्रवेशा विविधाङ्गवर्णा ।
परस्परं वित्तपरोद्यमेषु
प्रादर्शयत् कृत्रिममात्मभावम् ॥६॥

अन्योन्यभाषाऽनवबोधभीतेः
सम्मिश्रभाषा व्यवहारवन्तः ।
वणिग्जनाः क्रेतृगणैरवोचन्
प्राधान्यतो यत्र सहावभावम् ॥७॥

आंग्लास्तुरुष्का अरबास्तथान्ये
पाश्चात्यदेश्या धनराशिलुब्धाः ।
महालयेषूषुरुदारभोगा
यस्यां भुजङ्गा इव रत्नवन्तः ॥८॥

यत्रांग्लदेश्या अतिगौरवर्णाः
नार्यः प्रसन्नाननसुस्मितास्ताः ।
हतत्रपा यान्ति पथा विशङ्कं
स्वभर्तृहस्तग्रथितस्वहस्ताः ॥९॥

म्लेच्छाङ्गना यद्यपि हृद्यरूपाः
लोकावलोकादतिलज्जमानाः ।
यत्र क्वचिद् यान्ति मनाक् स्खलन्त्य
आशीर्षपादं पिहितस्वदेहाः ॥१०॥

वाणिज्यलब्धं विपुलं स्ववित्तम्
आरेक्तुकामा विविधोपभोगैः ।
यस्यामधन्या धनिनो युवानो
वाराङ्गनासद्मसु निन्युरायुः ॥११॥

सुरूपवत्योऽपहृताः कुमार्यो
भार्यास्तथा ब्राह्मणगुर्जराणाम् ।
यतोऽन्यदेशं प्रति वाहिता ही
म्लेच्छैर्धनान्धैर्बत विक्रयाय ॥१२॥

विशीर्णचैलाः कृशदेहबन्धाः
भारश्रमस्विन्नसमस्तगात्राः ।
ते क्रीतदासा विपणीषु यत्र
पर्यक्षिपन् कातरदृष्टिपातान् ॥१३॥

समामिलन् यत्र च यात्रिकास्ते
मोहम्मदीया विविधप्रदेश्याः ।
प्रयातुकामा उडुपैर्महद्भिः
मक्काभिधानं निजधर्मपीठम् ॥१४॥

प्रभूतहस्त्यश्वपदातिसैन्यो
निरस्तसर्वारितयाऽपभीतिः ।
दिल्लीपतेः शासनतः शशास
यत्राधिकारी स इनायताख्यः ॥१५॥

तदृद्धिकीर्ति बहुशो निशम्य
शाहिस्तखानापहृताखिलर्द्धिः ।
द्विरेफकोषान्मधुवत् ततो हि
वित्तापहारं शिव आचकांक्ष ॥१६॥

अन्याय्यमार्गैरुपचीयमानं
पापोपभोगैरपचीयमानम् ।
सत्कर्महेतो र्जनकण्टकानां
धनं स मेने हरणीयमेव ॥१७॥

दिल्लीपतेरेव हि शासनेन
विशोषित यत् सकलं स्वराज्यम् ।
उच्छोषणं तद्रिपुराजपुर्याः
मेने शिवाजिः खलु धर्म्यमेव ॥१८॥

वर्षर्तु वर्षे नितरां प्रशान्ते
ताराङ्गणे चाथ शरत्प्रसन्ने ।
सुदूरदर्शी सुयशोऽभिलाषी
शिवः स्वचाराधिपमेक्षतान्तः ॥१९॥

मनीषितं कल्पितुमप्यशक्यं
तत् स्वामिनश्चेतसि सन्निधाय ।
अनीक्षितः केनचिदप्यकस्माद्
बहिर्जिनामा स बहिर्जगाम ॥२०॥

उल्लंघ्य शीघ्रं सरितो गिरींश्च
निरीक्ष्य मार्गे रिपुचेष्टितानि ।
मनागविश्रम्य सुखस्थलेऽपि
तां सूरताख्यां स पुरीं प्रपेदे ॥२१॥

कर्णाटकीं कुत्रचिदान्ध्रदेश्यां
तुर्कीं कदाचित् क्वचिदारबीं वा ।
उर्दूं क्वचित् पारसिकीं च वाणीं
स व्याहरत् तत्र विचित्रवेशः ॥२२॥

मार्दङ्गिको वा यमपट्टिको वा
क्वचित् परिव्राडथ लिङ्गधारी ।
कुरानपाठी भवितव्यवादी
भूत्वा स बभ्राम दिवा च नक्तम् ॥२३॥

भूयः स भूत्वा बत भारवाही
कोषान्तिकाद् वित्तवतां चचार ।
चिक्षेप चक्षुः क्वचिदन्धरूपी
निगूढकोषेषु हिरण्मयेषु ॥२४॥

स श्रोतुकामोऽरि रहस्यजातं
बभूव धूर्तः क्वचिदेडमूकः ।
क्वचित्तु विभ्रान्त इव प्रकामं
निनिन्द नीचान् द्रविणान्धमूढान् ॥२५॥

तत्रैकमासं नगरे विशाले
कृत्वा निगूढभ्रमणं प्रकामम् ।
निरीक्ष्य मार्गं वनपर्वतान्तः
स सत्वरं रायगडं प्रपदे ॥२६॥

समीक्षितं यद् यददृष्टपूर्वम्
आकर्णितं चाश्रुतपूर्वभूतम् ।
बहिर्जिणा तत्र पुरे समृद्धे
निवेदितं तत्सकलं शिवाय ॥२७॥

कुबेरकोषाधिकवित्तकोषान्
दिल्लीपतेस्तद्वणिजां तथैव ।
संरक्ष्यमाणानबलारिसैन्यैः
ज्ञात्वा शिवः प्रीततरो बभूव ॥२८॥

तदैव चादेशयदात्मनीनान्
तुरङ्गसेना-प्रमुखान् बलाढ्यान् ।
श्रीत्र्यम्बकेशं प्रति तीर्थयात्रां
कर्तुं प्रयास्याम्यहमित्यकस्मात् ॥२९॥

आदेशमन्वेव चतुःसहस्रं
तुरङ्गसैन्यं द्विगुणं सशस्त्रम् ।
शिवानुगं त्र्यम्बकदर्शनार्थं
द्रागुत्तराशाभिमुखं प्रतस्थे ॥३०॥

दिल्लीन्द्रसेनासहितस्तदानीं
समीपवर्ती जसवन्तसिंहः ।
तदन्तिकाद् धावददोऽश्वसैन्यं
न मूढधीर्ज्ञातुमहो शशाक ॥३१॥

द्वित्रै रहोभिस्तदनीकमागाद्
गोदावरीजन्मभुवं पवित्रम् ।
ज्योतिर्मयं यत्र भुवं पुनाति
त्रियम्बकाख्यं परमेशलिङ्गम् ॥३२॥

तीर्थे कुशावर्तसमाह्वये च
भक्त्या नितान्तं परयाऽवगाह्य ।
सबिल्वपत्रोदकपुष्पहस्ताः
प्रापूजयन् देवममी प्रवीराः ॥३३॥

घण्टानिनादैर्जयगर्जनाभिः
शम्भो महादेव हरेति घोषैः ।
पुरातनं पावनमन्दिरं तद्
आनन्दसन्दोहमयं बभूव ॥३४॥

तत् प्रावतनं तीर्थपदं वगाह्य
भक्तः प्रकृत्यैव जिजातनूजः ।
श्रीत्र्यम्बकार्चाविधिमग्नचेताः
देहात्मभावं सहसोत्ससर्ज ॥३५॥

समन्त्रघोषं जगदीशलिङ्गे
फुल्लारविन्दानि सहस्रशश्च ।
समर्पयन्नूर्जितभावबन्धः
शिरोऽरविन्दार्पणधीर्बभूव ॥३६॥

पूजावसाने सहसादिदेश
सेनागणानग्रत एव यातुम् ।
संप्रेरिता किन्तु जनेषु वार्ता
युद्धाय यद् देवगिरिं प्रयामः ॥३७॥

सा किं वदन्ती प्रसृताऽऽसमन्ताद्
ह्रदेऽश्मघातादिव चोर्मिमाला ।
श्रुत्वैव यां चारगणैरनूक्तां
तत्राधिकारी नितरां चकम्पे ॥३८॥

दिने वनान्तः कृतगूढवासं
झञ्झाप्रवेगेन निशि प्रधावत् ।
तद् वीरसैन्यं खलु पञ्चमेऽह्नि
सम्प्राप्तमिष्टस्थलसन्निधाने ॥३९॥

तत्रातिभीतां जनतामवेक्ष्य
प्रसारिता विश्वसनीयवार्ता ।
औरङ्गजेबस्य निदेशतो यत्
सौराष्ट्रमभ्येति हि वाहिनीयम् ॥४०॥

अथापराह्न्यवगत्य तथ्यं
शिवाजिसेनेयमुपस्थितेति ।
वित्तापहारं परिभाव्य भीता
वणिग्गणाश्चुक्रुशुरार्तचित्ताः ॥४१॥

तदैव वार्ता प्रसृता समन्ताद्
आश्चर्यभूता खलभीतिहेतुः ।
यन्म्लेच्छराज्यान्तक एकवीरः
शिवाजिरप्यत्र समागतोऽस्ति ॥४२॥

महाचमत्कारमयी च वार्ता
श्रुता यदा सा नगराधिपेन ।
अशक्यतां तत्र दृढं विमृश्य
स उच्चकैर्मन्दमतिर्जहास ॥४३॥

जगाद चामूनतिभीतिमूढान्
वार्ताहरांस्तान् वणिजो धनाढ्यान् ।
अलं भियाऽलं खलु संशयित्वा
कथं कुतोऽसौ गिरिमूषकोऽत्र ॥४४॥

मूढाः ! स सह्याद्रिरितोऽति दूरे
मध्येऽस्मदीयं प्रसृतं च राज्यम् ।
स्थले स्थले ते शतशः स्पशा नः
कथं ससैन्यं स शिवाजिरेयात् ॥४५॥

तथापि चेदागत एव सोऽत्र
कथञ्चिदात्यन्तिकसम्भ्रमेण ।
इनायतोऽहं खलु नाफझुल्लः
शाहिसखानश्च तथा प्रमूढः ॥४६॥

इत्यात्मगर्वेण बहु ब्रुवाणे
तस्मिन्नधन्ये मदमोहमग्ने ।
समामिलन् सर्वत एव भीताः
ससम्भ्रमं ते यवना धनाढ्याः ॥४७॥

तानन्वगच्छन्नपरेऽपि केचित्
वित्तापहारे नितरां विशङ्काः ।
नार्यश्च हा हेति विलापवत्यः
सहार्थका भर्तृगवेषणोत्काः ॥४८॥

क्षणाच्च सर्वं नगरं विशालं
भयद्रवल्लोककदम्बकं तत् ।
बभूव वात्याहतसर्ववृक्ष-
विकीर्णपर्णाकुलकाननाभम् ॥४९॥

विवेश तस्मिन्नगरे तदानीं
शिवाजिसंदेशहरोऽग्रदूतः ।
अश्वाधिरूढः स बभूव वीरो
लोकस्य नूनं कुतुकैकपात्रम् ॥५०॥

इनायतस्याग्रत एव शीघ्रं
स किंकरः पत्रकरः प्रगल्भः ।
समागतः प्राह कठोरवाचा
शिवस्य सन्देशमलंघनीयम् ॥५१॥

दिल्लीन्द्रसैन्यप्रखरानलेन
वर्षत्रयं नः सकलं स्वराज्यम् ।
निःशेषमुच्छोषितमित्यतोऽहं
तद्राज्यसंशोषणधीरुपेतः ॥५२॥

येऽप्यत्र केचिद् धनकोशवन्तो
वणिग्जनाः श्रेष्ठिवरास्तथान्ये ।
उच्चाधिकाराश्च भवादृशा ये
ते स्वं धनं नः स्वयमर्पयन्तु ॥५३॥

दिल्लीन्द्रसैन्येन निपीडितानां
गोपालकानां च कृषीवलानाम् ।
आपत्तिमाहन्तुमभूतपूर्वां
सर्वं धनं मे विनियोजनीयम् ॥५४॥

ये धर्मकार्येऽत्र धनं स्वकीयं
समर्पयेयुः स्वयमेव शिष्टाः ।
ते पुण्यभाजो नियतं भवेयुः
त्यागेन पुण्यं मुनयो वदन्ति ॥५५॥

ये किन्तु लोभान्धधियः प्रमूढाः
नैवार्पयेयुः स्वयमात्मकोशान् ।
मत्क्रोधपात्रान् न हितान् सुरक्षेत्
दिल्लीश्वरोऽसौ ससमग्रसेनः ॥५६॥

तं वाचिकं लेखगतं च सर्वं
सन्देशमाकर्ण्य पुनः पठित्वा ।
निर्वीर्यसैन्यं स्वपुरं विजानन्
इनायतोऽसौ नितरां चकम्पे ॥५७॥

तथापि सन्देशहरं स्वमेकं
स प्रेषयामास शिवान्तिके च ।
प्रयुक्तगर्वोद्धतवाचिकं यं
बन्दीचकारैकपदे शिवाजिः ॥५८॥

क्षणेऽपरस्मिन्यदिशत् समस्तान्
सेनाधुरीणान् स हि लोहिताक्षः ।
दहन्निवात्युग्रवचःप्रसार-
स्फुरत्प्रकोपानलतः पुरीं ताम् ॥५९॥

भिन्तार्गलाश्छिन्त च वप्रभित्तीः
सवह्निदण्डं नगरे प्रयात ।
विध्वंसयध्वं धनिनां गृहाणि
कोशस्थितं लुण्टत वित्तजातम् ॥६०॥

श्रुत्वा तमादेशममी प्रवीराः
दुर्दान्तशत्रुक्षपणातिदक्षाः ।
निमेषमात्राद् धृतखड्गशूल-
भल्लाग्निदण्डाः प्रययुः सघोषम् ॥६१॥

तां वित्तगुर्वीं गुरुसद्मचार्वीं
ऋद्धापणां रुद्धसमस्तमार्गाम् ।
पुरीं प्रविष्टा शिववाहिनी सा
पूरोद्धता पर्वतवाहिनीव ॥६२॥

न तत्र गेहं धनिनः किलासीत्
न यद् विभग्नं न हि वा प्रदग्धम् ।
न वित्तवांस्त्यागपराङ्मुखश्च
बन्दीकृतो यो न हि तैः प्रवीरैः ॥६३॥

दहद्गृहोद्भूतविलोलवह्नि-
प्रसर्पदभ्रंकषधूम्रलेखाः ।
दूरस्थखेटस्थितगोपबालै-
र्विलोक्य वह्नेर्गरिमान्वमायि ॥६४॥

अस्तङ्गते भास्वति सुप्रकाशा
ज्वाला अदग्धानि विलेलिहानाः ।
नक्तं पयोधौ प्रतिबिम्बितास्ता-
स्तलस्थरत्नान्यदिशन् प्रकाशम् ॥६५॥

रात्रौ प्रवृद्धानलदीप्तकान्ति-
च्छायामयी सा तपती नदी च ।
घनान्धकारे निकषोपलाभे
सुवर्णरेखेव तदा रराज ॥६६॥

प्रोद्दीप्ततुङ्गालयतः स्फुरन्त्यो
ज्वालाश्च काषायरुचो महत्यः ।
म्लेच्छाधिराज्ये प्रतिरोप्यमाणाः
रेजुः स्वराज्यध्वजसन्निभास्ताः ॥६७॥

सुवर्णकोशाः सदनान्तरुच्चैः
वह्निप्रदाहेन नितान्ततप्ताः ।
समन्वविन्दन्नचिरात् समेत्य
शिवान्तिकं ते हि चिराय शान्तिम् ॥६८॥

अथातिभीतो नगराधिकारी
दुर्गे दिवाभीत इव प्रलीनः ।
विचिन्तयामास भृशं सुहृद्भिः
शिवाजिमाहन्तुमनाः प्रयुक्त्या ॥६९॥

नियुज्य सन्देशहराग्रदौत्ये
मनीषितं साधयितुं स्वकीयम् ।
स प्रेषयामास युवानमेकं
महाबलिष्ठं च निगूढशस्त्रम् ॥७०॥

स आगतः सत्वरमिद्धकोपो-
ऽप्यात्तस्मितो म्लेच्छयुवा सुवेशः
पुरोपकण्ठोपवने वसन्तं
शिवाजिमालोकयितुं समक्षम् ॥७१॥

समीक्षितस्तेन विशालवृक्ष-
शाखावितानाततमण्डपान्तः ।
उच्चासने खड्गधरावृतेऽसौ
विराजमानः प्रथितः शिवाजिः ॥७२॥

माणिक्य-मुक्तामणि-हीरकाणां
प्रवालकार्तस्वरराजतानाम् ।
महाचयास्तं परितश्च दृष्टाः
प्रतिक्षणं संपरिवर्धमानाः ॥७३॥

देशान्तराभ्यागतचित्रपात्र-
सुवस्त्रशस्त्रास्त्रमहानिकायाः ।
सञ्चीयमानाः क्षणशः समन्तात्
विलोकितास्तेन कषायिताक्ष्णा ॥७४॥

निरीक्षितास्तत्र सहस्रशश्च
बन्दीकृतास्ते वणिजो धनाढ्याः ।
अदित्सवो मूर्धनि ताड्यमानाः
प्रदित्सवो द्राक् परिमुच्यमानाः ॥७५॥

न धार्मिकः कश्चन किन्तु दुष्टो
मोहम्मदीयो न तथैशवीयः ।
नालोकि बन्दीकृतलोकवृन्दे
काप्यङ्गना यौवनलोभनीया ॥७६॥

दृष्टानि तेनोच्चकितेक्षणेन
धर्मप्रियाणां प्रियपुस्तकानि ।
प्रत्यर्पणार्थं कमनीयवस्त्रैः
संवेष्ट्यमानानि महादरेण ॥७७॥

स सम्परीतः शिवसैनिकानां
गणेन शीघ्रं प्रययावभीकः ।
शिवाग्रतोऽभ्येत्य नतोत्तमाङ्गः
सन्देशवाचं विससर्ज धीरम् ॥७८॥

सन्देशमाकर्ण्य पुराधिपस्य
भयाकुलस्यापि मदोद्धतं च ।
प्रसन्नगम्भीरसमुद्रचेताः
शिवाजिरुच्चैः प्रहसन्नुवाच ॥७९॥

खद्योतकस्तर्जयतेऽद्य सूर्यं
दुर्डुण्डुभो भर्त्सयते भुजङ्गम् ।
घूकोऽथवाज्ञापयते खगेन्द्रम्
इनायतो मामनुशास्ति कार्यम् ॥८०॥

आकर्ण्य वाणीं परिहासगर्भां
शिवस्य वाचंयमपण्डितस्य ।
प्रहासमग्नेषु सुहृद्गणेषु
स कृष्टगूढच्छुरिकश्चुकूर्द ॥८१॥

तदैव लक्षांशनिमेषमात्रात्
तडित्प्रदीप्ताः शतखड्गधाराः ।
शिवाजिघातोद्धृतशस्त्रहस्तं
वपुस्तदीयं शतधा व्यभिन्दन् ॥८२॥

तन्मांसखण्डा रुधिरप्रदिग्धा
उच्चैरकस्मादभिविप्रकीर्णाः ।
नभश्चरैर्गृध्रगणैः क्षुधार्तैः
नखाग्रकोटीषु धृता अयत्नम् ॥८३॥

तच्छिन्नगात्रोच्छलदुष्णरक्त-
प्रवर्षसंक्लिन्नसुधौतचैलः ।
बालार्करश्मिच्छुरितात्मकान्तेः
शिवो हिमाद्रेः सुषमां जहार ।।८४।।

कूटप्रयोगं तमरिप्रयुक्तं
विज्ञाय सर्वे शिवसैनिकास्ते ।
स्फुलिङ्गवृष्टिक्षुभितोग्रसर्प-
कदम्बकल्पाः परितोऽन्वसर्पन् ।।८५।।

यो यः पुरस्तादरिपक्षपाती
तैरीक्षितः कश्चन सूरतस्थः
स स प्रहारैरसिपट्टिशानां
कृतान्तसद्मातिथितां प्रजिघ्ये ।।८६।।

क्रोधान्धभूतैरखिलैरमीभिः
बन्दीकृतास्ते वणिजश्च नैके ।
उल्लंघ्य चालंघ्यतमां शिवाज्ञां
हतास्तदानीं पशुघातमेव ।।८७।।

संहारसत्रं तदवेक्ष्य घोरं
सर्वं निजाज्ञाविपरीतभूतम् ।
संवर्तपाथोनिधिघोरगर्जा-
गम्भीरनादं शिव उज्जगर्ज ।।८८।।

अलं प्रमादेन खलु प्रहृत्य
क्रोधं निजं संहरत प्रवृद्धम् ।
असन्मदाभ्याहतसद्विवेका
न जातु लोके विजयं लभन्ते ।।८९।।

न सौनिका यूयमरे क्रुधन्धाः
सङ्ग्रामशूराः खलु सैनिकाः स्थ ।
भीतेष्वशस्त्रेष्वबलेषु शस्त्रं
न सैनिकाः सौनिकवत् क्षिपन्ति ।।९०।।

इत्याज्ञया स्वामिन आकुलस्य
निगीर्यकोपानलमात्मनैव ।
वीराः प्रकोपान्धधियोऽप्यरुन्धन्
संहारकाण्डं तदकाण्ड एव ।।९१।।

एवं दिनत्रयमनारतमासमन्ताद्
दग्ध्वा समृद्धसदनां नगरीमरातेः ।
दग्धव्यशेषरहितः स महाहुताशः
क्रोधाग्निना सह शिवस्य चिरेण शान्तः ।।९२।।

निर्दग्धतुङ्गकमनीयगृहोत्तमाङ्गा
व्याकीर्ण-रम्यतरुगुल्मसुकेशपाशा
सा पूरभूत् पितृवनानललीढकाया
प्रेताङ्गनेव नितरामशुभावलोका ।।९३।।

निस्सारितं कुटिलनीतिविधिप्रवीणैः
देशान्तरागत-वणिग्गणयात्रिकैस्तु ।
संकल्पितं सकलमप्यशिवं हृदिस्थं
लीलायितं तदवलोक्य शिवस्य रौद्रम् ।।९४।।

तदनु चरगणोक्तं वृत्तमाकर्ण्य गूढम्
अगणितपृतनो यत् कोऽपि माहाबताख्यः ।
त्वरितगतिरुपेतो देहलीशाज्ञयेति
सपदि सनिधि दूरं निर्ययौ श्रीशिवाजिः ।।९५

इति श्रीशिवराज्योदये महाकाव्ये ४२ तमः सर्गः समाप्तः ।

❀ साम्ययोगदर्शनम् ❀

श्रीगोविन्दप्रसादसुन्दरियामहोदयः, सीकरः

समाजनिर्माणस्याऽऽधारशिला

समाजनिर्माणस्य मौल आधारः समतैवेति समाजशब्दस्यार्थविश्लेषणेन सम्यगवगम्यते। सहास्तित्वभावनाऽपि तदङ्गत्वेन सामाजिकैः स्वीकृता कालमासाद्य विकासमापद्यत। सभ्यतासंस्कृतिप्रभृतयः संस्कारविशेषास्तथैवाऽधुनाप्रादुर्भूताः समाजवादसाम्यवादादयो वादविशेषाश्च समाजनिर्माणस्य मूलाऽऽधारशिलायाः समतायाः सहयोगिनस्तदङ्गभूता एव सन्ति। समाजशास्त्रे समतातो भिन्नमस्तित्वं तेषां नैव विद्यते।

सममजन्ति जना अस्मिन्निति व्युत्पत्त्या समाजशब्दस्यार्थाऽनुसन्धाने सति सुस्पष्टं विज्ञायते यत्समाजनिर्माणस्य भावनया सहैव समतातत्त्वं समजायत। समाजशास्त्राऽनुसन्धानशीलैर्मनीषिभिरपि समाजस्य परिभाषा—"एकस्यैवोद्देशस्य सिद्धये प्रक्रमद्भिः समानभावेन परिचालिताभिर्व्यक्तिभिर्बलप्रभावविशेषप्रेरणान्तरा स्वेच्छया सञ्चालिता संस्था समाजः" इति व्यपदिष्टा। परिभाषयाऽनया प्रतीयते हि समाजनिर्माणात्प्रागसंघटनशीला आदियुगस्य मानवा जीवनयापने समापतन्तीनामसुविधानां निरासार्थं संघीभूयाऽचेष्टन्त, तदैव वृत्त्यर्थं समानभावेन कर्तव्यपालने दत्ताऽवधानास्ते समाजनिर्माणे समर्था बभूवुः।

सर्वोदयः

सर्वेषामुदयः सर्वोदय इति अर्थाद्यस्मिन्समाजे समानभावेन तदङ्गभूतानां सर्वेषां मानवानां समुन्नतिरथ च नैतिकभावेन परिशुद्धिर्भवेत्स सर्वोदयसमाज इति सूत्ररूपेण समुपदिष्टवांस्तत्रभवान् राष्ट्रपिता महात्मागान्धी। दिवंगते राष्ट्रपितरि तदवशेषं कार्यकलापं सम्पादयितुं प्रवृत्तोऽत्रभवानाचार्यविनोवाभावे सर्वोदयसमाजरचनार्थं प्रयतमानः साम्ययोगाऽभिधं तन्मूलतत्त्वं सर्वत्र प्रचारयति।

सर्वोदयसमाजरचनाया विचारप्रवाहो भारतवर्षेऽस्मिन् नवीनतमः कोपि प्रयत्नो नैव विद्यते। अतिप्राचीनकालादत्र विद्वद्भिः समादृता सर्वोदयीयविचारधारा काले काले महतो भारतीयराष्ट्रस्य जनगणाय मार्गनिर्देशकरी समभवत्। यद्यप्यस्याः प्रवाहोऽविरतमत्र नैव प्रावहत्तथाप्यस्मिन् देशे सर्वोदयीयविचारधारायाः समूलोच्छेदो न कदाप्यभवत्।

सर्वोदयस्य विचारधारेतिवृत्ताऽनुसन्धानेन विज्ञायते यत्सर्वोदयशब्दो दीर्घकालादत्र प्रचलितो विद्यते नाम। अद्यतो द्विसहस्राब्दपूर्वं जैनाचार्यः समन्तभद्रः सर्वोदयतीर्थस्य भावनां प्राकटयत्। तद्यथाः—

सर्वापदामन्तकरं निरन्तरं
सर्वोदयतीर्थमिदं तवैव।

श्रीमद्भगवद्गीतायां "सर्वभूतहिते रताः" इति समुल्लेखः पुरातनविचारकाणां सर्वोदयीं भावनां प्रकटयति। तथैव विश्वकल्याणप्रेरितैः ऋषिभिः कृतेयं प्रार्थनाः—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
'सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥

समुत्कृष्टायाः सर्वोदयसमाजरचनाया आधारशिलैवाऽस्ति।

साम्ययोगः

सर्वोदयसमाजरचनानिमार्णे समतायाः सहास्तित्वभावनायाश्च प्राधान्येनैव निखिलसमाजशास्त्रेषु साम्ययोगशास्त्रं शीर्षपदमलभत, तद्विषयकाण्यन्यानि शास्त्राणि तदङ्गभूतानि

भूदानग्रामदानसम्पत्तिदानाद्यनेकान्यान्दोलनानि च तदन्तर्गतान्येव विद्यन्ते। राष्ट्रस्य भाविनि निर्माणे सर्वोदयसमाजरचनार्थं साम्ययोग एव प्रधानहेतुर्भविष्यतीति विचारप्रेरणया साम्ययोगस्य तत्त्वाऽनुसन्धानमपेक्ष्यते।

समताया भावः साम्यमलब्धलाभो योग इति व्युत्पत्त्या निष्पन्नस्य साम्ययोगशब्दस्यार्थः—समानरूपेण लक्ष्यप्राप्तिरथवा सामूहिकरूपेण लक्ष्यसिद्धिर्भवति। समाजस्य शैशवकाले साम्ययोगशास्त्रमेव तन्मार्गनिर्देशकर आसीत्। तदा समाजशास्त्रमतिविस्तारविस्तीर्णं नैवाऽभवत्। समाजशास्त्राणां प्रवृद्धिस्तु कालमासाद्य समाजे सम्प्रविष्टाया विषमताया निरासार्थं बभूव, यतो हि स्वभावतः सत्प्रवृत्तिविधायकेऽपि मानवे परिस्थितिजन्यैः संस्कारजन्यैर्विकारोद्भूतै र्वा दोषैरधोगामिनि जाते सति सामाजिकेषु विषमतायाः प्रादुर्भावो भवति। विषमतयैव समाजेऽशान्तिकलहादीनि दुःखानि प्रवर्धन्ते। अधिगतायां विषमतायां तदनुसमर्थका जनाः समतां विहाय समानभावेन सामूहिकहितसंसक्ताञ्जनान् बाधन्ते। विषमताऽभिवृद्ध्या समाजसंगठनेऽनैतिकतया समुत्पन्नानामव्यवस्थानां सन्निवेशो भवति, तदैव विषमतानिवारणाय साम्ययोगसंस्थापनाय च मृदूपायान्विचिन्तयन्तः समाजविनेतारो मनीषिणः काले काले साम्ययोगशास्त्रं तद्दर्शनञ्च सामाजिकेभ्यः समुपदिशन्ति।

साम्ययोगो नैतिकजीवनस्याऽऽधारस्तम्भो विद्यते। तदास्तित्वं नैतिकपरम्परया विकसितेष्वविषमशीलेषु सामाजिकेषु सम्प्राप्यते। अपि च समताशीलस्य नैतिकताऽधिष्ठितसामाजिकजीवनस्य विकासो लोकतन्त्रशासनेष्वेव भवति, यतो हि साम्ययोगदर्शनं लोकतन्त्रैकतन्त्रशासनपद्धत्योरितिवृत्तस्य सिंहावलोकनमेवाऽऽस्ते।

साम्ययोगस्य विकासभूमिः

साम्ययोगस्य विकासभूमिर्लोकतन्त्रराज्यमेव भवति। असमशीलायामेकतन्त्रशासनपद्धत्यां साम्ययोगस्य विकासो नैव भवतीति प्रत्यक्षं परिलक्ष्यते नाम। इतिहासाऽनुशीलनेन विज्ञायते यदादित एव जगतीतलेऽस्मिन् द्विविधा शासनप्रणाली प्रचलिता विद्यते। वयमेकतः साम्ययोगाऽनुप्राणितया सहास्तित्वभावनया सह मानवतासंरक्षणाय प्रवर्तितां लोकतन्त्रशासनपद्धतिं पश्यामः तथैवाऽन्यतः साम्राज्यवादशीलामधिनायकाऽधिष्ठितामेकतन्त्रशासनपद्धतिमपि विलोकयामः। यथा लोकराज्येषु समतया जनपोषणप्रवृत्तिरादित एव कृताऽऽस्पदा विद्यते तथैवैकतन्त्राऽधिष्ठितेषु राष्ट्रेषु शोषणप्रवृत्तिरप्युत्तरोत्तरं प्रतिफलति।

लोकतन्त्रीयशासनपद्धत्यां मानवस्य विकासाय सर्वाणि द्वाराण्युन्मुक्तानि भवन्ति। तस्यां जनाः स्वतन्त्रनागरिकजीवनमुपभुञ्जानाः स्वेच्छयाऽऽत्मविकासाय प्रभवन्ति। ते स्व-कृतश्रमफलं स्वयमेव प्राप्नुवन्ति। लोकतन्त्रे शासिता जनगणा एव परोक्षे शासका भवन्ति ते स्वराज्यस्य सर्वोच्चसत्ताऽधिकारिणो नियामकाश्च सम्भवन्ति। त एव प्रशासकान्मतदानेन निर्वाचयन्ति। निर्वाचिताः प्रशासका निर्वाचितजनसमुदायं प्रत्युत्तरदायिनो भवन्ति, अत एव ते स्वेच्छाचाराऽऽचरणे जनगणपरिपीड़ने च न प्रभवन्ति। तदैव लोकराज्ये जनशोषणं न जायतेऽपि तु सामुदायिकरूपेण सर्वोच्चसत्ताऽधिष्ठितानां जनगणानां समवेतश्रमफलेन राष्ट्रियसमृद्ध्या उत्तरोत्तरं पोषणमेव सम्भवति।

प्रजाधीनसत्तासु राष्ट्रेष्वादित एव मानवतासंरक्षणाय प्रभूततमः श्रेयो विधीयते यतस्तेषामाधारस्तम्भ एव मानवतासंरक्षणं तत्समुन्नतिशीलत्वं चाऽऽस्ते। अन्यथा लोकतन्त्रशासनं

क्षणमपि जीवितुं नोत्सहेत। ननु साम्ययोगेन सहास्तित्वभावनया च सह मानवता परित्राणायैव लोकतन्त्रशासनपद्धतेराविर्भावो बभूवेति निर्विवादम्। अतएवाऽधुना सुप्रतिष्ठितेषु लोकराज्येषु साम्यवादसमाजवादप्रभृतिनानावादविशेषाणां प्रादुर्भावो जातः। सहास्तित्वभावनाऽपि पूर्वतोऽधिकप्राप्तसम्बला परिलक्ष्यते। आधुनिकप्रजातन्त्रेषु समुद्भूता वादविशेषा एते साम्ययोगस्य पृष्ठभूमावङ्कुरितास्तदङ्गभूता एवेति साम्ययोगशास्त्रस्य तद्दर्शनस्येतिहासस्य च सिंहावलोकनमेव विज्ञायते। तस्माध्देतोः साम्ययोगस्य विकासभूमिर्लोकराज्यमेवेति निर्विवादम्।

किन्तु विषमभावाऽवलम्बिन्यां साम्राज्यवादशीलायामधिनायकवादाऽधिष्ठितायामेकतन्त्रशासनपद्धत्यां लोकतन्त्रशासनपद्धतेर्विपरीतमेव जायते यतस्तस्यां केन्द्रीयशासनतन्त्राऽधिष्ठितस्यैकस्यैव व्यक्तिविशेषस्य प्रभावः सर्वोपरि भवति। स शासितान् स्वानुगतमतान्कर्तुं स्वेच्छया बलप्रयोगमप्यवलम्बते। तथा च केन्द्रीयशासनस्य प्रभूततमं बलमासाद्य स्वेच्छाचारेण वतते। सर्वेषां शासितानामधिकारान् श्रमफलानि च स स्तोकं स्वानुगतमतेभ्यः स्वसमर्थकेभ्यश्च प्रदायऽवशेषाणि स्वयमेव भुंक्ते। स प्रशासकपदेष्वपि स्वानुगतमतानेव नियुंक्ते। तत्र शासितानां परामर्शो नाऽपेक्ष्यते।

एकतन्त्रशासने सामाजिकानां सामूहिकहितं व्यक्तिगतस्वार्थेषु प्रलीयते। अपि चैकतन्त्रशासनस्य केन्द्रीयसत्ता वैयक्तिकसम्पत्तिरिवोपभुज्यते। अतएवैकतन्त्रशासने शासकस्य शासनसमर्थकाः केचन जना व्यक्तिश एव समृद्धि प्राप्नुवन्ति न पुनः सामूहिकरूपेण।

एकतन्त्रशासने केन्द्रीयशासनाध्यक्षः स्वमताऽनुगतानेव विकासायाऽवसरं ददाति येन जनास्ते स्वबलप्रभावेण तथैव समृद्धिप्रभावेण च शासितानां श्रमस्य प्रभूततमं लाभमवाप्य शोषणमाध्यमेनान्येषामुत्पीडनं कुर्वन्ति यत एकतन्त्रशासने शासितानां बलबुद्धिविकासाय न कुत्राप्यवसरं दीयते नाम, अपि तु साम्राज्यवादशीला एकतन्त्राऽधिष्ठिताऽधिनायकाः प्रजासु समुद्भूतमपि बलबुद्धिप्रभावमचिरेणैव कालेन विनाशयन्ति यतो हि शासितानां प्रभावाऽभिवृद्धिर्बलबुद्धेर्विकासश्च शासकानां स्वेच्छाचारस्याऽवरोधको भवति।

आदित एव लोकतन्त्रैकतन्त्रयोर्मध्ये पारस्परिकसंघर्षः समभवद्यतस्तौ सिद्धान्तभेदेन स्वभावत एव मिथः शत्रुभूतौ स्तः। शासनपद्धतेर्विकासकालादेव प्रवृत्तोऽयं संघर्षोऽद्यापि पूर्ववदेवाऽऽस्ते, परमाधुनिकाऽन्ताराष्ट्रियघटनाचक्रपरिवर्तनेन सम्भाव्यते नाम यन्नचिरादेव साम्राज्यवादस्य क्षीणप्रायः प्रभावो विनंक्ष्यतीति यतोऽधुना साम्राज्यवादशीलस्यैकतन्त्रशासनस्य परिहारायाऽखिलसंसारस्य जनगणेषु सामूहिकरूपेणाऽन्यतमा प्रवृत्तिः समुत्पन्ना या सन्निकटतमे भविष्यति क्रान्तिस्वरूपमासाद्य साम्राज्यवादशीलस्यैकतन्त्रशासनस्याऽधिनायकवादस्य च मूलोच्छेदं विधास्यति।

मानवविकासस्य पृष्ठभूमिः

पुरा मानवस्य विज्ञानवैभवं नाऽतिपरिस्तृतमासीत्। स स्वविकासाय प्रकृतेरभ्यर्थनयैव तुष्टिमासादयति स्म। लोकाः सीमितसाधनैरेव कालं यापयन्ति स्म। तेषु सीमितविचारवैभवमधिष्ठितमासीदिति मानवविकासस्य पृष्टभूमेः सिंहावलोकनेन परिज्ञायते। अतएवाऽद्यावधि काले-काले सञ्जातेष्वपि महत्सु प्रयत्नेषु मानवस्य सम्पूर्णविकासो नैवाऽभवत्।

अतीतकाले सर्वप्रथमं प्रबुद्धा मानवतावादस्य संस्थापका ऋषयो बुद्धमहावीरकार्लमार्क्सलेलिनगान्धीप्रभृतयोऽनेकेऽन्या मानवतावादिनो महापुरुषाश्चाऽस्यां दिशि कृतश्रमा बभूवुः परं

विज्ञानस्याऽसम्पूर्णविकासेन ते स्वात्मनि प्रयत्ने साफल्यं नाऽवापुः। किन्तु सन्तोषकरमेतद्यत्नैर्निर्मितायां पृष्ठभूमौ मानवस्य सम्पूर्णो विकासो भवितुं शक्नोति।

अधुना वयमणुयुगे प्रतिवसाम। विज्ञानस्याऽपरिसीमितविकासेन साम्प्रतं मानवस्य धरातलं पूर्वाऽपेक्षया सर्वथा परिवर्तितं परिवर्धितं विकसितं चेति प्रत्यक्षमवगम्यते। इदानीं मानवः प्रकृतेर्विजेतृपदमधितिष्ठति। विज्ञानमाध्यमेनाऽन्यैः परिवर्तनैः सह मानवीयविचारधारायामपि क्रान्तिकरं परिवर्तनं समुपस्थितम्। आधुनिकविज्ञानस्याऽसीमितसाधनैः प्रोत्साहिता मानवतावादिनो मनीषिणो मानवस्य सम्पूर्णविकासाय समुपलब्धंसमुचिताऽवसरं विज्ञाय तत्कृते चेष्टन्ते।

इदानीं जगतीतलेऽस्मिन्नेकतः कार्लमार्क्सलेलिनप्रभृतीनां विचारधारामवलम्ब्य मानवतावादसमुपासकैरनेकानेकैरन्यैः राष्ट्रैरनुगम्यमग्नं सोवियतराष्ट्रं साम्यवादमाध्यमेन मानवस्य संपूर्णविकासाय प्रयतते। तथैवाऽन्यतः ऋषीणां तदुत्तराधिकारिणां बुद्धमहावीरगान्धीनां विचारवैभवप्रेरितो महान् भारतीयगणराज्यसंघः साम्ययोगस्य तत्पृष्ठभूमावङ्कुरितस्य समाजवादस्य च माध्यमेन विश्वकल्याणहेतो मानवस्य सम्पूर्णविकासायाऽहर्निशं प्रयतमानस्तिष्ठति।

इत्थं परिस्थिते मानवविकासस्य भूयिष्ठे प्रयत्ने साम्प्रतं "मानवस्य सम्पूर्णो विकास स्यात्" इति ध्वनिः सर्वत्रैव सर्वदा श्रूयते। तथा च कालेऽस्मिन्नाधुनिकसंसारस्य सर्वाणि राष्ट्राणि मानवस्य सम्पूर्णविकासाय कृतप्रयत्नानि इत्यपि सर्वत्रैव परिलक्ष्यते। तथैव साम्राज्यवादशीलाऽधिनायकवादाऽधिष्ठितैकतन्त्रशासनाऽनुयायीन्यपि राष्ट्राणि स्वात्मनोऽनभिप्रेतस्याऽपि मानवीयसम्पूर्णविकासस्य मनाक् समर्थनं कुर्वन्ति। तेऽपि मानवतासंरक्षणाय बद्धपरिकरा अङ्गीकृततद्विषयकयोजनाश्चाऽऽत्मानं दर्शयन्तीव। इदानीं साम्राज्यवादशीलेष्वपि राष्ट्रेषु साम्ययोग-साम्यवादसमाजवादप्रभृतिवादविशेषाणां तत्त्वानि सम्प्रविष्टानि यानि तत्रत्यजनगणेषु मानवतासंरक्षणं सम्परिपुष्णन्ति।

आधुनिक विज्ञानस्याऽसीमविकासेन सर्वं जगद्विपरिवर्तितम्। जगति सुप्रतिष्ठितानां विभिन्नजनगणानां विचारपरम्पराऽपि सांकर्यं परित्यज्योदारदृष्टिकोणाऽभिमुखी बभूव, परं यत्र वयमुदारदृष्टिकोणेन मानवतासंरक्षणाय तथैव मानवस्य सम्पूर्णविकासाय सामान्यजनगणानां प्रवृत्तिं भूयसीं विकासोन्मुखीमवलोकयाम स्तत्रैव विषमशीलानां केषाञ्चिदेकतन्त्रवादिनां साम्राज्यलिप्सा तदनुयायिनां वित्तवादिनां केन्द्रितोद्योगसंग्राहकप्रवृत्तिरपि परिदृश्यमाना विद्यते।

साधारणतया जनकल्याणाय गवेषितं प्रायोगिकं विज्ञानमधुना वित्तवादाऽधिष्ठितसाम्राज्यशीलानामेकतन्त्रशासनाऽनुसमर्थकानामधिनायकवादिनां प्रोत्साहनमधिगत्य विश्वसंहारक्षमताधिष्ठितं जगदत्तुं सन्नद्धमिव विभावयते यतोऽधुना साम्राज्यवादिनां तदनुयायिनाञ्च वित्तवादिनां स्वेच्छाचारं जनपरिशोषणात्मकमनायासेनोपलब्धमैश्वर्योपभोगं च सर्वतो जगत्समाच्छादितवत्।

साम्प्रत पोषणशोषणप्रवृत्त्योर्मध्ये परीदृश्यमान आरोहाऽवरोहात्मकः संघर्षः सीमानमतिक्रामति। समाजशासनसंस्थानां प्रभवकालादाविर्भूतमिदमन्तर्द्वन्द्वमद्याऽपि प्रशमं नोपागमत्। अद्यावधि सर्वदैव दैवीसम्पत्समर्थकान् मानवतावादसमुपासकांल्लोकतन्त्राऽनुयायिनानासुरिसम्पच्छालिनः साम्राज्यवादसमर्थका एकतन्त्रा-

ऽनुयायिनोऽजयन्। मानवविकासस्य प्रारम्भकालादद्यावधि शोषणवादस्य सार्वकालिकविजयस्येदमेव रहस्यं यत्पुरा जनगणा अधुनावत्सामूहिकरूपेण शोषणप्रवृत्तिनिरासार्थं संघटिता नाऽभवन्। साम्प्रतं तु निखिलसंसारस्य बहुसंख्यका जनाः संगठितरूपेण साम्राज्यवादिनां शोषणप्रवृत्तिसमुच्छेदाय कृतसंकल्पाः सन्ति संकल्पसिद्धयै चेष्टन्ते चापि।

❀ श्रीरामविरुदम् ❀

पं० श्रीदुःखीश्यामपट्टनायकः, उत्कलम्, भुवनेश्वरः (ओडिसा)

जय जय रघुवर निरुपमसुन्दर
सुन्दर सुखकर रक्षकसत्तम
सत्तमपालक दनुजविनाशक
नाशक रावण दुर्जनध्वंसक
ध्वंसकखलदल सुरकुलरक्षक
रक्षकनिजजन शरणविभीषण
भीषणकर्तन बन्धनखण्डक
खण्डकलाधर- देवसुपूजित
पूजितशुचिनर मंजुलमेचक

मेचकरविकर सायकधारक
धारकभूतल दुष्टविमर्दक
मर्दकदूषण कोमलविग्रह
विग्रहखण्डक- हतखलभासुर
भासुरछविजित नतमुनिसेवित
सेवितसेवक वानरमित्रक
मित्रकलाकुल वंशविभूषण
भूषणभूषित- दशरथनन्दन
नन्दन हे त्वं नन्दय सुन्दर। वीर॥

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल काले तथा लम्बे और आपके दाँत मसूड़े सदा मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

आयुर्वेद सेवाश्रम प्राइवेट लिमिटेड [illegible]
[illegible]

गाय
छाप

स्वस्ति

आन्ध्रमूलम्:—श्रीदेवुलपल्लि वेङ्कटकृष्णशास्त्री

अनुवादकः—श्रीकाल्लूरिहनुमन्तरावः, हैद्राबादः

मद्बाल्यभाववल्लयां काचित् काङ्क्षा सुपुष्पिता ।
अद्यापि न परिक्लान्ता न च निर्गतवासना ॥

भ्रान्त्वा भ्रान्त्वा समस्तायां भुवि दिक्षु विदिक्षु च ।
गृहाद् गृहान्तरं गच्छन् द्वारि द्वारि च संस्थितः ॥

शब्दायमान एकेकं हृत्कपाटं पुनः पुनः ।
अन्तर्गत्वा मम स्वान्तात् स्नेहक्षीरं परिक्षिपन् ॥

आगमिष्यामि भूयोऽपि प्रियभ्रातरिति ब्रुवन् ।
आपृच्छ्य चिरमध्वन्यो भवितुं हृदि वर्तते ॥

आकाशविस्तृता काङ्क्षा पक्षीवाल्पं तु पाटवम् ।
घर्मजलवाहिनी घर्मकादम्बिनी
सिक्तसहजीवनासक्तविस्तृत भुवि ।
आरुह्यहिमगिरिं जलधिपर्यन्तमपि
दृष्टिं प्रसार्य गलशङ्खं धमामि ॥

विधुरजनश्रवोवीथीषु मङ्गलस्वादुवचांसि प्रपूरयामि ।
प्रज्वालयामि निर्णिद्रदीपावलीमन्धमनोमन्दिरान्तरेषु ॥

कर्कशमानसजाङ्गलेषु मधुरस्नेहवृष्टिं भूरि पातयामि ।
प्रचुरविद्वेषवैतरणीप्रवाहस्य सौहादसेतुबन्धं करोमि ॥

पांसुमग्नो वराकोऽभूद्चिरात् प्राक्क्षितौ नरः ।
उत्तिष्ठति स एवाद्य धृत्वा विजयकेतनम् ॥

गर्वमाणिक्यकोटीरधारी विजयतेतमाम् ।
निर्माता च विधाता च नेता भोक्ता स्वयं नरः ॥

स्वस्ति मनुष्येभ्यः श्रीरस्तु सदा शान्तिरस्तु लोकानाम् ।
एवं भारतवाण्या शास्ते विश्वस्तुता श्रेयः ॥

❀ जिज्ञासा-समाधानम् ❀

ले० साहित्यरत्नं पं० श्रीबदरीप्रसादशास्त्री, प्रपूर्णा, खेतड़ी, राजस्थानम्

पूर्वाऽनुवृत्तम्—

एतत् परं गुह्यमध्यात्मसंज्ञितं योगं गीताप्रवचनरूपं साक्षाद् योगेश्वराच्छ्रीकृष्णात् कथयतोऽहंपदवाच्यः स्वयं सञ्जयो "व्यासप्रसादाद्" व्यासस्य योगविद्यागुरोर्यः प्रसादः "यस्यप्रसाद् दिव्यं मे प्रज्ञाविज्ञानमुत्तम"मित्यादिना सञ्जयेनैवोक्तो दिव्यदर्शन-श्रवणादिलाभरूपस्तस्माच्छ्रुतवान्, एवञ्च श्रीकृष्णार्जुनसम्वादरूपगीतोपदेशादिदुर्योधनवधान्तं निखिलं युद्धं तु "सङ्गरादेत्य सञ्जयः" इत्यादि व्यासोक्त्या युद्धस्थलाद् धृतराष्ट्रान्तिकमुपेतः सञ्जयो योगबलेनैव दृष्टवान् आद्यं सामरिकव्यूहरचनात्मकं युद्धाङ्गं युद्धपदवाच्यं तु युद्धस्थले स्थितः प्रत्यक्षं दृष्टवान् ।

किञ्च "व्यासप्रसादाच्छ्रुतवा" नित्यस्य व्यासरचितवर्णनात् (महाभारतग्रन्थात्) सामरिकवृत्तजातमवगतवान् सञ्जय इति स्वकल्पितं तत्त्व जल्पन्ति तदरुचिरं 'दृष्टं योगबलेन चे" ति सञ्जयोक्तेरेव विरोधाद् वदतो व्याघातोपस्थितिश्चेति विभालयन्तु सुधियः ।

अथवा प्रकरणविरोधाद् व्यासरचितवर्णनोत्तरभाविनः संवादस्य व्यासरचितवर्णने दुर्लभत्वादस्य तु व्यासरचितवर्णन एव द्रष्टत्वाद्व्यासरचितवर्णनात् प्राग्भवत्वमेव सम्वादस्यास्य सिध्यतीत्ति प्रागप्युक्तमेव ।

इत्येवमुपक्रमोपसंहारादि—तात्पर्यग्राहकलिङ्गानुसारं समन्वयात्मकरीत्या "वाक्योच्चयो महावाक्य"मिति लक्षणेन महावाक्यात्मकस्य भारतस्यैकवाक्यताऽऽपादनेन प्राकरणिकपौर्वापर्यपर्यालोचनेन व्यासप्रसादासादितदिव्यदृष्टिः सञ्जयः प्रागुक्तप्रत्यक्षतया दिव्यदृष्ट्या च युद्धं दृष्ट्वा धृतराष्ट्रायापि तदुवाच ।

अथ पुनः सञ्जयधृतराष्ट्रसंवादश्चायं युद्धसमकालिक एव युद्धप्रकरण एव तद्वर्णनात्, अर्थात् महाभारतस्य धर्मप्रधानैतिहासिकसंहितात्मकत्वात्तत्रोक्तवृत्तजातस्य सर्वस्याप्यैतिहासिकक्रमानुसारं वर्णनाद्, उत वा—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूति ध्रुवा नीतिमतिर्मम ॥

इत्यनेन यत्र पक्षे योगेश्वरः श्रीकृष्णो धनुर्धरः पार्थश्चेत्युभौ स्तः तत्रैव पक्षे भाविविजयैश्वर्यादिकमाशासानः स्वयं सञ्जय एवोक्तसम्बादस्य युद्धसमसामयिकत्वमभिदधौ ।

अस्तु यद्यपि सञ्जयधृतराष्ट्रसम्बादेऽस्मिन् भूतकालिकक्रियाप्रयोगा दृश्यन्ते किञ्च तैरपि संवादस्यास्य युद्धकालोत्तरभावित्वं न हि सिध्यति ।

यथा "किमकुर्वत सञ्जय" इत्यस्मिन् प्रश्नवाक्ये "प्रश्ने चासन्नकाले" इति पाणिनीयानुशासनाद् वर्तमानकालिकेऽथवा भूतानद्यतनात्मके आसन्नकालिके प्रश्ने धातोर्लस्थानीयभूतानद्यतनासन्नकालिकाऽऽख्यातप्रयोग एव साधीयान् ।

एवमेव "शङ्खं दध्मौ प्रतापवान्" "शङ्खान् दध्मुः पृथक् पृथगित्यादयोऽपि शङ्खवादनक्रियायाः साधनपारोक्ष्यं कारके च विशेषणमपेक्ष्य साधनपरोक्षत्वाधिकभूतानद्यतनार्थक लादेशतिङन्तक्रियापदप्रयोगाः सूपपन्ना भवन्ति ।

अत्रैव "परोक्षेलि"डिति सूत्रभाष्ये "कस्मिन् पुनः परोक्ष इत्याशङ्क्य, धात्वधिकारे प्रकरणवशोद् "धाता" वित्यध्याहृतेऽपि शब्दे परोक्षत्वासम्भवादन्वयानुपपत्तेः, "धात्वर्थे" इत्यध्याहारे च पुनरन्वयोपपत्तावपि धात्वर्थरूपाक्रियैव भवति सा च "क्रिया नामेयमत्यन्तापरदृष्टाऽनु-

मानगम्याऽशक्यापिण्डीभूता निदर्शयितु" मिति भाष्यात् क्रियायाः सर्वथाप्यत्यन्तापरिदृष्टत्वात्, अर्थात् पृथिव्यादिपरमाणूनां द्व्यणुकादिना पिण्डीभूतानि पृथिव्यादीनि द्रव्याणि यथा प्रत्यक्षतामुपयान्ति तद्वदपि क्रियाऽवयवानां सूक्ष्माणामपि विनाशित्वात् परमाणुवदविनाशित्वाभावात् तत्पिण्डीभूताया अपि क्रियाया निदर्शयितुमशक्यत्वादननुमेयत्वाच्च तस्याः (क्रियायाः) प्रत्यक्षत्वपरोक्षत्वादि विशेषणं "सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थव" दिति न्यायादसङ्गतं भवतीत्यत "एवं तर्हि साधनेषु परोक्षेषु भवतः कः सम्प्रत्यय" इत्यादि भाष्योक्तविवरणेन "अयं पपाचे"त्यत्र क्रियाकृतविशेषरूपसीत्कारफूत्कारादिविशिष्टस्य संरब्धरूपस्य पचिक्रियानुकूलव्यापाराविष्टसाधनस्य कर्तुः प्रत्यक्षत्वसम्भवेऽपि कालान्तरेऽन्यद्रष्टुः परोक्षत्वमपि बोध्यते ।

अत एव "परोक्षेलि"डिति सूत्रभाष्ये लिट् तिङामर्थं क्रियानुकूलव्यापाराविष्टानां साधनानामेव परोक्षत्वमङ्गीकृत्य तस्य साधनपारोक्ष्यस्य कारके विशेषणं विवक्षितम् । तथात्वे च पूर्वोक्तविशेषणन्यायानुसारं व्यापाराविष्टानां साधनानां सम्भवव्यभिचाराभ्यां क्रियाकर्तुः प्रत्यक्षत्वेऽपि अपरस्य परोक्षत्वमपि सङ्गच्छते ।

यथा द्रष्टा देवदत्तो "रथ्यायां तण्डुलोदकं दृष्ट्वापि यदा न निश्चितवान् किमेते तण्डुलाः पच्यन्ते हूयन्तेऽथवा कुट्यन्त इति किञ्च यदा प्रमाणान्तरेण कालान्तरेऽन्यकर्तृकं पूर्वविगततण्डुलानां पाकमवगम्य स एव देवदत्तो वाक्यं प्रयुङ्क्ते तदा साधनस्य संरम्भरूपस्य परोक्षत्वात् "अयं पपाचे"ति युक्तमुक्तं निदर्शनं भाष्ये ।

अथवा "व्यातेने किरणावलीमुदयनः" इत्यत्र यथा किरणावलीकर्मकप्रसारणक्रियानुकूलव्यापाराविष्टसाधनानां चक्षुरादीन्द्रिय—विषयत्वाभावान् मनोबुध्यो विषयत्त्वात्तयोश्च पुन"रिन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मन" इत्यादि स्मरणात् परोक्षत्वे सति तज्जन्यक्रियानुकूलव्यापाराविष्टसाधनानां परोक्षतापि स्फुटा, ताञ्चैनां साधनपरोक्षतामुपपाद्य "व्यातेन" इति लिडादेशतिङन्तक्रियापदं सङ्गमयन्ति, तथैव शङ्खकर्मकधमनक्रियानुकूलव्यापारस्य तदाविष्टसाधनसमुदायस्य करणादिरूपस्य चातीन्द्रियत्वाद् इन्द्रियसाहाय्यमनपेक्ष्य यौगिकदिव्यसिद्धिज्ञेयत्वाद् परोक्षत्वं स्पष्टमेव । तथात्वे च "शङ्खं दध्मौ प्रतापवा" नित्यादयः प्रयोगाः सङ्गच्छन्ते ।

अथवा "वैयाकरणानां शाकटायनो रथमार्ग आसीनः शकटसार्थं यान्तं नोपलेभ" इत्यादिना भूतानद्यतनकालिके वर्तमानकालिकेऽपि च क्रियाविष्टसाधनपारोक्ष्ये लिट्तिङन्तक्रियापदप्रयोगस्य साधुत्वप्रतिपादनादत्रापि शङ्खधमनक्रियावेशकालिक–साधन–पारोक्ष्यं कारके च तद् विशेषणत्वमादाय वर्तमानकालेऽपि "शङ्खं दध्मौ प्रतापवा"न्नित्यादयः प्रयोगाः साधिष्ठा भवन्ति ।

अत्रैव भाष्ये शाकटायनस्य वैयाकरणसम्बन्धित्वाद् वैयाकरणत्वप्रतिपादनेन तस्याप्रमत्तत्वध्वननपुरःसरं क्रियाविष्टव्यापारसाधनपारोक्ष्ये सत्यप्रमत्तोऽपि लिडादेशतिङन्तक्रियापदं प्रयुङ्क्ते । एवञ्च 'सुप्तोऽहं किल विललाप' मत्तोऽहं किल विललापे" त्यादिवत् प्रकृतिस्थोऽपि क्रियाविष्ट (व्यापार) साधनपारोक्ष्ये लिडादेशतिङन्तक्रियापदं प्रयोक्तुमर्हतीत्यपि विभावनीयम् ।

इतश्च 'किञ्च प्रत्यक्षविरोधिलिट्लकारस्यप्रयोगेण तु सर्वथैतदवगम्यते, यद् आयोधनानन्तरमेव सञ्जयेनाखिलं वृत्तं श्रावित" मिति वाक्यं प्रयुञ्जाना जिज्ञासव एवमपि विदाङ्कुर्वन्तु यत् प्रत्यक्षविरोधि परोक्षत्वं न हि लिटो-

विशेषणं न च लिडादेशतिङाम्, अपि तु पूर्वोक्तरीत्यापरोक्षत्वस्य कारके विशेषणत्वं समेऽपि शाब्दिकशिरोमणयो मन्यन्ते न चापि लिट्लकारोऽन्ये वा लडादिलकाराः प्रयोगार्हा भवन्ति ।

अर्थात् स्थानिवदादेशं मत्वापि "उच्चारित एव शब्दोर्थवान् भवति नानुच्चारित" इति भाष्यात्—प्रयोगेऽनुच्चार्यमाणानां लकाराणामानर्थक्यं गौरवंच स्वीकृत्य तदादेशतिङर्थान्निरूपयन्तो वैयाकरणाः, शाब्दिकोक्तगौरवमयमुपेक्ष्य स्वकल्पितलाघवाल्लकारार्थान्नेव निरूपयन्तो नैयायिकाश्चापि लादेशतिङन्ताख्यातपदमेव प्रयुञ्जते न हि लकारान्तं क्रियापदं क्वचिदपि प्रयोगे दृग्गोचरीभवतीत्यतः "प्रत्यक्षविरोधिलिट्लकारस्य प्रयोगेणे" त्येवं तदुक्तं वाक्यमसाधुत्वादुपेक्षणीयमेवास्ति ।

अस्तु पल्लवितेनानेन समाधानलेखेन वस्तुतोजिज्ञासवो, जिज्ञासामिषेण परपाण्डित्यपरीक्षकाश्चापि परितुष्टाः स्युरथवा परीक्षकास्तु पुर्नारिह पूरकपरीक्षाप्रवेशार्थमनुमन्यन्तामिति सानुनयं निवेदनम् ।

[श्रीबदरीप्रसादशास्त्रिणा कृतमिदं जिज्ञासायाः समाधानं श्रीकल्याणदत्तशास्त्रि जिज्ञासुमहानुभावस्य सन्तोषाय तथान्येषां विदुषाञ्च मनोविनोदाय, व्याकरणमधीयानानां छात्राणाञ्चोपयोगाय भविष्यतीति — मधुपः]

शुभ कामनाओं के साथ

●

अच्छी जात के चाय के उत्पादक और निर्माता

आत्माराम कम्पनी

प्रो० बोरसिला—टी—इस्टेट

इंडिया एक्सचेंज,

कलकत्ता—१

शुभ कामनाओं के साथ

*** इन्डो फॉरेन एजेन्सीज् ***

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

श्रीदीनानाथत्रिवेदी मधुपः, सहसम्पादकः

अभिनववर्षाभिनन्दनम्

शुभा कामना

सर्वतः प्रथमं भारतीपरिवारः सोऽयं-नवम्बरमासस्य १९ तारिकायां ५२ द्विपञ्चाशत्तमं शुभं जन्मदिनमुद्दिश्य प्रधानमन्त्रि-श्रीमतीं इन्दिरागान्धीमहोदयां हृदयेनाभिनन्दति तथा चैषा सानन्दं सुदीर्घमायुरेवं प्रवर्तमाने चास्मिन् राजनीतिविषयके सङ्घर्षे साफल्यञ्चाप्नुयादित्येतदर्थं श्रीपरमात्मानं प्रार्थयते-इति ।

अयि सम्मान्याः संस्कृतसेविनो मनीषिणः !!

सुमहतः प्रमोदस्यायमस्त्यवसरो यद्भगवत आनन्दकन्दस्य श्रीकृष्णचन्द्रस्यानुपमयानुकम्पया चिरकालतोऽभिनवै र्मङ्गलाचरणैर्मासवतरणैः सरलातिसरलैर्गद्यैः पद्यैर्निबन्धै र्विविधैः सम्वादैस्तथा लघुकथा-सूक्तिसुधादिभिरेवं मनोविनोदकणिकाभिश्च भारतीपाठकानां तत्रभवतां भवतां विपश्चितां मनांसि विनोदयन्ती सेयं श्रीमतामेव 'भारती' संख्ययाऽनया एकोनविंशतितमं वर्षमुल्लङ्घ्य विंशे वर्षे सानन्दं पदं निदधातीति ।

तत्र सर्वतः प्रथमं तान् भारतीग्राहकमहानुभावान् सुलेखकान् विपश्चितांश्च समभिनन्दामि, यैः भारत्यां प्रकाशनार्थं काले-काले चात्मनो विविधा रचनाः सम्प्रेषिताः । श्रीमतामेवानुपमेन सहयोगेन सेयं भारती सुरसरस्वतीं तदुपासकांश्च सेवितुं प्रभुरस्तीति निश्चप्रचम् ।

अतो विगतेऽस्मिन् वत्सरे विशेषतया येषां महानुभावानां भूयान् सहयोगः समुपलब्धस्तेषामाभारमहं हृदयेन बिभर्मि । तथा च भूयो भूयस्ते सन्ति मयाभिनन्द्याः । यथा हि—

१. आशुकवि-श्रीहरिशास्त्रिणः, सम्पादकाः ।
२. श्रीगिरिराजशर्माणः, प्रबन्धसम्पादकाः ।
३. डा० श्रीश्रीधरभास्करवर्णेकरमहोदयाः, नागपुरम् ।
४. श्रीगणेशरामशर्माणः, डूँगरपुरम् ।
५. श्रीदुर्गादत्तशर्माणो मैथिलाः, जयपुरम् ।
६. श्रीचण्डीप्रसादशर्माणः, ,,
७. श्रीराधाकृष्णशर्माणः, ,,
८. श्रीदुःखिश्यामशास्त्रिणः, उडीसा, भुवनेश्वरः ६
९. श्रीविश्वनाथमिश्रमहोदयाः, बीकानेरः ।
१०. श्रीबदरीप्रसादशास्त्रिणः, प्रपूर्णा, (खेतड़ी)

११. श्रीस्वामिनो लक्ष्मणशास्त्रिणः, नागौरः ।
१२. श्रीयमुनाधरशास्त्रिणो नैयायिकाः, रामगढः
१३. कालूरि-श्रीहनुमन्तरावमहोदयाः पण्डितप्रवराः, हैदराबादः ।
१४. श्रीजानकीप्रसादशर्माणो द्विवेदाः, वाराणसी ।
१५. श्रीकृष्णलालशर्माणो रजिस्ट्रारमहोदयाः, अजमेरः ।
१६. श्रीराधेश्याममहोदयाः, नवलगढः (राज०)।
१७. श्रीरत्नलालमिश्राः, नागोरः ।
१८. श्रीभगवान्शरणभारद्वाजः, बरेली ।
१९. श्रीसूर्यनारायणशास्त्रिणः, आन्ध्रः ।
२०. वैद्यवर-श्रीरामस्वरूपशास्त्रिणः, मुम्बापुरी ।
२१. वैद्यश्रीबदरीप्रसादशास्त्री, तूंगा (राज०)।
२२. श्रीकृष्णलालशास्त्री व्यासमहोदयः, कपासनः (चित्तौडगढः)।

सहैव केन्द्रीयशिक्षाधिकारिणः, साहित्यसङ्गमबन्धून् शिक्षासञ्चालकमहानुभावान्, शिक्षानिदेशकान्, तथायुर्वेदनिदेशकमहाभागमेवमायुर्वेदजिलाधिकारिणश्च सोऽयं भारतीपरिवारो हृदयेनाभिनन्दति ।

एवमेव विज्ञापनदातृभ्यः, विडलापरिवाराय, तथा गणेशबीडीबन्धुभ्यश्चापि धन्यवादा वितीयन्ते भारतीपरिवारेण, येषां हि भारतीपत्रिकाया आर्थिकीं परिस्थितिं सुदृढामादयितुं शोभनः सहयोगः समये-समयेऽस्ति जायमानः ।

तथा च स्वर्गीय-श्रीयुगलकिशोर विडलामहानुभावस्य भारत्यामस्यामभूत्प्रगाढः स्नेहः । अत एवास्याः भारतीपत्रिकायाः सप्तमोऽङ्कः श्रीयुगलकिशोरविडला-स्मारिकारूपेण प्रकाशितोऽभूत् ।

किञ्च स्वतन्त्रतामयेऽस्मिन् समयेऽपि संस्कृतस्य तथा संस्कृत-पत्र-पत्त्रिकाणाञ्च प्रचारः प्रसारश्च नास्ति सन्तोषावहः ।

तत्र संस्कृतस्य प्रचारात्मके कर्मणि महती बाधा तु सेयं मुख्यरूपेण दृष्टिपथमुपयाति यत् संस्कृतशिक्षणालयेषु निर्धना ग्राम्याश्च बालका एव संस्कृतमध्येतुं समयान्ति न तु धनिकानां बालकाः इति । एवमेवार्थाभावेन तथा महर्घतापिशाच्याश्च दुष्प्रभावेण ग्राहकसंख्यायाः स्वल्पतया च संस्कृतपत्त्राणामस्ति दशा शोच्या नूनमांग्लभाषाप्रचारबहुलेऽस्मिन् काले ।

अतः प्रान्तीयसर्वकारा अपि सविनयं सप्रश्रयञ्च प्रार्थ्यन्ते यत्तैरचिरादेव संस्कृतस्याभ्युदयाय प्रसाराय च शिक्षणालयेषु संस्कृताध्ययनस्यानिवार्यतां कुर्युस्तथा संस्कृतपत्त्रपत्त्रिकाणाञ्च कृते समुचितमार्थिकं साहाय्यञ्च दद्युरिति ।

संस्कृतपण्डितपरिचयग्रन्थः

भारतीपत्रिकायाः १२ द्वादशादङ्काद् विदितमेवेदं स्यात् तत्रभवतां भवतां विपश्चितां भारतीपाठकानां यत्प्रस्तुतग्रन्थप्रकाशनस्य कार्यं यद्यपि मया प्रारब्धमास्ते, तथाप्यत्र भवतां समेषामपि विदुषां सहयोगोऽपि समपेक्ष्यत एव ।

ग्रन्थेऽस्मिन् प्रकाशनार्थमतस्त्वरितमेवात्यावश्यकः संक्षिप्तश्च परिचयः संप्रेष्यतां कृपया श्रीमद्भिर्विद्वद्भिः । स्वग्रन्थरचनासूत्तमरचनायाः सहैवैका प्रतिरपि प्रहेयाऽवश्यं. यतस्तत एव प्रस्तुते ग्रन्थे कश्चनांशोऽप्यवश्यं दातुं शक्येत, येन ग्रन्थस्योपयोगितापि वर्धेत । तथैकं चित्र चित्रप्रतिकृतिः (ब्लाक) वा परिचयसामग्र्या सहैव प्रेष्यताम् । पत्रव्यवहारार्थञ्च स्थायी वर्तमानः पूर्णः सङ्केताश्चाप्यावश्यकः ।

अपि चैतदपि तत्र भवद्भिर्विद्वद्भिरवधेयं यद्यदि श्रीमतां समग्रापि परिचयसामग्री ममान्तिके युगपदेव समागच्छेत् तर्हि नूनमकारादिक्रमेण सूचिः सम्पन्ना भवेत् पुनश्च तदनुसारेणैव परिचयसामग्र्याः प्रकाशनमपि मया कर्तुं पार्येत ।

किञ्च येऽपि श्रीमतां समीपवर्तिनः सुपरिचिताश्च, सुयोग्याः संस्कृतपण्डिता भारतीग्राहका न भवेयुस्तेऽपि भवद्भिरेतदर्थमवश्यं प्रेरणीयाः। तथा चात्र काचन कदाचिज् जिज्ञासापि जायेत, तर्हि तदर्थं पत्रव्यवहारश्च कर्तव्यः। कार्यमिदं सम्पादयितुञ्चास्म्यहं सन्नद्धः। "कर्मण्येवाधिकारस्ते: .. .." इति श्रीगीतावचोनुसारेण कर्मणोऽस्य साफल्यार्थञ्च स एव भगवान् श्रीकृष्णः सम्प्रार्थ्यते मया भूयो भूयः।

अपि चाहं भूयो भारत्या अनुग्राहकान् ग्राहकान् संस्कृतसमुपासकान् सविनयं सप्रश्रयञ्च प्रार्थये यदग्रेऽपि ते महानुभावाः भारत्याः कृते स्वस्वरचनायाः सम्प्रेषणे नवीनग्राहकाणाञ्च सम्पादने पूर्वापेक्षयाण्यधिकाधिकं परिपूर्णं च सहयोगं दातुमवश्यं कृपां करिष्यन्ति कृपालव इति वर्तते मन्मनसि द्रढीयान् विश्वासः। तथा चान्तेऽहं पुनर्हृदयेन कामये यत्—

यशोदानन्दनः कृष्णो भक्तानुग्रहकारकः।
साध्ये सिद्धिं सदा कुर्याल्लोके संस्कृतसेविनाम्॥

इति शम्।

* * *

DONATE BOOKS FOR
Pt. DEENDAYAL MEMORIAL LIBRARY
which is to be established in
Pt. DEENDAYAL MEMORIAL HALL
Fort, Hall Road, Box-10720,
NAIROBI, KENYA, EAST AFRICA.
●
DESPATCH DIRECTLY or JANA SANGH OFFICE
G. D. AMBEKAR ROAD,
Wadala, BOMBAY-31.

भारती के कतिपय प्रकाशन

		मूल्यं
१.	अम्बिकासूक्तम्	२.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	१.५०
३.	सरलसंस्कृतशिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुरः	१.२५
५.	चित्रद्वारा संस्कृतशिक्षा (बालोपयोगिनी)	१.५०
६.	सुवर्णलक्ष्मीनक्षत्रमाला	०.५०
७.	आयुर्वेदविशेषांकः	५.००
८.	आरोग्यांकविशेषांकः	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक
भारती संस्कृत मासिक

अथ नवमोऽध्यायः

'ॐ' राजोवाच ॥१॥	राजा बोला ॥१॥
विचित्रमिदमाख्यातं भगवन् भवता मम । देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥२॥	विचित्र यह देवीका भगवन् आपने कहा । माहात्म्य और चरित रक्तबीजप्रसंग से ॥२॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते । चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥३॥	अब मैं सुनना चाहूं अन्तमें रक्तबीजके । शुम्भने क्या किया काम और क्रुद्धति शुम्भने ॥३॥
ऋषिरुवाच ॥४॥	ऋषि बोले ॥४॥
चकार कोपमतुलं रक्तबीजे निपातिते । शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥५॥	किया अतुलही कोप बधपै रक्तबीजके । औरोंके भी मरणपै शुम्भ और निशुम्भने ॥५॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् । अभ्यधावन्निशुम्भोऽत्र मुख्ययासुरसेनया ॥६॥	सेना हत हुई देख कोपमें भरता हुवा । निशुम्भ अब आयाथा मुख्यसेनालिए हुए ॥६॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः । संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥७॥	उसके अग्रतः पीछे बगलमें महासुर । क्रुद्ध हो डसतें होंठ देवीको मारने चले ॥७॥
आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः । निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥८	शुम्भभी निज सेनासे घिरा आया महाबली । लडके मातृकाओंसे चण्डीको मारने चला ॥८॥
ततो युद्धमतीवासीद् देव्या शुम्भनिशुम्भयोः । शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥९॥	तब युद्धहुवा देवी और शुम्भनिशुम्भ में । वर्सते बाण दोनोंके जैसे बादल बर्सते ॥९॥
चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥१०॥	चण्डीने उन बाणोंको काटा निजशरौघसे । दोनों ही दानवेन्द्रों को शस्त्रोंसे बींधभी दिया ॥१०
निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् । अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥११॥	निशुम्भने तीक्ष्णखड्ग और सुन्दर ढाल ले । सिंहको शिरमें मारा देवीवाहनश्रेष्ठको ॥११॥
ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् । निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥१२	सिंह क्षत हुआ देख देवीने क्षुरपास्त्र से । निशुम्भका खड्ग ढाल टुकडे टुकडे किया ॥१२॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः । तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखगताम् ॥१३	कहतेही खड्ग ढाल शक्ति फैंकी सुरारिने । चक्रसे संमुखप्राप्त उसेभो शोघ्र तोडदो ॥१३॥
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः । आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥१४॥	कोपाविष्ट हुवा शूललिया दैत्य निशुम्भ ने । आते उसे मुष्टिमार देवीनें चूर्णही किया ॥१४॥
आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति । सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१५॥	उसने भी घुमा फैंकी गदा जो चण्डिका प्रति । देवीसे वहभी शूल-छिन्न हो भस्म होगई ॥१५॥

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ॥१६॥

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥१७॥

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥१८॥

तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥१९॥

पूरयामास ककुभो निजघण्टा स्वस्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥२०॥

ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गां तथैवं दिशो दश ॥२१॥

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥२२

अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥२३॥

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥२४॥

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥२५

सिंहनादेन शुम्भस्य व्याप्त लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥२६॥

शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥२७॥

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।
स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥२८॥

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ।
आजघान सरैर्देवीं कालीं केसरिणं तथा ॥२९॥

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥३०॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥३१

फिर आते हुए देख दैत्यको फरसा लिए ।
देवीने मार बाणोंसे भूमीपर गिरा दिया ॥१६॥

भीमविक्रम भाईके गिरतेही निशुंभके ।
शुंभ क्रुद्ध हुवा आया देवीको शीघ्र मारने ॥१७॥

ऊंचे रथस्थित हुवा वह खड्ग लिए बडे ।
नभ आठ भुजाओंसे व्यापता सोहने लगा ॥१८॥

आतेदेख उसे देवी ने फूंका शङ्ख जोरसे ।
ज्याशब्दभी धनुषका किया अत्यन्त दुःसह ॥१९॥

निजघण्टा नादसे भी दिशऐं पूरने लगी ।
जो सभी दैत्यसेनाका करता तेज नष्ट था ॥२०॥

सिंहने तब नादोंसे गजोंके मद सोखते ।
आकाशपूरित किया भूमि और दिशा दस ॥२१॥

नभमें कूद काली ने ताडी जो हाथसे मही ।
पहलेके शब्द सभी उससे लीन होगये ॥२२॥

जोरसे शिवदूतीने अट्टहास किया वहां ।
दैत्य त्रस्त हुए सारे शुंभ क्रूद्ध हुवा महा ॥२३॥

खडा रह जरा दुष्ट ! अम्बिकाने कहा तभी ।
आकाशस्थित देवोंने जयहो जयहो कहा ॥२४॥

आतेही शुंभने छोडी ज्वालाभीषणशक्ति जो ।
आतीको हो अम्बिकाने महोल्कासे निरस्तको ॥२५

सिंह का सा शुंभ-नाद छाया त्रैलोक्य गर्भमें ।
वह जीतगया भूप ! घोर निर्घात शब्दको ॥२६॥

शुंभके बाण देवीने देवीके बाण शुंभने ।
काटे उग्र स्वबाणों से सैंकडों वा सहस्रशः ॥२७॥

तब क्रुद्धाचण्डिकाने उसे मारा त्रिशूलसे ।
शूलाहत हुवा शुंभ मूर्च्छा खा भूमिपै गिरा ॥२८॥

निशुंभ ने चेतना पा लिया धनुष हाथ में ।
मारा शरों से देवीको कालिका और सिंहको ॥२९॥

फिर दैत्येशने बाहु सहस्र दसधारके ।
चक्रायुधोंसे देवीको छादिया सब ओरसे ॥३०॥

तब क्रुद्ध हुई देवी दुग दुर्गार्तिनाशिनी ।
छेदा शरोंसे उसके चक्रों और शरौघको ॥३१॥

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् । अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥३२॥	निशुंभ तब ले दौडा गदा को चण्डिका प्रति । मारने के लिए दैत्य सेना साथ लिए हुए ॥३२॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका । खड्गेन शितधारेण स च शूलं समाददे ॥३३॥	काट डाली चण्डिकाने आतेही उसकी गदा । खङ्गसे तीक्ष्णधारा के, उसने शूल लेलिया ॥३३
शूलहस्तं समायान्तं निशुम्भममरार्दनम् । हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥३४॥	शूल हाथ लिए आते देवशत्रु निशुंभ का । वेंधा हृदय अम्बाने वेग से फैंक शूल से ॥३४॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः । महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥३५॥	शूल से भिन्न उसके हृद् से प्रगट और ही । महावीर्य बली दैत्य तिष्ठ यों बोलता हुवा ॥३५॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः । शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥३६॥	उसका व्यक्त होते का देवी ने हँसके शिर । बोलता ही काट दिया आ गिरा वह भूमि पै ॥३६
ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान् । असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥३७॥	सिंह ने खालिए दैत्य डाढ चूर्णित शीस के । औरों को खागई काली शिवदूती प्रमोद से ॥३७
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः । ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥३८॥	कौमारी शक्ति से केई मरे भिन्न महासुर । और केई ब्रह्मशक्ति मन्त्र पावन वारि से ॥३८॥
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे । वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥३९॥	अनेक दैत्य माहेशी शूल से भिन्न हो गिरे । वाराही तुण्ड से केई चूर चूर हुए वहां ॥३९॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः । वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥४०॥	खण्ड खण्ड किए दैत्य वैष्णवी ने स्वचक्र से । और केई मरे दैत्य ऐन्द्री प्रेरित वज्र से ॥४०॥
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् । भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ॐ॥४१	और केई मरे 'भी' से रण छोड़ भगे कई । शिवदूती, सिंह, काली खागये दैत्य शेष को ॥४१
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः ॥	श्रीहरिशास्त्रिकृत हिन्दी दुर्गापाठ में नवाँ अध्याय पूर्ण ।

S. S. SWAIKA
J. P. Committee Member of Indian Council of Agricultural Research.

Sri S. S. SWAIKA, B. A.
J. P. DIRECTOR OF SWAIKA GROUP OF INDUSTRIES, CALCUTTA
has been elected as a Committee Member of the
INDIAN COUNCIL OF AGRICULTURAL RESEARCH,
Government of India, Ministry of Food and Agriculture to represent the
FEDERATION O INDIAN CHAMBERS OF COMMERCE & INDUSTRY,
NEW DELHI
FOR A TERM OF THREE YEARS.

30 लाख स्त्रियाँ गलत नहीं हो सकतीं!

पिछले चार वर्षों के दौरान 30 लाख से भी ज्यादा स्त्रियां लूप को अपना चुकी हैं। वे जानती हैं कि लूप :

कारगर है—यह परिवार नियोजन के बहुत ही विश्वसनीय तरीकों में से एक है।

आसान है—लेडी डाक्टर कुछ ही मिनटों में इसे लगा देती है।

यह निकाला जा सकता है—दूसरे बच्चे की इच्छा होने पर इसे आसानी से निकाला जा सकता है।

यह सरल है—एक बार यदि आपको लूप माफिक आ जाये तो फिर दूसरे किसी तरीके को अपनाने की जरूरत नहीं। इसके होने से आपके वैवाहिक आनन्द में किसी प्रकार की बाधा नहीं पड़ती।

खतरनाक नहीं है—इससे कोई बीमारी वगैरा नहीं होती। अलबत्ता, यदि कोई छोटी-मोटी शिकायत पैदा हो जाये तो उसका आसानी से इलाज हो जाता है।

डाक्टर लोग अधिकांश महिलाओं के लिये, सावधानी पूर्ण जाँच के बाद, लूप को उपयोगी बता देते हैं। जिन कुछ महिलाओं को लूप माफिक नहीं आता उनके लिये बच्चों के जन्म में समयान्तर लाने और परिवार को छोटा रखने के लिये और अनेक तरीके मौजूद हैं। जानकारी के लिये अपने निकटतम परिवार नियोजन केन्द्र से सम्पर्क स्थापित कीजिये। परिवार नियोजन के बारे में सलाह और सेवायें सभी मुफ्त दी जाती हैं।


अफवाहों पर
कान न दीजिये !
अपने डाक्टर पर
विश्वास कीजिये !

davp 69/265

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

नरसीमेहता — श्रीनरसीमेहतामहोदयः पञ्चदशशताब्द्यामाविरभूत्। अस्य निवासस्थानं गुर्जरप्रान्ते जूनागढनगरमासीत्। बाल्यकाले एवास्य मातापितरौ दिवङ्गतौ आस्ताम्।

पितृव्यात्मजस्य गृहे अस्य पोषणमभूत्। स्वविवाहानन्तरं श्रीकृष्णस्यानन्या भक्तिरेवास्य जीवनस्य प्रमुखो ध्येय आसीत्।

स्वभ्रातुः पत्न्या दुर्व्यवहारेण खिन्नः स स्वपत्न्या सह भ्रातुः गृहान्निर्गत्य धर्मशालायां निवासं चकार। यदा अस्य पत्नी बालकाश्च प्रसुप्ता आसन् तदा धर्मशालातो निर्गत्य स शिवमन्दिरम् अगात्। तत्र तेन सप्तदिवसपर्यन्तं अनशनं कृत्वा शिवस्याराधनं कृतम्। सप्तमे दिवसे भगवान् शङ्करः प्रकटोऽभूत्। शिवेन सह श्रीनरसीमहोदयो गोलोकधाम्नि श्रीकृष्णस्य रासलीलामण्डल्यां प्रापितोऽभूत्। तत्र श्रीकृष्णतः पीताम्बरवस्त्रं मयूरपङ्खं करतालवाद्यं च संप्राप्य मृत्युलोके भक्तिरसप्रसारस्यादेशञ्चापि लब्ध्वा स प्रतिनिवृत्तोऽभूत्। तदनन्तरं तेन सम्पूर्णं निजजीवनं श्रीकृष्णभक्तिरसप्रसारणे एव यापितम्। अस्य स्वरचिताः पद्यावलयः परिपूर्णभक्तिरससिक्ताः सन्ति। समस्ते गुर्जरप्रदेशे अस्य कवितायाः प्रभावो विद्यते। साध्वी मीरादेवी अनेन सुपरिचिता आसीत्।

तुलसीदासः—श्रीतुलसीदासो विक्रमीये १५८९ संवत्सरे उत्तरप्रदेशे बान्दामण्डलान्तर्गते

नरसीमेहता:—श्री नरसी मेहता महोदय का आविर्भाव पंद्रहवीं शताब्दी में हुवा था। इनका निवासस्थान गुजरात प्रान्त में जूनागढ नगर था। बाल्यकाल में ही इनके माता पिता दिवङ्गत होगए थे। चचेरे भाई के घर में इनका पोषण हुवा था। अपने विवाह के पश्चात् श्रीकृष्ण की अनन्य भक्ति ही इनके जीवन का प्रमुख ध्येय था।

अपने भाई की पत्नी के दुर्व्यवहार से खिन्न वे अपनी पत्नी के साथ भाई के घर से निकल कर धर्मशाला में निवास कर लिया। जब इनकी पत्नी और बच्चे सो रहे थे तब धर्मशाला से निकलकर वे शिव मन्दिर में चले गए। वहां उसने सात दिन तक अनशन करके शिव की आराधना की। सातवें दिन भगवान् शंकर प्रगट हुए। शिवजी के साथ श्रीनरसी महोदय गोलोकधाम में श्रीकृष्ण की रासलीलामण्डली में पहुंचा दिए गए। वहां श्रीकृष्ण से पीताम्बर वस्त्र, मयूरपङ्ख, और करतालवाद्य प्राप्त करके और भक्तिरस के प्रसार का आदेश भी प्राप्त करके वे लौटे। तदनन्तर उनने अपना सम्पूर्ण जीवन श्रीकृष्णभक्ति के इस प्रसार में ही बिताया। इनकी स्वरचित पद्यावली पूर्णभक्ति रस से सिक्त है। सम्पूर्ण गुर्जरप्रदेश में इनकी कविता का प्रभाव विद्यमान है। साध्वी मीरा देवी इनसे सुपरिचित थी।

तुलसीदास:—श्री तुलसीदास ने विक्रमीय १५८९ संवत्सर में उत्तरप्रदेश में बान्दा मण्डल

राजपुरग्रामे जन्म लेभे। अस्य पिता कान्यकुब्जजातीयः आत्मारामः, माता हुलसी, पत्नी च दीनबन्धुपाठकस्य कन्या रत्नावली आसीत्। बाल्येऽयं 'रामबोला' इति नाम्ना प्रसिद्ध आसीत्। वैराग्यग्रहणे चास्य नाम 'गोस्वामी तुलसीदासः' इति बभूव।

पत्न्या व्यङ्ग्यवचनेन मर्माहतोऽयं गृहान्निर्गत्य नरहरिदासस्वामिनः समीपमागत्य दीक्षां स्वीचकार। तदनन्तरं विभिन्नानां शास्त्राणामप्यध्ययनमनेन कृतम्। तदनन्तरं प्रयागादितीर्थेषु गत्वा तीर्थाटनं सम्पादितम्। तदनन्तरं अयोध्यायामेव निवासं कृत्वा तत्रैव च जगद्विख्यातंरामचरितमानसं ग्रन्थं रचयामास। स्वजीवनस्यान्तिमे चरणे त्वसौ काश्यामेवासीत्। प्रसिद्धे असीघट्टे च १६८० तमे वत्सरे श्रावणशुक्लसप्तम्यां स्वस्य नश्वरं देहं तत्याज।

अद्यावधि चतस्रः शताब्द्यः व्यतीताः, तथापि संकरसंस्कारमयेऽस्मिन् युगे तुलसीदाससाहित्यं अनुदिनं सश्रद्धं पठ्यते, अस्येदं कारणं यद् गोस्वामी तुलसीदासो जनभाषायाः राष्ट्रकविः आसीत्। एषः यदा जन्म लेभे तदा भारतवर्षम् वैदेशिकैः मुगलशासकैः समाक्रान्तं आसीत्। तस्मिन् काले तुलसीदासः सुप्तां स्वातन्त्र्यभावनां "पराधीन सपनेहु सुख नाहीं" इत्यादि रचनारूपां जनहृदयेषु उत्थापयामास। अस्य प्रसिद्धाः ग्रन्थाः—रामचरितमानसम्, विनयपत्रिका, दोहावली, कवितावलीप्रभृतयः सन्ति।

काशीपण्डितैः प्रेरितेन श्रीमधुसूदनसरस्वतीमहोदयेन रामचरितमानसं अधीत्य तस्योपरि इयं निजसम्मति लिखिता—

आनन्दकानने ह्यस्मिञ्जङ्गमस्तुलसीतरुः।
कवितामञ्जरी भाति रामभ्रमरभूषिता॥

में राजपुर ग्राम में जन्म लिया। इनके पिता कान्यकुब्ज जातीय आत्माराम, माता हुलसी और पत्नी दीनबन्धु पाठक की कन्या रत्नावली थी। बाल्यकाल में ये 'रामबोला' इस नाम से प्रसिद्ध थे। वैराग्यग्रहण करने पर इनका नाम 'गोस्वामी तुलसीदास' यह होगया।

पत्नी के व्यङ्ग्यवचन से मर्माहत ये घर से निकलकर नरहरिदास स्वामी के समीप आकर दीक्षा स्वीकार की। इसके पश्चात् इनने विभिन्न शास्त्रों का अध्ययन किया। तदनन्तर प्रयागादि तीर्थों में जाकर तीर्थाटन किया। तत्पश्चात् अयोध्या में ही निवास करके और वहीं जगत्विख्यात रामचरितमानस ग्रन्थ को रचा। अपने जीवन के अन्तिम चरण में तो ये काशी में ही थे। प्रसिद्ध असीघाट पर १६८० वत्सर में श्रावण शुक्ला सप्तमी को अपने नश्वर देह को छोडा।

आज तक चार शताब्दी व्यतीत होगई तो भी संकर (मिलेजुले) संस्कारों से युक्त इस युग में तुलसीदास साहित्य प्रतिदिन श्रद्धासहित पढा जाता है। इसीका यह कारण है कि गोस्वामी श्रीतुलसीदास जनभाषा के राष्ट्रकवि थे। इनने जब जन्म लिया तब भारतवर्ष वैदेशिक मुगल शासकों के अधीन था। उस समय तुलसीदास सुप्त स्वातन्त्र्य भावना को 'पराधीन सपने हु सुख नाहीं' इत्यादि वचनों को जनहृदय में उठाया। इनके प्रसिद्ध ग्रन्थ रामचरितमानस, विनयपत्रिका, दोहावली, कवितावली इत्यादि हैं। काशी के पण्डितों से प्रेरित श्रीमधुसूदन सरस्वती महोदय ने रामचरितमानस को पढकर उसके ऊपर अपनी यह सम्मति लिखी।

'इस काशीरूपी आनन्दवन में तुलसीदास चलता फिरता पोधा है। उसकी कविता रूपी मञ्जरी बडी ही सुन्दर है, जिस पर श्रीरामरूपी भंवरा सदा मंडराया करता है'।

गोस्वामीतुलसीदासः स्वप्रभोः श्रीरामचन्द्रस्य दास्यभावमङ्गीकृत्य दास्यभावमयीमीश्वरोपासनाम् प्रचारयामास ।

कम्बः—तामिलनाडप्रदेशे तिरुवयुन्दुरनामके ग्रामे एकसहस्रवर्षेभ्यः पूर्वं श्रीकम्बकविर्जन्म लेभे । श्रीषडयप्पमुदलियारनामकेन भूमिपतिनाऽस्य लालनपालने च कृते । कम्बकवेः चरित्रं अज्ञातमेवास्ति ।

तामिलनाडप्रदेशस्य शैवसमाजस्य वैष्णवसमाजस्य च स श्रद्धेयः कविरासीत् । उत्तरभारते तुलसीदासेन प्रणीतस्य रामायणस्य यादृशं प्रामाण्यं वर्तते, तादृशमेव प्रामाण्यं तामिलनाडप्रदेशे श्रीकम्बकविकृतस्य रामायणस्य वर्तते । रामायणस्य लेखनं समाप्य श्रीकम्बककविः श्रीरङ्गनगरमगात् । तत्रत्यैः पण्डितैः सः 'कविचक्रवर्ति' इत्युपाधिना विभूषितोऽभूत् । यावज्जीवनं श्रीकम्बककविना स्वरचितेन रामायणेन रामकथायाः प्रचारः तामिलप्रदेशे कृतः । प्रदेशस्य बहुभिः नृपतिभिः तस्य महान् सत्कारः सम्पादितः । तामिलसाहित्यस्येतिहासे नवमशताब्दीतः समारभ्य चतुर्दशशताब्दीपर्यन्तस्य कालखण्डस्य नामनिर्देशः 'कम्बकालः' इति नाम्ना कृतोऽस्ति ।

गोस्वामी तुलसीदास ने अपने प्रभु श्रीरामचन्द्र का दास्यभाव अङ्गीकार करके दास्यभावमयी ईश्वरोपासना का प्रचार किया ।

कम्बः—तमिलनाड प्रदेश में तिरुवयुन्दुर नाम के ग्राम में एक सहस्र वर्ष पूर्व श्रीकम्ब कवि ने जन्म लिया । श्रीषडयप्पमुदलियार नामक जागीरदार ने इनका लालन-पालन किया । श्री कम्बकवि का जन्म अज्ञात ही है ।

तामिलनाड प्रदेश के शैवसमाज का और वैष्णव समाज का वह श्रद्धेय कवि था । उत्तर भारत में तुलसीदास द्वारा प्रणीत रामायण का जैसा प्रामाण्य है वैसा ही प्रामाण्य तामिलनाड प्रदेश में श्रीकम्ब कवि कृत रामायण का है । रामायण के लेख को समाप्त करके श्रीकम्ब कवि श्रीरङ्ग नगर में गए । वहां के पण्डितों के द्वारा वे 'कवि चक्रवर्ती, इस उपाधि से विभूषित हुए । सम्पूर्ण जीवन पर्यन्त श्रीकम्ब कवि ने अपने द्वारा रचित रामायण द्वारा रामकथा का प्रचार तामिल प्रदेश में किया था । प्रदेश के बहुत से राजाओं ने उनका महान् सत्कार किया था । तामिल साहित्य के इतिहास में नवीं शताब्दी के आरम्भ से चौदहवीं शताब्दी तक के समय का नाम निर्देश कम्बकाल इस नाम से किया है ।

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

सूक्ति-सुधा

(ईर्ष्यामुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

परस्यैश्वर्य्यमालोक्य
वृद्धिं वा प्रभुतां पराम् ।
यया वृत्त्या मनस्तापः
सा हीर्ष्या वृत्तिरीरिता ॥१॥

येषामीर्ष्या भवति वै,
हृदये, ते रुहन्ति नो ।
परतापेन ते शुष्काः
शीर्णाः शीघ्रं भवन्ति वै ॥२॥

ईर्ष्या परसुखे नैव
कार्य्या, हेतौ तदुन्नतेः ।
एवं कृते सुखप्राप्ति-
र्नान्यथेति विनिश्चयः ॥३॥

ईर्ष्यैवाकारणं दुःख-
मीर्ष्यैवाऽग्नि निरिन्धनः ।
निरन्तरं ज्वलयते मन
ईर्ष्या मनस्विनाम् ॥४॥

परैश्वर्य्यसमुल्लास-
कारणानि विमृश्य भोः
बालास्तानि भवन्तोऽपि
धारयन्तु श्रयन्तु च ॥५॥

दूसरों के ऐश्वर्य को अथवा प्रभुता (हकूमत) और बढती देखकर जिस वृत्ति से मन में जलन (सन्ताप) होता है वह वृत्ति ईर्ष्या कहाती है ॥१

जिनके हृदय में ईर्ष्या होती है वे जन पनपते उठते उगते नहीं हैं। वे पर ताप से सूखने लगते हैं और शीर्ण (जल्दी ही बूढे) हो जाते हैं ॥२॥

ईर्ष्या परसुख में कभी न करनी चाहिये उनके सुख सम्पत् प्राप्ति के कारणों में ईर्ष्या कर सकते हो, इसके करने से तुम भी वैसे सुखी हो सकते हो, अन्यथा नहीं हो सकते ॥३॥

ईर्ष्या ही अकारण दुःख है, ईर्ष्या ही बिना ईन्धन के जलने वाला अग्नि है। बडे २ मनस्वियों के मन को यह ईर्ष्या निरन्तर जलाती रहती है ॥४॥

हे बालको ! दूसरे के ऐश्वर्य के कारणों का विचार (तलाश) करो और आप लोग भी उन कारणों को धारण करो, आश्रय करो तो आप भी ऐश्वर्य सुख सम्पदा प्राप्त कर लोगे ॥५॥

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित । फोनः ६३१५६

भारती

संस्कृतमासिकस्य



पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय

पार्थ-मोहमपाकर्तुं गीतामुपदिशन्हरिः ।
विश्वकल्याणकृद्भावो भगवानभिवन्द्यताम् ॥

२०
२

वार्षिकमूल्यं सप्तमुद्राः ७.००
एकप्रतेः सप्ततिपणाः ०.७

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आन्ध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलाचरणम्	आशुकवि-श्रीहरिशास्त्री, सम्पादकः,	४७
२.	काव्यदोषाः	कालूरि-श्रीहनुमन्तरावः, हैदराबादः	४८
३.	सुभाषिततोरणबन्धपद्यानि	कवीन्द्रः श्रीदीनानाथशर्मा, लुध्याना	५२
४.	राष्ट्रस्यैकताया आधारचतुष्टयं	श्रीपुरुषोत्तमशास्त्री, मधुनगरं आगरा	५३
५.	मनोविनोदकर्णिका	मधुपः, सहसम्पादकः	५४
६.	रक्षन्ति वचनं धीराः	श्रीरामस्वरूपशास्त्री, बम्बई	५५
७.	वामनविजयम्	आचार्य-श्रीविश्वनाथशास्त्री, बीकानेरः	५६
८.	धर्मं चरन्तः खलुः भाग्यवन्तः	श्रीगङ्गाधरगुरुमहोदयः, सम्बलपुरं उड़ीसा	५९
९.	चन्द्रतले मानवः	अनु० श्रीगणेशरामशर्मा, डूंगरपुरम्	६०
१०.	अस्मदीयो राष्ट्रपतिः	श्रीहरिश्चन्द्रशर्मा, अलवरस्थः	६९
११.	श्रीनानकगुरुदेवाय श्रद्धाञ्जलिः	संस्कृतपरिषद् चण्डीगढः	७१
१२.	श्रीशिवराज्योदये महाकाव्ये ४३ तमः सर्गः	डा० श्रीश्रीधरभास्करवर्णेकरः, नागपुरम्	७५
१३.	श्रीदुर्गासप्तशती, दशमोऽध्यायः	अनु० श्रीहरिशास्त्री, सम्पादकः, जयपुरम्	७७
१४.	सम्पादकीयम्	'मधुपः'	८१
१५.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	८४
१६.	श्रीवासुदेवाष्टकम्	श्रीअक्षयकुमारशर्मा, काश्मीरः	८७
१७.	सूक्तिसुधा	आशुकवि-श्रीहरिशास्त्री, सम्पादकः	❀

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपस्तुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् २० | मार्गशिर्षः, विक्रमाब्दः २०२६ (दिसम्बर, १९६९) | अङ्कः २

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

दुर्वृत्तैरतिदुर्लभा दितिसुतप्रोद्दामदर्पापहा
दासानां दुरितौघदारणपरा दारिद्र्यविद्राविणी
दात्री दैवतसम्पदां च विपदुद्दामद्रुमच्छेदिनी
दुर्गाया द्रुतदुःखदारणपरा दृष्टिः क्रियान्मङ्गलम् ॥१॥

मासावतरणम्

यं जानन्ति जना हरिं भगवतीगीतास्थनिर्देशतः
यस्मिन्वैतरणीव्रतं किल तदुद्याप्तिं समातन्वते ।
प्राक्पक्षेऽपि च कालभैरवजयन्तीं कारयत्यादरात्
हेमन्तस्य सुहृद्वरो मृगशिरा मासः स एवागतः ॥१॥

—❀ काव्यदोषाः ❀—

लेखकः—श्रीकालूरिहनुमन्तरावः, हैद्राबादः

अलङ्कारिकैर्बहवः काव्यदोषाश्चर्चिताः। तेषु अप्रयुक्तं यथा—

"विमुखा दैवतास्सर्वे ते नो दुश्च्यवनादयः।
अरण्यगृहमेधिन्यो यैर्वयं हन्त कल्पिताः॥
(प्रतापरुद्रीयम्।)

अत्र देवता इति पुंलिङ्गे, दुश्च्यन इतीन्द्रपरत्वेन च कविभिर्न प्रयुक्तौ। ईदृशपदानि झटित्यर्थबोधप्रतिबन्धकानि भवन्ति, ततो दोष इति चाभिप्रायः। परन्तु समुद्र इवातिविस्तृता वर्तते भाषा। यद्यपि पूर्वकविभिः केनापि कारणेन कानिचित् पदानि न प्रयुक्तानि तथाऽपि कालान्तरे केनापि न प्रयोज्यानीति कथं वक्तुं शक्यते? प्रायेण कवयः स्वस्वकालेषु प्रजानां सुपरिचितान्येव पदान्युपयुञ्जते। अपि तु भाषा कालक्रमेण परिणमति। पूर्वपदानि व्यवहारान्निर्गच्छन्ति नूतनपदानि च प्रविशन्ति। व्यासेन भासेन चोपयुक्तानि पदानि कतिचिदद्यास्माकं न सुलभग्रहाणि। तिक्कन्नश्रीनाथरामकृष्णादिप्राचीनान्ध्रकविभिः प्रयुक्तानि बहून्यान्ध्रदेशीयपदानि अद्यतनान्ध्रपाठकानां सुलभग्राह्याणि न सन्ति। तत्तद्रचनाकालेषु तत्तत्पदानि सुबोध्यान्येव स्युः पाठकानाम्। अद्य व्यवहाराद् गलितत्वात्तेषामर्थबोधाय निघण्टुरेव शरणं विद्यते।

अत्र केषाञ्चिदाधुनिककवीनां कश्चिदभिप्रायोऽपि विचार्यः। अस्माकं प्राचीनकवित्वं प्रजानामसुलभग्राह्यायां भाषायामस्ति सामान्यजनै र्नावगम्यते, ततः सर्वं तत्साहित्यं निष्प्रयोजनम्, सुलभभाषायामधुना स्वविरचितमेव साहित्यं प्रजाभिरवगम्यते, साहित्यप्रयोजनं च निर्वहतीति तेषां वादः। तेषां दृष्ट्या भ्रमरः, रक्तम्, इत्यादिपदानि, तेषामपि देश्यविकृतय एव देशभाषासाहित्ये सन्तु; मिलिन्दः, रुधिरम् इत्यादिपदानि न। प्रतापरुद्रीयकारमते दुश्च्यवनादिषु केषुचिदेव निघण्टुस्थ कष्टबोध्यपदेषु, एतदाधुनिककवीनां मते अस्माकं दैनिकव्यवहृतानि शतं वा द्वे शते वा पदान्यपहाय शिष्टा समस्ता भाषादुर्ग्रहैव। यदि नाम सुकवित्वलक्षणमेतत्, भाषा शीघ्रं क्षयति। वेदशास्त्रेतिहासकाव्यादिभिर्बहुविस्तृतायां देशव्याप्तायां भाषायामप्रयुक्तः शब्द एव न विद्यते, सर्वः शब्दः क्वापि प्रयुक्त एव स्यादिति महाभाष्यपस्पशाह्निके पतञ्जलिना उक्तम्। एभिः कारणैः 'अप्रयुक्तम्' काव्यदोष इति न परिगणनीयम्।

अमङ्गलव्रीडाजुगुप्साप्रतीतिकरं त्रिविधमश्लीलं यथा—

"अभिप्रेतपदावासः कदा वा सम्भविष्यति?
नीचं साधनमेतेषां परोत्सर्गैकजीविनाम्।"
(प्रतापरुद्रीयम्।)

अत्र अभिप्रेतनीचसाधनपरोत्सर्गपदानि क्रमेण अमङ्गलव्रीडाजुगुप्साकराणि। किन्तु कवयः केऽपीमं दोषं न परिपूर्णेन परिहरन्ति। अभिप्रेतपदं प्रचुरप्रयुक्तम्। "प्रसादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः" इति कालिदासप्रयोगः। अश्लीले इमे शब्दगते। अश्लीलमर्थगतमपि स्यात्। पठितुरभिरुचिमनुसृत्य तस्य परिहरणं वा स्वीकरणं वा भवति। अधोदृष्टान्तितपद्येषु अश्लीलस्यात्यन्तसमीपे यथा रम्यभावाः प्रकटिता इति विभावयत—

"तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बं।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः।"
(मेघसन्देशम्।)

'विवृतजघना' मित्यश्लीलमेव । अपि तु सौन्दर्यान्तर्भागोऽभूत् ।

शाकुन्तलस्थमपरं पद्यम्—

"स्निग्धं वीक्षितमन्यतोऽपि नयने
यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयो र्गुरुतया
मन्दं विलासादिव......."

अत्र 'नितम्बयोः' इति द्विवचनप्रयोगो व्रीडाकरोऽपि रमणीयः । इन्द्रियप्रवृत्तिं विशदीकुर्वन् षेक्स्पियरेणविरचितमिदं Antony and cleopatra नाटके अस्ति ।

"Royal Wench !
She made great caesar lay his sword to bed :
He plough'd her, and she cropp'd."

ploughed इति पदे दृश्यमानमश्लीलं cropped इति पदेन परास्तमभूत् । एतावता अश्लीलपदानि भावाश्च साहित्ये विशृङ्खलमुपयुज्येरन्निति न । उपयोक्तुः कवेस्तानि आस्वादनीयतां नेतुं सामर्थ्यमस्तु इति दर्शयितुमेवैतावती चर्चा ।

शास्त्रमात्रप्रसिद्धस्य लोकव्यवहारादृष्टस्य शब्दस्य प्रयोगः 'अप्रतीतिकम्' नाम दोषः यथा—

"मनूपदेशाः क्व गताः कुलाचार्यैरुदीरिताः ।"
(प्रतापरुद्रीयम्)

अत्र मनुशब्दो मन्त्रपरत्वेन मन्त्रशास्त्रमात्रप्रसिद्ध इत्यप्रतीतिकम् । किन्तु श्रीवेलूरिशिवरामशास्त्रिकृतम् 'अग्निः' इत्यान्ध्रखण्डकाव्यस्थमेतत्पद्यं परिशीलयत—

"ऋग्वेद ! अष्टदिग्वीथीषु मां द्रष्टुं
कियानुत्कण्ठितस्त्वं दहनकाले
वेदान्त ! मां वीक्षितुं कियतीं योगदृङ्मतिं
धृतवानसि प्लोषसमये
व्याकृते ! यङ्लुगन्तो 'दृशिर्' ममार्थं कियान्
त्वया प्रसारितः चरमवेलायाम्
कविताकुमारि ! मम दर्शनाय कतिभिर्मुखैदुःखिता त्वं तपनसमये
बत ! साहिति ! मामुपगूहितुं
कियत्पर्यन्तं तव हस्तौ प्रसारितौ,
मां कङ्कालं कृत्वा अगच्छत
हे पुस्तकानि विज्ञानपुटानि ।"

स्वगृहेण सह दग्धान् ग्रन्थान् स्मृत्वा कविरेवं परिदेवयति । व्याकरणपरिभाषायामपनीतायां पद्यतृतीयचरणस्यार्थः 'हे व्याकृते ! दह्यमाना ममार्थं पुनः पुनरतिशयेन कथं वीक्षितवती' इति । व्याकरणमुद्दिश्य व्याकरणपरिभाषयामेवोक्तिर्युक्तास्ति । व्याकरणमेव काव्यवस्तु परिणतम् । एतत्पद्यं पठित्वा शास्त्रसंकेतपदानि कवित्वार्हाणि नेति केन भण्येत ?

अप्रतीतिकमनित्यदोषमाहुः । यदि कविः पठिता द्वावपि तत्तच्छास्त्रवेत्तारौ न दोष इति । पद्यं साधु उत दुष्टमिति तत्पद्यभावेन पदजालेन च न निर्णीयते, पठितुः पठनार्हतया निर्णीयते इति समञ्जसो ननु अभिप्रायः ?

"अरीतिः" इति आन्ध्रकाव्यालंकारसंग्रहकर्त्रा वाक्यगतो दोष उक्तः । 'रसानुचितपदविसरः अरीतिः' यथा— 'विटजनहृदयग्रसनाग्रहग्रहिलदृष्टिसमग्रोदग्रो वनितायाः शृंगारः' इति । शृंगाररसस्य असमासा वा अल्पसमासा वा रचना अनुकूला । लक्ष्ये दीर्घसमासरचना कृता । तथैव वीररौद्ररसयो र्दीर्घसमासरचना उचिता, तत्रासमासरचना दोष इति तस्याशयः ।

अपि तु शृङ्गारकरुणरसस्थलेषु दीर्घसमासरचनाः, रौद्रादिरसेषु व्यस्तपदरचनाश्च पूर्वकाव्येषु बोह्व्यो दृश्यन्ते । यथा—

"प्रतिवर्षवसन्तोत्सव
कुतुकागत सुकविनिकरगुम्फितकाव्य
स्मृतिरोमाञ्चविशङ्कित
चतुरान्तःपुरवधूप्रसादन रसिक !"
(पारिजातापहरणम् आन्ध्रकाव्यम् । छाया ।)

"पतिपाणिपल्लवच्युत नीविबन्धन
व्यग्रबालाहस्तवनरुहम्
धवकृताधरबिम्बदशनक्षतिव्यथा
भुग्नलीलावतीभ्रुलतम्……तदारतमभूत्॥"
(शृङ्गारनैषधम्, आन्ध्रकाव्यम् । छाया)

"सहसा नखम्पचस्तनदत्तपरिरम्भ-
मामूलपरिचुम्बिताधरोष्ठम्
अतिशयप्रेमकल्पितदन्तसम्बाध-
मगणितग्लानिशय्यानिपातम्….॥
(मनुचरित्रम् आन्ध्रकाव्यम् । छाया ।)

रौद्ररसे व्यस्तपदरचना यथा—

"अथाह भीमः पुनरुग्रकर्मा
दुश्शासनं क्रोधपरीतचेताः ।
गतासुमालोक्य विहस्य सुस्वरं
किं वा कुर्यां मृत्युना रक्षितोऽसि ॥
एवं ब्रुवाण पुनराद्रवन्त
मास्वादय रक्तं तमतिप्रहृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं
भयेन तेऽपि व्यथिता निपेतुः ॥

……………………………………

पूरयित्वाञ्जलिं भूयो रुधिरस्योग्रनिस्स्वनः ॥
शृण्वतां लोकवीराणामिदं वचनमब्रवीत् ।
"एष ते रुधिरं कण्ठात् पिबामि पुरुषाधम ।
ब्रूहीदानीं तु संहृष्टः पुन गौंरिति गौरिति ॥
ये तदाऽस्मान् प्रनृत्यन्ति पुनर्गौरिति गौरिति
तान् वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥"
(महाभारतम्)

Othello नाटके अल्पाल्पैः पदैर्यथा महान् कोपः प्रकटित इति पश्यत—

"Othello :— O ! that the slave had
forty thousand lives ! One is too
poor, too weak for my revenge."

उदाहृतिभिरेताभिररीति र्न दोष इति स्पष्टं भवति । रौद्रे वा शृङ्गारे व अन्यस्मिन् वा भावनाशक्तिरावश्यकी, शैली न प्रधानम् ।

तथैव वीररौद्ररसयोः परुषाक्षराणि सन्तु, शृङ्गारकरुणयोर्नेति आलङ्कारिकोक्तः 'प्रतिकूलवर्णम्' नाम दोषोऽपि न युक्तः । सूर्यशतकस्थं पद्यमिदं दृश्यताम् । "मार्गोपान्ते सुमेरोर्नुवति कृतनतौ नाकधाम्नाँ निकाये, वीक्ष्य व्रीडानतानां प्रतिकुहरमुखं किंनरीणां मुखानि । सूतेऽसूयत्यपीषज्जडगतिवहतां कन्धरार्धैर्वलद्भि र्वाहाना व्यस्यताद् वः सममसमहरेर्हेषितं कल्मषाणि ॥"

रसानां वाच्यता दोष इत्यालङ्कारिकोक्तिः । यथा— "विपुलोग्ररणमसदृशबीभत्सरसोल्लसितम्, शृंगारसहिता ललना ।" इति । (आन्ध्रकाव्यालङ्कारसंग्रहः ।) किन्तु महाकविप्रयोगाः सन्ति बह्वो येषु रसा वाच्याः कृताः । उपर्युदाहृतभारतश्लोके 'क्रोधपरीतचेताः' इति रस वाच्यतैव । ध्वनिकारेण तु सम्यङ्निरूपितस्य रसस्य वाच्यता न दोष इत्येवोक्तम् । शृङ्गारकरुणयो रल्पसमासरचना वीररौद्रयो दीर्घसमासरचना च प्रायेण स्यात्, महाकविप्रयोगास्सन्ति येषु शृङ्गारकरुणयो दीर्घसमासरचनास्तथा वीररौद्रयोरल्पसमासरचनाश्च विद्यन्ते इति, शृङ्गारकरुणयोरप्रयत्नपूर्वकागतयमकाद्यलङ्कारयुतरचना अपि सन्तीति च ध्वन्यालोके उक्तमेव । शोकवर्णने यमकालङ्कारो नन्नय्यकृतेऽस्मिन्नान्ध्रपद्ये विद्यते—

"सहकार ! मत्प्रियसहकारं, पुन्नाग !
पुन्नागं, भुवन ! भूभुवनतिलकम्,
चन्दन ! बुधहरिचन्दनं, पुष्पिताशोक !
सुहृज्जनशोकदमनम्…… ….."(छाया ।)

तस्मात् नैते काव्यदोषाः । कविविवक्षिताद् भावात् पाठकमनांसि ये प्रतिरुधन्ति त एव काव्यदोषाः ।

पद्ये पदानि कानिचिदर्थपोषणे यदि नोपयुज्यन्ते तदा पद्यरचना शिथिलिता भवति । तु, च, हि, वै' इत्यादयः । आलङ्कारिके-

निरर्थकं नाम दोष इत्येतदुक्तम्। छन्दोवशात् काव्ये एते तिष्ठन्त्येव। यदि व्यर्थपदानि पद्यरचनामीषत् श्लथयन्ति तदा न प्रबलो दोषः यत्र तु पद्यभावमपि भृशं श्लथयन्ति तदा प्रबलदोषो भवति। यथा आन्ध्रनृसिंहपुराणकाव्यात् पद्यम्—

"श्रीस्तनकुंकुमद्रवनिषिक्तभुजान्तरभागविस्फुरत्
कौस्तुभरत्ननूत्नरुचिगर्वितनाभिसरोजसौरभ
प्रस्तुतमत्तभृङ्गरवरागरसोल्बण भोगिभोग-
तल्पास्तरणं ये स्मरन्ति सुकृतात्मानस्ते
अपास्तसमस्तकल्मषाः।" (छाया।)

पद्येऽस्मिन् 'गर्वित', 'रसोल्बण,' 'आस्तरण' इत्येतैः पदैः काप्यर्थपुष्टि र्न भवति, प्रत्युत पद्यान्वयः क्लिष्टो भवति।

पद्ये एकं वा बहूनि वा पदानि यदि तत्प्रकरणे अनुचितानि वर्तन्ते दोष सम्पद्यते। पाण्डुरङ्ग-माहात्म्यनामान्ध्रकाव्यस्थमिदं पद्यं पश्यत—

"प्रारब्धानां वेदपाठानां
प्रत्यूहो न भवत्विति किम्
रे भ्रातः! मां द्रष्टुं
बहुदिनेभ्यो नागच्छसि
त्वामपश्यन्मम चक्षूरा-
जीवयुगं म्लायति।" (छाया।)

बहुसन्तानवत्या वार्धक्यसमीपाया निगमशर्मणो ज्येष्ठभगिन्याः स्वनेत्रे 'चक्षूराजीवयुगम्' इति कथनं नोचितम्। किन्तु एतदनौचित्यं पद्यभावं सुतरां न विफलयति। दृश्यतामिदं पद्यम्—

"आकाशात् शम्भुशिरः
तस्मात् शीताद्रिं
सुरलोकाद्हिमाद्रे र्भुवं
भूलोका दस्तोकाम्बोधिं
पयोधेः पवनान्धो लोकं च
प्रापद् गङ्गाकूलङ्कषा
बहुविधा विवेकभ्रष्टसम्पाताः।"

इदं भर्तृहरिसुभाषितस्य एनुगुलक्ष्मणकवेरान्ध्रानुवादस्य संस्कृतच्छाया। गङ्गा नदो आकाशात् शिवस्य शिरः, तस्मात् हिमवत्पर्वतम् सुरलोकाद् हिमाद्रे र्भुवः अस्तोकसमुद्रम् एवं विधेनार्थे क्रियमाणे गङ्गा नदी एकस्मादु त्कृष्टप्रदेशादन्योत्कृष्टप्रदेशं प्राप्नोतीव स्फुरति, विवेकभ्रष्टसम्पाता न स्फुरन्ति। अस्य पद्यस्य भावो मूलश्लोकपठनादेवावगम्यते।

(क्रमशः)

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय:—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स:—
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता:—
शुद्धा, श्वेता, कणवती शर्करा

सुभाषित-तोरण-बन्धपद्यानि गीताजयन्ती-विषयाणि

लेखकः-आचार्यः श्रीदीनानाथशर्मा कवीन्द्रो लुध्यानावस्तव्यः

रमणं **रा** धिकायास्त्वं नित्यं **भ** जाङ्ग साधक।
संसृति **म** मता ह्रासः कित **व** कथमन्यथा ॥१॥

मनस्ते **च** पलं नूनं विद्धि **सा** र मनन्यधीः।
अपाह **र** पुनर्जन्म मत्त ? **ग** र्वं च मा कुरु ॥ २॥

गिरं भ **ण** समुज्ज्वलां स्वागा **र** निरतिं त्यज।
दुराशा **अ** पनेतुं हि गीता **न** वनवं तपः ॥३॥

इन्द्रिय **व** र्ग मादम्य कृष्णे **र** तिं समाचर।
सुविशा **ल** मना भूत्वा भवं **त** र जिगीषितः ॥४॥

अवलं **ब** स्व सूक्तीश्च विह **र** हर्षनिर्भरः।
परम **वि** गताऽऽतृष्णो माग **ण** य मनः शुचम् ॥५॥

प्राप्तोमा **नु** षकं देहं ज्ञान **को** ट्यां स्थिरी भव।
माधवं **भ** जमानो हि दलाऽ **रा** ति-दलं भृशम् ॥६॥

विज्ञान **व** ल्लभा येऽपि श्रद्धा **म** तीत्य वञ्चकाः।
सहासः **सा** हसस्तेषां तू प **श** मो न तद्धृदि ॥७॥

वीतरा **ग** प्रशस्तस्त्वं ज्ञान **र** तिरतो भव।
केशवे **र** मणं मुक्तिः शर **णं** सुखदो हरिः ॥८॥

संसार **दुः** खसंतप्तः गीता **म** तिपरायणः।
तमेव **ख** निमुक्ताभं स्मर **त** मो महेश्वरम् ॥९॥

अन्यथा **मू** ढवत्प्राणान् दुःखी **भू** य निरन्तरम्।
सुमृदु **ल** शरीरोऽपि घृत्वा **ल** घुरनाथवत् ॥१०॥

राष्ट्रस्यैकताया आधारचतुष्टयम्

ले० आचार्यः श्रीपुरुषोत्तमशास्त्री, वेदकुटीरम् मधुनगरम्, आगरा

भारतवर्षं भूमण्डलस्य तत्खण्डमस्ति यतः विश्वस्मिन् संसारे मानवजातेः सभ्यतायाश्च प्रसारोऽभूत् । अस्मिन्नेव खण्डे सर्वतः पूर्वं मानवजातेः आदिमः पिता मनुः आविर्भूय स्वान् सप्तपौत्रान् आग्निध्रेध्मजिह्वादीन् सप्तसु जम्ब्वादिषु द्वीपेषु प्रातिष्ठिपत् । एवं चासौ मनुरेव समस्तमपि विश्वं किंवा विविधानि राष्ट्राणि मानवजात्या समलंकृतं भाषया मुखरितं संस्कृत्या सभ्यतया उद्भाषितं धर्मेण च मर्यादितम् अकरोत् । अतः अद्यापि क्वचित् आदिममनुः बाबाआदम, शब्देन व्यवह्रियते, तत्प्रजाश्च मानवशब्देन मैन·शब्देन वा उच्यन्ते । अतो वस्तुतः मानव जातेः विविधानां भाषाणां सभ्यतानां च मूलं स्रोतः एकमेवास्ति । तस्य प्रभवस्थानं तु भारतमस्ति । किंतु प्रवाहक्षेत्रमस्ति समस्तं विश्वम् । यद्यपि अद्यत्वे बहवः भारतीया जनाः राजनैतिक–कुटिलचक्रैः दिग्भ्रान्ता भूत्वा स्वमिदमितिवृत्तं गौरवमयं विस्मृतवन्त इव लक्ष्यन्ते । ततश्चाज्ञानमदेन उन्मत्ताः "मुण्डे मुण्डे मतिर्भिन्ना चानुसृत्य विविधा निस्साराः कल्पनाः कल्पयित्वा दुरन्तान् रागान् प्रजल्पन्ति यैः अहर्निशं निर्बलं भवति राष्ट्रम् किंकर्तव्यविमूढतामेति समाजः, तमोघनाच्छन्नो भवति सनातनः सदाचारः । किन्तु आशासे यस्मिन् दिने भारतीया सन्ततिः स्वं सत्यमितिहासं स्मरिष्यति तस्मिन्नेव दिने सर्वोऽपि भारतीयः समाजः स्वस्थं सुदृढम् एकं शरीरमिव समुन्नेष्यति ।

आत्मस्मृतेः प्रथमस्तावद् आधारः अस्तिमातृभूमिः । "माता भूमिः पुत्रोऽहं पृथिव्याः", अयंभावः दृढतया स्वीकतव्यः, मातृभूमेः भक्तिं विना कश्चिदपि नरः प्रकृत राष्ट्रस्य न जातु राष्ट्रियताया अधिकारी भवितुं शक्नोति, अस्ति चेत्क्वचित्तर्हि सैषा राष्ट्रियताया विडम्बना । राष्ट्रियप्रतिष्ठाया वा भावनात्मकैकतायाश्च नास्ति कश्चिदन्यः प्रथम आधारः मातृभूमिमृते । मातृभूमिरेव राष्ट्रस्य शरीरमस्ति । अनेन भूमिशरीरेणैव राष्ट्रियसन्तत्याः शरीराणां निर्माणमथ पालनं च भवति । अत एकैकस्या व्यक्तेः स्वास्थ्येन समाजस्याथ राष्ट्रस्योन्नयनं भवितुं शक्नोति तदैव विश्वबन्धुत्व प्रति यत्नः सुकरः । एवं स एव पुरुषः राष्ट्रियोऽस्ति यः मातृभूमेः प्रतिकणं पूज्यं प्रतिपर्वतं समाराधनायाः केन्द्रं प्रतिनदि प्रतिसरोवरं च तीर्थं प्रतिव्यक्तित्वं चात्मीयं मन्यते । अतो विपरीता भावाः मनसः दूरादेव हातव्याः, स्थाप्या चात्मनि मातृभूमेः भक्तिरव्यभिचारिणी ।

राष्ट्रियभावनात्मैककताया द्वितीय आधारोऽस्ति राष्ट्रस्य संविधाने अचला निष्ठा । भूमिः राष्ट्रस्य शरीरमस्ति तर्हि संविधानं तस्य श्वासः । संविधानेनैव राष्ट्रस्य नियन्त्रणं सघटनमुत्कर्षश्च भवति । वस्तुतः संविधानस्य पालनमेव चरित्रस्य निकषोपलम् । संविधानमेव राष्ट्रस्य संस्कृतिः । अस्याचरणेनैव अतिशयतामेति मानवः । अतः संविधानस्य द्रष्टारः महर्षयः साभारं श्रद्धयार्चितव्याः ।

तृतीयाधारे भारतीयाः पुराणपुरुषाः स्वपूर्वजाः महान्तः स्वाचारे आदर्शरूपेण मन्तव्याः । अवश्यशेव ते एव महापुरुषा अद्यापि कोटिशः वर्षैः भारतीयसन्ततिरूपे वर्तमानाः सन्ति । भारतीयाः कामं स्वान् परकीयान् मन्येरन् किन्तु यथा प्रत्यहं नवेन रूपेण उदीयमानः भानुः नो कथंचिदपि परिवतते, तथैव भारतीयसन्ततिरूपे ते एव महापुरुषाः सन्ति यैः विश्वो-

पवनं समलंकृतं सुशिक्षितं च। तेषामेव महापुरुषाणां चरित्रं शिक्षासंविधानं चाद्यापि भारतीयानां संस्कृते जीवनस्य चाधारोऽस्ति।

भारतस्य राष्ट्रियैकतायाः चतुर्थाधारे वैषम्यनिरसनपूर्वकं सामाजिकसाम्यम् ध्येयम्। वैषम्येण व्याकुलीजातमास्ते समाजस्यमानसम्। सम्प्रति स्वार्थैकमात्राधारा निस्साराः कल्पिताः सन्ति विविधा भेदाः। किन्तु अज्ञानेन धनपदकर्मणां दुरुपयोगाः समाजे भीषणक्लेशान् उत्पादयन्तो दृश्यन्ते। यथा निर्धनता जनाम् दुःखयति हीनभावनाश्चोत्पादयति, तथैव अतिसंग्रहोऽपि असन्तोषं मिथ्याभिमानं च जनयति। अतः समाजस्य घटकं घटकं प्रति आवश्यकतामनुसृत्य भूमिः धनं वा स्यात्, योग्यतामनुसृत्य च पदं भवेत्। कर्मणः महत्त्वं तु तत्कौशल एवास्ति नतु जातु स्तरे। स्वाध्यायस्य प्रशासनस्य वा स्वच्छतायाः वा सर्वं कर्म नरनारायणस्य सेवार्थं लक्ष्ये समानमिति धार्यम्। एवं च समाजस्य आर्थिकस्तरे स्वस्थे सति पदकर्मणोः साम्यं स्वयं सिध्यति। कतव्यच्युतिस्तु पातित्यम्, निष्ठया श्रमेण शीलेन योगेन च कर्तव्यपरता उच्चतोच्यते एतदेव तथ्यं भारतीयैः शिष्टैः सदाचारस्य धर्मस्य वा नाम्ना समाद्रियते।

उपर्युक्तैः भारतस्य राष्ट्रियैकतायाः चतुर्भिः आधोरैः सुप्रयुक्तैः राष्ट्रमेकं शरीरमिव स्वस्थं सुघटितं च भवितुं शक्नोति। तदेव भारतं पुनः विश्वं "वसुधैव कुटुम्बकम्, इति आदर्शं पाठं पाठयितुं प्रभवति अथ च स्वीयेन जगद्गुर्वाख्येन आसनेन "सर्वे वै अमृतस्य पुत्राः, इति दिव्यवाण्या प्रबोद्धुं च शक्नोति।

* * *

मनोविनोदकणिका—

धनिकं प्रति भिक्षुकः

किं[1] पार्श्वपुटकं श्रीमन् ! कुत्रापि पतितं तव ?
नैव, तत्सविधे मेऽस्ति, किमर्थं पृच्छ्यते त्वया ?
एवं, तर्हि ततः किञ्चिद् भगवन्नाम्नि दीयताम् ॥

—मधुपः

---

[1] बटुवा

रक्षन्ति वचनं धीराः

लेखको-वैद्य-श्रीरामस्वरूपशास्त्री सम्पादकः, बालसंस्कृतम्, बम्बई ७७

प्रदत्तं पालयामास राजा दशरथो वचः ।
तत्याज स प्रियं पुत्रं रामं प्राणानपि प्रियान् ॥१॥

वचनस्य संरक्षायै हरिश्चन्द्रो महीपतिः ।
राज्यं दारांश्च पुत्रं च दत्त्वा भेजे स भृत्यताम् ॥२॥

विष्णवे समयं रक्षन् सार्वभौमं ददौ धनम् ।
बलिर्वामनरूपाय पातालं च ययौ स्वयम् ॥३॥

गाङ्गेयः समयं भीष्मं दत्त्वा संरक्ष्य तं पुनः ।
ब्रह्मचर्यव्रतं धृत्वा लोके भीष्मत्वमाप्तवान् ॥४॥

बन्धमुक्तां करिष्यामि सोऽहं भारतमातरम् ।
इत्येतद् वचनं गान्धिः पालयामास मोहनः ॥५॥

रसनिष्पादनोद्योगं गृहं स्वं मुद्रणालयम् ।
पुत्रान् दारान् कुटुम्बं च जीवनं जीविकामपि ॥६॥

संस्कृतस्य प्रचाराय दत्तकीर्तिः सुधीवरः ।
वैद्यरामस्वरूपोऽपि शास्त्री सर्वं जहौ स्वकम् ॥७॥

लोकनिन्दाभयाद् भीता लोकप्रत्ययपोषणम् ।
रक्षन्ति वचनं धीराः स्वप्नेऽपि समयीकृतम् ॥८॥

* * *

निवेदनम्—संस्कृतस्य प्रसाराय सर्वे संस्कृतसेविनः ।
अनुकुर्वन्त्विमान् वैद्यान् रामस्वरूपशास्त्रिणः ॥—मधुपस्य

❀ वामनविजयम् ❀

प्रणेता—श्रीविश्वनाथमिश्रः, शार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

षष्ठं दृश्यम्

राजसभायां बलिविजयोत्सवः

[सभायां प्रसन्नमुद्रायां सिंहासने विराजते बलिः, प्रधानामात्यः, कोषाध्यक्षः, सेनापतिः अन्ये सभासदश्च यथास्थानमवस्थिताः सन्ति]

वन्दिनो गानं कुर्वन्ति

जय दानवदेव विजयतात्
जयतात् जयतात् जयतात्
रत्नजटितसिंहासनभासित
शिरसि स्वर्णमय छत्रविभूषित
वालव्यजन छविधारिन् ।। जय दानव·······

भालतटे मुकुटेन सुशोभित
स्वप्रभावकृत सुरपतिलज्जित
याचकनुतगुण भारिन् ।। जय दानव·······

असुरसुरञ्जन सुरदलभञ्जन
अदितितनयसम्मानविमर्दन
अतुलविपुल बलधारिन् ।।३।। जय दानव·· ····

दीनमपीह करोषि अदीनम्
कलयसि धनपतिगुणमपि हीनम्
जयतु जयतु मुद्कारिन् ।।४।। जय दानव·······

(गानं कृत्वा गायकाः गताः)

बलिः—भो अक्षौहिणीपते ! कथयतु भवान् किमधुना, भूलोके, देवलोके, पाताललोके अथवा अन्यत्र कुत्रापि ममाप्रतिहतस्य शासनस्य उल्लंघनं तु न भवति । स्वार्थिनः मखभोजिनः युद्धपराङ्मुखाः भीरवः देवाः कचित् विरोधप्रदर्शनस्य दुःसाहसन्तु न कुर्वन्ति ?

अक्षौहिणीपतिः—दैत्यकुलपुङ्गवो महाराजो बलिः सदैव जयतात् । महाराज ! अधुना तु सर्वासु दिक्षु भवदीयं यशोगानमेव श्रूयते । सर्वत्रैव श्रीमतां विजयवैजयन्ती दोधूयते । लोकपालाः दिक्पालाश्च भवदीयां वशंवदतामङ्गीकृत्य राजाज्ञां शिरसा वहन्ति । जगतो विस्तृते नभोमण्डले स्वकीयप्रखरकिरणै र्भासमानभुवनभास्कर इव निखिलवीरशिरोमणिमध्ये भवानेव विशिष्यते । भवतां तेजसः पुरस्तात् ध्वस्ततेजसः देवाः हीनाः सन्तः टिमटिमायन्ते । न क्वापि भवदीयं शासनं उल्लंघ्यते, न च विरोधभावना दृश्यते श्रूयते वा ।

बलिः—शोभनम्, शोभनम् [कोषाध्यक्षं दृष्ट्वा] अयि भो कोषाध्यक्ष महाशय ! कथयतु भवान् इदानीं कोषागारस्तु परिपूर्णः अस्ति न वा ? करप्रदाने प्रजा कीदृशमपि कष्टन्तु नानुभवति ? प्रजानां सुखशान्त्यर्थं कोषागारतो धनमादाय प्रतिदिनं व्ययं भवति न वा ? मम शासने कश्चनः अपि जनः दुःखमयं जीवनं तु न यापयति ?

कोषाध्यक्षः—महाराज ! श्रीमतां तपसः तेजसश्च महिम्ना भगवती वसुन्धरा सदैव स्वर्णादिविभिन्नरत्नान्युद्गिरति । भवदीयसुकृतरूपाः वारिवाहाः सदैव आकाशमण्डलतोऽमृतं वर्षन्ति । न कदाचित् अतिवृष्टिः न वा अनावृष्टिः उपलवृष्टिः वा भवति । प्रभुवर्याणां शोभनाचारसम्मुखे ईतयो भीतयश्च अस्तित्वरहिताः सम्पन्नाः वर्तन्ते । प्रजाश्च अहमहमिकया कोषागारपूर्तये यतमानाः सन्ति । प्रजानां सुखशान्तिकामनया प्रत्यहं लक्षमुद्राः वितीर्यन्ते कोटिमुद्राभिश्च बहिरागताः अभ्यागताः सत्क्रियन्ते प्रतिदिनम् ।

बलिः—महान् प्रमोदस्य विषयः । अस्तु मन्त्रिणं प्रति —

भो मन्त्रिन्! कीदृशी प्रचलति सम्प्रति शासनव्यवस्था। मम प्राणसमाः प्रजा अभावनामिकया पिपासया आकुलास्तु न सन्ति कच्चित्? गुणिनां सम्मानम् विदुषां समादरः याचकानां सत्कारश्च यथानिर्दिष्टेन पथा प्रत्यहमनुष्ठीयते न वा?

मन्त्री—देव! सुविदितशासनप्रयोगतया न वर्तते कुत्रापि अनवस्था। परीक्ष्य नियुक्ताः कार्याकार्यविचारकुशलाः गुप्तचराः स्वकीयं कार्यं सुचारुतया सम्पादयन्ति। राज्यस्य प्राणिनः किं खादन्ति, किं पिबन्ति, किं कुर्वन्ति किं वा मनसा कामयन्ते इति सर्वदा सवकाले वयं जानीमः। मनुष्याणां देवानां, असुराणाञ्च कथा दूरमास्ताम्। वायवः कथं वान्ति, सूर्यश्च कथं प्रकाशते, चन्द्रश्च कथं दीप्यते इत्यादि रूपेण चराचरस्य विस्तृतस्य प्रकृतिप्रपंचस्य निखिलं कृत्यं वयं विद्मः।

राजन्! सर्वाः प्रजाः त्रासरहिताः अभिलषितपदार्थप्राप्तिद्वारा सुखेन शान्त्या च कालं गमयन्ति। याचकाश्च अयाचकाः सम्पन्नाः भवतां यशोगानेन दिगन्तं बधिरयन्ति। महादानस्य जलराशिना निखिलं भूमण्डलं आप्लावितं वर्तते। शुष्कं नीरसं दयनीयञ्च स्थानम् दृष्टिपथम् अवतरत्येव न हि।

बलिः—धन्योऽसि मन्त्रिन्! धन्योऽसि। शोभना तव कार्यसंचालनपद्धतिः। अहमतीव तुष्टोऽस्मि त्वयि।

(द्वारपालः आगच्छति)

द्वारपालः—जयतु जयतु महाराजः। एते खलु दानवकुलशुभचिन्तका भृगुमहर्षयः समुपस्थिता वर्तन्ते।

बलिः—पूर्णेन स्वागतेन सह महर्षिमानय।

(भृगुरागच्छति, बलिश्च उत्थाय अभिवाद्य सिंहासने उपवेशयति)

बलिः—स्वागतं तपोधनाय। परमसौभाग्यं वर्तते यदद्य स्वयमेव समुपस्थाय ऋषिवर्येणानुकम्पितोऽस्मि। कथयतु महाभाग! दासानुदासस्य कृते कांचित् तुच्छसेवाम्।

ऋषिः—राजन् "रेवातटे तपः कुर्यात् मरणं जाह्नवीतटे" इति वचनमनुसृत्य नर्मदातीरे तपस्तप्तुम् ऋषीणामाश्रमनिर्माणाय अल्पस्य भूखण्डस्यावश्यकता वर्तते। अत एव समागतोऽहम्।

बलिः—अल्पः भूखण्डः? तुच्छधरा! न शोभनम्। बलेः सभायाम् अल्पः, किंचित्, न्यूनमित्यादयः शब्दाः कदापि न प्रयुज्यन्ते। महर्षे! नर्मदातीरे अल्पस्य भूखण्डस्य स्थाने शतं ग्रामाः मया प्रदीयन्ते। कृपया ममेदं दानं सादरं ससम्मानं च ग्रहीतुमर्हन्ति श्रीमन्तः।

ऋषिः—धन्योऽसि! कृतपुण्योऽसि राजन्! सदा सर्वत्र विजयीभूयाः।

(पटाक्षेपः)

सप्तमं दृश्यम्

भगवत्प्राकट्यम्

(बलिपराजितैः देवैः भगवतस्स्तवनम्)

प्रणतशरण नारायण जय, जय,
अभय अनन्त गुणायन जय जय
शरणमिहास्ति विना न भवन्तम्,
भीत उपैति ततो भगवन्तम्,
विश्वभरण करुणायन जय जय ॥ प्रणत…

बलिरनयं कुरुते भयदाता
सुरकुलविपुलविषादविधाता
तं निगृहाण बलेन रिपुञ्जय ॥ प्रणत शरण…

दहति दिशो दश तस्य प्रतापः
नैव बिभेति कुतोऽपि स पापः
विकृतममुं सहसा प्रकृतिं नय ॥ प्रणतशरण…

कमपि विचिन्तय नाथ उपायम्
येन लभेत हरिर्निजदायम्
सततपरार्थपरायण जय जय ॥ प्रणत……

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रव श्रवणमंगलनामधेय ।
आपन्नलोकवृजिनार्तिहर प्रसीद
शं नो विधेहि भगवन्नसि दीननाथः ॥

(स्तुत्यनन्तरम् चतुर्भुजनारायणप्रादुर्भावः)

नारायणः—भो ? भो ? आदितेयाः ? सदास्वर्गनिवासिनः जगन्मंगलविधायिनः यूयम् अत्र एकत्रीभूय कथं करुणक्रन्दनं कुरुत ।

इन्द्रः—अन्तर्यामिन्, अखिलेश्वर ? दयामय प्रभो ? न किमपि तिरोहितं सर्वज्ञस्य भवतः पुरस्तात् । सर्वं विजानतोऽपि भवतः यदि ममसुखादेव वर्तते शुश्रूषा तर्हि श्रूयताम् । अस्माकीना खल्वियमस्ति विषमा समस्या । विभो ? न जाने केन प्रकारेण अतुलनीयं बलम् अनभिभवनीयं तेजः विपुलं पराक्रमं चावाप्य मदोन्मत्तो बलिः अस्मान् भृशं पीडयन् वर्तते ।

नारायणः—(आश्चर्यमुद्रया) एवम् ? बलिः युष्मान् पीडयति ? कथय, कथय स्पष्टं तदीयमुदन्तजातम् वर्णय ।

इन्द्रः—दुर्दान्तैर्मायापरैः क्रूरैश्च दानवनिकरैः समवेतः असौ एकस्मिन् दिने अमरावतीमरौत्सीत् ।

नारायणः—किमुक्तम् ? अमरावतीमरौत्सीत् ? ततस्ततः…………

इन्द्रः—तदनुचरैः नन्दनवनं विनाशितम्, अमरावती विलुंठिता स्वायत्तीकृता च देवास्तु पशुमारं मारिताः । अशनं, पानं, शयनम् प्रभृति निखिलमस्माकं कृत्यजातं कठिनीकृतं दानवैः । वयं कथं श्वसिमः कथं जीवामः कथं वा विचाराम इति न शक्यते वक्तुम् । तद्भयात् लुक्कायिता वयं कथं कथमप्यमागत्य भवन्तं शरणमुपगताः स्म । प्रभो ? त्रायस्व, त्रायस्व अस्मान् भीषणसङ्कटादस्मात् ।

नारायणः—ज्ञातम् ज्ञातम् सर्वं विज्ञातम् । सत्यमेव बलिना अत्याचरितम् । असंशयं कल्पनातीतं कष्टं सोढं युष्माभिः ।

भो पुरन्दरप्रमुखा देवाः शृणुत—अस्मिन् विशाले ब्रह्माण्डक्षेत्रे कस्यापि गर्वः न भवितुमर्हति चिरस्थायी । बालिश्यात् कृतो गर्वः समूलमुन्मूल्यते मया । अति सर्वत्र वर्जनीय एव भवति । बलिरपि सम्प्रति सीमानमुल्लंघ्यातिवर्तते । अतस्तस्यापि मानभंगः कर्त्तव्य एव । भो वृन्दारकाः ? इदानीं यूयं निर्भयाः भवत । अमरावती पुनरपि इन्द्रेणैव भोक्ष्यते ।

अहमचिरादेव महर्षिकश्यपस्य गृहे वामनरूपेणावतीर्य भवतः क्षेमं विधास्यामि । बलिविश्रृङ्खलितां पुरातनीं मर्यादाञ्च पुनरपि संस्थापयिष्यामि ।

देवाः—जयतु जयतु, जगन्नियन्ता अखिलेश्वरो नारायणः ।

(देवाः स्तुवन्ति, नारायणश्चान्तर्धत्ते)

१—नारायणं निराकारं नरवीरं नरोत्तमम् ।
नृसिंहं नागनाथं च तं वन्दे नरकान्तकम् ॥
२—पीताम्बरं पद्मनाभं पद्माक्षं पुरुषोत्तमम् ।
पवित्रं परमानन्दं तं वन्दे परमेश्वरम् ॥
३—मुरारिं माधवं मत्स्यं मुकुन्दं मुष्टिमर्दनम् ।
महौजसं महाबाहुं तं वन्दे मधुसूदनम् ॥

भगवतः अन्तर्धानम्
पटाक्षेपः

धर्मं चरन्तः खलु भाग्यवन्तः

श्रीगंगाधरगुरुः, पद्मपुरं, राजबोड़ासम्बरं, सम्बलपुरं, ओड़िसा

राष्ट्रं स्मरन्तो नयशौर्य्यवन्तो
राष्ट्रीयकल्याण–सुतुष्टिमन्तः ।
राष्ट्रीयसंस्कार–विचारवन्तो
धर्मं चरन्तः खलु भाग्यवन्तः ॥१॥

दुर्नीतिजालं विनिवारयन्तो
राष्ट्रीयता–गौरवमानयन्तः
स्वार्थं त्यजन्तश्च परार्थवन्तो
धर्मं चरन्तः खलु भाग्यवन्तः ॥२॥

सत्यं वदन्तः सरलीभवन्तो
राष्ट्रीयकर्त्तव्यमनुस्मरन्तः ।
पापार्जितार्थान् अतिगर्हयन्तो
धर्मं चरन्तः खलु भाग्यवन्तः ॥३॥

मदर्थभावं परिवर्जयन्तो
राष्ट्रार्थचिन्तां हृदि धारयन्तो
मदान्धकारं च विदारयन्तो
धर्मं चरन्तः खलु भाग्यवन्तः ॥४॥

सदा सदाचारमहत्त्ववन्तः
पापं सदस्त्रैश्च विनाशयन्तः ।
स्वसंस्कृतेर्गौरवमुद्धरन्तो
धर्मं चरन्तः खलु भाग्यवन्तः ॥५॥

ओं शान्तिः शान्तिः शान्तिः

-: चन्द्रतले मानवः :-

मूललेखकः श्रीजयप्रकाशभारतीमहोदयः

अनुवादकः-विद्याभूषणः श्री गणेशरामशर्मा, डूंगरपुरम्

विश्वस्यास्य सर्वेष्वपि च भूभागेषु स्त्रियः, पुरुषाः बालाश्चाकाशवाणीयन्त्रैः स्वकर्णौ संयोज्य निषण्णा आसन्। ते सर्वे मानवेतिहासस्य सर्वाधिकं रोमाञ्चकारिण्या घटनायाः प्रत्येकस्य क्षणस्य सहभागिनो भवन्तोऽभूवन्। ते खल्वौत्सुक्येन, कौतूहलेन च स्वास्तित्वचेतनायाः सवथाऽनवधाना आसन्! को देशः, का वा जातिर्युगयुगेभ्यश्चन्द्रपर्यन्तं प्राप्तेः स्वप्नान्न समायोजयन्—किन्त्वद्यास्या धरित्र्या एव द्वौ मनुष्यौ तान् स्वप्नान् सत्यान्—साकारान्—विधातुं कृतसंकल्पावास्ताम्।

२१, जुलाई १९६९ दिनाङ्के चन्द्रवासरे ब्राह्मे मुहूर्ते 'गरुड' इत्याख्यं चन्द्रगगिअन्तरिक्षयानं नील-आर्मस्ट्रांगमहोदय।तथा च-एर्डविन-एल्ड्रिनमहाशयमादाय चन्द्रतलमवततार। तदेतच्चन्द्रयानं धूलिमुद्धून्वानं चन्द्रधरातलस्य जलविहीने शांतिसागराख्ये स्थलेऽवततार। भारतीयसमयानुसारं १ वादनोपरि ४७ मिनटात्मके कस्मिंश्चिदन्यग्रहे मनुष्यः प्रथमवारं प्राप्तवान्। निःसीममन्तरीक्षं विदारयतः, पृथवीतश्चतुर्लक्षकीलोमीटरदूरस्थे चन्द्रमसि गच्छतो मानवस्य १०२ घण्टाः, ४५ मिनटास्तथा ४२ सैकण्डमितः समयो व्यतीयाय। तत्र गत्वाऽपोलो-१० अन्तरिक्षयानस्य सञ्चालको नील-आर्मस्ट्रांगमहाशयः सर्वादौ कुशल-सम्वादं प्राहिणोत्—'अस्माकं यानमवततार। वयं सर्वथा सकुशला वर्त्तामहे। किंविधायाश्चापि चिन्ताया नास्त्यावश्यता।'

तदिदमपोलो-११ इत्याख्यमन्तरिक्षयानं १६, जुलाई १९६९ बुधवासरे सायं ७ वादनोपरि २ मिनटात्मके समये कैपकेनेडीतिस्थानतः (अमरीकान्तर्गतात्) विमुक्तमभूत्। यानेऽस्मिन् यात्रिणस्त्रयोऽभूवन्-नीलआर्मस्ट्रांगो, यानस्यास्य-नियन्त्रको, माइकलकालिन्सस्तथा च—एडविन-एल्ड्रिनः इति। यदा गरुडाख्यं चन्द्रयानं मूलयानतः पृथग्बभूव तथा चन्द्रतलमवततार, तस्मिन् समये माइकलकालिन्समहाशयो मूलयाने कोलम्बियाख्ये विद्यमानः ९६ कीलोमीटरप्रमाणायामुच्चतायां निरन्तरं चन्द्रमसः परिक्रमणं कुर्वाणोऽभूत्।

श्रीनील-आर्मस्ट्रांगमहाशय श्चन्द्रतलात् पृथिवीं वर्णयन् प्रोक्तवान्—सैषा पृथिवीअतीव स्थूलाकारा, भास्वरा, सुन्दरी च (ब्रिग, ब्राइट एण्ड ब्यूटीफुल) दृश्यमानास्ते। अथ चन्द्रतलविषये स प्रावोचत्—अत्र स्थाने-स्थाने स्थूलाकाराः प्रस्तरा दृश्यन्ते। चन्द्रतलं कठोरमास्ते, तथात्रत्या मृत्तिका मरुस्थलस्य मृदिव विद्यते।'

एल्ड्रिनमहाशयो भावविमुग्धो भूत्वावदत्—'सुन्दरं दृश्यमास्ते, सवमपि च सुन्दरं वरीवर्ति।' स पुनरवोचत्—यत्र वयमवातराम ततः स्वल्पीयसि दूर एव वयम् वृन्ताकवर्णां शिलामपश्याम। चन्द्रमसो मृत्तिका शिलाश्च सूर्यस्य प्रकाशे विद्योतमाना आसन्। तदिदमेकं भव्यमेकान्तस्थलमभूत्।'

चन्द्रयानं समीचीनायां स्थितौ वर्तते, तदिदं निरीक्ष्य, किञ्चिदन्नपानमारामं च कृत्वा तदनन्तरं प्रातः ८ वादनोपरि २६ मिनटात्मके समये नील-आर्मष्ट्रांगमहाशयश्चन्द्रतले पदं दिधे। स हि स्वकीयां भारगुर्वीं स्थूलस्थूला-

मन्तरिक्षवेशभूषां परिदधानोऽभूत् तथा स चन्द्रयानस्य (गरुडाख्यस्य) सोपानेन शनैःशनैरवातरत् । सोऽयमैतिहासिकः क्षणोऽभूद्यदा लक्षाधिकेभ्यो वर्षेभ्योऽनुर्वरायां, शून्यायामस्पृष्टायां व चन्द्रतलस्य धरायां मानवस्य चरणाः स्पर्शन्तोऽभूवन् । ततस्तत्र निर्धारितात् समयात्पूर्वमेव हि मनुष्यश्चलनमारभत ।

अर्बुदसंख्याधिका डालरमुद्राव्ययीकरणानन्तरं मानवश्चन्द्रतलं प्राप परन्तु सः स्वकीयानां भौतिकीनां, शिल्पतन्त्रगतानां क्षमतानां सीमाभ्यन्तरं कियद्वा कथं किमपि कुर्याद्ये न तस्याल्पकालिकमपि चन्द्रे विचरणं खल्वधिकाधिकमुपयोगि संसिद्धये न्नाम ! विषयेऽत्रान्ताराष्ट्रियोड्डयनस्यान्तरिक्षप्रशासनस्य सङ्घटनस्य (नासाख्यस्य) पदाधिकारिणः (वैज्ञानिकाः) पूर्वत एवातीवाधिकं बहु विचारविमर्शं कृतचरा अभूवन् । दीर्घकालोना गोष्ठीर्विधाय चर्चा-परिचर्चाभ्योऽनन्तरमेकैकस्य पलात्मकस्य सूक्ष्मसमयावयवस्य कार्यक्रमं निश्चितवन्तः । एतावत्पर्यन्तं यदार्मस्ट्रांगमहाशयस्य कार्यं यन्त्रयानावतरणसोपानादवरोहणसमकालमेवारभत । स हि क्षणमेकं विरम्य रज्वा बद्धामेकामर्द्धचन्द्राकारां मुद्रिकामाकर्षद्येनैकस्मिन् स्थानविशेषे निहित उपकरणानां पुञ्जः (मैसा) बहिराजगाम । दूरदर्शनस्य चित्रग्राहकं यन्त्रमपि च सक्रियं समभूत् । एलड्रिनमहाशयोऽधुना कामं गरुडयानान्तः स्थितः स्यात् परन्तु तेनापि निष्क्रियं नैव स्थातव्यमभूत् । स हि चलचित्रग्राहकयन्त्रेण-आर्मस्ट्रांगमहाशयस्य चित्राणि ग्रहीतुमारेभे ।

अथ-आर्मस्ट्रांगमहाशयः स्वस्य वामं चरणं चन्द्रतले निदधे, यदा च तस्य दक्षिणश्चरणश्चन्द्रयान एवासीत् । स खल्वेतावत् सावधानोऽभूद्यद्धि सः स्वकीयाभ्यां हस्ताभ्यां चन्द्रयानं सुदृढमवलम्बमानः संतस्थे । तेनेदं विनिश्चेतव्यमभूत् यन्नासाऽधिकारिणश्चन्द्रतलं यथाविधं बुध्यन्तः सन्ति, तस्मात्तद्बह्वधिकं भिन्नं तु नास्तीति । अथाधुना स यानस्य समीपमेवमेवेतस्ततः कानिचित् पदानि चचाल, तथा च स यादृगन्वभूत्, तद्विषय एकलक्षडालरमूल्यवत्याकाशवाणीयन्त्रे ह्यूस्टनस्थितं नियन्त्रणकेन्द्रं प्रति सूचनां प्रासारयत् ।

चन्द्रतले पदं निदधान आर्मस्ट्रांगमहाशयोऽवादीत्—'यद्यपीदं मनुष्यस्य लघुतमं पदमास्ते परन्तु मानवतायाः कृते सैषातीवोच्चतमा झम्पा वर्तते'

इदानीं तेन—आर्मस्ट्रांगमहाशयेन तत्कालमेव (चन्द्रतलात्प्रस्तरमृदादिपदार्थानां) वर्णिकामादाय संग्रहीतव्याभूत् । स हि २५ इञ्चपरिमाणां दीर्घामल्यूमीनियमधातोर्नलिकामिव यन्त्रमेकं जग्राह, यस्मिनेकतो गोणी (थैला) संलग्नासीत् । उपकरणस्यास्य सहाय्येन, विनैव देहावनमनमेव मृदः शिलादीनां वर्णिकास्तत्रापूरयितुं शक्यन्ते । इदानीमार्मस्ट्रांगमहाशयो यामन्तरिक्ष-वेषभूषां परिदधानोऽभूत्तस्यां स्थितावधिकमवनमनं किंवा हस्तपादाद्यवयवानामाकुञ्चनप्रसारादिकं सम्भवं नाभूत् । आर्मस्ट्रांगमहाशयस्तत्रत्यानां मृदादिपदार्थानां स्वल्पाल्पां वर्णिकां स्वाधोवस्त्रस्य स्यूतान्तर्निदधे ।

अथ विंशतिमिनटात्मकसमयानन्तरमेल्ड्रिनमहाशयोऽपि च चन्द्रयानाद्बहिर्निरगात्तथा स चन्द्रतले पदसञ्चारं कृत्वा तदनुभवं कृतवान् । अस्मिन्नेव समये-आर्मस्ट्रांगमहाशयो दूरदर्शनचित्रग्राहकं यन्त्रं त्रिपादिकायां संयुयोज । एल्ड्रिनमहाशयो 'मैसा' इत्याख्यादुपकरणपुञ्जाल्लीवरसंज्ञकं भारग्राहि लोहदण्डयन्त्रं बहिराकर्षयत् तथा सौरमण्डलसम्बन्धिनां झञ्झावातानां ज्ञानप्रदायकमेकमल्यूमीनियम यन्त्रोपकरणं यवनिकाकारं समायोजयत् ।

अथेदानीं स—एल्ड्रिनमहाशयः—भूकम्पलेखकं यन्त्रं संस्थापयति । भूकम्पानां तथा च चन्द्रतले भवतां कम्पनानां ज्ञानमिदं यन्त्रं प्रयच्छद्भावि । तदिदं भूकम्पज्ञापकं यन्त्रं जानुदघ्नमुच्चं, सामान्यमञ्जूषाकल्पं चाकारप्रकारायतनं विद्यते । पृथिव्यामुपयोज्यमानानामेवंविधानां भूकम्पसूचकयन्त्राणामपेक्षया तदेतद्यन्त्रं विंशतिगुणाधिकम् सम्वेदनशीलमास्ते । तदिदमेकवर्षानन्तरं यावत् सक्रियं भवेदित्याशास्यते तथाचेदं पृथिव्यां स्वयमेवाकाशवाणी–सङ्केतान् प्रेषयत्स्यात् ।

अस्मिन्नेव समये दशपदप्राये दूरे आर्मस्ट्रांगमहाशयो लेसर–परावर्तकमुपकरणं निदधे । लघुमञ्जूषाकल्पं तदिदमुकरणम् दशवर्षाणि कार्यशीलं सन्तिष्ठेत । अस्योपकरणस्य साहाय्येन वैज्ञानिका लेसर्सस्य घनीभूतान् किरणांश्चन्द्रमसि प्रेषयितुं पारयेयुस्तथा च पृथ्वोस्थितैरुपकरणैस्तेषां प्रतिबिम्बमङ्कितुं शक्नुयुः । यन्त्रस्यास्य चन्द्रतले स्थापनात् स्वल्पसमयानन्तरमेव केलिफोर्निया–वेधशालायामनेन यन्त्रेण प्रक्षिप्ताः प्रकाश-किरणा अगृह्यन्त ।

इदानोमार्मस्ट्रांगमहाशयेन–एल्ड्रिनेन च काश्चनान्या वर्णिकाश्चापि ग्रहीतव्या आसन् । ताश्च वर्णिका मञ्जूषास्वनेकासु शिलानां च वर्णिका आपूरणीया अभूवन् । तौ द्वौ सहयोगेन तदिदं कार्यमारभेताम् । १९ इञ्चप्रमाणदीर्घा ११॥ इञ्चप्रमाणविस्तृतास्ता एता वर्णिकामञ्जूषा अनेकेभ्यः स्थानेभ्य आपूरिताः । मञ्जूषास्ता इमा लोहकण्टकेऽवरोध्य चक्रिकासाहाय्येनाकृष्यन्त तथा–एल्ड्रिनमहाशयस्ता यानाभ्यन्तरं निदधौ ।

ताविमौ चन्द्रयात्रिणावेकं धातुफलकं, यस्मिंस्त्रयाणामण्यन्तरिक्षयात्रिणाममरीकाया राष्ट्रपते निक्सनमहोदयस्य हस्ताक्षराण्यङ्कितानि विद्यन्ते, चन्द्रतले तत्यजतुः । अमरीकाया राष्ट्रध्वजोऽपि चन्द्रतले संस्फारितः । वायोरभावात् सोऽयं ध्वजस्तेन विधिना विनिर्मितोऽभूद्यदसावुच्चालकोपकरणेन विततः प्रस्फुरन्नेव बोभूयेत । विभिन्न राष्ट्राध्यक्षाणां सन्देशानां पारदर्शिनो चित्रपट्टिकाऽ (फिल्म) पि चन्द्रतलेऽमोच्यत ।

द्वाभ्यां रूषदेशीयाभ्यामन्तरिक्षयात्रिभ्यां यूरीगगारिन–एम कोमोरोव इत्येताभ्याम् मरणोपरान्तं प्रदत्तानि पदकानि तथा च त्रिभ्योऽमरीकाया अन्तरिक्ष–यात्रिभ्यः (ग्रिसम, ह्वाइट तथा चैफी इत्येतेभ्यः) प्रदत्तानां पदकानामनुकृतीश्चापि तावेतौ द्वावपि चन्द्रयात्रिणौ तत्र न्यदधताम् । ताविमौ चन्द्रयात्रिणौ यं हि धातुफलकं चन्द्रतले न्यदधताम् तत्रोत्कीर्णांश्छब्दान् आर्मस्ट्रांगमहाशयः प्रोच्चैः स्वर पपाठ–'जुलाई, सन् १९६९ वर्षे पृथिवीग्रहतो मानवाश्चन्द्रमसस्तदिदं स्थानमवतेरुः । वयमत्र समस्ताया मानवजातेः शांति–कामनामादायागच्छाम ।'

एतावतो व्यस्तस्य कार्यक्रमस्य पूर्णतापादने तेषां श्रमावसादः स्वाभाविकोऽभूत् । तथापि त एतेऽन्तरिक्षयात्रिणः प्रसन्ना आसन् । यत्र तेऽतीवसावधानं पदमेकैकं निदधतोऽभूवन्, पश्चात् कंगारुपशुविशेष इवोच्छलन्तश्चलन्तोऽदृश्यन्त ।

मानवस्य चन्द्रतलेऽवतरणस्यास्मिन् सर्वप्रथमे प्रयासे भवति सत्यपि स एषः प्रयासोऽसाधारणरूपेण सफलो बभूव, यद्यपि प्रतिक्षणं, प्रतिपदं च भीतय आशङ्काश्चासन् ।

अथास्यान्तरिक्ष-युगस्य सूत्रपातः ४, ऑक्टोबर १९५७ दिने बभूव, यदा रूषदेशः स्वकीयमाद्यं स्फुटनिकमित्याख्यं यन्त्रान्तरिक्षयानं मुमोच । ततो यथार्थतः ११ वर्षेभ्यः ९ मासेभ्यः १७ दिवसेभ्यश्चन्द्रतलमधि मानवोऽभ्युत्ततार । प्रथमोऽन्तरिक्षयात्री यूरीगगारिनमहाशयः स्वात्मन ऐतिहासिकमुड्डयनम् १२, अप्रैल १९६१ दिने कृतवान् । गगारिनस्य पृथिव्याः परिक्रमा-

करणादष्टवर्षमासत्रयनवदिनेभ्योऽनन्तरं मनुष्यश्चन्द्रलोकं प्राप्तुं शशाक ।

दिसम्बर १९६८ समये प्रथमवारमन्तरिक्षयानस्यापोलो–८ इत्याख्यस्य त्रयोऽपि चान्तरिक्षयात्रिणश्चन्द्रमसः प्रतिवेशं यावत् प्रापुः । पृथिवीं प्रतिनिवर्तनात् पूर्वं ते ७० मीलप्रमाणायां दुरतायां चन्द्रस्य दशप्रदक्षिणाश्चक्रुस्तथा चन्द्रमसोऽनेकानि चित्राणि च जगृहुः । अतः परं चन्द्रमस्यवतरणस्यास्य भव्यनाटकस्य पूर्वाभिनयोऽपोलो–१० अन्तरिक्षयानस्योड्डयनेनाक्रियत । अस्यान्तरिक्षयानस्य त्रयो यात्रिणोऽन्तरिक्षयानं तच्चन्द्रस्य कक्षापर्यन्तं निन्युः । एकोऽन्तरिक्षयात्री मूलयानं कक्षायां तस्यां भ्रामयन्नासीत्तथा द्वावन्यौ यात्रिणौ चन्द्रयानमध्यास्य तत् केवलं चन्द्रात् ९ मीलदूरं यावन्निन्यतुः । आभ्यां यात्रिभ्यामपोलो ११ अन्तरिक्षयात्रिणामवतरणस्य सम्भावितानां स्थानविशेषाणामध्ययनं विहितम् निकटतः । तच्च चन्द्रयानं पुनर्मूलयानेन सह समायोज्यत, ते च सकुशलं पृथ्वीं परावर्तन्त ।

सन् १९६८ वर्षस्य मईमासेऽपोलो १० अन्तरिक्ष-यानस्य सफलतायास्तज्जन्यानामनुभवानां चोपयोगं विदधद्भि वैज्ञानिकैः—अपोलो ११ चन्द्रयानस्योड्डयनस्य कार्यक्रमो विनिश्चितोऽभूत् । यद्यप्यधिकांशा लोका आशङ्किता आसन् यदेतावच्छीघ्रं मानवस्य चन्द्रमस्यवतरणमतीव विघ्नबाधाकुलं कार्यमास्त इति । परन्तु वस्तुतोऽस्य कार्यस्य पृष्ठभूमौ विगतानामष्टवर्षाणां तत्परतासीत् । अस्मिन् समयावधौ चतुर्लक्षसंख्याधिका लोका अपोलो ११ यानस्योपकरणसाधनानां, सुविधानां च संयोजने, तेष्वनुसन्धाने, तन्निर्माणविधौ चाविश्रान्तं कार्यजातमकुर्वन् । स्वर्गतस्य राष्ट्रपतेः केनेडीमहोदयस्य ते शब्दाश्चाप्यमरीकाया जनेभ्यः प्रेरणां प्रयच्छन्तोऽभूवन् यान् सः २५, मई सन् १९६१ दिने प्रोक्तवानासीत्—'अमरीकयाऽस्या दशाब्द्याः पूर्वमेव हि मानवस्य चन्द्रमस्युत्तारणस्य तथा तस्य सकुशलं पृथिव्य. निवर्तनस्य लक्ष्यं निर्धार्य परिपूर्णतां नेयम् ।'

येन यानेन मानवः प्रथमवारं चन्द्रतले प्राप्तुं सफलतां लब्धुं शशाक, तद्विषये ज्ञानार्थं भवन्तोऽवश्यमुत्सुकाः स्युः ।

अपोलोयानं, येन 'सैटर्न–५ नामकेन प्रक्षेप्यवाहनेन प्रक्षेपितं भवति, तद्विश्वस्य सर्वतोऽधिक शक्तिशालिवाहनं वर्तते ।

अपोलोऽन्तरिक्षयानस्य त्रयो भागा भवन्ति किं वा त एते त्रीणि 'मोड्यूलानि' वक्तुं शक्यन्ते । प्रत्येकेन मोड्यूलसंज्ञकेन भागेन काश्चन विशिष्टाः क्रियाः सम्पाद्या भवन्ति ।

नियन्त्रणभागस्य निर्माणमनया दृशा क्रियते यत् प्रतिनिवर्तनकाले पृथिव्या वायुमण्डले प्रवेश–समये तदिदं यानं तीव्रं तापं, भारोत्पीडनप्रभावांश्च सहेत । स एष नियन्त्रणभागो नियामककक्षस्य, शयनागारस्य, भोजनकक्षस्य प्रयोगशालायाश्चैतेषां सर्वेषां संयुक्तरूपं 'माड्यूलं भवति । प्रक्षेपण–समये यदि कापि च दुर्घटना भवेत्तदा यात्रिणः स्वरक्षार्थं तमिमं भागं शेषाद्यानात् पृथक्कर्तुं शक्नुवन्ति ।

अपोलो–११ अन्तरिक्ष-यानस्य सेवाकक्षे, नियन्त्रककक्षे (सी. एस. एम.) १८०.० किलोग्रामप्रणोदकमभूत् । चन्द्रकक्षां प्रवेष्टुं तथा च पृथिवीं प्रति निर्वर्तितुं चास्योपयोगोऽक्रियत ।

अथ पुनः प्रवेशाय निर्मितस्य नियन्त्रकशङ्कोर्भारः ५५०० किलोग्रामप्रमाणोऽभूत् । अस्मिन् हि शङ्कौ सार्द्धपञ्चघनमीटरप्रायं रिक्तस्थानमासीद्यत्र त्रयोऽपि यात्रिणः स्वकीयानि सामान्यानि कार्याणि सम्पादयितुं प्रभवेयुः । तदिदं स्थानं वयं मध्यमाकारं मरुत्त्वरयानमिव मन्तुं पारयामः । शंकुरसौ यदा निर्मितो भवति,

तदानीं समयेऽस्मिन् पञ्च विद्युदाग्नेयशतघ्न्यो भवन्ति तथा च द्वादश प्रक्षेप्यास्त्रधूमयन्त्राणि संयोजितानि भवन्ति, येषां प्रत्येकस्य भारः ४५ किलोप्रमाणो भवति। शङ्कावस्मिन् चत्वारः प्रणोदकतटाकाः संयुक्ता भवन्ति, नवाकाशवाणीयन्त्राणि तथा च सङ्केतकाः संलग्ना भवन्ति। अत्र शङ्कौ पञ्चाशद्विभिन्नानि यन्त्राणि तथा गवक्षान्यपि च संयोजितानि भवन्ति। त्रयाणां जनानां कृते चतुर्दशदिनपर्याप्ता खाद्यसामग्री, जलभाण्डागारं तथा मलविसर्जनव्यवस्थापि सन्तिष्ठन्ते। चतुर्विंशमीटरव्यासाकाराणि त्रीणि वायुच्छत्राण्यपि चात्र सन्निहितानि भवन्ति।

सोऽयं शंकुर्वायुयानमिवोड्डयितुं शक्नुते, नौरिव तरीतुं पारयते तथा च यात्रिभ्यः कठोरमाघातमकृत्वा कठोरतमायामपि भूमावुत्तरीतुं प्रभवति।

अथान्तरिक्षयानस्य द्वितीयो भागः सेवाशङ्कुर्वा सेवा-खण्डो भवति। सोऽयं सेवाकक्षो मध्यमाकारं ट्रकसंज्ञकं भारवाहिमृत्तरयानमिवाभूत्। अत्र दशलक्षकीलोमीटरदूरं यात्रां कर्तुं पर्याप्तमिन्धनमासीत्तथा चतुर्दशदिनानि यावच्छ्वासोच्छ्वासग्रहणयोग्यः प्राणवायुर्बभूव। अस्य खण्डस्येन्धनप्रभागे तरला दुदजनादोषजनाच्चोर्जां प्राप्तुं व्यवस्थासीत्। यानं चन्द्रकक्षायां स्थापयितुं तस्य गतिर्न्यूनीकरणीया भवति तथा सेवाकक्षस्य शङ्कोः शक्तिशालि राकेटमत्तरम् दग्ध्वैवं क्रियते। पृथिवीं प्रति निवर्तनसमये चन्द्रकक्षातो बहिर्निष्क्रमणायापि चेदमेव मृत्तरं गतिक्रमं विवर्द्धयति।

अथास्य चन्द्रयानस्यार्थादपोलो–११ इत्याख्यस्य 'गरुड' — संज्ञकोऽन्तरिक्षयानस्यैको भागोऽपि सन् स्वयं स्वात्मनि पूर्णोऽभूत्। अद्यावधि साहिकेष्वभियानेषु प्रयुक्तेषु यानेषु तदेद्गरुडयानं सर्वाधिकं महत्त्वपूर्णं मन्येत। अस्मिन् द्वौ खण्डावास्ताम्—अवरोहभाग आरोहभागश्चेति। अवरोहभागे ८२०० किलोमितं प्रणोदकमभूद्येन ४५०० किलोप्रघातक्षमस्य चालकयन्त्रस्य सम्भरणं सम्भवेत्। चालकानां श्वासग्रहणार्थमोषजनस्य, पेयजलस्य तथा चन्द्रतले यानं शीतलं रक्षितुं व्यवस्थाक्रियत। अस्मै गरुडयानाय विद्युच्छक्तिं प्रदातुमस्मिन् विद्युद्वेटर्यश्चतस्रः (६० किलोप्रमाणाः) आसन्। अस्य निर्माणं विधिनानेनाक्रियत यद्धि प्रस्तरशर्करासदृशेऽति कठोरेऽपि तलेऽवतरीतुं शक्नुयान्नाम। चन्द्रयानस्य चतुर्षु स्थूलवस्त्रवेष्टितेषु पादेषु त्रिषु ६८ इञ्चदीर्घस्पर्शतलान्यप्यासन्! चन्द्रयानस्यास्य सर्वेषामपि चरणाकां धरण्याः समतले स्थितिर्नावश्यकी समभूत्। तदिदं चन्द्रयानं (गरुडाख्यं) तिर्यग्वा विषमाधारं वा स्वास्थितिं परिपालयितुं क्षममभूत्।

अवरोहभागे २३०० कीलोप्रमाणं (चन्द्रतले केवलं ४०० कीलोभारं) प्रणोदकमासीद्यद्धि १६०० किलो प्रघात-क्षेमं राकेटचालकं यन्त्रं सञ्चालयितुं क्षमं भवेत्। अस्मिन् कक्षे खल्वाकाशवाण्याः सम्वादग्राहियन्त्रं, प्रेषणयन्त्र, चत्वारि विद्युच्छक्त्युत्पादकानि यन्त्राणि तथा च मूलयानेन, पृथिव्या च सह सञ्चार-व्यवस्थामक्षुण्णां परिपालयितुं सप्ताकाशीयानि (एरियल) संयुक्तान्यासन्।

अस्य गरुडयानस्य द्वावपि च भागौ तथा निर्मितावास्ताम् यत्तौ कस्मिंश्चिदपि समये पृथग्विधातुं शक्येयातामिति। परिस्थितिविशेषे, सत्यावश्यके चन्द्रतलेऽवतरण–समयेऽपि च पृथक् पृथक् कर्तुं शक्येत। ताम् च चन्द्रयानस्य द्वयोर्मार्गयोर्भारः १५००० किलो प्रायोऽभूत्।

'गरुडस्य' निर्माणं प्रकारेणानेन विहितमभूद् यद्धि तच्चन्द्रमसि तथा च तन्निकटवर्तिनि शून्यप्राये क्षेत्रे कार्यशील सन्तिष्ठेत। अस्य भारं न्यूनान्न्यूनं रक्षितुं–एल्यूमीनियममिश्रितस्य धातोः कर्गदसमानैः सूक्ष्मतमैः प्रतनुभिः प्रच्छ-

दावरणपटैरस्यावयवरचनाऽक्रियत । भारो न्यूनतमो भवेदित्यावश्यकमास्ते, यतोऽस्यैकपौण्डमिते भारे विवर्धिते, तस्मिन् प्रणोदकस्य भारगुरुत्वं ७० पौण्डमितं वर्द्धते खलु । सत्यप्येवं चन्द्रयानमेतदेतावद्द्रढीयो विनिर्मितमास्ते, यत्तदिदं सामान्यानां लघुमहतामुल्कापिण्डानां घातप्रतिघातान् संघर्षणं च सोढुं शक्नुयान्नाम ।

अथास्यापोलो–११ चन्द्रयानस्य भूमेराकाशेऽवमोचनाद्दिनत्रयपूर्वमेव हि सोवियतसङ्घः स्वचालितं स्टेशनरूपं लूना–१५ इत्याख्यमन्तरिक्षयन्त्रयानं समुच्चिक्षेप । यथा प्रायेण भवति–विनैव कामपि सूचनां लूना-१५ अन्तरिक्षयन्त्रयानमुदक्षिप्यत तथा चोत्क्षेपणानन्तरमपि मास्कोस्थानतोऽत्यन्तं संक्षिप्ता टिप्पणी प्रासार्यत । लूना–१५ यानस्य विषये विज्ञापितम् यदस्यान्तरिक्षं प्रति प्रक्षेपणस्योद्देश्यं ननु चन्द्रमसो निकटवर्तिन्यन्तरिक्षे शोधान्वेषणकार्यमास्ते तथा च साकमेवानेनास्य स्वचालितस्य यानस्याभ्यन्तरं संयोज्य प्रयुक्तानां शिल्पविधीनां परीक्षणमपि च वर्तत इति ।

अथेदं लूना–१५ यानं यद्धि चन्द्रमसो रहस्यपरम्परामुद्भेत्तुं प्रेषितमभूत्, स्वोड्डयनसमयेऽतीव रहस्यमयं सन्तस्थे । अस्य विषये नानानुमानानि तर्कितानि । अपोलो ११ यानस्य चन्द्रकक्षायां प्राप्तेः पूर्वमेव हि तदिदं लूना–१५ यन्त्रयानं चन्द्रमसं परिक्रान्तुमारेभे । आशङ्कितमपि यन्न कदाचिदपोलो–११ चन्द्रयानं तथा लूना–१५ यन्त्रयानमुभे मिथो दुर्घर्षणाहते भवेतामिति । परन्त्वस्य न कोऽपि चावकाशोऽभूदथ चापोलो–११ चन्द्रयानमनेन लूना १५ यन्त्रयानेनाऽप्रभावितमभूत् । जोड्रलवेधशालायां लूना १५ यन्त्रयानेन प्रेषिताः संकेता निरन्तरमाप्यन्त । वेधशालायास्तस्या निर्देशकेनोक्तम् यल्लूना–१५ यन्त्रयानं बह्वीः सूचनाः पृथ्व्यां प्रहिण्वद्विद्यते । तस्मान्नवविधाः सङ्केताः प्राप्यमाणाः सन्ति येषामर्थावबोधे वयमसमर्था आस्म । सामान्यासौ धारणाऽभूद्यदपोलो–११ चन्द्रयानस्य यात्रिभ्यः प्रागेव हि लूना–१५ यन्त्रयानं चन्द्रतलान्मृत्तिकायाः शिलानां वर्णिका नीत्वा पृथिवीं प्रतिनिवर्तेत परन्तु सेयं धारणा निराधाराऽसिद्ध्यत ।

अथ लूना–१५ यन्त्रयानमनेकवारं परिक्रमणकक्षायां परिवर्तनान्यकरोत्तथा च चन्द्रमसो निकटं प्राप्नुवानमभूत । २१, जुलाई दिने भारतीयसमयानुसारं ९–३५ वादनकाले तच्चन्द्रतलमध्यवततार । तस्मिन् समये लूना–१५ यन्त्रयानस्य चन्द्रमस एकपञ्चाशत्तमं परिक्रमणं कुवाणमासीत् । तदिदं चन्द्रतलगते संकट–सागराख्ये स्थानस्य क्षेत्रेऽवातरत् । तच्चेदं स्थानमपोलो–११ अन्तरिक्षयानस्यावतरणस्थलात् ८०५ किलोमीटरप्रमाणे दूरे वर्तते । यस्मिन् समये लूना–१५ यन्त्रयानं चन्द्रतलमवातरत्तदानीं समये चन्द्रयात्रिणावार्मस्ट्रांगएल्ड्रिनौ ततो निवर्तनोपक्रमं कुर्वाणावास्ताम् ।

नील–आर्मस्ट्रांग–एडविनएल्ड्रिनौ चन्द्रतले २१ घण्टाः ३६ मिनाटात्मकं समयं व्यतीयतुः । अस्मिन्नेव कालान्तरे तावेतौ तानि तानि सर्वाणि कार्याणि सम्पादितवन्तौ यानि ताभ्यां समर्पितान्यभवन् । समयाभावात्तावेकं लघुप्रयोगं कर्तुं न शेकतुर्यद्यपि–आर्मस्ट्रांगस्याग्रहाद्वैज्ञानिकानां सेवा–मण्डलस्य नियन्त्रकसङ्घटनमतिरिक्तं १५ मिटनात्मकं समयं यावत्तौ चन्द्रतलेऽधिकं भ्रमणायानुमेने ।

तावेतौ द्वावपि च यात्रिणौ चन्द्रतले स्वपदानां तादृशानि चिह्नानि मुमुचतुर्यथा हलाकृष्टे भूक्षेत्रेऽङ्कितानि भवन्ति । तान्येतानि पदचिह्नानि परश्शतानि वर्षाणि यावदक्षुण्णान्येवमेव स्थास्यन्तीति विश्वासोऽस्ति ।

तावेतौ द्वौ चन्द्रयात्रिणौ दशलक्ष–डॉलरमुद्रामूल्यवतः साधनसम्भारां चन्द्रतले–एवापतत्यजतुः । यथानेकानि चित्रग्राहकाणि यन्त्राण्यने-

कान्यन्यान्युपकरणानि श्वासग्रहणमञ्जूषादयः। येन दूरदर्शन-चित्रग्राहकेण यन्त्रेण पृथिव्यां, चन्द्रतले विचरणस्य दृश्यानि दर्शितानि, तदपि तत्रैव परित्यक्तम्। एतेषां सम्भाराणां परित्यागो नन्वेतदर्थमपि चावश्यकोऽभूद्येन निवर्तनाय तत उड्डयनसमये नातिभारः स्यादिति।

चन्द्रयानस्य चन्द्रतलेऽवतरणं तत्र च तस्यैकवारं स्थिरतापादनादनन्तरं पुनरुड्डीय मूलयानेन सह संयोगः–एतत्सर्वमपि च कार्यं सर्वाधिकं भयप्रदं, शङ्कातङ्काकुलं कर्मासीत्। अपोलो–११ अन्तरिक्षयानस्य पूर्वाऽभिनयो यद्यपि चापोलो–१० संज्ञकेनान्तरिक्षयानेन कृतपूर्वोऽभूत् परन्तु तत्समये चन्द्रयानं तलमधि नावतीर्णमभूत्। एतावदेव किम्, पूर्वमतो नैवंविधं किमपि परीक्षणमक्रिपत यन्मानव–रहितं यानं चन्द्रतलध्युत्तारितं स्यात्तथा तत्पुनरुड्डीय मूलयानेन साकं संयुक्तं स्यादिति एवं प्रकारेणानेनापोलो–११ चन्द्रयानस्य सम्पूर्णे कार्यक्रमे सैषा विशिष्टतासीत्तथा ताविमावुभावपि साहसिकावन्तरिक्षयात्रिणौ, सत्स्वपि कतिपयेषु विघ्नबाधाकाठिन्येषु, महता साफल्येन–प्रयोगमिमं–सम्पादयामासतुः।

मानवश्चन्द्रतलस्य स्वल्पप्रमाणाया मृत्तिकायास्तथा च शिलाया वर्णिकानां मूल्य नन्वर्बुदाधिकानां डालरमुद्राणां धनराशिमितं व्येतु बाध्यो बभूव। परन्तु चन्द्रपर्यन्तमस्मिन्नभियानेऽमरीकारुषदेशौ या ह्युपलब्धी लेभाते, यानि चानुसन्धानानि चक्राते, न तत् साधारणं वस्तु। विज्ञानस्य, शिल्पतन्त्रस्य च क्षेत्रे या प्रगतिः संजातास्ते, तया सर्वसाधारणस्य मनुष्यस्य जीवनं निश्चयेनैव प्रभावितं स्यात्तथा तस्मा अधिकाः सुविधाः सुलभा भविष्यन्ति। अज्ञानस्यान्धविश्वासस्य च गुर्वी मोहान्धकारघटा विनङ्क्षयति तथा जनसाधारणेऽपि च वैज्ञानिक्याः स्फीतदृष्टेः प्रादुर्भावो भावी।

खगोलीयस्यानुसन्धानस्याग्रिमकेन्द्ररूपाच्चन्द्रमसो निश्चयेनैवापेक्षाकृतं ब्रह्माण्डस्याधिकतरं श्रेष्ठं ज्ञानं वृद्धिं नेतुं शक्येत।

इदानीं यावच्चन्द्रमसोऽग्रतनानां ग्रहाणां कक्षाणां प्राप्तेः समानवस्य प्रोड्डयनस्य न कापि च द्रढीयसी योजना निर्मितास्ते। परन्तु चन्द्रपर्यन्तं यात्राविधानस्य दिशि प्रयत्ना अनेके भवन्तो भविष्यन्ति। अथाधुनाऽपोलो–१२ इत्याख्यस्यान्तरिक्षयानस्योड्डयनाय योजना संसाध्यमानास्ते। वर्षस्यास्यान्तपर्यन्तं तस्योड्डयनं भावीति सम्भावना वर्वर्ति।

यस्मिन् समये वयं ता एताः पंक्तीर्लिखन्त आस्महे, तावत्पर्यन्तमपोलो–११ चन्द्रयानस्य यात्रिणः प्रशांतमहासागरे नावातरन्। प्रशांतमहासागरे गरुडापरनामकस्य यानशङ्कोः सकुशलमवतरणादनन्तरं चन्द्रतलादानीता वर्णिकाह्युस्टननामके वैज्ञानिके केन्द्रे प्रापयिष्यन्ते। तत्रेमा वर्णिका डा० एल्बर्ट ए० किंगमहाशयाय समर्पयिष्यन्ते। पृथिव्या वायुमण्डलस्य वर्णिकासु तासु कोऽपि च प्रभावो न पतेदनेनाभिप्रायेण ता वर्णिका–मञ्जूषा निर्वाते कक्षे समुद्घाटयिष्यन्ते। प्रायेण मासद्वयादनन्तरं यदा तदेतन्निश्चितं भावि, यत्ता एता वर्णिका हानिरहिताः सन्ति, तदा ताश्चत्वारिंशद्देशानां वैज्ञानिकेभ्यो वितरिष्यन्ते। ते च वैज्ञानिका विभिन्नानामनुसन्धानानां कृते तेष्वेतेषु, वर्णिकापदार्थेषु परीक्षणानि करिष्यन्ति।

चन्द्रपृथ्व्योर्विषये केचन निष्कर्षाः

- चन्द्रमसो व्यासः (३४७८ किलोमीटर) पृथिव्या व्यासापेक्षया प्रायेणैकश्चतुर्थांशो वर्तते।
- चन्द्रस्य गुरुत्वाकर्षणशक्तिः पृथिव्या गुरुत्वाकर्षणशक्तेः षड्भागतुल्यास्ते।
- अस्य चन्द्रस्य सर्वोऽपि च भारः पृथिव्या भारस्याष्टांशसमानोऽस्ति।

- चन्द्रमाः स्वधुरो भ्रमणमेकं २७ दिनेषु ७ घण्टासु तथा च ४३ मिनटेषु परिपूर्णं कुरुते। पृथिव्याः परिक्रमणेऽपि तस्य (चन्द्रस्य) प्रायेणै तावानेव समयो लगति। फलतश्चन्द्रमसः समस्तस्य धरातलस्यैकोनषष्ठ्यात्मकः प्रतिशतं भाग एव हि पृथिव्याः सम्मुखं तिष्ठति।

- चन्द्रमसो दिनमेकं पृथिव्याश्चतुर्दशदिनानां समान, तथैका रात्रिः पृथिव्याश्चतुर्दशरात्रीणां तुल्या भवतः।

- चन्द्रोऽण्डाकारायां कक्षायां पृथिव्याः परिक्रमणं विधत्ते। पृथिव्यास्तस्य निकटतमा दूरता ३५६५५० किलोमीटरप्रमाणा तथाधिकतमा च दूरता ४०६८६३ किलोमीटर प्रमाणा (२३९००० मीलमिता) मन्यते।

[मान्याः! विद्वांसः!! यद्यपि लेखोऽयं कालातीतः संवृत्तः, तथापि लेखकमहानुभावाभ्यामाचरितस्य श्रमस्य साफल्याय तथा चात्र गरुडयानस्य तस्य स्वरूपं वर्णितमस्तीत्येतदर्थञ्च पाठकमहानुभावा भवन्तो लेखस्यास्य प्रकाशनेन नाप्रसन्ना भविष्यन्तीति मम विश्वासः।

किञ्चैतत्सर्वमपि यज्जातमनुदिनञ्च यदस्ति जायमानं तत्सर्वमाश्चर्यकरमेव, नात्र सन्देहः। तथापि चन्द्रलोके मानवप्रवेशविषये नानाविधा विचाराः समुद्भवन्ति प्रायः सचेतासां चेतस्सु।

समाचारपत्रैः सर्वेषामपीदं विदितमस्ति यत् चन्द्रलोकयात्रिकैश्चन्द्रमण्डलं परितः परिभ्रमणं कृतमिति। तदा तैरिदमपि विज्ञातं स्याद् यच्चन्द्रमण्डस्य कश्चन भागः खण्डितोऽस्ति न वेति। यदि कोऽपि तन्मण्डलस्य भागो नास्ति खण्डितस्तदा प्रतिपदि चन्द्रमण्डलस्य रेखारूपेणैव कुतः साक्षात्कारो भवति? क्रमेण चाग्रे तिथ्यन्तरेषु चन्द्रमण्डलस्यार्धभागः कथं दृग्गोचरीभवति। तथा च पूर्णिमायां तिथौ निशि समग्रमपि चन्द्रमण्डलं दर्शकैः सर्वैरपि प्रत्यक्षीक्रियत एव। न चात्र भूच्छायासंक्रमोऽस्तीति वक्तुं शक्यते, ग्रहणवेलायामेव चन्द्रमसि भूच्छायासंक्रमो भवति, न तु यदा कदा सर्वदापीति विज्ञानां राद्धान्तात्। वस्तुतः चन्द्र इव चन्द्रलोकस्यास्ति त्रैविध्यं, आधिभौतिकाध्यात्मिकाधिदैविकभेदात्।

किञ्च गतेष्वेषु दिवसेषु यदा सम्मान्या **जगद्गुरवः पुरीस्थाः श्रीशङ्कराचार्यवर्या** जयपुरमिदमलंकृतवन्तः, तदा सोऽयं प्रसगस्तेषां पुरतोऽपि प्राचलत्, तदा तैः प्रतिपादितं यत् — चन्द्रलोकस्थितानां वस्तूनां परीक्षणस्य चर्चा तावदास्ताम्, प्रथमं सोऽयं विचारः कर्तव्यो भवति यद् भूमिस्थितैः पदार्थैः सह चन्द्रस्य कः सम्बन्धो विद्यते? यथा हि—यदा निशि चन्द्रः समुदेति तदा सरःसु कुमुदानां विकासो भवति, कमलानि च भवन्ति प्रायः संकुचितानि। एवमेव प्रतिमासं पूर्णिमायां रात्रौ चन्द्रोदयेन समुद्रे जलौघो वृद्धिमायाति-इति स्फुटमेव। भौतिकविज्ञानवादिभिर्विषयेऽस्मिन् नैव कृतो दृष्टिपातः इति।

वस्तुतः सोऽयं चन्द्रः स्वस्यामृतमयैः किरणैः किमुत चेतनवर्गमपि तु सकलमपि जडजातमपि नन्वाप्याययत्यनुदिनम्। तदेतच्च सर्वं चेतन एव चन्द्रः कर्तुं प्रभवति न जडस्वरूपः। अतो निश्चयेन चन्द्रोऽस्ति चेतन एवेति प्राचां भारतीयशास्त्रपरिशीलनकर्तॄणां विश्वासः। ते हि प्राचीना महर्षयः शास्त्रकाराः भूस्थिता अपि कस्यापि जीवस्य हिंसामकृत्वा तथैकस्य नवस्य पणस्यापि व्ययमकृत्वैव यत्तत्त्वं पुरा प्राप्तवन्तस्तदिदानीमनेककोटिमितस्य धनराशे व्ययं कृत्वापि भौतिकविज्ञानवादमनुशीलयन्तो नाप्तुं शक्नुवन्तीत्यलं पल्लवितेनेति—

—दीनानाथत्रिवेदी मधुपः]

राजस्थान आपको आमंत्रित करता है

आइये ! अपना उद्योग लगाइये

राजस्थान में विपुल आर्थिक साधन एवं स्वस्थ जन शक्ति उपलब्ध है। यह साधन आपको अपना उद्योग लगाने का अवसर प्रदान करते हैं।

राजस्थान आपको निम्न सुविधाएं प्रदान करती है :—

१. औद्योगिक क्षेत्रों में सस्ती दर पर भूमि।

२. औद्योगिक बस्ती में निर्मित ग्रेड तथा सस्ती दरों पर भू-खण्ड। साथ ही बिजली पानी, सड़कें बैंक इत्यादि की सुविधा।

३. सस्ते ब्याज एवं आसान किस्तों पर ऋण।

४. बड़े एवं मध्यम श्रेणी के उद्योगों को वित्तीय संस्थाओं द्वारा दिये जाने वाले ऋण पर गारन्टी।

५. उधार पट्टे पर मशीनें प्राप्त करने में सहायता।

६. सस्ती दरों पर विद्युत शक्ति तथा लघु उद्योगों द्वारा विद्युत शक्ति उपभोग पर वित्तीय अनुदान।

७. राजकीय जल प्रदाय योजना तथा सिंचाई परियोजना के द्वारा सस्ती दरों पर स्वच्छ पानी।

८. चुंगी कर, बिक्री कर तथा बिजली की ड्यूटी पर छूट।

९. उत्पादित माल की बिक्री में सहायता।

१०. कच्चे माल एवं मशीनरी प्राप्त करने में सहायता।

११. निःशुल्क सूचना सेवा एवं उचित मार्ग-दर्शन।

विस्तृत जानकारी के लिए कृपया निदेशक, उद्योग एवं नागरिक रसद विभाग, राजस्थान, जयपुर से सम्पर्क स्थापित करें।

❀ राजस्थान के औद्योगिकरण में भागीदार बनिये ❀

राजस्थान सरकार द्वारा प्रसारित।

अस्मदीयो नवराष्ट्रपतिः

ले० श्रीहरिश्चन्द्रशर्मा, साहित्याचार्यः, अलवरस्थः

इयं भारतभूः सदा महापुरुषाणाम्, मेधाविनाम्, विदुषाम्, नेतॄणाञ्च जन्मदात्री वर्तते। एतादृशेषु महापुरुषेष्वेवास्मदीयो नवो राष्ट्रपतिः विद्यते। अस्य च महाभागस्य पूर्णं नाम श्रीवराहगिरिः वेंकटगिरिरस्ति। अनेन महात्मनाधुनैवांतरात्मनः प्रेरणया राष्ट्रपतिनिर्वाचने विजयो लब्धः। येनास्य सर्वे विपक्षिणः चकितचकिताः भूत्वा पराभूतास्तिष्ठन्ति। एकतः राष्ट्रियमहासभायाः (कांग्रेसस्य) अधिकृतः प्रत्याशी श्रीनीलमसंजीवरेड्डीमहोदयः आसीत्, अपरत्र च स्वतंत्रः प्रत्याशी श्रीगिरिमहोदयः। एतस्मिन् महानिर्वाचने विजयश्रियायं वृतः, 'इति तु सर्वैरेवावगम्यते।

अस्य महापुरुषस्य जन्म १०–८–१८९४ दिने उडीसाप्रान्तस्य वरहामपुरग्रामे बभूव। तत्र चानेन कल्लिकोटाकालेजे स्नातकपरीक्षोत्तीर्णा। पुनश्च ऽबलिननगरे, आयरलैण्डराष्ट्रियविश्वविद्यालये व्यवहारशास्त्रं (वकालत) पठनाय गतवान्। तत्रैव चास्य महापुरुषस्य चेतसि श्रमिकान् प्रति सहानुभूतिपूर्णाः भावाः समुत्पन्नाः। अतः श्रमिकाणामुत्थानाय हिताय च भारतं आगत्य महापुरुषेणानेनानेकानि कार्याणि कृतानि।

सर्वप्रथमं यातायातश्रमिकसंघस्य स्थापना कृता। पुनश्चाखिलभारतीय-रेल्वेकर्मचारीसंघस्य सचिवपदं सप्तवर्षपर्यन्तं, अध्यक्षपदञ्चापि सप्ताब्दं यावदलं चकार। अस्मिन् समये यानि कार्याणि कृतानि, तैः कर्मभिः कर्मचारिणः महामानवस्य नाम सादरं स्मरन्ति।

ततश्च १९२७ तमे ख्रीष्टाब्दे जिनेवानगरेऽन्ताराष्ट्रियश्रमिकसंघटनसम्मेलने भारतस्य प्रतिनिधिरूपेण सम्मिलितो जातः। १९३१ तमे चाङ्गलवर्षे लन्दननगरे आयोजिते द्वितीयगोलमेजमहासभाधिवेशने भारतीयश्रमिकाणां प्रतिनिधित्वेन सम्मिलितः। १९३७ तमे वर्षे मद्रासविधानसभायाः सदस्यत्वेन निर्वाचितः मद्रासप्रान्तीयप्रथममंत्रिमण्डले १९३७–३९ पर्यन्तं श्रमोद्योगमन्त्रिपदं शोभयामास च। १९४६ तमे वर्षे पुनः विधानसभायाः सदस्यत्वेन निर्वाचितः। अब्दपर्यन्तञ्च मंत्रिपदं पुनरलञ्चकार। ततः १९४८–५० पर्यन्तं श्रीलंकादेशे उच्चायुक्तपदे आसीनः आसीत्।

१९५२ तमे वर्षे संसदः सदस्यो जातः। पश्चाच्च केन्द्रे मई '५२ तः' ५४ पर्यन्तं श्रममंत्रिपदस्य विभूषणं जातः। १९५४ तमेऽब्दे मंत्रिमण्डलात् त्यागपत्रं दत्तम्। १९३७ तमे वर्षे स्व० श्रीनेहरुमहोदयानां अध्यक्षत्वे राष्ट्रिययोजनासमितेः संयोजकोऽभवत्।

एतादृक्बुद्धिवैभवयुक्तो प्रतिभावानयं अष्टौ वर्षाणि यावत् राज्यपालपदं विभूषयामास। यदायं महाभागः उत्तरप्रदेशस्य राज्यपालः आसीत्, तस्मिन् समये विश्वविद्यालयकार्येषु बहुरुचि गृहीतवान्।

एकदा कस्मिंश्चित् विषये मुख्यमन्त्रिणा सह मतभेदः संजातः। अतः जनैरनुमितं श्रीगिरिमहोदयः त्यागपत्रं दास्यति। श्रीगिरिमहोदयेन एकः प्राध्यापकः विश्वविद्यालयस्य कार्यकारिण्याः सदस्यः नियुक्तः। अस्मिन् विषये विवादे जाते तेनोक्तम् "नाहं सुप्तः कार्यकरः सर्वकारस्य स्वाधिकारविषये जागरूकोऽस्मि"।

श्रीगिरिमहोदयः अनुशासनस्य दृढभक्तः अस्ति। नियमविरुद्धञ्च नाचरति। अन्या-

यांश्च न सहते स्म । स्वभावेन दयालुः हास्ययुक्तश्चास्ति । अंग्रेजशासनकालेऽपि श्रीगिरिः बहुलोकप्रियोऽभवत् । १९३७ तमे वर्षे मद्रासप्रान्ते बोवेलीनृपं, यश्च तत्समये मुख्यमन्त्री, मुख्योन्यायाधीशश्चासीत्, पराजित्य यशस्तेने । अयं महानुभावः क्रीडानुरागी चास्ति । टेनिस क्रीडायामस्य महती रुचिः वर्तते । अस्मिन् दिसम्बरमासे भारतेन क्रिकेटक्रीडायां विजयो लब्धः । तेन च प्रसन्नतापरिपूर्णेन चेतसा श्रीनवाबपटोदीमहोदयाय सर्वप्रथमं वर्धापनं प्रेषितम् । एतादृशैः गुणैः युक्तोऽयं महानुभावः उपराष्ट्रपतिपदेऽपि समासीनो जातः । तस्मिन् समयेऽपि अस्मै राजवैभवं न रोचते स्म । साधारणं जीवनं यापयति । अस्य महापुरुषस्य परिवारोऽपि महान् वर्तते । एकदा परिवारनियोजनस्योद्घाटनावसरेऽनेनोक्तम्, "अहमस्मि षोडशबालकबालिकानाम् जनकः, तदा कथ अस्याहं पक्षपाती स्याम् । अनेन सर्वे एव स्मेरमुखाः अभवन् ।

अस्य महाभागस्य जनकः जोगियापाततुलुः आसीत् । एतयोः पितापुत्रयोः मध्ये महान् स्नेहः आसीत् । द्वावेव मित्रवत् वसतः स्म । यैः जनैः एताववलोकितौ, ते कथयन्ति स्म "इद कठिनतरं कथनं वर्तते, पिता पुत्रे अधिकं स्निह्यतिस्म अथवा पुत्रः पितरि", यस्मिन् परिवारेऽनेन जनिः लेभे तस्मिन् परिवारे आतिथ्यसत्कारस्य पालनं अधिकं वर्तते स्म । उत्तरप्रदेशस्य राज्यपालकाले कश्चिज्जनः एषां समीपे समागतः । तदा तत्क्षणमेव च स्वागतसामग्री समायाता । तामवलोक्य स आश्चर्यचकितो भूत्वा चाकथयत्, "नाहं किमपि भक्षयितुमिच्छामि" । परन्तु श्रीगिरिमहोदयेनोक्तम् "आगतैः जनैः एषः दण्डस्तु ग्रहणीयः एव । अहमपि भवता सह चतुर्थवारं चायपानं करिष्यामि" ।

एकदा च श्रीनेहरूमहोदयेन सहास्य धावनप्रतियोगितापि जाता । तस्यां प्रतियोगितायामपि अयं एव महाभागः साफल्यमधिकृतवान् । श्रीगिरिमहोदयस्य भविष्यवाण्यः प्रायः सत्याः अभवन् । एतासु भविष्यवाणीषु मध्येऽस्य महापुरुषस्य इदानीन्तनो विजयसम्बन्धिनो अपि । अयं महापुरुषः मनस्वो अपि वर्तते । मनोबलस्य साहाय्येनैव अनेन राष्ट्रपतिपदमपि लब्धम् । पञ्चसप्ततितमेऽपि वर्षेऽस्य नैतिकं, चारित्रिकं, मनोबलं कस्मादपि युवकादन्यूनम् । येऽस्य विरोधिनः सन्ति । तान् प्रति उक्तवान्—"ये नराः मम वयः प्रति उपहसन्ति ते मम प्रत्यक्षमागत्य शक्तिपरीक्षणं कुर्वन्तु", अनेन महाभागेन अन्तःकरणस्य प्रेरणयैवास्मिन् जन्ये विजयोऽलंभि । महाभागस्यास्य वयं चिरायुषः सुस्वास्थ्यस्य च कामनां कुर्मः ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *
२३, सर फिरोजशाह मेहता रोड़,
बम्बई – १

पञ्चमजन्मशताब्दीमहोत्सवे श्रीगुरुनानकदेवमहोदयाय—

श्रद्धाञ्जलिः

प्रस्तुतकर्त्री—संस्कृतपरिषद्, चण्डीगढ़ः

महती प्रमोदावहेयं वार्ता यत्सम्प्रति श्रीगुरुनानकदेवमहाभागानां पञ्चमजन्मशताब्दीमहोत्सवो महता समारम्भेण सर्वत्र सम्पाद्यते। प्रकाशोत्सवस्य शुभावसरे श्रीगुरवे श्रद्धाञ्जलि प्रदातुकामा वयं संस्कृतज्ञाः श्रीगुरोः जपसंहितायाः (जपजी) स्वामिहरिप्रसादवैदिकमुनिकृतं भावानुवादं गायं गायं श्रद्धाञ्जलिः प्रस्तुमः। यतोहि अस्मिन् शुभावसरे गुरुवचनानां श्रवणं मननं तदनुकूलाचरणमेव श्रद्धाञ्जलिरिति—"एकः, ईश्वरः, सत् तस्य नाम, स सर्वकर्ता, सर्वत्रपूर्णः, निर्भयः, निर्वैरः, अकालमूर्तिः, अयोनिः, स्वयंभाः, तत्प्राप्त्युपायो गुरुप्रसादः।

देहशौचाद् भवेच्छौचं, शान्तिर्वा मौनसंश्रयात्।
न जातु मनसो नृणां, तृप्तिर्वा कामसंक्षयात् ॥ १ ॥
ईश्वरेच्छा ममेच्छेति, दृढं कृत्वा प्रवर्तते।
कार्ये कर्मणि यो नित्यं, स सर्वः सुखमश्नुते ॥ २ ॥
अहन्ता—ममते प्राहुः, कर्मसु कर्मयोगिनः।
मूले दुःखस्य सर्वस्य, तस्मादेते परित्यजेत् ॥ ३ ॥
प्राप्तं यत् तदुपासीत, नाप्राप्तं परिचिन्तयेत्।
आज्ञायां वर्तते सर्वं, बुद्ध्वा सत्याश्रयो भवेत् ॥ ४ ॥
अनन्ताः भुवनस्रष्टुः दीप्तिप्रभृतयो गुणाः।
गायं गायं परिश्रान्ताः, ऋषीणामखिलाः गणाः ॥ ५ ॥
दर्शं दर्शं गतो हर्षं दाति तेभ्यो ददौ विभुः।
सकुलं तेन ते तृप्ताः, जगुर्धन्यो महाप्रभुः ॥ ६ ॥
सत्यं नाम च रूपं च, स्वामिनस्तस्य विद्यते।
गातव्यं ब्राह्मवेलायाम्, अमृतत्वस्य सिद्धये ॥ ७ ॥
दुर्लभो मानुषो देहः, पुण्यपुञ्जैरवाप्यते।
म्रियतेऽविद्यया तत्र, विद्यया चामृतायते ॥ ८ ॥
नैकदेशी न वा कार्यः, स्वतः सिद्धो निरञ्जनः।
गुणानामाश्रयः श्रेष्ठः, सुखस्यैकपरायणः ॥ ९ ॥
ब्रह्माण्डं सकलं यस्य, देहो विश्वस्य साक्षिणः।
ये तं गायन्ति भावेन, ते सर्वेऽमृतभागिनः ॥ १० ॥
श्रवणं मननं नाम्नो विश्वयोर्नैर्दिवानिशम्।
यच्छतोऽनेकशः सिद्धीः, हर्षं चात्मसुखावहम् ॥ ११ ॥

ब्राह्मणाः क्षत्रियाः वैश्याः शूद्रा अन्त्यावसायिनः ।
श्रवणे मनने नाम्नः, तुल्याः सर्वेऽधिकारिणः ॥ १२ ॥

विश्वकर्ता महाशक्तिः समः सर्वत्र वर्तते ।
तस्य पुत्रेषु न्यूनोऽयं, वदितुं केन शक्यते ॥ १३ ॥

अनन्तो महिमा यस्य, स ईशः शुद्धबुद्धिभिः ।
प्राप्यते तेन कर्तव्या, बुद्धेः शुद्धिः सबुद्धिभिः ॥ १४ ॥

तीर्थं दानं तपो यज्ञः कर्म चान्यदनिन्दितम् ।
नित्यनैमित्तिकं सर्वं, बुद्धिशुद्धिकरं परम् ॥ १५ ॥

भक्ताः नानाविधाः प्रोक्ताः प्रशस्ता; कर्मवेदिनः ।
कर्मवेदिषु कर्त्तारः, कर्तृषु ब्रह्मवेदिनः ॥ १६ ॥

कर्ता च ब्रह्मवेत्ता च, कामसङ्कल्पवर्जितः ।
सुखदुःखसमो धीरः, स भक्तोऽनुपमो मतः ॥ १७ ॥

मुक्त्यै नो स्पृहयामि नाथ विभवैः कार्यं न सांसारिकैः,
किन्त्वायोज्य करौ पुनः पुनरिदं त्वामीश याचे हृदा ।

स्वप्ने जागरणे स्थितौ प्रचलने दुःखे सुखे मन्दिरे,
कान्तारे निशि वासरे च सततं भक्तिर्ममास्तु त्वयि ॥ १८ ॥

अनन्ता निधयो यस्यानन्ताः यस्य च दातयः ।
अनन्ताः याचकास्तेषाम्, अनन्ताश्च गृहीतयः ॥ १९ ॥

ब्रह्मोमेशरमेशवासवमुखाः देवाश्च देवद्विषः,
मर्त्याः वेदपुराणपाठनिरताः सिद्धास्तथा साधकाः ।
दृष्ट्वाऽमूल्यपदार्थभारबहुलान् ईशस्य देयांश्चक्रुः;
ख्यानोद्योगपराहतेन मनसाऽनन्तोऽसि हे सर्वसूः ॥ २० ॥

ब्रह्मा विष्णुर्महेशः सुरासुरपतयो मृत्युवातानलापः,
लोकाः ताराः दिनेशाः शशिगणसहिताः भूमयो भूधराश्च ।
वृक्षाः नद्यः समुद्राः जनिजनमुनयो रागिणीरागयुक्ताः,
गातारो यस्य गेहे स गुणगणनिधिः पातु वो विश्वकर्ता ॥ २१ ॥

सन्तोषो योगिनां मुद्रा, भूतिर्विद्या पराऽवरा ।
मण्डली सकला जातिः, पन्था आस्तिकता परा ॥ २२ ॥

जिते चित्ते जितं लोकं, मन्यन्ते कर्मयोगिनः ।
नमस्यन्ति च विश्वेशं, प्रातः सायं मनस्विनः ॥ २३ ॥

योगिनां ज्ञानभण्डारो दया भाण्डार नायिका ।
प्रार्थिनां लब्धकामानां हृषनादश्च - नादिका ॥ २४ ॥

ऋद्धयः सिद्धयः सर्वाः, अज्ञचित्तैकरञ्जिकाः ।
योगव्याघ्रैर्न काङ्क्ष्यन्ते केवलं मृगतृष्णिकाः ॥ २५ ॥

एको मायी विश्वकर्त्ता स्वयम्भूः, शिष्यातस्य ब्रह्मविष्णू महेशः ।
कार्यं स्वं स्वं सृष्टिरक्षे च भङ्गं काले काले कुर्वते तन्नियुक्ताः ॥ २६ ॥

यस्य ब्रह्मादयो देवाः, शश्वदाज्ञानुवर्तिनः ।
तमीशं वशिनं पूर्णं, प्रातः सायं प्रणोनुमः ॥ २७ ॥

कर्मणो धर्मलोकस्य, धरित्री वेदिरुच्यते ।
कार्यबुद्ध्या विधातव्यं, कर्म तत्रोपदिश्यते ॥ २८ ॥

कामबुद्ध्या नराः सर्वे, विविधं कर्म कुर्वते ।
इष्टानिष्टं फलं तेन, नित्यमेवोपभुञ्जते ॥ २९ ॥

विद्यया तत् प्रपद्यन्ते, यत्र कामाः परागताः ।
ज्ञेयाः ब्रह्मादयः सर्वे, ज्ञायन्ते देवनिर्मिताः ॥ ३० ॥

ज्ञानलोकः समाख्यातः, सैषा देवी सरस्वती ।
सदा यत्नेन संग्राह्या, श्रीदाऽनेककलावती ॥ ३१ ॥

नृणां कर्माश्रितो भागो, वर्णः शास्त्रेषु भाष्यते ।
तेषामेवायुषो भागः, आश्रमः परिभाष्यते ॥ ३२ ॥

ब्रह्मचर्यं च गार्हस्थ्यं, मुख्यमेवाश्रमद्वयम् ।
वर्णोऽपि च तथैवैकः, क्षत्रियो मतमुत्तमम् ॥ ३३ ॥

वर्णाः वाऽश्रमिणो वाऽपि, यज्ञकर्माधिकारिणः ।
ऐश्वर्येण विनाऽशक्ताः, भवन्त्वैश्वर्यशालिनः ॥ ३४ ॥

ऐश्वर्यं कर्मणो लोकः, इति वेदानुशासनम् ।
धर्मनीतियुतं तस्य, बलमेकं तु कारणम् ॥ ३५ ॥

असक्तः सर्वदैश्वर्ये पुत्रैर्दारैर्गृहैर्वृतः ।
रक्षाविस्तारयोस्तस्य, लग्नो ज्ञानेन संयुतः ॥ ३६ ॥

तुल्यो द्वन्द्वेषु सर्वेषु भक्त्या कर्मणि वर्तते ।
वर्तयन् निखिलान् लोकान्, सोऽमृतं पदमश्नुते ॥ ३७ ॥


INDIAN
POST OFFICE SAVINGS BANK
PASSBOOK

आधुनिक बनिए

सभी डाकघर
(चाहे वह बड़े हों या छोटे) आपको बचत खाते के लिए चैक की नयी से नयी सुविधायें प्रदान करते है।

अपना बचत खाता चैक से चलाइए

- चैक वाले खाते में जमा की कम से कम रकम सिर्फ १०० रुपया है।
- चैकों की संख्या पर कोई पाबन्दी नहीं है।
- स्थानीय चैकों पर कोई संग्रह-शुल्क नहीं लिया जाता।
- चैक के द्वारा रकम जमा की जा सकती है।


Post Office Savings Bank
13.8.69
Rs. 200/-

चैक से पैसे का
भुगतान आसान
और निरापद है।

आज ही डाकघर बचत बैंक में एक खाता खोल लीजिए

davp 69/236

राष्ट्रीय बचत संगठन

अथ श्रीशिवराज्योदये महाकाव्ये

४३ तमः सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः. डी लिट्, नागपुरम्

एवमौरङ्गजेबस्य त्रिपुरस्येव दुर्मतेः ।
समुद्रतटसंस्थां तां ददाह नगरीं शिवः ॥१॥

धनलक्ष्मीस्तु तत्रत्या कदर्यगृहकुण्ठिता ।
शिवसेनासहायेन दीनोद्धाराय निर्ययौ ॥२॥

सुवर्णमोहिनी लक्ष्मीरसौ वस्त्रावगुण्ठिता ।
शिवं तमनुगच्छन्ती सलज्जेव शिवा बभौ ॥३॥

स नगान्नगमाक्रामन् संभास्वद्रत्नसन्निधिः ।
ययौ तडित्वदारुढः पुरन्दर इवापरः ॥४॥

तं रिपुन्द्रममायान्तं रिपुलक्ष्मीपुरस्सरम् ।
प्रजाभ्यनन्दत् सानन्दं धनञ्जयमिवापरम् ॥५॥

स राज्यगढमागच्छन् मातृदर्शनलालसः ।
सुश्राव सहसा वाक्यं दूतोक्तं पविपातवत् ॥६॥

हा हा हन्त दिवं यातः स्वामिन् स्वामी महत्तरः ।
दुःखशोकार्णवे मग्ना जनता भग्ननौरिव ॥७॥

वृत्तान्तमग्रे स प्राह विलपन् बाष्पगद्गदम् ।
तुल्यावस्थं शिवं पश्यन्नस्तंगतजयोन्मुदम् ॥८॥

मृगयारसिकः स्वामिन् प्रकृत्यैव स ते गुरुः ।
स्वच्छन्दं मृगयारण्यं ययावल्पपरिच्छदः ॥९॥

अनुधावन् प्रवेगेन वध्यवेध्यं तुरङ्गमः ।
दृढगुल्ममहाजालबद्धपादोऽपतद् भुवि ॥१०॥

पृष्ठाधिरूढो हा हन्त हन्त हन्त स विक्रमी ।
प्रपतन् भुवि कायेन दिवि प्राणैस्तु निर्ययौ ॥११॥

वैमात्रेयेण ते स्वामिन् सपद्यभ्यागतेन च ।
एकोजिना हि धर्मोक्ता अन्त्या विदधिरे क्रियाः १२

इति वार्ताहरे तस्मिन् भाषमाणे सगद्गदम् ।
आजग्मुरपरे केचिद् बाष्पाविललिलेचनाः ॥१३॥

ते पादयोर्निपत्योचुराक्रोशन्तो मुहुर्मुहुः ।
वर्धयन्तो महाशोकं शिवस्य पितृमृत्युजम् ॥१४॥

देव! त्रायस्व नः सर्वानधुना दीनबान्धवान् ।
पतिव्रता जिजा देवी सतीधर्मं चिकीर्षति ॥१५॥

इत्याकर्ण्यैव तद्वाक्यं शिवाजिर्मातृभक्तिमान् ।
दीप्तस्फुलिङ्गसंस्पर्शं कर्णयोरन्वभूदसौ ॥१६॥

संवर्तानिलनिष्कम्पकुलाचल इवाचलः ।
विचचाल तदा चित्ते शिवो धीरधुरन्धरः ॥१७॥

यो गोवर्धनवद् राष्ट्रं लीलयोच्चैरधारयत् ।
स नात्मानं समुद्धर्तुमशक्नोच्छोकविह्वलः ॥१८॥

वज्राघातपतद्वीररघुसन्निभमाकुलम् ।
शिवं समन्ततः सर्वे बान्धवाः समधारयन् ॥१९॥

विभ्रान्तो गुरुशोकेन स विपर्यस्तकुन्तलः ।
धरातलमवासीनो नभस्तलमुदैक्षत ॥२०॥

तन्नेत्रयुगलं तस्य सदा दीप्तानलप्रभम् ।
सविलन्नलोचनैर्लोकैरलोकि जलपूरितम् ॥२१॥

हा मातरिति चाक्रन्दो मूर्च्छयन् वृक्षवल्लरीः ।
बालस्य शम्भुराजस्य शुश्रुवे सहसा मुहुः ॥२२॥

तेनोद्भिन्नमहाशोकसमाधिरचिरादसौ ।
आक्रन्दाभिमुखं वेगादगादत्यन्तविह्वलः ॥२३॥

निसर्गधीरगमनोऽप्यसौ भूयः परिस्खलन् ।
जगाम सदनं मातुः शोकपूरातिपूरितम् ॥२४॥

दृक् तस्य मातृभक्तस्य ह्यनन्यालोकनोत्सुका ।
शोकार्तजनसम्मर्दे जिजामेकामलोकयत् ॥२५॥

वीक्षिता जननी तेन सद्यः स्नानार्द्रकुन्तला ।
कुसुम्भ्रबभ्रुवसना सर्वसौभाग्यमण्डना ॥२६॥

परीताऽपि हि पर्यश्रुलोचनैः पारिवारिकैः ।
अनश्रुलोचना वह्निप्रवेशे कृतनिश्चया ॥२७॥

निरुध्यमाना शिशुना क्रन्दता मुहुरुच्चकैः ।
पुरस्तथापि गच्छन्ती च्छिन्नवात्सल्यबन्धना ॥२८॥

भर्तृचिन्तननिर्मग्नसर्वज्ञानेन्द्रियक्रिया ।
अनीक्षमाणा चात्मानमात्मजं पुरतः स्थितम् ॥२९

कार्याकार्यविमूढोऽसौ सुप्रत्युत्पन्नधीरपि ।
पपात पदयोर्मातुः शोकविध्वस्तचेतनः ॥३०॥

प्रवृद्धवाष्पसंरुद्धकण्ठः सोऽवददस्फुटम् ।
विनिवर्तयितुं घोरान्मातरं वज्रनिश्चयात् ॥३१॥

देवभूयं गते तातेऽध्यवसायस्तवोचितः ।
विनोभाभ्यां युवाभ्यां तु मया किं नु विधीयताम् ॥

त्वदाशीर्वचनैरेव मयि शक्तिरवर्धत ।
तैर्विनाऽतः परं मातः कुतः शक्तिः कुतो जयः ॥३३॥

वीरकर्माणि सर्वाणि त्वदादेशेन चक्रिरे ।
किं न तस्तव सन्तोषो यन्मां त्यक्तुं त्वमुद्यता ॥

साधीयसी त्वं साधुभ्यो गुरुभ्यश्च गरीयसी ।
अपि स्वर्गाच्च मोक्षाच्च मातस्त्वं श्रेयसी मम ॥३५॥

नवोदितस्वराज्यस्य त्वं हि मङ्गलदेवता ।
स्वराज्यमन्दिरे ह्यस्मिन् किं नु पूज्यं त्वया विना ॥

इत्थमार्तस्वरं दूने शिवे सम्प्रार्थनापरे ।
तथैवानूचुरन्येऽपि व्याकुलाः पारिवारिकाः ॥३७॥

शृण्वती चापि सा तस्थौ चिरमामीलितेक्षणा ।
मौनमुद्रामपुञ्चन्ती चिन्तयन्ती व्रतोचितम् ॥३८॥

वैधव्यजीवनं नूनं तुषज्वलनसेवनम् ।
इति मत्वाऽत्यजद्वह्निप्रवेशे सा स्वनिश्चयम् ॥३९॥

विश्वश्रेष्ठस्य पुत्रस्यानुरोधात् त्यक्तनिश्चयाम् ।
निन्युरन्तर्जिजादेवीं महिला महितव्रताम् ॥४०॥

कृतस्नानां परित्यक्त-सर्वसौभाग्यमण्डनाम् ।
तामवन्दन्त सर्वेऽपि पुण्यमूर्तिं महासतीम् ॥४१॥

शिवोऽपि विहितस्नानः परीतः खिन्नबान्धवैः ।
तस्थौ नितान्तगम्भीरो घनीभूत इवार्णवः ॥४२॥

वैदुष्यं गुणगृह्यत्वं शूरत्वं नीतिकौशलम् ।
स्मारं स्मारं पितुर्भूयः स नितान्तमदूयत ॥४३॥

स उवाच सुहृद्वर्यं समदुःखं स्वपार्श्वगम् ।
पितुरात्मनि वात्सल्यं संस्मरन् परमोत्कटम् ॥४४

हतो मयाऽफझुल्लोऽसौ यदा दुर्दान्तविक्रमः ।
तातेनात्यन्ततुष्टेन विक्रमो मेऽभिनन्दितः ॥४५॥

यदा मयातिधैर्येण शास्ताखानः स शासितः ।
तातेनात्यन्ततुष्टेन धीरता मे प्रशंसिता ॥४६॥

दुर्गमा दुर्जया दुर्गा जिताः शत्रोर्यदा यदा ।
तातेनात्यन्ततुष्टेन विजयो मेऽभिनन्दितः ॥४७॥

यद् यत् किञ्चित् मया कर्म कृतमत्यन्तदुष्करम् ।
तातेनात्यन्तनुष्टेन तत् तद्भूरि प्रशंसितम् ॥४८

जीवानामसहायानामापत्तापनिवारणम् ।
पितृरूपं कृपाच्छत्रं नूनं भगवता कृतम् ॥४९॥

पितृदेवकृपाच्छत्रं यस्य मूर्ध्नि विराजते ।
स हि च्छत्रपतिर्नूनं नाभिषिक्तो महीपतिः ॥५०॥

सत्पुत्राणां महाकर्म परिक्लेशव्यथाभुजाम् ।
मातुः पितुश्च सन्तोषः परमं पारितोषिकम् ॥५१

अतः परं करिष्यामि महाकार्याणि यान्यपि ।
निष्फलानीव तानि स्युः सन्तोषेण विना पितुः ॥

जीवितं धारयन्तीं तां मातरं ह्यात्मनः कृते ।
दर्शं दर्शं शिवो धीरः स्थिरसत्त्व इवाभवत् ॥५३॥

धर्माधिकारिवचनैर्हि दिवङ्गतस्य
शान्त्यै पितुः स्वविभवोचितवित्तजातम् ।
श्रद्धाभयेन मनसा द्विजसाच्चकार
वेदोक्तधर्मविधिनिष्ठमतिः शिवाजिः ॥५४॥

इति श्रीशिवराज्योदये महाकाव्ये शहाजिनिधनं
नाम ४३ तमः सर्गः समाप्तः ।

अथ दशमोऽध्यायः

ऋषिरुवाच ॥१॥	ऋषि बोले ॥१॥
निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ।	प्राणप्रिय लघुभ्राता मृत देख निशुम्भ को ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥२॥	तथा सेना मरी देख क्रुद्ध हो शुम्भ ने कहा ॥१॥
बलावलेपदुष्टे ? त्वं मा दुर्गे गर्वमावह ।	बलाहंकार से दुष्टे न गर्व कर चण्डिके ।
अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥३॥	दूसरों के सहारे ही लडती मान धारती ॥३॥
देव्युवाच ॥४॥	देवी बोली ॥४॥
एकैवाहं जगत्यत्र द्वितीया का ममापरा ।	एक ही हूँ जगत्में मैं दूसरी और कोन है ? ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥५॥	देख दुष्ट मुझी में ये घुसे मेरी विभूतियाँ ॥५॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।	तभी लीन हुईं सारी ब्रह्माणी आदि देवियाँ ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥६॥	शरीर में अम्बिका के एक ही अम्बिका रही ॥६॥
देव्युवाच ॥७॥	देवी बोली ॥७॥
अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ।	मेरी विभूति से मैं थी बहुरूप लिए यहाँ ।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥८॥	समेटा वह मैं एक ही हूँ तू उठ युद्ध में ॥८॥
ऋषिरुवाच ॥९॥	ऋषि बोले ॥९॥
ततः प्रववृते युद्धं देव्या शुंभस्य चोभयोः ।	तब युद्धारंभ हुवा देवी का और शुम्भ का ।
पश्यतां सवदेवानामसुराणां च दारुणम् ॥१०॥	देवों के और दैत्यों के देखते अति दारुण ॥१०॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।	बाणों की उग्र वर्षा से तेज शस्त्रास्त्र संघ से ।
तयोर्युद्धमभूद् भूयः सर्वलोकभयङ्करम् ॥११॥	इनका युद्ध था भारी भयदायी त्रिलोक में ॥११॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।	दिव्यास्त्र सैंकड़ों छोड़े अम्बिका ने. उन्हे वहीं ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥१२॥	दैत्येन्द्र ने काट दिया पत्यस्त्रों के प्रयोग से ॥१२॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।	शुंभ से मुक्त दिव्यास्त्र थे उन्हे परमेश्वरी ।
बभञ्ज लीलयैवोग्रहूंकारोच्चारणादिभिः ॥१३॥	लीला से ही काटती थी उग्र हूंकार आदि से ॥१३
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।	शुम्भने छादिये देवी पर सायक सैंकडों ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥१४॥	देवी ने निजबाणोंसे काटा धनुष दैत्यका ॥१४॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।	चापके कटजाने से दैत्यने शक्ति हाथ ली ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥१५	देवी ने चक्रसे काटी उसे दैत्यकरस्थ ही ॥१५॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।	तब खड्ग लिया ढाल शतचन्द्रप्रकाशवान् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥१६॥	देवीके संमुख हुआ वह दैत्येन्द्र भूमिप ! ॥१६॥

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥१७॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा त्रिसारथिः ।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥१८॥
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्यवत्तां मुष्टिमुद्यम्य वेगवान् ॥१९॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥२०॥
तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥२१॥
उत्पत्य च प्रगृह्योच्चै र्देवीं गगनमास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥२२॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥२३॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥२४॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥२५॥
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥२६॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥२७
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नृप ! ॥२८॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥२९॥
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥३०॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥३१॥
जज्वलुश्चाग्नयः शान्ताः शान्तदिग्जनितस्वनाः ॥
श्री दुर्गासप्तशत्यां दशमोध्यायः पूर्णः ।

आते ही उसका खड्ग देवीने स्वशरौघसे ।
काट डाला ढाल कोभी जो था उज्ज्वल सूर्यसा १७
हताश्व होगया दैत्य गिरा धनुष सारथि ।
घोर मुद्गर ले आया अम्बिकामारणोद्यमी ॥१८॥
देवीने तेज बाणोंसे छेदा मुद्गर दैत्यका ।
फिरभी वह दौडा ही उठाये मुष्टि वेगसे ॥१९॥
मारी मुष्टिक अम्बाके वक्षपै दैत्यराजने ।
देवीने उसको ताडा उरमें तलघातसे ॥२०॥
तलघाताहत हुवा भूमिपै आगिरा वहीं ।
सहसा ही दैत्यराज फिर वैसे खडा हुवा ॥२१॥
ऊंचा उछल देवीको उठा गगनमें चढा ।
वहां भी जा निराधार चण्डिका उससे लडी ॥२२॥
आकाशमें किया युद्ध चण्डिका दैत्यने मिथः ।
अपूर्व था वह मुनि-सिद्ध विस्मयकार था ॥२३॥
अम्बिकाने किया युद्ध बहुकाल सुरारिसे ।
उछालके घुमा खूब पृथ्वी पर गिरा दिया ॥२४॥
गिरा वह महीपै आ उठाए मुष्टि वेगसे ।
दुरात्मा दौडता आया चण्डो का बध चाहता ॥५२॥
चण्डिकाने पास आते उस दैत्यजनेश को ।
शूलसे उरमें बींध भूमीपर गिरा दिया ॥२६॥
देवी शूलाहतहुवा वह निष्प्राण हो गिरा ।
हिलाता भूमिको सिन्धु द्वीप पवतसयुत ॥२७॥
दुष्टके हत होनेसे प्रसन्न सब होगये ।
जगतस्वस्थ हुवा और नभ निर्मल होगया ॥२८॥
उल्काओं के साथ उग्रमेघ थे शान्त होगये ।
उसे गिरा, देख हुई नदियां मार्गवाहिनी ॥२९॥
हर्षपूर्णमना सारे हुए देव समूह भी ।
उसे गिरे देख, गाया गन्धर्वों ने मनोज्ञ ही ॥३०॥
बजाए बाद्य औरोंने नाची देववराङ्गना ।
पवित्र मारुत वहे हुवा सुप्रभ सूर्य भी ॥३१॥
अग्नियां शान्त जलती शान्त दिक् स्वनवान थीं ॥
श्री हरिशास्त्रिविरचित हिन्दी दुर्गापाठ में
१० वां अध्याय पूर्ण हुआ ।

ALWAYS INSIST ON

BOWREAH FABRICS

SPECIALITIES:

2 x 2 Plain & Fancy Rubia Full Voil, Wash & Wear H. T. Rubia & 2 x 2 Poplin, Dyed & Printed S. F. Lawn & Cambric, Fine Printed & Dyed Poplin, Fancy Doria, Deep Shade Poplin, Cord Coating Shirtings etc.

ALSO

Sized Beams & Hosiery Yarn

●

Manufactured by—

BOWREAH COTTON MILLS CO., LTD.

21, STAND ROAD,
CALCUTTA 1.

Phone – 22–9601 (6 lines) *Tele :* BOWREAH

विवेकानन्द स्मृति-ग्रन्थ

मुख्य विषय :

विश्व के सांस्कृतिक एवम् वैचारिक प्रगति-क्रम में युगों से भारत का योगदान

अतिरिक्त भागों के विषय :

१. स्वामी विवेकानन्द—जीवन और कार्य
२. विवेकानन्द शिला स्मारक की निर्माणगाथा

विवेकानन्द शिला स्मारक के **उद्घाटन** अवसर पर

सितम्बर १९७० में प्रकाशित

इतिहासज्ञ **डॉ. रमेशचंद्र मजुमदार** की
प्रस्तावना एवम्
देश विदेश के सुविख्यात
विद्वानों के लेखों से समृद्ध

संपादक : **डॉ. लोकेशचंद्र**

पृष्ठसंख्या	८००	....	आकार ९" × १२"
चित्रपृष्ठ	१००	....	(बहुरंगी १०)
मूल्य रु.	१२५/-	....	(प्रेषणादि व्यय सहित)
भाषा	....	....	अंग्रेजी

प्रकाशनपूर्व मूल्य रु. १००/- (जनवरी ३१, १९७० तक जमा करने पर)

● बैंक चेक और ड्राफ्ट्, 'विवेकानन्द कॉमेमोरेशन वाल्यूम' के नाम से लिखकर निम्न पते पर प्रेषित करें।

पता : Organising Secretary
Vivekananda Commemoration Volume
12, Pillaiyar Koil Street,
Triplicane, Madras-5

श्रीदीनानाथत्रिवेदी मधुपः, सहसम्पादकः

कालीदासजयन्तीसमारोहः

गतदिवसेषु राजस्थान-विश्वविद्यालयीय-संस्कृतपरिषदा डा० श्रीजी. सी. पाण्डेमहोदयस्याध्यक्षतायां महाकविकालिदासस्य जयन्त्युत्सवः समायोज्यत । तत्र डा० श्रीटी. जी. मैनकरमहोदयेन कालिदासस्य काव्येषु वैशिष्ट्यमांग्लभाषायां प्रतिपादितम् । इदमप्येकं वैशिष्ट्यमेव यत् सस्कृतकवेर्यशोगानमांग्लभाषायां, तथांग्लकवेश्च गुणगानं संस्कृते भवेदिति ।

ततः डा० श्रीसत्यव्रतसिहमहोदयः समभाषत यत् कालिदासस्य रचनासु यादृशं सौकुमार्यं प्राप्यते तादृशं नान्यत्र । तथा वैदेशिका अपि कालिदासस्य गुणगौरवं मुक्तकण्ठं गायन्तीति ।

मध्ये च तत्र एम. ए. कक्षायाश्छात्रा श्रीसन्तोषगोठवालमहोदया मेघदूतस्य पद्यानि सुमधुरस्वरेणागायत् । श्रोतॄणां मनांसि च कामं प्रासीदन् । तथा श्रीवसन्तजेटलीमहोदयेन चैकाकिनैव शाकुन्तलनाटके स्थितमंशद्वयमधिकृत्य दुष्यन्तविदूषकयोरुभयोरपि मिथः सम्पन्नस्य वार्तालापस्य यथार्थरूपेण यः शोभनोऽभिनयोऽक्रियत, तत्र स्थितैः सर्वैरपि सभासद्भिर्विद्वद्भिर्मध्ये मध्ये करलध्वनिभिरसकृत् स प्रशंसितोऽभूत् ।

ततः श्रीगंगाधरद्विवेदमहोदयेन च भाषितं यत् कालिदासस्य नाटकेषु काव्येषु गीतिकाव्येषु यद् वैलक्षण्यमुपलभ्यते, न तथांग्लकवीनां रचनास्विति । अवसरे चात्र राजस्थानकालेजस्य, महाराजसंस्कृतकालेजस्य, एवं महाराणीकालेजस्य चापि विद्वांसः समुपस्थिता आसन् । अन्ते च डा० श्रीपाण्डेमहानुभावस्याध्यक्षीयभाषणेनास्य समारोहस्य समापनमजायत ।

पञ्चदिवसीयः सत्सङ्गः

इह हि जयपुरनगरे गतदिवसेषु अनन्तविभूषितानां श्रीनिम्बार्काचार्यपीठाधीश्वराणां **श्रीराधासर्वेश्वरदेवाचार्य-श्रीश्रीजीमहाराजाना**माध्यक्ष्ये श्रीनिम्बार्कसत्सङ्गमण्डलेनायोजितः पञ्चदिवसीयः सोऽयं सत्सङ्गः साधु समपद्यत । तत्र श्रीसर्वेश्वरस्य प्रभोः नित्यार्चनमभिषेकस्तथा प्रवचन-भजन-कीर्तनात्मकः कार्यक्रमः प्राचलत् । तथान्ते च श्रीश्रीजीमहाराजेभ्यः सादरमभिनन्दनपत्रमर्पितमभूदिति ।

राजस्थान-संस्कृतशिक्षा-निदेशकः

श्री के० कृष्णमाधवकृष्णशर्मा स्वर्गतः

महतो दुःखस्य वार्तेयं वर्तते यद् दिसम्बरमासस्यास्य १४ तारिकायां रात्रौ श्रीके० माधवकृष्णशर्ममहोदयः ५७ वर्षात्मके वयसि वर्तमानः सहसैव परलोकपथिकः संवृत्तः । यद्यपि श्रीशर्ममहोदयस्य विगतेषु पञ्चसु दिवसेषु नासीत्स्वास्थ्यं समीचीनं, तथापि प्राणप्रयाणकालात्प्राक् स हि महानुभावः स्वस्थः सन्नन्तिके समागतैः सज्जनैः सह प्रसन्नेन चेतसा वार्तालापं कुर्वाणोऽवर्ततेति तदानीं तदन्तिकमुपगत्यागता जना भणन्ति । एतावता स शुभकर्मा महापुरुष एवासीदिति निश्चयेन वक्तुं शक्यते । तथा चोक्तमस्ति —

अनायासेन मरणं विनादैन्येन जीवनम् ।
अव्यर्थं वचनं यस्य धन्यं कस्यापि जीवनम् ॥

स्व० श्री के० माधवकृष्णशर्ममहोदयस्य जन्म १९१२ ईशवीयेब्दे मार्चमासस्य २९ तारिकायां केरलराज्यान्तर्गते कान्हनगढनाम्नि स्थाने समभूत् । १९३३ ई० वत्सरे च श्रीशर्ममहोदयेन व्याकरणशिरोमणिपरीक्षोत्तीर्णा तथा इन्डो-यूरोपियन-तुलनात्मक-भाषा-परीक्षायाञ्च सर्वप्रथमं स्थानं लब्धम् ।

किञ्च मद्रास-ओरियन्टल-कांफ्रेंसपुरष्कारेण च श्रीशर्ममहोदयः पुरस्कृतः समभूत् । एव १९४० ईशवीयेऽब्दे च मास्टर आफ ओरियन्टलर्लागनोपाधिः महानुभावेन तेन सम्प्राप्त आसीत् । एतदनिरिक्तञ्च बोकानेरस्थेऽनूपशोधपुस्तकालये च कार्यं कुर्वाणेन श्रीशममहोदयेन राजस्थानस्यानेकासां दुर्लभानां प्राचीनतमानां पाण्डुलिपीनां सम्पादनमक्रियत । तथा च वेद-पुराण-दर्शनेतिहास-साहित्यधर्मशास्त्रादिविषयेषु ग्रन्थानामनेकेषां सम्पादनं शोधकार्यं तथा पाण्डुलिपीनां प्रकाशनञ्चाक्रियत, अनुमानतः ५ पञ्चसहस्रसंख्यामितानां पाण्डुलिपीनां परीक्षणञ्च कृतं श्रीशर्ममहोदयेन ।

अपि च स हि शर्ममहोदयो यथा शास्त्रान्तरेषु प्रगाढो विद्वान् अभूत, तथैव ज्यौतिषेऽपि मर्मज्ञो विद्वान् समासींत् । अत एव देशस्यानेके महान्तो महान्तो जनाः समये-समये समागत्य श्रीशर्ममहोदयं स्व-स्वग्रहाणां शुभाशुभफलानि पृष्ट्वा सन्तोषमावहन्ति स्मेति स्फुटमेवेदं तत्परिचितानां जनानाम् । अत एवैतदपि जनैरुच्यते यत् श्रीशर्ममहोदयः स हि पूर्वत एव स्वमृत्युकालमपि व्यजानात् । अत एव डाक्तरेणात्यर्थं प्रेरितोऽपि स महानुभास्तद्दिने चिकित्सालयं नैव गतवानिति ।

एवमेव श्रीशर्ममहानुभावः स पाणिनीयव्याकरणस्यापि महानुद्भटो विद्वान् आसीदिह तु नास्ति मनागपि सन्देहः । इदानीं श्रीशर्ममहोदयस्य परिवारे तदीया धर्मपत्नी, पुत्री चैका, पुत्राश्च त्रयो विद्यन्ते ।

किञ्च विगतेभ्यः कतिपयवर्षेभ्यो राजस्थानसंस्कृतशिक्षाविभागे निदेशकपदमलङ्कुर्वाणः सोऽयं श्रीशर्ममहोदयः राजस्थान-संस्कृतशिक्षायाः प्रसारात्मके कर्मणि सुमहत्त्वपूर्णं योगमदात् । एवञ्च श्रीशर्ममहानुभावेनाचरिता सेयं संस्कृन-सेवा चिरकालं स्मरणपथमायास्यति ।

अतश्चतुर्दशभाषाप्रवीणस्यास्य महापण्डितस्य सहसा देवलोकयानेन भारतीपरिवारः सोऽयं सुमहद् दुःखमनुभवन् दिवं गतात्मने श्रीशर्ममहानुभावाय हृदयेन श्रद्धाञ्जलिमपयन् परमात्मानं प्रार्थयते यत् स स्वर्गगताय तस्मै शाश्वत्तिकीं शान्ति तथा तत्परिपाराय चासह्यमिदं दुःखं सोढुं शक्तिञ्च दद्यादिति शम् ।

निर्वैरः सरलश्च यो
विविधवाक्पाण्डित्यपूर्णस्तथा,
प्रोद्धाराय च संस्कृतस्य,
कृतवान् कार्याण्यनेकान्यपि ।
नानाग्रन्थसुलेखनेऽतिकुशलः
साधुस्वभावश्च यः
श्री के० माधवकृष्णशर्मविबुधो
हा हन्त स स्वर्गतः ॥

श्रद्धाञ्जलयः

सुप्रसिद्धपण्डितप्रवर-श्री के० माधवकृष्णशर्ममहोदयानामाकस्मिकं निधनमुपश्रुत्यापारं दुःखमनुभवता कालेजीयपरिवारेणात्र महाराजसंस्कृन-कालेजेऽध्यक्ष-श्रीगोविन्दनारायणशर्मनैयायिकानां साभापत्ये शोकसभा समायोजयत ।

तत्र श्रीशर्ममहोदयानां पाण्डित्यस्य तथा साधुत्वस्य संस्कृतसेवायाश्च कामं प्रशंसाक्रियत। तथैकः शोकप्रस्तावश्चापठ्यत। अन्ते च कालेजीयैः पण्डितैश्छात्रैः कर्मचारिभिश्च सर्वैरपि सम्भूय 'जगन्नायकः स परमेश्वरो दिवं गतात्मने सुखं शान्तिञ्च दद्यात्' इति प्रार्थयमानैः सादरं श्रद्धाञ्जलयः समर्प्यन्तेति।

शोकप्रस्तावः

संस्कृतसंसारस्य प्रख्यातपण्डितस्य तथा राजस्थानसंस्कृतशिक्षानिदेशक-श्री के० माधवकृष्णशर्मण आकस्मिकं निधनमुद्दिश्य व्यावरस्थ-श्रीसनातनधर्मप्रकाशक-संस्कृतमहाविद्यालयस्य परिवारो हार्दिकं शोकं तथा तदीयसन्तप्तपरिवारं प्रति सम्वेदनाञ्च प्रकटयन् श्रीपरमात्मानं प्रार्थयते यत् स दिवंगतात्मने परमां शान्तिं दद्यादिति प्रधानाचार्यः शोकप्रस्तावेनानेन सूचयतीति।



गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

[illegible]

'गाय' छाप

भारती के कतिपय प्रकाशन

१. अम्बिकासूक्तम्	मूल्यं २.५०
२. गल्पकल्पलतिका (बालोपयोगिनी)	१.५०
३. सरलसंस्कृतशिक्षणोपायः (बालोपयोगी)	१.५०
४. गोलनवांकुरः	१.२५
५. चित्रद्वारा संस्कृतशिक्षा (बालोपयोगिनी)	१.५०
६. सुवर्णलक्ष्मीनक्षत्रमाला	०.५०
७. आयुर्वेदविशेषांकः	५.००
८. आरोग्यांकविशेषांकः	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक
भारती संस्कृत मासिक

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

नायन्मारालवाराश्च तिरुवल्लुवरस्तथा ।
वितरन्तु सदैवैते दैवीं मे गुणसम्पदम् ॥

नायन्मारः—तमिलनाड्प्रदेशे शैवसम्प्रदायप्रवर्तकाः धर्मपुरुषाः नायन्मार इति माम्ना प्रख्याता सन्ति । द्वितीयशताब्दीतः समारभ्य नवमशताब्दीपर्यन्तम् त्रिषष्टिसंख्यकाः नायन्माराः बभूवुः । एतेषु अप्परः, मणिवक्-वाचकरः सुन्दररमहोदयः ज्ञानसम्बन्धरश्च चत्वारो महापुरुषाः विशेषेण प्रसिद्धाः सन्ति ।

अप्परस्य पिता शूद्रजातीय आसीत्, पूर्वं तेन जैनमतं स्वीकृतम् तदनन्तरं च सः शिवभक्तो बभूव । मणिक्क-वाचकरः चतुर्थ्यां शताव्द्यां संजातः । मदुरायाः पाण्ड्यराजस्य अरिदमनस्य सः प्रधानमन्त्री आसीत्, किन्तु शिवभक्तिरसे मत्तो भूत्वा तत्पदं तेन परित्यक्तम् । सुन्दररमहोदयो ब्राह्मणकुले संजातोऽभूत् । तेन भगवतः शङ्करस्य प्रत्यक्षं साक्षात्कारः कृतः । ज्ञानसम्बन्धरस्योदयो सप्तम्यां शताब्द्यां बभूव । बाल्यकाले तेन शिवभक्तियुतं काव्यं रचितम् । तस्य वैदुष्येण मदुरायाः पाण्ड्यनृपतेः जैनसाम्प्रदायिकाः सभापण्डिताः विवादमध्ये पराभूता अभूवन् । तदनन्तरं पाण्ड्यनरेशेन शैवसम्प्रदायस्य दीक्षा गृहीता ।

'तेवरम्' नामके काव्यसंग्रहे एतेषां चतुर्णां शैवसम्प्रदायप्रवर्तकानां काव्यानि संगृहीतानि सन्ति । इदं काव्यं तमिलनाड़प्रदेशे अत्यन्तं लोकप्रियं प्रमाणभूत च वर्तते । द्वादश्यां शताब्द्यां मेयकण्डदेवनामकेन शैवाचार्येण 'शिवज्ञान-

नायन्मारः—तमिलनाड़ प्रदेश में शैव सप्रदाय के प्रवर्तक धर्मपुरुष नायनमार इस नाम से प्रख्यात हैं । दूसरी शताब्दी पर्यन्त ६३ संख्या में नायन्मार हुए थे । इनमें अप्पर, मणिक्कवाचकर, सुन्दरर, ज्ञानसम्बन्धर ये चार महापुरुष विशेष रूप से प्रसिद्ध हैं ।

अप्पर के पिता शूद्रजाति के थे । पहले उनने जैनमत स्वीकार किया था । तत्पश्चात् वे शिवभक्त हुए । मणिक्कवाचकर चौथी शताब्दी में हुए । मदुरा के पाण्ड्य राजा अरिदमन के वे प्रधान मन्त्री थे । किन्तु शिवभक्ति के रस में मत्त होकर वह स्थान उन्होंने त्याग दिया । सुन्दरर ब्राह्मण कुल में उत्पन्न हुए थे । उन्होंने भगवान् शंकर का प्रत्यक्ष साक्षात्कार किया था । ज्ञानसम्बन्धर का उदय सातवीं शताब्दी में हुवा था । बाल्यकाल में उनने शिवभक्तियुक्त काव्य रचा था । उनके वैदुष्य से मदुरा के पाण्ड्य राजा के जैन मतवादी सभापण्डित विवाद में पराभूत हुए थे । तदनन्तर पाण्ड्य राजा ने शैव सम्प्रदाय की दीक्षा ग्रहण की थी ।

'तेवरम्' नामके काव्य संग्रह में इन चारों शैव सम्प्रदाय के प्रवर्तकों के काव्य संगृहीत हैं । यह काव्य तमिलनाड़ प्रदेश में अत्यन्त लोकप्रिय और प्रमाणभूत है । बारहवीं शताब्दी में मेयकण्डदेव नामके शैवाचार्य ने 'शिवज्ञानबोध-

बोधनम्' इति ग्रन्थं विलिख्य शैवसिद्धान्तस्य दार्शिनकं स्वरूपं प्रस्थापितम् । ख्रिष्टाब्दस्य प्रारम्भिकीषु पञ्चशताब्दीषु अस्माक देशस्य दक्षिणे भागे बौद्धमतस्य जैनमतस्य च प्रभाव आसीत् । नायन्माराणां शैवसम्प्रदायस्य प्रचारकार्येण तयोः बौद्धजैनमतयोः प्रभावस्य समाप्तिः तथा शैवसम्प्रदायस्य विस्तारश्च बभूव । दक्षिणाञ्चले अवस्थितेषु अनेकेषु शिवमन्दिरेषु तेषां च गोपुरेषु च नायन्मारसन्तानां मूर्तय उपलब्धाः सन्ति, भावुकाः शिवभक्ताश्च ताः समर्चन्ति ।

आलवारः—तमिलनाड़प्रदेशे द्वे परम्परे विद्येते । एका परम्परा आचार्याणां अनुगामिनी, द्वितीया च आलवारनामकानां वैष्णवसन्तानां अनुगामिनी चास्ति । आलवारशब्दस्य शाब्दिकोर्थोऽस्ति "परमात्मनः भक्तौ निमग्नो भक्तः । मध्ययुगे पोडगई, भूतत्तारः पेई, तिरुमलिसै, नम्मः, मधुरकविः, कुलशेखरः, आंडालः, पेरी, तोंडर डिप्पोडी, तिरुप्पाणः, तिरमगई इति नामकाश्च द्वादशसंख्यकाः आलवारसाधवः (भक्ताः) संजाताः । एतेषु नम्मालवारस्य व्यक्तित्वं अधिकं महत्त्पूर्णं गण्यते । 'प्रबन्धम्' नामके तमिलग्रन्थे एतेषां द्वादशसन्तानां गीतसंग्रहाः उपलब्धाः सन्ति । तमिलप्रदेशस्य वैष्णवसम्प्रदाये 'प्रबन्धम्' ग्रन्थस्य महत्त्वं श्रीमद्भगवद्गीतायाः समकक्षं मन्यन्ते । आलवाराणां विचारधारानुसारेण जातिवर्णादिभेदभावानां तत्र किमपि स्थानं नास्ति । श्रीरामानुजाचार्यस्य प्रपत्तिवादस्य (सम्पूर्णशरणागतिः) मूलं आलवाराणां विचारधारायां मिलति । एषु द्वादशालवारसन्तेषु सर्वे विभिन्नजातीयाः आसन् । 'आंडाल' इत्येषा एका साध्वी महिलाऽऽसीत् । दक्षिणभारते श्रीरङ्गमित्यादिषुप्रमुखदेवालयेषु एतेषां सन्तानां मूर्तयः उपलब्धाः सन्ति ।

नम्' यह ग्रन्थ लिखकर शैव सिद्धान्त का दार्शनिक स्वरूप प्रस्थापित किया । ईस्वीय सन् के प्रारम्भ की पांच शताब्दियों में हमारे देश के दक्षिण भाग में बौद्ध और जैन मत का प्रभाव था । नायन्मारों के शैव सम्प्रदाय के प्रचारकार्य से उन बौद्ध जैन मतों की प्रभाव समाप्ति और शैव सम्प्रदाय का विस्तार हुवा । दक्षिणाञ्चल में अवस्थित अनेक शिवमन्दिरों में और उनके गोपुरों में नायनमार सन्तों की मूर्तियां उपलब्ध हैं जिनकी भावुक शिवभक्त पूजा करते हैं ।

आलवारः—तमिलनाड़प्रदेश में दो परम्पराएं विद्यमान हैं । एक परम्परा आचार्यों का अनुगमन करने वाली और दूसरी आलवर नामक वैष्णव सन्तों का अनुगमन करने वाली हैं । आलवार शब्द का शब्दार्थ है 'परमात्मा की भक्ति में निमग्न भक्त' । मध्ययुग में पोडगई, भूतत्तार, पेई, तिरुमलिसै, नम्म, मधुरकवि, कुलशेखर, आंडाल, पेरी, तोडरडिप्पोडी तिरुप्पाण और तिरुमगई इस नामके द्वादश सख्या में आलवार सन्त हुए हैं । इनमें नम्मालवार का व्यक्तित्व अधिक महत्वपूर्ण गिना जाता है । 'प्रबन्धम्' नामके तमिलग्रन्थ में इन द्वादश सन्तों के गीतसंग्रह उपलब्ध हैं । तमिल प्रदेश के वैष्णव सम्प्रदाय में 'प्रबन्धम्' ग्रन्थ का महत्त्व श्रीमद्भगवद्गीता के समकक्ष मानते हैं । आलवरों की विचारधारा के अनुसार जाति वर्णादि के भेदभावों का वहां कोई स्थान नहीं है । श्रीरामानुजाचार्य का प्रपत्तिवाद (सम्पूर्ण शरणागति) मूल आलवारों को विचारधांरा में मिलता है । इन बारह आलवार सन्तों में सारे विभिन्न जाति के थे । 'आंडाल' यह एक साध्वी महिला थी । दक्षिण भारत में 'श्रीरङ्गम्' इत्यादि प्रमुख देवालयों में इन सन्तों की मूर्तियां उपलब्ध हैं ।

तिरुवल्लुवार:— अस्याविर्भावकाल: ख्रिष्टाब्दात् एकशताब्द्या: पूर्वमासीत्। तिरुवल्लुवारस्य पारिवारिकजीवनस्य विषये किमपि वृत्तम् नोपलब्धम्। स तन्तुकारस्य व्यवसायं करोति स्म। जनान् सन्मार्गे आनेतुं पुण्यकार्यकरणे स सदैव तत्पर: आसीत्। 'तिरुक्कुरल' नामके ग्रन्थे १३३० सुभाषितानां संग्रहो विद्यते। एलेलशिंगलनामकेन अस्य एकेन शिष्येण अयं काव्यग्रन्थों मदुरायाः एकोनचत्वारिंशत्संख्यकानां विद्वज्जनानां सम्मुखे अस्य परीक्षार्थं उपस्थापित: आसीत्। अस्मिन् ग्रन्थे सम्पूर्णस्य मानवजीवनस्य प्रकाशनं कृतम्। 'तमिलभाषायां एतादृश अत्युत्तमो ग्रन्थो अद्यावधि न कुत्रापि प्रकाशित:' इत्यासीत् तेषां विद्वज्जनानां अस्य अद्ग्रन्थस्य विषयेऽभिमतमासीत्। धमार्थकामनामेषां त्रयाणां पुरुषार्थानां ज्ञानमस्मिन् प्राचीनग्रन्थे परिपूर्णमस्ति।

अस्मिन् श्लोके प्राचीनानां मध्ययुगीनानां च सन्तानां भक्तानाञ्च नामावलि: समाप्ता भवति। अत: अन्तिमे पादे प्रार्थितम् यत् एते सर्वे महापुरुषा: अस्मभ्यं दैवीं गुणसम्पदं प्रयच्छन्तु इति।

तिरुवल्लुवार:—इनका आविर्भावकला ईस्वीय सम्बत् के एक शताब्दी पूर्व था। तिरुवल्लुवार के पारिवारिक जीवन के विषय में कुछ भी वृत्त उपलब्ध नहीं है। वे तन्तुकार का व्यवसाय करते थे। मनुष्यों को सन्मार्ग में लाने का पुण्य कर्म करने में वे सदैव तत्पर थे। 'तिरुक्कुरल' नामके ग्रन्थ में १३३० सुभाषितों का संग्रह है। एलेलशिंगन नामके इनके एक शिष्य ने इस काव्य ग्रन्थ को मदुरा के ३९ विद्वानों के सम्मुख इसकी परीक्षा के लिए प्रस्तुत किया था। इस ग्रन्थ में सम्पूर्ण मानव जीवन को प्रकाशित किया गया है। 'तमिलभाषा का ऐसा अत्युत्तम ग्रन्थ आज तक कहीं से भी प्रकाशित नहीं हुवा' यह उन विद्वानों का इस सद्ग्रन्थ के विषय में अभिमत था। धर्म, अर्थ, काम इन तीनों पुरुषार्थों का इस प्राचीन ग्रन्थ में परिपूर्ण ज्ञान है।

इस श्लोक में प्राचीन और मध्ययुगीन सन्तों और भक्तों की नामावलि समाप्त होती है। अत: अन्तिम पद में प्रार्थना की गई है कि ये सब महापुरुष हमें दैवी गुणसम्पदा देवें।



श्रीवासुदेवाष्टकम्

श्रीअक्षयकुमारशर्मा विद्यार्थी, किश्तवाड़ः. (काश्मीरराज्यम्)

वनमालिकया गलशिखिपिच्छविनिर्मितमौलिधरम् ।
सुतनुं, तनुपीतपटैर्लसितं प्रणमामि सदा वसुदेवसुतम् ॥१॥

नृपनन्दगृहे सह गोपसुतैर्नवनीतविमिश्रितभोज्यभुजम् ।
परमेश्वरमाद्यमनन्तमजं प्रणमामि सदा वसुदेवसुतम् ॥२॥

यमुनातटकुञ्जकुटीरतले वृषभानुजया सह केलिपरम् ।
ललिताकृतिमूर्जितशक्तिमयं प्रणमामि सदा वसुदेवसुतम् ॥३॥

अतिसुन्दरवेणुनिनादकरं मुनिचित्तविमोहनरासरतम् ।
धृतगोदुह्बालकवेशवरं प्रणमामि सदा वसुदेवसुतम् ॥४॥

सुरनायकदर्पविनाशकृते निजकीयकरे गिरिराजधरम् ।
पशुपालजनार्तिहरं वरदं प्रणमामि सदा वसुदेवसुतम् ॥५॥

शिशुपालरिपुं पशुपालविभुं क्षितिपालपतिं सुविशालमतिम् ।
नृपधर्मरतं शुभकर्मकृतं प्रणमामि सदा वसुदेवसुतम् ॥६॥

बहुकष्टगतां द्रुपदस्य सुतां नृपसंसदि रक्षति यो भगवान् ।
शिरसा मनसा वचसा तमहं प्रणमामि सदा वसुदेवसुतम् ॥७॥

स्वजनानवलोक्य तु युद्धभुवि गुरुमोहगतार्जुनमोहहृतम् ।
भयवारकगोतवदं सुखदं प्रणमामि सदा वसुदेवसुतम् ॥८॥

इदमष्टकमक्षयलोकपतेर्वसुदेवसुतस्य तु यः प्रपठेत् ।
स नरः कृपया कमलाधिपतेर्लभते सुमतिं सुकृतिं सुगतिम् ॥९॥

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

सूक्ति-सुधा

आसनमुद्दिश्य

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

आस्यते स्थीयते येन
यस्मिन्वा सुचिरं स्थिरम् ।
सुखं, तदेव विद्वद्भि-
रुक्तमासनमुत्तमम् ॥१॥

आसनं मन्त्रतन्त्राणां
योगस्यापि च सिद्धये ।
प्रथमं साधनं प्रोक्तं,
यद्विना सिद्ध्यसंभवः ॥२॥

तस्मादासनसिद्ध्यर्थं
प्रयतते पुरा बुधः ।
यस्मिन् सिद्धे शीघ्रमेव
मन्त्रो योगश्च सिद्ध्यति ॥३

आसनानि महासिद्धै-
र्बहुधा उदितानि च ।
तत्र हि स्वस्ति-सिद्धाख्ये
स्वासने समुदीरिते ॥४॥

अन्यानि पद्मवीरादी-
न्यासनानि च योगिभिः ।
योगशास्त्रेषु तन्त्रेषु
वर्णितानि सुविस्तरात ॥५

ततस्ततोऽवधार्य्याणि
प्रमुखे तूदिते मया ।

जिससे या जिसमें चिरकालतक सुख से स्थिर होकर बैठा जाय वही उत्तम आसन विद्वानों ने कहा है ॥१॥

आसनसिद्धि को मन्त्र तन्त्र और योग-साधन में प्रथम साधन बताया है जिसके बिना कोई सिद्धि असंभव है ॥२॥

इस कारण आसन की सिद्धि के लिए विद्वान् को पहले प्रयत्न करना चाहिए। जिस आसन के सिद्ध हो जाने पर मन्त्र और योग शीघ्र हो सिद्ध हो जाते हैं ॥३॥

यद्यपि मन्त्र तन्त्र और योगशास्त्रों में बहुत प्रकार के आसन कहे हैं उनमें स्वस्तिक और सिद्धासन सब में श्रेष्ठ और सुगम कहे हैं ॥४॥

और और पद्मासन वीरासन वज्रासन आदि आसन योगियों ने योगशास्त्र में और मन्त्र तन्त्र शास्त्रों में बहुत विस्तार से बताये हैं ॥५॥

वे वहीं से देखकर स्वीकार करें, सर्व प्रमुख और सुगम तो दो आसन मैंने बता दिये हैं।

प्रकाशकः—जयबहादुरसिंह पता: भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष: ७५४९६
राधेश्याम शर्मा द्वारा श्री [illegible] प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित । फोनः ६३१५९

भारती

संस्कृत-मासपत्त्रिकायाः

lib 12 9/4

श्री बद्रीनाथः
श्रीद्वारका
जगन्नाथः
रामेश्वरः

श्रीघुश्मेश्वरज्योतिर्लिङ्गम्



इत्युक्त्वा च शिवस्तत्र लिंगरूपोऽभवत्तदा ।
घुश्मेशो नाम विख्यातः सरश्चैव शिवालयम् ॥
घुश्मेशाख्यमिदं लिंगमित्थं जातं मुनीश्वराः ।
तद् दृष्ट्वा पूजयित्वा हि सुखं संवर्द्धते सदा ॥
(शि० पु० को० रु० सं० ३३/५०, ५४)

२७
४

फरवरी
१९७७

वार्षिकमूल्यम् दश मुद्राः १०.००
एकप्रतेः—एकं रूप्यकम् १.००

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आंध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र०सं०	विषयाः	निबन्धारः	पृष्ठ संख्या
१.	मङ्गलम्	दीनानाथत्रिवेदी मधुपः, सम्पादकः	९९
२.	मासावतरणम्	,, ,, ,,	९९
३.	वेदानां महत्त्वम्	विद्वद्वर-श्रीसुरजनदासस्वामिमहाभागा जयपुरम्	१००
४.	भारताभिवादनम्	कविः श्रीजयेशः पुसद्	१०४
५.	श्रीशङ्कराचार्य्योपरि आक्षेपः	श्रीदीनानाथशास्त्री सारस्वतः, दिल्ली	१०५
६.	घुश्मेशं तु शिवालये	डा० श्रीनन्दकिशोरगौतमः, जयपुरम्	१०७
७.	कुम्भयोगस्यैतिहासिकं पौराणिकञ्च स्वरूपम्	श्रीगोविन्दसुवेदी, काशीस्थः	१११
८.	रत्नाकरो महाकुम्भः	श्रीउमाशङ्करशुक्लः आजमगढ़ः	११५
९.	विश्वसमाचाराः	श्रीकलानाथशास्त्री; जयपुरम्	११९
१०.	सम्पादकीयम्	दीनानाथत्रिवेदी मधुपः सम्पादकः	१२०
११.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, माण्डलगढः	१२२
१२.	सौन्दर्य-गीतम्	श्रीइन्द्रमोहनसिंहः	१२३
१३.	हिन्दीपद्यानुवादः	अनु० श्रीसत्यनारायणशर्मा, कोटा	१२५
१४.	सूक्ति-सुधा	दीनानाथत्रिवेदी मधुपः, जयपुरम्	१२८

सम्पादकः
दीनानाथत्रिवेदी मधुपः
साहित्यालङ्कारः
सहसम्पादकः
रामगोपालशास्त्री
जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
व्यवस्थापकः
राधेश्यामशर्मा
श्री शङ्कर आर्ट प्रिण्टर्स
त्रिपोलिया बाजार,
जयपुरम्-२

वर्षम् २७ | माघः, विक्रमाब्दः २०३३ [फरवरी, १९७७] | अङ्कः ४

मङ्गलम्

दीनानाथत्रिवेदी मधुपः, सम्पादकः

संसारदावानलतः सदा यः,
भक्तान्निजान् पाति नतान् क्षणेन ।
सुरासुरैर्वन्दितपादपद्म !
गोविन्द ! दामोदर ! ते नमोऽस्तु ॥

◆ ◆ ◆

मासावतरणम्

कायेन वाचा मनसा कृतस्य ।
पापस्य नाशाय च सत्यलोक–
प्राप्त्यै प्रकार्यं तिलपात्रदानम्,(१)
इत्यादिशन्नागत एष माघः ॥

---

(१) माघे तिलपात्रदानस्य विषये यथाचोक्त धर्मशास्त्रे—
ताम्रपात्रे तिलान् कृत्वा पलषोडशनिर्मिते ।
सहिरण्यं स्वशक्त्या वा विप्राय प्रतिदापयेत् ॥

◆ ◆ ◆

वेदानां महत्त्वम्

विद्वद्वर—श्रीसुरजनदासस्वामिमहाभागाः, जयपुरम्

पूर्वाऽनुवृत्तम्—

'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चेति (छा० उ० ७ । १ । २) 'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणः' (मु० १ । १ । ५) 'ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः' (बृ० उ० १ । १ । २) 'अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (बृ० उ० ४ । ४ । १०) 'ऋग्यजुसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादाः' (तृ० ता० उ० १ । १ । २) इत्यादिश्रुतिवचनैरथर्वणोऽपि वेदत्वस्य स्पष्टं सिद्धेः । अस्ति चाथर्ववेदस्य यज्ञनिष्पत्त्यर्थमावश्यकताऽपि । तथा हि यज्ञस्य द्वौ पक्षौ वाक् च मनश्च । तयोरन्यतरो वाक्पक्षस्त्रय्या विद्यया होत्रादिभिस्त्रिभिः ऋत्विग्भिः संस्क्रियते द्वितीयश्च मनःपक्षो ब्रह्मणाऽथर्वाङ्गिरोभिः संस्क्रियते । अत एवोक्तं गोपथे— 'प्रजापतिर्यज्ञमतनुत । स ऋचैव हौत्रमकरोत्, यजुषाऽऽध्वर्यवं, साम्ना औद्गात्रम्, अथर्वाङ्गिरोभिर्ब्रह्मत्वम्' इति प्रक्रम्य 'स वा यत्र त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः संस्क्रियते । मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति' (गो० ब्रा० ३ । २) इति । ऐतरेयब्राह्मणोऽपि 'अयं वै यज्ञो योऽयं पवते । तस्य वाक् च मनश्च वर्तन्यौ । वाचा च हि मनसा च यज्ञोऽवर्तत । इयं वै वाक् । अदो मनः । तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति । मनसैव ब्रह्मा (अपरं पक्षं) संस्करोति । (ऐ० ब्रा० ५ । ३३) इति श्रुत्या एकस्यैव पक्षस्य त्रयीसंस्कार्यत्वमुक्तम्, अपरस्य तु ब्रह्मसंस्कार्यत्वमेव प्रतिपादितम् । ब्रह्मा चाथर्वाङ्गिरोविदेव भवति । अत एव गोपथे 'ऋग्विदमेव होतारं वृणीष्व यजुर्वेदमध्वर्युम्, सामविदमुद्गातारम्, अथर्वाङ्गिरोविदं ब्रह्माणम् । तथा हास्य यज्ञश्चतुष्पात् प्रतितिष्ठति' (गोपथ २ । २४) इति श्रुतौ ब्रह्मणोऽथर्वाङ्गिरोवित्त्वमुक्तम् । उपपद्यते चैतदेव । तथाहि—आग्नेयसौम्यभेदेन वेदो द्विविधः । तत्र ऋग्यजुःसामानि आग्नेयवेदः, अथर्वाङ्गिरसां वेदश्च सौम्यवेदः । यज्ञस्य च वाङ्मनसरूपपक्षद्वये वाचः संस्कार ऋगादिवेदत्रय्या । 'तस्य वा एतस्याग्नेर्वागेवोपनिषत्' (शत० ब्रा० १० । ३ । ५ । १) इति शतपथश्रुत्या । 'अग्निर्वाग् भूत्वा मुखं प्राविशत् (ऐ० उ० २ । ४) इत्यैतरेयोपनिषच्छ्रुत्या च वाचः अग्निरूपत्वेन साजात्यात् अग्निरूपायाः वाचः संस्कारः आग्नेय्या वेदत्रय्या जायते । यतो हि एक एवाग्निर्घनतरलविरलभेदैः त्रिधा विभक्तः सन् अग्निवाय्वादित्यशब्दैर्व्यपदिश्यते । एवमग्नेस्त्रैविध्यात् त्रिविधेनाग्निना उत्पादितस्य आग्नेयवेदस्यापि त्रैविध्यं स्वतः

सिद्धम् । अत एव मनुना—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥
(मनु० १ । २३)

इत्युक्तम् । शतपथेऽपि 'सा वा एषा वाक् त्रेधा विहिता ऋचो यजूंषि सामानि तेनाग्निस्त्रिधा विहितः' (शत० १० । ३ । ५ । २) एभिस्त्रिभिरपि वेदैरग्निरूपाया वाच एव संस्कारः संभवति नान्यस्य सौम्यस्य मनसः । मनसस्तु अथर्वाङ्गिरोभिरेव संस्कारः संभवति । तथा हि—'चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' (ऐ० उ० २ । ४) 'चन्द्रमा वै मनः' इत्यादिश्रुतिभिर्मनसः सौम्यत्वम् । अथर्ववेदस्यापि 'अन्तरा हि भृग्वङ्गिरसो वेदानुदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते । सोमात्मको ह्ययं वेदः' (गोपथ ब्रा० ५ । ७) । ऋचामग्निर्दैवतं पृथिवी स्थानम् । यजुषां वायुर्दैवतमन्तरिक्षं स्थानम् । साम्नामादित्यो दैवतं द्यौः स्थानम् । अथर्वणां चन्द्रमा दैवतमापः स्थानम्' (गो० ब्रा० १ । २९) इति गोपथश्रुत्या अस्ति सौम्यत्वम् । अतः सौम्यस्य मनसः संस्कारः साजात्यात् सौम्यवेदेनाथर्वणैव संभवति । अत एव मनः संस्कारकस्य ब्रह्मणोऽथर्वाङ्गिरोवित्त्वं प्रतिपादितम् 'अथर्वाङ्गिरोविदं ब्रह्माणम्' (गो० ब्रा० २ । २४) इति गोपथश्रुत्या । न हि—अथर्वाङ्गिरसां ज्ञानमन्तरा मनसः संस्कार उपपद्यते ।

उपर्युक्तानि त्रय्या एव वेदत्वबोधकानि श्रुतिवचनानि तु आग्नेयवेदपराणीति न कोऽपि विरोधः । सूर्यस्याग्नित्वेन आग्नेयस्य च वेदस्य त्रिविधत्वेन सैषा त्रय्येव विद्या तपति 'वेदैरशून्यस्त्रिभिरेति सूर्यः (तै० ब्रा० ३ । १२ । ९ । ११) 'ऋग्भिः पूर्वाह्णे' (तै० ब्रा० ३ । १२ । ९ । १) इत्यादिश्रुतीनामपि स्वरसतः समन्वयः संगच्छते । अत एव त्रय्या विद्यया त्रिविष्टपादिप्राप्तिं अथर्वाङ्गिरोरूपब्रह्मवेदेन च ब्रह्मलोकप्राप्तिमुपदिशन्ती श्रुतिः स्पष्टमेव त्रयी विद्याभिन्नमथर्वाङ्गिरसां वेदं समाचष्टेः—

'त्रिविष्टपं त्रिदिवं नाकमुत्तमं तमेतया
त्रय्या विद्ययैति ।
अत उत्तरे ब्रह्मलोका महान्तोऽथर्वणा-
मङ्गिरसां च सा गतिः ॥
(गो० पू० ५ । १०)

अयं च वेदः अथर्ववेदः, ब्रह्मवेदः, अङ्गिरो वेदः अथर्वाङ्गिरसां वेदः भृग्वङ्गिरोवेदः इत्यादिसंज्ञाभिर्व्यपदिश्यते तत्र तत्र । 'तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः सन्तप्तेभ्यो यान् मन्त्रानपश्यन्स आथर्वणो वेदोऽभवत्' (गो० ब्रा० १ । १ । ५) इति 'भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः येऽङ्गिरसः स रसः'। येऽथर्वाणस्तद् भेषजम्' (गो० ब्रा० १ । ३४) इति 'चन्द्रेण देवेन दिशां, लोकेन लोकानां, ब्रह्मवेदेन वेदानां, तेन त्वा शमयाम्यसौ स्वाहा (शा० गृ० सू० १ । १६ । ३) इति, 'ऋग्वेद एव भर्गो यजुर्वेद एव महः सामवेद एव यशो ब्रह्मवेद एव सर्वम्' (गो० ब्रा० ५ । १५) इति, तद् यथा—'चत्वारो

वा इमे वेदाः ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति' (गो० ब्रा० १ । २ । १६) इति, एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (शत० ब्रा० १४ । ४ । १०) इति, 'यस्माद् ऋचोऽपातक्षन् यजु र्यस्मादपाकषन् । सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम् । स्कम्भं तं ब्रूहि कतमः स्विदेव सः । (अथर्व० १० । ७ । २०) इति, 'तस्य यजुरेव शिरः, ऋग्दक्षिणः पक्षः, सामोत्तरः पक्षः, आदेश आत्मा, अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा' (तैं० उ० ब्रा० ३ अनु०) इति च ।

उपर्युक्ताभिर्ब्रह्मवेदादिसंज्ञाभिरथर्ववेदो व्यपदिश्यते इत्यस्योपपत्तिस्तु निम्नाङ्किता ।

तथाहि स्वयम्भूर्वै प्रजापतिः वाक्प्राणोभयात्मकस्य वाय्वाकाशोभयात्मकस्य वा यजुषः वाग्रूपेण जूभागेन अप उत्पाद्य 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः ऋग्यजुःसाममय्या त्रय्या विद्यया सहासु अप्सु प्रविष्टो भवति । तदुक्तं शतपथे षष्ठे काण्डे सोऽयं पुरुषः प्रजापतिरकामयत—भूयान्त्स्यां प्रजायेयेति । सोऽश्राम्यत्, स तपोऽतप्यत, स श्रान्तस्तेपानो ब्रह्मैव प्रथममसृज्यत त्रयीमेव विद्याम् । सैवास्या प्रतिष्ठाऽभवत् । तस्मादाहुः—ब्रह्मास्य सर्वस्य प्रतिष्ठेति । तस्मादनूच्य प्रतितिष्ठति । प्रतिष्ठा हैषा यद् ब्रह्म । तस्यां प्रतिष्ठायां प्रतितिष्ठतोऽतप्यत । सोऽपोऽसृजत वाच एव लोकात् । वागेवास्य साऽसृजत । सेदं सर्वमाप्नोत् यदिदं किञ्च । यदाप्नोत् तस्मादापः, यदवृणोत् तस्माद्वाः । सोऽकामयत—आभ्योऽद्भ्योऽधिप्रजायेयेति । सोऽनया त्रय्या विद्यया सहापः प्राविशत्" (शत० ६ । १ । १ । ८-१०) एता एवापः परमे स्थाने (सूर्यादप्युपरितने स्थाने) तिष्ठन्तीति व्युत्पत्त्या पारमेष्ठ्य उच्यन्ते । तदुक्तं शतपथे एकादशे काण्डे—'आपो वा इदं सर्वम्, ता यत् परमे स्थाने तिष्ठन्ति, योहीहाभिरवनेदप एवाभिविन्देत् । परमाद्वा एतत्स्थानाद् वर्षति यद्दिवस्तस्मात् परमेष्ठी नाम (शत० ११ । १ । ६ । १६)

अत एव कौषीतकिब्राह्मणेऽप्युक्तम्—'अस्ति वै चतुर्थो देवलोक आपः । ता यत् परमे स्थाने तिष्ठन्ति तस्मात् पारमेष्ठ्य उच्यन्ते " (कौ० १८ । २) अप्तत्वमेवेदमहृदयत्वादशरीरत्वाच्च ऋतमुच्यते । तदुक्तम्—

ऋतमेव परमेष्ठि ऋतं नात्येति
किञ्चन ।
ऋते भूमिरियं श्रिता ऋते समुद्र
आहितः ॥ इति
(तै० ब्रा० काण्ड)

स एष आपोमयः परमेष्ठी स्नेहतेजोगुणकः । तत्र स्नेहप्रधानं तत्त्वं भृगुः, तेजःप्रधानं तत्त्वं चाङ्गिराः । उभयोः समन्वितावस्था चाऽऽपः । आसु अप्सु प्रविष्टः ऋग्यजुःसाममयः स्वयम्भूर्ब्रह्मा । स च तत्राप्सु प्रविश्य ता अपः समतपत् । ताभ्यः सन्तप्ताभ्योऽद्भ्यः तापपरिपाकाद् भृगोरुत्पत्तिरभवत् । तदुक्तं

गोपथश्रुतौ अथेतरा पेयाः स्वांद्वचः शान्ताः (आपः) तत्रैवाश्राम्यत् अभ्यपतत्, समतपत् । ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः सन्तप्ताभ्यो यद्रेत आसीत् तदभृज्ज्यत । यदभृज्ज्यत तस्माद् भृगुः समभवत् । तद्भृगोर्भृगुत्वम् । ‘ (गो० ब्रा० पू० १ । ३) भृगुरेव च घनतरलविरलावस्थाभेदेन अब्वायुसोमभेदतस्त्रिधा व्यभज्यत । तदुक्तम्—‘आपो वायुः सोमः’ इत्येते भृगवः (‘गो० ब्रा० पू० २ । ८ । ६) ततः पुनः प्रजापतेस्तपोरूपव्यापारेण स भृगुः अङ्गिरो रूपे पर्यणमत् । तदुक्तम्—‘तं वरुणं मृत्यु (वरुणमयं भृगुं) अभ्यश्राम्यत्, अभ्यतपत् समतपत् । तस्य श्रान्तस्य तप्तस्य सन्तःप्तस्य सर्वेभ्योऽङ्गेभ्यो रसोऽक्षरत् । सोऽङ्गरसोऽभवत् । तं वा एतमङ्गरसं सन्तं (अङ्गिरा) इत्याचक्षतेः । (गो० ब्रा० पू० १ । ७)

स आपोमयः परमेष्ठी प्रजापतिः भृगुं सृष्ट्वा केन्द्र एव प्रतितिष्ठति यत्र त्रयीमयः स्वयम्भूर्ब्रह्मा प्रतिष्ठितः । परमेष्ठिप्रजापतेरापः शरीरम् । तदन्तः प्रविष्ट आप्यप्राणश्च तासामात्मा प्रजापतिः । आपोमयपरमेष्ठिप्रजापतिना सृष्टो भृगुश्च परमेष्ठिप्रजापतेरभिन्नः । यतो हि परमेष्ठी प्रजापतिरापोमयः । भृग्वङ्गिरसोर्भृगुरपि स्नेहप्राधान्यादप्प्रधानः । अत उभयोरम्मयत्वात् अप्प्राधान्याच्च विवेकः कर्तुं न शक्यते इत्येतदेव भृगुसर्जनानन्तरमापोमयपरमेष्ठिनोऽन्तर्धानमुच्यते यद् गोपथे श्रूयते । स च भृगुरन्तर्हितं तं परमेष्ठिप्रजापतिमन्वेष्टुमैच्छत्, परं नाशकत्तथा कर्त्तुमात्मना सह तस्याविवेकात् । अथाशरीरिण्या वाचा ‘वात वातेति’ तमब्रवीत् अन्वविन्दामहे’ इति ‘अथार्वागेनमेतास्वप्सु अन्विच्छ’ इत्येवं प्रेरितो भृगुरेनमापोमयं प्रजापतिप्राणं (परमेष्ठिनम्) अर्वाक् (केन्द्रे) एतासु शरीररूपासु अप्सु एवाविन्दत । अथ अर्वागप्सु सत्त्वादेवायं प्रजाप्रतिः ‘अथार्वाक्’ इति व्युत्पत्त्या अथर्वा समभवत् । यतो हि अथ अर्वागेव परोक्षभाषया अथर्वा जातः. देवानां ‘परोक्षप्रिया हि देवाः’ इति वचनेन परोक्षप्रियत्वात् । एषः अथर्वा अपां केन्द्रे स्थितः आपोमयः प्रजापतिप्राण एव । अर्थात् ऋग्यजुःसामरूपवेदत्रयीगर्भितमापोमयं वेदतत्वमेव अथर्वा परमेष्ठी प्रजापतिर्वा ।

तस्मात्सिद्धमेतदुपरितनेन प्रघट्टकेन यत् अथर्वा ब्रह्मा, अपां केन्द्रस्थः परमेष्ठी प्रजापतिः, भृगुः, अङ्गिराश्च सर्वाण्यपि तत्त्वानि आपोमयानि । अपां वेद एव चाथर्ववेदः । अप्तत्वस्य घनतरलविरलभेदैः 'आपो वायुः सोमः—इति त्रिधा विभक्तत्वात् अयमपां वेदोऽथर्ववेदः सौम्यवेदनाम्नाऽपि व्यपदिश्यते । एवं चास्य वेदस्य अथर्ववेदः, ब्रह्मवेदः, भृग्वङ्गिरसां वेदः, अथर्वाङ्गिरसां वेदः, आथर्वणो वेदः इति सर्वा अपि संज्ञा एकार्थबोधिका एव । भृग्वङ्गिरोऽथर्वब्रह्मादीनां सर्वेषामपि तत्त्वानां अप्सम्बन्धित्वेनाप्त्वात् ।

(क्रमशः)

भारताभिवादनम्

कविः श्रीजयेशः पुसद्
ज० व्यं० पल्लेवारः काव्यतीर्थः

भजत भजत देशं भारताख्यं विशालम्
हिमनगशिखराग्रं वेदविद्याभिषिक्तम्
जलधिजलविलोलं शैलमालावशीर्णम्
अविरतवनराजी–शाद्वलाभाभिरामम् ।। १ ।।

विमलजलनदीनामम्भसा पूनितांगम्
विपुलजलनदीनां स्रोतसाप्लावितांगम्
विततनगररम्यं भव्यहर्म्यावकीर्णम्
भजत भरतदेशं दिव्यवंशाभिजातम् ।।२।।

निगमनिगदनादैर्मुग्धभूमंडलेशम्
सरसमृदुलशब्दैर्व्यक्तकाव्यानुरागम्
विबुधवचनवित्तं देवभाषानुनादम्
भजत भजत देशं भिन्नभाषाभिलीनम् ।।३।।

विविधविषय्युक्तं ग्रन्थभाण्डारभव्यम्
विविधगहनसूत्रै बौद्धधर्मप्रमाणम्
विविधगुणनिधानं वेदविद्याप्रधानम्
भजत भरतदेशं योगिनां दिव्यधाम ।।४।।

विगलितपरपाशं नष्टदास्यत्वदुःखम्
अरुधिरसमरोत्थं स्वयीराज्याधिकारम्–
बहुजनमततंत्रैर्मंत्रितं राज्ययंत्रम्
भजत भरतखंडं संस्कृतेर्मानदण्डम् ।।५।।

प्रमुदितजनचित्ते संधृतं राज्यसूत्रम्
दुरितदलितदुःखं योजनाबद्धयत्नैः
सरलहृदबलायाः नेतृहस्ते निविष्टम्
भजत भरतदेशं विश्वकीर्तेः प्रविष्टम् ।।६।।

विकसितगणराज्ये गौरवेणाधिरूढम्
विमलजनचरित्रं विश्वधर्मानुषंगम्
भजत भरतवर्षं विश्ववंद्यं प्रसिद्धम्
भणतु भरतवाक्यं भारतं भातु विश्वे ।।७।।

श्रीशङ्कराचार्य्योपरि आक्षेपः ।

श्रीदीनानाथशास्त्री सारस्वतः, विद्यावाचस्पतिः
अध्यक्षः "सनातनधर्मालोक" महाविद्यालयस्य
१ बी १९ लाजपतनगरं (नई दिल्ली-२४)

आद्यश्रीशङ्कराचार्योपरि एकया शास्त्रिण्या कुमार्या एकेन च सुधारकेण आक्षेपः कृतो यत्—तैः स्वकीय—'प्रश्नोत्तरमणिमालायाम्' नारीजातौ कटव आक्षेपाः कृताः । तत्र प्रश्ना उत्तरञ्च इत्थम्—

'विश्वासपात्रं न किमस्ति ?' इति प्रश्नस्य तैरित्थमुत्तरं दत्तम्—'नारी' । द्वितीयः—"द्वारं किमेकं नरकस्य" इति प्रश्नस्यापि "नारी" इत्युत्तरं दत्तम् । अत्र नारी नरकस्य द्वारमुक्ता । तृतीयः प्रश्नः—'किं तद् विषं भाति सुधोपमं यद्' अत्रापि उत्तरं 'नारी' इति दत्तम् । अत्र नारी विषसम्पृक्तम् अमृतमपि च 'नारी' प्रोक्ता । चतुर्थः प्रश्नः—'विज्ञान्यतविज्ञतमोस्ति को वा ?' अत्राप्युत्तरितम्—'नार्या पिशाच्या न च वञ्चितो यः' यः पुरुषो नार्या न वञ्चितः, स एव विद्वान् । पञ्चमः प्रश्नः का श्रृङ्खला प्राणभृतां हि' अत्रापि पूर्ववद् उत्तरितम्—नारी' ।

एतेन स्त्रीनिन्दारूपपापेन श्रीङ्कराचार्यस्य 'भगन्दररोगेण मृत्युर्जातः' । (एका शास्त्रिणी कुमारी) ।

अत्रोत्तरम्—एतादृक्षु आक्षेपेषु यदि विचार-दृष्टिः प्रवर्त्येत, तदत्र न कापि अयुक्तता प्रतिभासते । नारीकीटो जातः सन्मनुतनुजनु[1]र्नरकमेव तु उपार्जयन् भवति । गोस्वामी तुलसीदासो यावद् नारीकीटः स्थितः, तावद् रामभक्तौ [2]प्रत्यूहव्यूह पाताद् नरक एव निमग्नस्तिष्ठति स्म । तद् यावत् स तन्निमग्नोऽस्थात् तं न कोपि अजानात् ।' तन्मोहेऽपगत एव स तस्मान्नरकाद् उद्धृतोऽबोभूयिष्ट[3] ।

आक्षेप्तृभिरवधेयं यत्—श्रीमच्छङ्कराचार्योऽद्वैतवादी संन्यासी ववृते । तत् संन्यासिनः कृते नारी स्पष्टं नरकस्य द्वारम् । [तत् तथाऽर्थापयिता श्रीशङ्कराचार्यः कथं नाम आक्षेपपात्रम् ?[4] । श्रीमद्भागवते भिक्षुधर्मनिरूपणे प्रोक्तम्—'पदापि युवतिं भिक्षुर्न स्पृशेद् दारवीमपि (दारुनिर्मितामपि) । स्पृशन् करीव बध्येत करिण्या अङ्गसङ्गतः । (११ । ८ । १३) ।

आर्यसमाजी स्वामीदयानन्दो यदा स्वामिनो विरजानन्दस्य पार्श्वे पठति स्म, तदा-

---

[1] मनुतनुजनुः—मनुष्यः । [2] प्रत्यूहव्यूहः—विघ्नराशिः । [3] अबोभूयिष्ट यङ्लुङि ।

[4] आक्षेपपात्रम् । अत्र सत्पुरुषत्वात् पर्यालिङ्गता ।

एकदा ध्यानदशायामेकया स्त्रिया तस्य चरणयोः स्वशिरः स्थापितम् । दयानन्दस्वामिना तत्प्रायश्चित्तस्वरूपे त्र्यहमुपोषितम्[1] । एतन्निशम्य तद्गुरू [2] रोमाञ्चितोऽभूत् ।

यदि स्त्रीनिन्दाफलस्वरूपे श्रीशङ्कराचार्यस्य भगन्दरस्फोटकेन मृत्युर्जातः, तदा स्त्रीनिन्दकस्य गोस्वामि[3] तुलसीदासस्य भगन्दरस्कोटकः, कुतो नाभूत् ? । वस्तुत इदं मृषोद्यम् [4] । भगन्दरस्तु बहुविलासिनां भवति । वस्तुतः श्रीशङ्कराचार्यस्य जैनबौद्धैः साकं शास्त्रार्थो भवति स्म । ततः स्वामितः पराजितेन एकेन अभिनवगुप्तेन—यस्तान्त्रिक आसीत्, अभिचारक्रियाद्वारा शङ्कराचार्यस्य शरीरे भगन्दरस्फोटकः संक्रमितः ।

ततस्तस्य मन्त्रतन्त्रज्ञाता पद्मपादनामा तच्छिस्यः तं स्फोटकमभिनवगुप्ते एव सङ्क्रमितवान् । तेन अभिनवगुप्तस्यैव मृत्युर्जातः । एतच्छङ्करदिग्विजये दृश्यताम्—'तदनु स्वगुरोर्गदाऽपनुत्त्यै परमन्त्रं तु जजाप जातमन्युः । मुहुरार्यपदेन वार्यमाणोऽप्यरिवर्गेऽप्यनुकम्पिनाऽब्जपादः' (पद्मपादः) (१६ । ३१) । 'अमुनैव ततो गदेन नीचः ।

प्रतियातेन हतो ममार गुप्तः (अभिनवगुप्तः) (१६ । ३२ ; एवं शास्त्रिण्याः कुमार्य्या आक्षेपाः परिहृताः इति " भारती " पाठकैरवसेयम् ।

---

१ त्रिदिनमुपवासः कृतः । २ गुरू रोमाञ्चितः अत्रढ्लोपदीर्घः ३ गोस्वामि अत्र न दीर्घप्राप्तिः ।४ मृषोद्यम्—असत्यम् ।

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम्	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	१.५०
३.	सरलसंस्कृतशिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुरः	१.२५
५.	चित्रद्वारा संस्कृतशिक्षा (बालोपयोगिनी)	१.५०
६.	सुवर्णलक्ष्मीनक्षत्रमाला	०.५०
७.	आयुर्वेदविशेषांकः	५.००
८.	आरोग्यांकविशेषांकः	२.५०

भारती के ग्राहकों २५%वर्तन दिया जायगा यदि सम्पूरण पुस्तकें एक साथ मंगायें ।

व्यवस्थापक

भारती संस्कृत-मासिक, जयपुरम्

श्रीहरिः

घुश्मेशं तु शिवालये

[शिवाड़-(शिवालय)-स्थितघुश्मेश्वरमहादेवस्य द्वादशं ज्योतिर्लिङ्गम्]

डॉ॰—नन्दकिशोरगौतमः निर्मलः, एम. ए., पी.एच. डी., साहित्यायुर्वेदाचार्यः, साहित्यायुर्वेदरत्नम् ।
साहित्यप्राध्यापकः-राजकीय महाराज-आचार्य-संस्कृतमहाविद्यालयः, जयपुरम्

पूर्वानुवृत्तम्— (वर्षं २७ अङ्कः ३

विद्यमानघुश्मेश्वरमहादेवस्य मन्दिरम्, यत् मध्यकालिकस्थापत्यकलादर्शं वरीवर्ति, वर्षद्वयेन परिपूर्णतामगमत् । अस्मिन्नवधौ घुश्मेश्वरस्य पूजाया अस्थायिकार्यक्रमश्चलनासीत् । मन्दिरस्य निर्माणकाले सर्वप्रथमं निजमन्दिरस्य निर्माणमभूत्, यस्मिन् भगवतो घुश्मेश्वरस्य योनिस्तस्य मध्यभागे सुस्थापिता । मन्दिरेऽस्मिन् दीर्घाकारस्फटिकशिला संस्थापिता । हरमन्दिरस्यास्य मुख्यद्वारं प्रतीच्यां सुनिश्चितम् । मुख्यद्वारस्य सम्मुखमेव विशालसभाभवनं निर्मितम् । सभाभवनमिदं शोडषस्तम्भैर्निर्मितम्, यस्मिन् नवचतुर्भुजाकारशिलाः संस्थापिताः, तस्मादेव च कारणात् सभाभवनमिदं नवचतुर्भुजाकारान्वितं प्रसिद्धम् । उदक् लघ्वाकारत्रिद्वारस्थले गणेशस्थापना विहिता । यस्य बहिश्चन्द्रसेनगौडस्य शिलालेखस्तिष्ठति । घुश्मेश्वरमन्दिरशिखरस्य उच्चता च त्रिंशद्धस्तयुता विरचिता ।

निजमन्दिरे भगवतो घुश्मेश्वरस्य योन्यामन्तर्निहितं द्वादशं ज्योतिर्लिङ्गम् ।

घुश्मेश्वरस्यास्य भव्यमन्दिरनिर्माणानन्तरं राजा श्रीशिववीरः सुयोग्यपण्डितान् समाहूय नवसप्तत्यधिकैकादशशततमे (११-७९) विक्रमाब्दे प्रथमफाल्गुनकृष्णत्रयोदश्यां चन्द्रवासरे शुभमुहुर्ते शिवमन्दिरे कलशं स्था-



१—(क) निजमन्दिरे कुड्यां सम्मुखमेव प्रज्वलिताखण्डज्योतिः दरीदृश्यते ।

(ख) निजमन्दिरस्य मुख्यद्वारं प्रतीच्याम् ।

२—द्वारस्य सम्मुखमेव शोडषस्तम्भैर्निर्मितं सभाभवनं यस्य मध्यभागे विशालघण्टं दरीदृश्यते ।

पयामास विधिना च पूजां कृतवान् । अस्मिन्नेव दिने महाशिवरात्रिर् आसीत् । अतः सभामण्डपे वेदपाठानां, रुद्रस्तोत्राणां विविधस्तुतीनां चोद्घोषोऽभूत् राज्ञा च पार्थिवशिवलिङ्गानां पूजा सविधिविहिता । शिवाडस्थितश्रीगोविन्दनारायणश्रौत्रियस्य पूर्वजानां कृते अस्मिन्नेव दिवसे पार्थिवशिवलिङ्गपूजासम्पादनार्थम् एकालेखपट्टं प्रदत्तम्, यदस्माभिः पूर्वमपि उद्धृतम् । तस्मिन् शिवालयशब्दस्य अन्त्याक्षरलोप*स्याधारेण (शिवाल) इति नाम प्राप्यते, यच्च नवसप्तत्यधिकैकादशशततम-(११७९) विक्रमाब्दे प्रदत्तकारणात् वर्षद्वयपूर्वघटितायाः किशनतक्ष्णो घटनायाः पुष्टिं पूर्णरूपेण विदधाति ।



निजमन्दिरविशालशिखरं सभाभवनञ्च

ज्योतिर्लिङ्गस्यापि वेदविधिना पूजा विहिता । सभाभवन एव रात्रौ जागरणं जातम्, चतुष्प्रहराणां चतुर्धा पूजाः स्वयं राज्ञा शिववीरचौहानेन कृताः । अग्रिमे दिवसे शिवरात्रिमेलनमलगत् । ब्राह्मणभोजनं जातम् । राजा प्राचीनघुश्मेश्वरमन्दिरस्य व्यासकुलोद्भवपूजकान् समाहूय समादरेण घुश्मे-

---

*भाषाविज्ञानस्य परिवर्तनस्य सा दिशा यस्यामन्ताक्षरलोपो जायते, 'अन्त्याक्षरलोपः (apocope) कथ्यते ।

श्वरपूजायां नियुक्तवान्। भगवतः शिवस्य भोगादिकानामुत्तमोत्तमव्यवस्था विहिता। पाठपूजनकर्तृपण्डितानां कृते पूजकानाञ्च कृते भूमिदानं कृतम्। आज्याखण्डज्योत्याः, चन्द्रवारस्य जागरणस्य, शिवरात्रिमहोत्सवस्य, प्रतिदिनं द्विवारं योन्या जलेन परिपूर्णस्य, सहस्रघटाभिषेकस्य परिधेर्निर्धारणस्य, प्रतिदिनं चतुर्वारं नीराजनस्य (प्रातः ब्राह्ममुहूर्ते, मध्याह्ने नैवेद्यकाले, सन्ध्याकाले, शयनकाले च) नियमा निर्धारिताः, ये अद्यावधि अक्षुण्णरूपेण प्रचलितास्सन्ति।

(२) अल्लाउद्दीनखिल्जिन आक्रमणम्:—भगवतो घुश्मेश्वरस्य नवनिर्मितमन्दिरस्य चाकचक्येन साकमेव ज्योतिर्लिङ्गस्य ख्यातिः पुनः सुदूरं प्रासरत्। सहस्रसंख्यका जनाः समेत्य शिवरात्रिमहोत्सवे सम्मिलिता बभूवुः। तदा तु ज्योतिर्लिङ्गस्य ख्यातेरखण्डज्योतिः सम्पूर्णभारते प्रदीप्तम्, प्रदीप्तकान्त्या चाकचक्येन व्यथितोऽल्लाउद्दीनखिल्जी ज्योतिर्लिङ्गं पुनर् विध्वंसयितुं चचाल।

अष्टपञ्चाशदधिकत्रयोदशशततमे (१३-५८) विक्रमाब्देऽल्लाउद्दीनो यदा राजाधिराजहम्मीरेण सह योद्धुं गच्छन्नासीत् तदा मार्गे स्थितस्यास्य ज्योतिर्लिङ्गस्य विनाशं विना न जिगिमषति स्म। पूर्वविदितशिवमन्दिरं निकषा स सायं उपागच्छत्। तत्क्षणमेव च शिवायतनं विखण्डयितुमादिदेश। खिल्जिनः सेनापतिः सभाभवनं प्रविश्य नन्दिकेश्वरद्वयं खण्डितवान्। तौ विखण्डितौ



खिल्जिना विखण्डितं नन्दिकेश्वरद्वयम्

नन्दिकेश्वरौ इदानीमपि शिवमन्दिरे तिष्ठन्तौ यवनानाम् अत्याचारान् स्मारयतः। शिवमन्दिरे स्थितज्योतिर्लिङ्गं भूमिगतत्वेन दृष्टिमार्गे नायात्, किन्तु सेनापतिः मन्दिरशिखरं विध्वंसयितुं प्रारब्धवान्। हस्तद्वयशिखरविनाशानन्तरं स रात्र्या गाढान्धकारेण परिश्रमविशेषाच्च सैनिकान् विश्रामार्थमादिष्टवान्।

रात्रौ भगवान् भूतनाथो भयंकररूपं धारयित्वा हस्ते त्रिशूलं नीत्वा अल्लाउद्दीनं संत्रासयामास। अल्लाउद्दीनो व्याकुलो भूत्वा उदतिष्ठत् सेनापतिं चाहूय स्वप्नोदन्तं कथयामास। सेनापतिः तत्रस्थपूजकमाहूय मन्दिरस्य देवस्य नाम तस्य महिमानं च ज्ञातवान् इमं च निश्चयं चकार यत् मन्दिरस्यास्य प्रधानदेवादेव [illegible] भीतः शिखरविध्वंशाच्च स

रुष्टोऽस्ति इति। भवेन्नाम स अनिष्टाधिक्यं कुर्यात्। अतः श्रीमन्तः मन्दिरभञ्जनविचारं त्यक्त्वा देवाधिदेवशिवं संप्रार्थ्य निद्रामुपागच्छेयुः। ततः परं खिल्जी तथैवाकरोत् सुखेन च सुप्तवान्।

प्रातः समुत्थाय खण्डितं शिखरं पुनर्निर्माय शिवमन्दिरकुड्याञ्च शिलालेखमेकं संयोज्य गतवान्। शिलालेखे तस्मिन् इदं लिखितं वर्तते यत् न कोऽपि मन्दिरमिदं नाशयिष्यति। शिलालेखस्तम्भे एकतः गोः परतश्च शूकरस्य चित्रमङ्कितमस्ति ये हिन्दूनां कृते गोमातुः शपथमिति, यवनानां कृते च शूकरस्य शपथमिति प्रकटयतः। घुश्मेश्वरस्य कृपया तस्मात् कालात् इदानीं यावत् शिवालयोऽयं सुरक्षितः। साम्प्रतमपि च निजचमत्कारैर्भव्यतया च जनमनांसि आकर्षयति।

शिवाडस्थ स्व० गङ्गाविशनश्रोत्रियमहाभागस्य हस्तलिखितपुस्तके शिवालयक्षेत्रस्य माहात्म्यं पौराणिकसंस्कृते प्राप्तम्। तत्र शिवालयक्षेत्रं योजनपर्यन्तविस्तृतं चतुर्भिर्द्वारैश्च संयुक्तं प्रकटितम्। येषां द्वाराणां नामानि क्रमशः (१) सर्वसर्पद्वारम् (२) वृषभद्वारम् (३) नृत्यशालाद्वारम् (४) ईश्वरद्वारं च सन्ति। उदक् सुरसरसरोवरस्य दक्षिणा च वासिष्ठ्या नद्या वर्णनमपि कृतम्। वासिष्ठ्यास्तटे मन्दारवनं विल्ववनमपि च प्रदर्शिते। इदं सर्वं वर्णनम् आधुनिकशिवाड़े पूर्णरूपेण घटते। शिवाडतः प्राक् क्रोशं पूर्वद्वारं सारसोपग्रामस्य रूपे, उत्तरद्वारं बहड-(वृषभद्वारं) ग्रामस्य रूपे, पश्चिमद्वारं नटवाडा-(नृत्यशाला नटवान्) ग्रामस्य रूपे विद्यन्ते। मन्दारवनं वासिष्ठ्यास्तटे मण्डावरग्रामस्य रूपे सुरसरसरोवरः सरसग्रामस्य रूपे दक्षिणा च वासिष्ठ्याः (वनासनद्याः) तटे विल्ववनमपि विद्यते। यस्मात् शिवपूजार्थं विल्वपत्राणि आनीयन्ते।

उपर्युक्तप्रमाणैर्न-कापि शंकावशिष्टा यत् शिवाडेव शिवालयोऽस्ति, अत्रस्थं ज्योतिर्लिङ्गमेव घुश्मेश्वरमहादेवस्य द्वादशं वास्तविकं ज्योतिर्लिङ्गमस्ति न तु महाराष्ट्रराज्यान्तर्गतबेरूलग्रामे स्थितं शिवलिङ्गं ज्योतिर्लिङ्गमस्ति, यतो हि शिवपुराणे वर्णितसमस्तवस्तूनां तत्राऽभावोऽस्ति। विस्तारभयात् घुश्मेश्वरमहादेवस्य चमत्कारपरम्पराया उल्लेखो न मया विहितः। अस्मादेव च कारणात् शिवमन्दिरस्यानेकनवीनमन्दिराणामपि वर्णनं न कृतम्। यस्य वर्णनं वयं भविष्यत्काले प्रकाश्यमाने पुस्तके विस्तारपूर्वकं करिष्यामः।

प्रमाणिततथ्यान् प्रस्तुत्य लक्ष्यसिद्धेः पश्चात् अपि यदि कस्यचित् महानुभावस्य मनसि शंकावशिष्टास्तर्हि ममेदं नम्रनिवेदनमस्ति यत् ते प्रकृतस्थलमुपस्थाय सहर्षं तथ्यानां परीक्षां कर्तुं पारयन्ति।

अन्तेऽहं परमशिवभक्तं शिवाड-(शिवालय) निवासिनमादरणीयं ठाकुरश्रीबजरङ्गसिंहराजावतं सेवानिवृत्तोपमण्डलाधिकारिणं प्रति हार्दिककृतज्ञतां प्रकटयामि। यः सम्बन्धितविषयस्यावश्यकसामग्रीं दत्त्वा मां लेखनाय प्रेरितवान्।

।। इति शिवम् ।।

कुम्भयोगस्यैतिहासिकं पौराणिकञ्च स्वरूपम्

श्रीगोविन्दसुवेदी, काशीस्थः।

प्रयागं तीर्थराजमामनन्ति शिष्टाः अत एव—

"त्वं राजा सर्वतीर्थानां
त्वमेव जगतः पिता।
याचितं देहि मे तीर्थं
तीर्थराज नमोऽस्तु ते ॥

इति मन्त्रेण स्तुवन्ति च। तत्र माघमासे-स्नानमतीव पुण्यप्रदम्।

"दुःखदारिद्र्यनाशाय
श्रीविष्णोस्तोषणाय च।
प्रातः स्नानं करोम्यद्य
माघे पापविनाशनम् ॥"
इति दर्शनात्।

"माघमासे रटन्त्यापः
किञ्चिदभ्युदिते रवौ।
ब्रह्मघ्नं वा सुरापं वा
कं पतन्तं पुनीमहे।"
इति दर्शनाच्च।

तत्रापि यदि पौषपूर्णिमानन्तरं समागतायाममायां सूर्योदये श्रवणनक्षत्रस्य रविवासरस्य च यदा योगो जयते तदा कोटिसूर्यग्रहणसदृशफलदायी "अर्धोदय" संज्ञको योगो भवति। यथा—

"अमार्कपातश्रवणैर्युक्ता चेत्
पौषमाघयोः।
"अघादयः" स विज्ञेयः
कोटिसूर्यग्रहैः समः ॥'
इति महाभारते।

तत्रापि सूर्योदयसमये रविवासरस्य स्थाने सोमवासरो भवति चेत् तदा "महोदय" संज्ञकस्ततोप्यधिकफलदो योगो जायते। यथा—

"पातस्यान्ते पूर्वभागे त्वमायाः
श्रोणामध्ये भास्करस्योदये च।
भानोर्वारे ह्यर्धमित्याहुरार्याश्चेन्दोर्वारे
तन्महत्त्वपूर्वमाहुः ॥"
इति धर्मप्रवृत्तिवचनात्।

कुम्भयोगस्तु वृहस्पतौ मेषराशिगते सति यदा चन्द्रसूर्यौ मकरराशिगतौ भवतस्तदा जायते। तत्राप्यमाया योगे पूर्णकुम्भयोगो जायते। तदुक्तम्—

"मेषराशिगते जीवे मकरे
चन्द्रभास्करौ।
अमावस्या तथा योगः
कुम्भाख्यस्तीर्थनायके।।"
इति रेवातन्त्रे।

वेष्णुयागाख्ये ग्रन्थे तु सूर्ये मकरराशौ गते सति मेषराशौ यदि बृहस्पतिस्तिष्ठति तदा प्रयागराजे 'कुम्भ' योगो जायते। इत्येवोक्तम्। स च द्वादशवर्षानन्तरमेव लभ्यते। अतोऽतीव दुर्लभः। इति प्रतिपादितमस्ति।

यथाः—

"मकरे च दिवानाथे ह्यजगे
च बृहस्पतौ ।
कुम्भयोगो भवेत् तत्र
प्रयागेऽतीव दुर्लभः ।"

इति विष्णुयागे ।

यतो हि चन्द्रसूर्यौ तु प्रतिवर्षं मकरराशौ गच्छतः परं बृहस्पतिस्तु प्रतिवर्षमेकराशिं भुक्त्वा राश्यन्तरं गच्छति, इत्येवं द्वादशे वर्षे पूर्वपरित्यक्तराशिं गन्तुं प्रभवतीतिहेतोः प्रतिद्वादशवर्षे प्रयागराजे 'कुम्भ' योगो जायते । प्रतिषष्ठवर्षे च "अर्धकुम्भ" योगो जायते ।

"कुम्भ" इति घटपर्यायः । अस्य योगस्य विषये पुराणेषु प्रसिद्धा एका कथा स्ति । यथा यदा समुद्रमन्थनं जातं तदा ततश्चतुर्दशरत्नानि प्रादुर्भूतानि । तेषु अमृतकुम्भं गृहीत्वा धन्वतरिर्यदाविर्बभूव तदाऽमृतघटार्थं देवासुरयोर्मध्ये "अहमहमिका" संजाता । देवा अमतकुम्भं गृहीत्वा पलायिताः । दानवास्तेषामनुप्रधावं चक्रुः कुम्भार्थम् । द्वादशाहोरात्रपर्यन्तमयमेव क्रमः प्रचलितः । तस्मिन्नेवासरे चतुर्वारं चतुर्षु स्थलेषु सम्मर्दोऽपि तेषां जातः । परस्परं कुम्भजिघृक्षायां कुम्भस्तत्र तत्र पृथिव्यां पतितश्च । तानि चत्वारि स्थलानि-प्रयाग-हरिद्वार-नासिकोज्जयिनीति प्रसिद्धानि) अत एव तत्र तत्र चतुर्ष्वपि स्थलेषु कुम्भयोगो जायते विभिन्नसमये । तदामृतकुम्भस्य रक्षका वृहस्पति-चन्द्र-सूर्य-शनैश्चरा आसन् । अत एव तेषां योगे कुम्भयोगस्तत्र तत्र जायते । अत एवास्या घटनायाः स्मारकरूपेण क्रमेणैतेषु स्थलेषु कुम्भयोगाः प्रतिद्वादशवर्षे समापतन्ति । अर्धकुम्भयोगश्च प्रतिषड्वर्षे समापतति । इति ।।

अस्मिन् विषये ऐतिहासिकं तथ्यम् :—

इतिहासेषु पर्यालोचितेषु कुम्भसम्बन्धे समुल्लेखो महाराजहर्षसामयिको मिलति । यस्य चीनदेशीयबौद्धभिक्षुणा ह्वेनसाङ्गाभिधेन ख्रिस्तीयसप्तमशताब्दे स्वयं साक्षात्कारपुरःसरं स्वकीयेतिहासग्रन्थे समुल्लेखो विहितोऽस्ति । स लिखति—

"बौद्धभिक्षुषु प्राचीनतमा एका एतादृशी प्रथा प्रचलितासीद् यत् प्रतिशुक्लपक्षीयद्वितीयायां पुर्णिमायाञ्चैकत्रितास्ते प्रायश्चित्तरूपे तदवधौ विहितानां स्वकीयपापानामथवा दोषाणां स्पष्टरूपेण स्वीकारं कुर्वन्ति स्म । कालान्तरे सेयं प्रथा गृहस्थेष्वपि विस्तृतिं गता । ये तादृशेषु विशेषावसरेषु यथाशक्ति दानपुण्यादिकमपि कर्तुं प्रारभन्त ।

महाराजस्य हर्षवर्द्धनस्य समये प्रायश्चित्तमिदं प्रतिषष्ठे वर्षे भवति स्म । यं लोकाः "आनन्दस्य कृषिः" इति कथयन्ति स्म । अवसरोऽयमर्धकुम्भस्य कुम्भस्य वावसरे भवति स्म । महाराजेन हर्षवर्धनेनेदमनुष्ठानं षष्ठे वारे ह्वेनसांगपुरतः कृतमासीत् ।"

तदातनदानदक्षिणादिवर्णनमतीव प्रभावितेन ह्वेनसांगमहोदयेन कृतमस्ति । स

लिखति—

"नगरात् पूर्वभागे क्रोशपञ्चकान्तरे गङ्गायमुनाख्ययोर्द्वयोर्नद्योरन्तरे पृथिवी रमणीया तथोच्चा सुन्दरस्वच्छबालुकामयी विद्यते। प्राचीनकालत इयं प्रथा तत्र प्रचलितास्ति यत् कुम्भस्यार्धकुम्भस्य वावसरे सामन्तराजानो महाराजा अन्ये च महान्तो धनाढ्या यदा तत्रागच्छन्ति स्म तदा ते स्वकीयं धनं दानपुण्यकर्मणि समर्पयन्ति स्म । महाराजहर्षवर्धनोऽपि स्वकीयपूर्वपुरुषाननुसरन् पञ्चवर्षपर्यन्तं सञ्चितं सर्वमपि धनमेकस्मिन्नेव दिने दानरूपेण प्रदत्तवान् । प्रथमे दिवसे स भगवतो बुद्धस्यैकां मूर्तिं निर्माय पूजयित्वा स्वीयानि सर्वाणि बहुमूल्यानि रत्नानि तत्र खचितवान् । तदनन्तरं स तत्सर्वं तत्रस्थितेभ्यस्तीर्थपुरोहितेभ्यः पूजकेभ्यश्च प्रददौ । तदनन्तरं सोऽन्यतः समागतेभ्यः पूजकतीर्थपुरोहितेभ्यो ये तत्र समागत्य स्थिता आसन्, तेभ्यः प्रददौ । ततश्च विद्वद्भ्यस्तदनन्तरं विधवाभ्यस्ततो दीनानाथदुःखिभ्यः स्वार्जितं सर्वमपि धनं समर्पितवान् । यदा तस्य पार्श्वे किञ्चिदपि नैवावशिष्ट तदा स स्वकीयं रत्नजटितं मुकुटं स्वगलादुत्तार्य मुक्ताहारञ्च दत्तवान् । तथा करणे महाराजहर्षवर्धनः किञ्चिदपि कष्टं नानुभूतवान्, अपितु स प्रसन्नतापूर्वकं कार्यमिदमुद्दिश्य स्वं धन्यं मन्यते स्म । तदनन्तरं विविधदेशप्रदेशेभ्यः समागता माण्डलिकाः सामन्तराजानो ये महाराजहर्षवर्धनस्याधीने स्थिता आसन्, तैर्नानाविधानि रत्नादीनि वस्तूनि समुपाहृतानि यतो राजकोषो रिक्तो मा भूत्।" इति ।

पाठकानां मनोरञ्जनार्थं टालवायेज ह्वीलरस्येतिहासतश्च किञ्चिदत्र प्रस्तूयते—

स लिखति यद् "अस्मिन् कुम्भावसरे प्राचीनशैल्या सर्वञ्जातमासीत् । त्रयोदशशतमित 'वर्गगज' प्रायःपरिमिता चतुष्कोणातिविस्तृता भूमिः सुन्दरतमप्रफुल्लितपाटलपादपैः सुसज्य परिवृतासीत् । तदभ्यन्तरे काशतृणादिभिरिष्टकादिभिश्च भवनानि निर्मितानि आसन् । यत्र सुवर्णरजतादीनि, बहुमूल्यरत्नानि, कार्पासवस्त्राणि तथान्यविधानि च विविधानि बहुमूल्यान्यनेकवस्तूनि परिपूरितानि आसन् । तेषामेव निकटे भोजनशाला आसन् निर्मिताः । या एकस्यां पङ्क्तौ पण्यशालाया आपणानीव प्रतिभान्ति स्म । प्रतिभवनं सहस्रसंख्यका मनुष्या भोजनं कर्तुं पारयन्ति स्म । अस्य कुम्भपर्वावसरस्य किञ्चत्प्रथमत एव दूरदूरतः श्रमणा ब्राह्मणा दीनानाथदरिद्रादयश्च प्रयागे निमन्त्रिता भवन्ति स्म । पर्वदिने महाराजहर्षः स्वकीयैर्मन्त्रिभिस्तथाधीनस्थराजभिश्च सह प्रयागसङ्गमे समायातः । यत्र बलभीराजो 'ध्रुवपत्' तथा कामरूपस्य राजा 'कुमारो'ऽप्यासीत् । एतेषां समेषां राज्ञां सैनिकशिविराणि चतुर्दिशस्थितान्यासन् । विशाल-समारोहपूर्वकं कार्यं प्रारब्धम् । महाराजेन तत्र परमोदारतायाः परिचयो दत्तः । उत्सवोऽयं गौतमबुद्धस्योपलक्ष्ये विहित आसीत् । परं तु तेषामप्यादर-

सत्कारादिकं सञ्जातं ये तत्र पूजकास्तीर्थपुरोहिताश्चासन्। प्रथमे दिवसे भगवतो बुद्धस्य मूर्तिरेकस्मिन् स्तूपे स्थापिता, तस्मिन् दिवसे बहुमूल्यानि वस्तूनि प्रदत्तानि तथा भोजनालये चोत्तमोत्तमानि भोजनव्यञ्जनादीनि सम्भोज्य तर्पितास्तत्रागताः सर्वे। कुसुमानां वर्षा जाता, तथा श्रुतिमनोरञ्जनानि वाद्यानि वादितानि। द्वितीये दिवसे भगवतः सूर्यस्य तथा विष्णोः मूर्तिस्थापना जाता। तृतीये दिवसे भगवतः शिवस्य मूर्तिस्थापना विहिता। एषु दिनेषु प्रथमदिनतस्तृतीयदिवसपर्यन्तमेवार्धवस्तूनि प्रदत्तानि। चतुर्थदिवसात् केवलं सामान्यं दानपुण्यादिकमेव प्रवृत्तम्। तत्र विंशतिदिनपर्यन्तं श्रमणेभ्यो ब्राह्मणेभ्यश्च दानानि दत्तानि। ततो दशदिनपर्यन्त विधवाभ्यो विधर्मिभ्यश्च ततो दशदिनपर्यन्तं नागेभ्यस्ततस्त्रिशद्दिनपर्यन्तं दीनानाथदुःखिदरिद्रेभ्यो दानानि दत्तानि। इत्थमयं कुम्भपर्वसमारोहः पञ्चसप्ततिदिनैः पूर्णतां गतः।" इति शम्।

गाण्डीवतः साभारं गृहीतोऽयं लेखः—
इति मधुपः।

सुरा वै मलमन्नानां, पाप्मा च मलमुच्यते।
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥
—मनुस्मृति ११-९३

सुरा (शराब) अन्न का मल है। मल को पाप कहते हैं। मल-मूत्र जैसे अभक्ष्य पदार्थ है वैसे ही ब्राह्मण-क्षत्रिय और वैश्य आदि सुरा (शराब) रूपी मल को न पीवे—क्योंकि मल-मूत्र तो शूकर (सूअर) आदि पशु ही खाते हैं। मनुष्य नहीं।

पंजाबी चन्द्र हलवाई कराची वाला

प्रधान कार्यालय : १८५ बालकेश्वर रोड, तीन बत्ती, बम्बई-६
दूरभाष—३६३६२५, ३६४७९५

स्थापना—१८९६ **शाखायें :—**

शाखायें	दूरभाष	शाखायें	दूरभाष
(१) जवेरी बाजार	३१३७२९	(६) वरली नाका	३७२९९६
(२) ग्रान्टरोड	३५१७८०	(७) सायन सर्कल	४७३८८९
(३) कुलाबा	२१३८१३	(८) ठाकुरद्वार	३५५६८३
(४) "दादर टी० टी०	४४२०१२	(९) घाटकोपर-वेस्ट	५५२३८०
(५) सूर्योदयस्टोर्स, चर्चगेट	२९१९७	(१०) अकबर अलीसफोर्ट	२५३९२१-२२

कारखाना : चन्द्र भवन, ग्रान्टरोड, बम्बई-७ दूरभाष—३७२६२८ और ३७०७३३

रत्नाकरो महाकुम्भः

श्रीउमाशङ्करशुक्लः 'सन्यासी' आजमगढ़ः

स्थानम्—गङ्गायमुनयोस्तटम् ।

समयः—रात्रेः द्वितीयः प्रहरः ।

भीमसेनस्य तथा महासेनापतेः अर्जुनस्य प्रवेशः ।

भीमसेनः—महासेनापते ! अद्यैव अत्रैव विधौ वियन्मध्यगते सति पितामहो भीष्मदेवः पुण्यसलिलायाः भागीरथ्याः संगमभूमिम् प्रणम्य मातरं जह्नुनन्दिनीं दर्शयिष्यति, ईदृशीम् मन्त्रणाम् अवलम्ब्य सम्पादिता आवाभ्यां सुदूरयात्रा, परन्तु तस्य महापुरुषस्य किंचिच्चिह्नमपि न लक्ष्यते ।

अर्जुनः—बन्धो ! पितामहोऽस्माकं हितसाधने तत्परः, नूनम् आगमिष्यति । प्रतीक्षस्व तावत् ।

भीमसेनः—निर्जन ! खाण्डवप्रस्थं प्राप्य मुह्यामि महासेनापते ! कथं नगरनिर्माणम्, कथं सेनासंघटनम्, कथं भोजनपानं वा, धनेन विना ?

अर्जुनः—बन्धो ! क्षत्रियवंशावतंशाः भुजवीर्येणैव जीवन्ति रमन्ते अश्नन्ति च । परोपजीविनस्ते ये वीर्यहीनाः । अहम् एकं नवीनं राज्यं स्थापयामि, प्रतीक्षे महाव्रतिनः पितामहस्य आज्ञाम् ।

भीमसेनः—कोषसंचयनकर्त्ता महाव्रती अस्मत्पितामहः, परन्तु तेनापि अस्वीकृतम् ।

अर्जुनः—पितामहं मा विगर्हस्व बन्धो ! नूनम् आगमिष्यति पितामहः ।

भीमसेनः—महासेनापते ! किं तस्य आगमनेन ? बुभुक्षिताय उपदेशमाला न रोचते । सम्प्रति सम्पत्तिरेव अपेक्ष्यते ।

अर्जुनः—पितामहो न केवलम् अस्माकं पितामहः, परन्तु पितापि । तेन महापुरुषेणैव पालिताः, वर्धिताः, शिक्षिताश्च वयम् ।

भीष्मदेवः प्रविशति

महासेनापतिः भीमश्च प्रणमतः ।

भीष्मः—नरशार्दूल वत्स विजय ! क्षमस्व विलम्बम् ।

अर्जुनः—(बद्धाञ्जलिः) पालक ! पितः ! पितामह ! भवदीया क्षमा क्षमा, अस्मदीया तु केवलं प्रार्थना ।

भीष्मः—महासेनापते ! त्वय्येव ।

भीमसेनः—पूज्यपाद ! भूविभाजनं समाप्तं किन्तु कोषविभाजनम् ···?

भीष्मदेवः—वत्स भीमसेन ! निष्ठुरः दुर्योधनः कोषविभाजनेऽसमर्थः ।

भीमसेनः—यत्र भवादृशः वीराः निवसन्ति तत्र स्वार्थलोलुपस्य स्वार्थसीमा कथं निःसीमा ?

भीष्मः—वत्स कोपं जहि । मयैव संचितः कोषः....

भीमसेनः—अत एव वयमपि कोषाधिकारिणो भगवन् !

भीष्मः—अहं तुभ्यं सर्वथा नवीनं कोषं दास्यामि ।

भीमसेनः—नवीनं कोषम् ?

भीष्मः—अवश्यमेव । मम माता जाह्नवी युष्मान् कृतार्थान् करिष्यति ।

भीमसेनः—कदा भगवन् !

भीष्मः—मुहूर्तमात्रं प्रतीक्षस्व ।

महामना भीष्मो बद्धाञ्जलिः अश्रुपूर्णाभ्यां लोचनाभ्याम् भागीरथीं पश्यति । क्षणार्धस्य पश्चात् एका लक्ष्मीस्वरूपा स्वर्णकुम्भसहिता दिव्याङ्गना सलिलादूर्ध्वमुपैति ।

सर्वे शिरोभिः प्रणमन्ति ।

भीष्मः—जननि ! कृतार्थोऽस्मि ।

गङ्गा—वत्स ! देवव्रत·······

अर्जुनः भीमसेनश्च दिशः पश्यतः ।

भीष्मः—अहमेव देवव्रतः, एतौ पुत्रौ ।

गङ्गा—पुत्रौ....? देवव्रत ! त्वं तु ब्रह्मचारी, कथम् एतौ पुत्रौ ?

भीष्मः—जननि ! एतौ मम भ्रातुर्विचित्रवीर्यस्य पुत्रौ मम पौत्रौ पुत्रौ च ।

गङ्गा—अयं महाभागो महासेनानीः प्रतीयते । उत्तिष्ठोत्तिष्ठ विनयावनत ! अहं तुभ्यम् इमं रत्नपूर्णकुम्भ दास्यामि ।

अर्जुनः—मातः ! अयं मध्यमभ्राता रत्नान्यपेक्षते ।

गङ्गा—गृह्यताम् पुत्र ! अयं कुम्भः ।

भीमः—(रत्नकुम्भं ग्रहीतुं चेष्टते परन्तु भाराक्रान्तः सः विलपति) ईदृशी कुम्भस्य गुरुता, कथं विजयते महासेनापते !

गङ्गा—महासेनापते ! गृह्यताम् अयं कुम्भः ।

अर्जुनः पादयोः पतति पश्चात् कुम्भम् गृह्णाति ।

गङ्गा—धन्योऽसि, धनञ्जयोऽसि, सेनापते ! गच्छ खाण्डवप्रस्थम् इन्द्रप्रस्थं कुरु ।

अर्जुनः—मातः ! भगवद्दर्शनसम्पत्तिरेव मम सम्पत्तिः, नाहं नगरं पुरं वा इच्छामि ।

गङ्गा—कुरुकुलशिरोमणे ! अहं त्वाम् अनुजानामि ।

भीष्मः—जननि ! पौत्राय आशीर्वचनं याचे ।

गङ्गा—वत्स अर्जुन ! त्वं न केवलं महासेनाप्रणेतासि, प्रत्युत मूर्धाभिषिक्तानां जनकोऽपि । समीपमागच्छ, सर्वे समीपं गच्छन्ति । गंगा क्रमशस्तेषां शिरांसि स्पृशति, जिघ्रति गच्छति च ।

मुहूर्तानन्तरं सर्वे स्वस्थाः भवन्ति ।

भीष्मः—अपश्यतां भवन्तौ मम जननीम्

अर्जुनः—समुचितसमादरेण कौतूहलेन च भगवन् !

भीष्मः—मदीया जननी द्वादशवर्षान्तराले मां पश्यति सदैव । एकं रत्नपूर्णं कुम्भं ददाति च । परन्तु अयं महाकुम्भः सर्वथा अदृष्टपूर्वः । महासेनापते ! धन्योऽसि । ईदृशीं कृपां मदीया जननी कदापि नाऽकरोत् ।

अर्जुनः—ईदृक्स्नेहसंस्मरणार्थम् अहम् एकं महाजनमेलापकम् आयोजयामि भगवन् !

भीमसेनः—प्रत्येकं द्वादशवर्षेषु ?

अर्जुनः—परिश्रुतोऽस्मि ।

भीष्मः—एवमस्तु ।

साप्ताहिक-गाण्डीवतः साभारं गृहीतोऽयं लेखः इति—मधुपः ।

आप 'भारती' के लिए क्या कर सकते हैं ?

१. १०) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सम्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६. भारती' के अभिकर्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय-समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए ।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए । हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिए अग्रसर ही रहेंगे :

व्यवस्थापक

राधेश्याम उपाध्याय

श्री शङ्कर आर्ट प्रिन्टर्स, त्रिपोलिया बाजार, जयपुर-२

राजस्थान में किसान शोषण से मुक्त

* * *

राजस्थान देश में क्रान्तिकारी भूमि सुधार लागू करने में अग्रणी है। राजस्थान किसान अब शोषणकारी बिचोलियों के चंगुल से पूर्णतः मुक्त हैं।

भूतपूर्व राजा महाराजाओं की लगभग ६० हजार एकड़ भूमि अधिगृहीत करने के आदेश दिये जा चुके हैं।

राज्य में भूमिहीन कृषि श्रमिकों तथा समाज के अन्य कमजोर वर्ग के लोगों को लगभग १०.७० लाख एकड भूमि आवंटित की गई है।

अब तक भूमि सीलिंग के ९९ प्रतिशत मामले निपटा दिये गये हैं। ४.९१ लाख एकड़ अवाप्त भूमि में से २.८४ लाख एकड भूमि ५०,००० से अधिक व्यक्तियों में वितरित हो चुकी है।

* * *

राजस्थान सरकार द्वारा प्रसारित

विश्ववार्ता

तैलोत्पादकराष्ट्राणां विश्वस्यार्थनीतौ प्रभुत्वम्

श्रीकलानाथशास्त्री, उपनिदेशको भाषाविभागे, जयपुरम्

विश्वस्य राजनीतावर्थनीतौ चाद्यत्वे यदि किमप्येकं तत्त्वं सर्वाधिकं प्रभावशालित्वेन वर्णयितं शक्यं तर्हि तत् 'पेट्रोल' तैलं वर्तते। विकसितेषु विकसत्सु च राष्ट्रेषु प्रावैधिक-यान्त्रिकाद्युन्नतिसमंकालमेव पेट्रोलतैलप्रयोगो न केवलमनिवार्य एवापितु सततं वर्धमानोऽप्यस्ति। अत एव हि पेट्रोलतैलोत्पादकदेशानां प्रभुत्वं विश्वराजनीतावनुदिनं वर्धमानमस्ति।

पेट्रोलतैलोत्पादकैर्देशैरेकं संघटनं निर्माय, तैलस्यास्य मूल्ये च निरन्तरं वृद्धेर्निर्णयं कृत्वा विश्वस्यार्थनीतिः सततं प्रभाविता। संयुक्ततैलनीतेः सर्वप्रथमः संधिः १९६८ वत्सरे समभवत्। तदनन्तरं सततं तैलमूल्येषु वृद्धिः क्रियतेऽमीभिः। एतस्य सर्वाधिकः प्रभावो विकसितेषु विकसत्सु च देशेषु संजायते। एतस्य फलस्वरूपं विकसितराष्ट्राणि पेट्रोलस्य वैकल्पिकानि साधनानि सततमन्वेष्टुं तत्पराणि, पैट्रोलस्य राष्ट्रीये प्रयोगे यथाऽनुदिनं ह्रासो, मितव्ययश्च भवेत्तथा च प्रयतमानानि सन्ति।

गतदिवसेषु १९७७ वत्सरस्य प्रथमदिनमारभ्य पुनस्तैलमूल्येषु वृद्धिरासीच्चिकीर्षिता देशैरमीभिः किन्तु देशेष्वेषु कथंचन मतभेदः समजायत। सऊदी अरबदेशः, संयुक्त-अरब-अमीरातराष्ट्रं च केवलं ५% वृद्धिमवाञ्छताम्, अन्यानि राष्ट्राणि च १०% वृद्धिम्। कतारप्रदेशदेशानामेषां गतदिवसेष्वेकं समेलनमप्यध्यविशत् परन्तु मूल्यवृद्धावैकमत्यं नाभूत्। सऊदी-अरब-सयुक्तअरब-अमीरातयोस्तैलमूल्यान्यन्यदेशापेक्षया ५% स्वल्पानि सन्तीति पाश्चात्यराष्ट्राणि द्वयोरनयोर्देशयोस्तैलमेव समधिकं क्रीणन्ति, अन्येषु देशेषु च तैलव्यापारः क्षीयते। समस्तानामेषां राष्ट्राणां दैनिकतैलोत्पादनं अर्बुदद्वयषडशीतिकोटि (२.८६कोटि) पात्राणामस्ति यस्मिन् १० लक्षपात्रमितं तैलं सऊदी-अरबदेशेनोत्पाद्यते। एवं हि सऊदी-अरबदेशः सर्वाधिकतैलोत्पादकः। तैलोत्पादकराष्ट्राणामासीदनुमानं यत्पेट्रोलस्यानिवार्यत्वने हेतुना बाह्यराष्ट्राणि अधिकाधिकमूल्येनापि तत् क्रेष्यन्त्येव। फलतो बहूनां पाश्चात्यराष्ट्राणाँ वार्षिकव्ययः सुतरां वृद्धिमगात्। किन्तु पेट्रोलप्रयोक्तृदेशैरपि तैलप्रयोगे ह्रासं मितव्ययं च कृत्वा शनैः शनैरेतस्य याच्ञायां न्यूनताऽवलम्बिता, येन तैलोत्पादकराष्ट्राणां निर्यातेषु स्वल्पता समागता, फलतश्च तेषामपि, सततमेधमाना समृद्धिः शैथिल्यमगात्। एतेनैव कारणेन देशद्वयं ततोऽप्यधिकां मूल्यवृद्धिं न हितकरीं मन्यते। राजनैतिकानामनुमानमस्ति यत्तैलोत्पादकराष्ट्रेष्वनेन मतभेदेन विश्वस्यार्थनीतौ यदेतेषां सुमहत् प्रभुत्वं समेधितमासीत् तत्ताहशं न स्थास्यति, आहोस्वित् एते सर्वान् मतभेदान् समाप्य, पुनरप्यैकमत्यमङ्गीकरिष्यन्ति येनैतेषामेकोऽधिकारो नापक्षीयेत।

◆

श्रीः

सम्पादकीयम्—

दीनानाथत्रिवेदी मधुपः
सम्पादकः

श्रद्धाञ्जलिः

सखेदमिदमावेद्यते यद् फरवरीमासस्य ११ तारिकायां **राष्ट्रपतिः श्रीफखरुद्दीन-अली-अहमदः** सहसा हृदयगतेरवरोधेन दिवमुपगतः। दुःखावहे चास्मिन्नवसरे कार्यवाहको राष्ट्रपतिः श्री बी० डी० जत्तीमहाभागः प्रधानमन्त्रिणी श्रीमती इन्दिरागान्धीमहोदया च राष्ट्रपतिभवनस्य सभाभवने तदीयशवोपरि पुष्पाञ्जली समर्पयताम् ।

दिवंगताय तस्मै च शोकमग्नस्य राष्ट्रस्यास्य विभिन्न-संस्थाभिः शोकसभासु श्रद्धाञ्जलयः सादरं समर्प्यन्त । ततश्च फरवरीमासस्य १३ तारिकायां दिनस्य तृतीये प्रहरे राजकीयसैनिक–सम्मानेन सह सुन्नीमुस्लिमरीत्या च नवदिल्यां जामामस्जिदस्य परिसरे तदीयोऽन्तिमः संस्कारोऽक्रियत । सम्प्रति भारतीपरिवारोऽपि दिवंगतात्मने तस्मै-श्रीफखरुद्दीन-अली-अहमदाय हृदयेन श्रद्धाञ्जलिमर्पयतीति—

—मधुपः

उदयपुरस्थित-राजस्थानसाहित्याकादम्या

वार्षिकोत्सवः

साहित्यकार–सम्मान–समारोहश्च

सुविदितमेवेदं तत्रभवतां भवतां विपश्चितां यदद्यफरवरीमासस्यास्य १ तारिकायामिह राजस्थानस्य राजधान्यां जयपुरनगर्यां राजस्थानसाहित्यसंगमस्य त्रिदिवसीयो वार्षिकोत्सवः सोऽयं शिक्षामन्त्रि–**श्रीमोहनछंगाणी**महाभागस्याध्यक्ष्ये तथा शिक्षाराज्यमन्त्रिणः **श्रीफारुकहसनमहाभागस्य** च विशिष्टातिथ्ये महता समारोहेण साधु समपद्यत ।

समारोहे चास्मिन् चत्वारः साहित्यकाराः पुरस्कृता अक्रियन्त । तथा विश्वविद्यालय-महाविद्यालय-विद्यालयानाञ्च छात्रच्छात्राभ्यश्चापि पुरस्काराः प्रादीयन्त ।

तत्र विशिष्टसाहित्यकाररूपे सम्मानिता विद्वांसश्च सन्त्येते । यथा हि (१) काशीस्थ–

हिन्दुविश्वविद्यालये हिन्दीविभागाध्यक्षः डा० श्रीभोलाशङ्करव्यासमहोदयः। (२) श्रीसरावत—सारस्वतमहोदयो जयपुरस्थः। (३) संस्कृतस्य विद्वान् पण्डित-श्रीगणेशरामशर्मा डूँगरपुरस्थः। (४) उर्दू भाषाया विद्वान् श्रीप्रेमशङ्करः श्रीवास्तवो जोधपुरस्थश्च।

तथा नवोदितप्रतिभानां प्रोत्साहनार्थञ्च साहित्यसंगमेनानेन वर्षेऽस्मिन् विश्वविद्यालय—महाविद्यालयस्तरीय-निबन्धप्रतियोगितायां प्रथमं द्वितीयञ्च स्थानं यैरपि छात्रैर्याभिश्च छात्राभिर्लब्धं तेभ्योऽपि पुरस्काराः प्रादीयन्त। यथा हि—

(१) जोधपुरस्थ—विश्वविद्यालयस्य श्रीराजेन्द्रः (छात्रवर्गे) प्रथमः। (२) नाथद्वारस्थ—राजकीय-महाविद्यालयस्य अर्चनातैलंगः (छात्रावर्गे) प्रथमः। विद्यालयस्तरीयनिबन्धप्रतियोगितायाञ्च-(१) बाडमेरस्थ-राजकीयोच्चमाध्यमिक-विद्यालयस्य श्रीनरेन्द्रकुमारस्तापड़िया (छात्रवर्गे) प्रथमः। (२) राजगढ (चुरू) स्थितोच्चमाध्यमिक-विद्यालयस्य श्रीवेदप्रकाशो द्वितीयः।

तथा छात्रावर्गे च (३) जयपुरस्थ—राजकीयमहाराज—बालिकोच्चमाध्यमिकविद्यालयस्य सुश्रीमञ्जुलशर्मा प्रथमः, एवम् (४) अजमेरस्य श्रीमञ्जुशर्मा द्वितीयः। इति।

अपि च साहित्यसंगमस्यास्याध्यक्षवर्यैः **श्रीविष्णुदत्तशर्ममहोदयैः** स्वागतभाषणं कुर्वद्भिः प्रतिपादितं यत्—महतः प्रमोदस्यास्त्ययं विषयो यत् सेयं साहित्याकादमी स्वजीवनस्य १८ अष्टादशवर्षाणि समतीत्यैकोनविंशतितमेऽभिनवे वर्षे सम्प्रति प्रवेशं कुर्वाणा वर्तते। श्रीमतां विपश्चितामेतदपि सुविदितमेव भवेद्यत् १९५८ तम ईशवीयाब्दे जनवरीमासस्य २८ तारिकायामस्या अकादम्याः स्थापना-राजस्थानस्य साहित्यिकं जीवनं गतिमयं विधातुं तथा भावात्मकैकतायाश्च सुविकासार्थञ्चैकं सशक्तं मञ्चं प्रस्तोतुं समभूत्। १९६२ तमे चेशवीयाब्दे नवम्बरमासे राज्यसर्वकारेणास्याः कृते स्वायत्तता प्रत्ता। ततश्च सेयमकादमी स्वोद्देश्यानां पूर्त्यै राजस्थानस्य साहित्यिक-पुनर्जागरणे महत्त्वपूर्ण भूमिकां निरवहत्। अकादम्या वार्षिकप्रतिवेदनानामवलोकनेन स्पष्टमिदं विज्ञात भविष्यति यदकादमी स्वोद्देश्यानां पूर्त्यर्थं समधिकं प्रायतत, साहित्यकाराणां कृते च सशक्तं मञ्चं प्रायच्छत्। इदानीञ्च सेयमकादमी विविध—साहित्यिक-प्रवृत्तीनां साफल्येन सञ्चालनं कुर्वाणा वर्तत इति।

किञ्चान्तेऽकादमीनिदेशकैः **डा० श्रीराजेन्द्रशर्ममहाभागै**र्वार्षिकोत्सवस्यास्य त्रिदिवसीयकार्यक्रमस्य विवरणं प्रास्तूयतेति शम्।

❖ ❖ ❖

बालोपयोगिनी लघुकथा

१३–चण्डकर्माख्यराक्षसद्विजयोः कथा

श्रीपद्मशास्त्री माण्डलगढ़ः (राज०)

वसति स्म वनोद्देशे
चण्डकर्मा च राक्षसः ।
समासादितवान् विप्रं
भ्रमन् कानने हि सः ।।१।।

किसी वन में चण्डकर्मा नामक राक्षस रहता था। जंगल में घूमते हुए उसे एक ब्राह्मण मिला ।। १ ।।

तस्य स्कन्धे समारुह्य
प्रोवाच स द्विजं प्रति ।
ब्राह्मणोऽपि भयत्रस्त-
स्तमादाय च प्रस्थितः ।।२।।

उस ब्राह्मण के कन्धे पर चढ़कर उस राक्षस ने ब्राह्मण को कहा। वह भयभीत ब्राह्मण भी उसे लेकर चल दिया ।। २ ।।

पादौ दृष्ट्वा राक्षसस्य
कमलोदरकोमलौ ।
ब्राह्मणः राक्षसं प्राह
कथमेषा दशा तव ।।३।।

राक्षस के कमल के समान कोमल पैरों को देखकर ब्राह्मण ने कहा—तुम्हारी यह दशा कैसे हुई ।। ३ ।।

नार्द्रपादश्च धरणीं
स्पृशामीति व्रतं मम ।
तच्छ्रुत्वा तत्सरः प्राप्तं
मोक्षोपायं विचिन्तयन् ।।४।।

राक्षस ने कहा—मैं गीले पैरों से पृथ्वी को नहीं छूता हूँ यह मेरा नियम है। यह सुनकर वह सरोवर प्राप्त हुआ, उससे छूटने का उपाय सोचता हुआ ।। ४ ।।

राक्षसेन द्विजः प्रोक्तः
स्नानपूजाविधिर्मम ।
यावत्समाप्ति नो यायात्
तावत्त्वं सुस्थिरो भव ।।५।।

राक्षस ने ब्राह्मण से कहा–जब तक मेरी स्नानपूजा समाप्त नहीं हो जाती तब तक तुम अच्छी तरह यहां बैठे रहो ।।५।।

द्विजस्तु चिन्तयामास
नार्द्रपादैश्च धावति ।
राक्षसोऽयं व्रतभ्रंशा—
दहं गच्छामि साम्प्रतम् ॥६॥

ब्राह्मण ने विचार किया कि यह राक्षस गीले पैरों से नहीं चलेगा क्योंकि इसका व्रत भंग हो जायेगा अतः मैं जाता हूँ ॥ ६ ॥

नायं पृष्ठगतो रक्षो
व्रतभंगभयादयम् ।
तस्मान्मुक्तो द्विजश्रेष्ठः
तदा दैववशादयम् ॥७॥

यह राक्षस अब व्रत भंग के भय से मेरे पीछे नहीं आयेगा । इस प्रकार भाग्यवश वह ब्राह्मण उस राक्षस से मुक्त हुआ ॥ ७ ॥

सौन्दर्य-गीतम्

ऋतवो ललिताः पुष्पं ललितम्,
त्वत्तो ललितं किमपि न ।

वर्षर्तौ गगने तडिद्द्युतिः
ललितललितोषायां घनगतिः
वसन्ते मधुराऽलिकुलविरुतिः
फुल्लितविटपिवल्लीदलनर्तिः

भवहारि हंस-गमनं प्रथितम्,
त्वत्तो ललितं किमपि न ।

तिर्यगिन्द्रचापो मनोहरः
निशाया राजाऽस्ति सुधाकरः
नवलरागेण पल्लवो वरः
हिमगिरिश्चिरं श्वेतताधरः

देशेषु प्रासादेषूषितम्,
त्वत्तो ललितं किमपि न ।

—श्रीइन्द्रमोहनसिंहः
संस्कृतविभागे
सागरविश्वविद्यालयस्य
(म० प्र०)

तेजी से बढ़ती हुई हमारी अर्थ-व्यवस्था

भारत की अर्थ-व्यवस्था तेजी से आगे बढ़ रही है। मुद्रा-स्फीति पर रोक लग गयी और वह बढ़ने की बजाय घटने लगी है। मूल्यों में स्थिरता आ गई है।

- अनाज का उत्पादन 11 करोड़ 80 लाख मो० टन के शिखर तक पहुँच चुका है; इस समय देश के पास लगभग 1 करोड़ 80 लाख टन अनाज का भण्डार है।
- चालू वित्त वर्ष के प्रारम्भिक छः महीनों में औद्योगिक उत्पादन की वृद्धि दर लगभग 12 प्रतिशत थी जबकि गत वर्ष इसी अवधि में यह दर केवल 3 प्रतिशत थी। अनुमान है कि 1576–77 में औद्योगिक उत्पादन पिछले वर्ष से लगभग 10 प्रतिशत अधिक होगा।
- अप्रैल–सितम्बर, 1975 के मुकाबले 1976 की इसी अवधि के दौरान बिजली के उत्पादन में 16.4 प्रतिशत वृद्धि हुई है।
- भारतीय निर्यात में अप्रैल–अक्तूबर, 1976 के दौरान 33.9 प्रतिशत की रिकार्ड वृद्धि हुई। इसी अवधि में आयात में 90 प्रतिशत की कमी हुई।
- विदेशी ऋणों के भुगतान में काभी सुधार हुआ है। स्वतन्त्रता प्राप्ति के बाद पहली बार विदेशी मुद्रा की राशि 2500 करोड़ रुपये की सीमा से बढ़ी है।
- सार्वजनिक क्षेत्र में उत्पादन लगभग 12 प्रतिशत हुआ है।
- रुपये की क्रय शक्ति में 17 से 21 प्रतिशत तक की वृद्धि हो गई है।

इन उपलब्धियों से यह साफ जाहिर होता है कि हमारी जनता और सरकार इस विशाल और प्रतिशील राष्ट्र के समस्त साधनों का पूरा फायदा उठाने के लिये कृतसंकल्प है।

डीएवीपी 76886

कालिदासविरचितम् "कुमारसंभवम्"

हिन्दीपद्यानुवादः

अनुवादकः–श्रीसत्यनारायणशर्मा साहित्याचार्यः

प्रथमः सर्गः

पूर्वाऽनुवृत्तम्—

(२४)

तया दुहित्रा सुतरां सवित्री– स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दा– दुद्भिन्नया रत्नशलाकयेव ।।

मेना कन्या के ज्योतिर्मय देहदण्ड से अतिशय दीप्त ।
मेघाञ्चल-समसंशोभित थी विद्युत् ज्योति वितानालिप्त ।।

(२५)

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ।।

शशिलेखा-सी दिन-दिन बढती चढ़ती गौरी नव्यप्रभा ।
चन्द्रकला के विविधविवर्तन-सी बढ़ती लावण्य विभा ।।

(२६)

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ।।

बन्धुजनों ने उसे पुकारा पार्वती-शुभनाम सहर्ष ।
'उ मा' न जा तप को यह मां का वाक्य उमा का नामोत्कर्ष ।।

(२७)

महीभृतः पुत्रवतोऽपि दृष्टिः तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसंगा ।।

पुत्री पर अनिमेषदृष्टि भी तृप्त न था सुतवान् हिमवान् ।
क्योंकि पुष्पप्राचुर्य न रोके अलिरसाल आदानप्रदान ।।

(२८)

प्रभा महत्या शिखयेव दीपः त्रिमगयेव त्रिदिवस्य मार्ग. ।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ।।

उज्ज्वल लौ से दीप-तुल्य वह स्वर्गङ्गा से स्वर्ग-समान ।
शुद्धगिरा से बुधजन-सा था पूत अलङ्कृत कन्यावान् ।।

(२९)

मन्दाकिनी सैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ।।

सिकता स्तूपों से गंगा के, गेंदों से, गुडियों से, वह ।
बाल्यामोद भोग करती थी सखिसंग क्रीड़ा सुख में बह ।।

(३०)

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ।।

पूर्वजन्म की विद्याएं विदुषी बाला ने लीं तत्क्षण ।
हंस शरद् में गंगा को ज्यों, करे दवा निशि ज्योतिग्रहण ।।

(३१)

असंभृतं मण्डनमङ्गयष्टे- रनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यक्तिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे ।।

अंगों की उन्मुक्त बनावट छिटक रही थी मदक्रिया ।
कामदेव का कुसुमभिन्न शर यौवन उसने संग लिया ।।

(३२)

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ।।

पार्वती का पूर्णरूप नव-यौवन ने तब निखराया ।
कूंची के कोमल चित्रण सा, अंबुज-सम रवि-विकसाया ।।

(३३)

अभ्युन्नताङ्गुष्ठनखप्रभाभि- र्निक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ।।

नख-लालिमा उगलते-से वे अंगुष्ठों से युगल चरण ।
स्थलपद्मों की सुन्दरता का करते थे व्याकुलीकरण ।।

(३४)

सा राजहंसैरिव संनताङ्गी गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै- रादित्सुभिर्नूपुरसिञ्जितानि ।।

जालपाद के लास गमन को अपनी गति में भर-भर कर ।
नूपुर के नादों से गौरी चलती थी लज्जित कर कर ।।

(३५)

वृत्तानुपूर्वे च न चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये ।
शेषाङ्गनिर्माणविधौ विधातु–र्लावण्य उत्पाद्य इवास यत्नः ।।

वर्तुल, समुचित रूप युक्त जंघाएं उसकी मांसल थीं ।
इस रचना में मानो विधि की अत्युत्कण्ठा संबल थी ।।

(३६)

नागेन्द्रहस्तास्त्वचि कर्कशत्वा– देकान्तशैत्यात्कदली विशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ।।

कर भी करि का कठिन बना, केला न अकेलापन तजता ।
तो रुचिर रूप भी दोनों का कैसे ऊरुस्थल-सा सजता ? ।।

(३७)

एतावता नन्वनुमेयशोभि कांचीगुणस्थानमनिन्दितायाः ।
आरोपितं यद् गिरिशेन पश्चादनन्यनारीकमनीयमङ्कम् ।।

अम्बा के नितम्ब बिम्बों की केवल शोभा है अनुमान ।
जिनको शिव की पूत गोद में मिला बाद में उत्तम स्थान ।।

(क्रमशः)

भारती

R. J. No. 26179
Licence. No. PP.'
'Licenced to Post.
Without prepayment

सूक्ति-सुधा

[पञ्चत्वसंख्योपदिष्टमुद्दिश्य]

दीनानाथत्रिवेदी 'मधुपः' सम्पादकः

न्यायोपार्जितवित्तस्य विभागं पञ्चधात्र यः ।
करोति स जनो नूनं परत्रेह च मोदते ॥

जो मनुष्य इस संसार में अपने न्यायोपार्जित धन का पांच प्रकार से (या पांच भागों में) विभाग करता है, वह निश्चय से इस लोक और परलोक में सुखी रहता है। यथा—

धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥ (भाग०)

जैसे—

जो पुरुष धर्म, यश, अर्थ, काम और आत्मीयजन—इन पाँचों के लिए अपने धन का विभाग करदेता है, वह इस लोक और परलोक-दोनों में सुखी होता है।

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर ३०२००३।
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित दूरभाष: ६१७६७

भारती

संस्कृत-मासपत्रिकायाः


श्री बद्रीनाथः
श्री द्वारका
गन्नाथः
रामेश्वरः

ाघः
र्षम् २८
ङ्कः ४

फरवरी
१९७८

ा-निनाद संहृष्टा ज्ञानामृतरसप्रदा ।
ाणी मोदतां मूकं वावदूकं करोति या ॥

—श्रीरामगोपालशास्त्री, जयपुरम्

वार्षिकमूल्यम् दशमुद्राः १०.००
एकप्रतेः—एकं रूप्यकम् १.००

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आंध्र-उत्तरप्रदेश-

बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र०सं०	विषया।	निबन्धारः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	१३३
२.	मासावतरणम्	" " "	"
३.	हिन्दी-उर्दू उभे एव स्वसारौ	क० स्व० भट्टश्रीमथुरानाथशास्त्री, जयपुरम्	१३४
४.	'जयपुर' नगरे संस्कृतसाहित्याभिवृद्धिः	डॉ० श्रीप्रभाकरः शास्त्री, जयपुरम्	१३६
५.	राजस्थानराज्यस्य शिक्षामन्त्री श्रीभंवरलालशर्मा	श्रीगङ्गाधरद्विवेदी, जयपुरम्	१४०
६.	मदीया सोवियतयात्रा	श्रीपद्मशास्त्री, जयपुरम्	१४१
७.	देशवार्ताः	श्रीगङ्गाधरद्विवेदी, जयपुरम्	१४५
८.	सम्पादकीयम्	श्रीदीनानाथत्रिवेदी मधुपः	१४८
९.	श्रीमत्कविकुलचूडामणिमहाकवि-कालिदासविरचितम् महाकाव्यम् कुमारसम्भवम्	अनुवादकः-श्रीसत्यनारायणशर्मा, साहित्याचार्यः, कोटा	१५२
१०.	विश्व-वार्ताः	श्रीकलानाथशास्त्री, जयपुरम्	१५४
११.	आयुर्वेदस्तम्भः	श्री बा० बा० नटराजशास्त्री तिरुचिरापल्ली	११३
१२.	रामस्य वनगमनम्	श्रीरघुवीरस्वरूपभट्टः, कांकरोली	१६०
१३.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	१६२
१४.	नारीस्तम्भः	श्रीमती राजेश्वरीभट्टः, जयपुरम्	१६५
१५.	सूक्ति-सुधा	श्रीगंगाधरभट्टः, जयपुरम्	१६६

सम्पादकः
दीनानाथत्रिवेदी मधुपः
साहित्यालङ्कारः

सहसम्पादकः
रामगोपालशास्त्री
जयपुरम्

भारती

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवन
गोपालजी का रास्ता
जयपुरम्-२

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् २८ | माघः, विक्रमाब्दः, २०३४ [फरवरीः, १९७८] | अङ्कः ४

मङ्गलम्

श्रीरामगोपालशास्त्री, जयपुरम्

गायन्ती मधुरं स्वनूपुररवैराकर्षयन्ती मनो
नेत्रापाङ्गविलोकनैरपि सुधां संवर्षयन्ती मुदा ।
रासे या स्वसखीसहस्रसहिता रासेश्वरी नृत्यति
सा वन्दारुजनान् स्वपादनिरतानानन्दयेद् राधिका ॥

* * *

मासावतरणम्

श्रीरामगोपालशास्त्री, जयपुरम्

माघ[१] ! प्रतिष्ठामगमस्त्वमेव—
सुद्घोषयन् योऽघविनाशकारी ।
माघ[२] ! प्रतिष्ठामगमस्त्वमेवं
संमानयन्नेति कविं स माघः[३] ॥

१—मा + अघ ! इति पदच्छेदः । २—माघाख्यः कविस्तत्सम्बुद्धौ "माघ !" इति ।
३—माघमासः ।

हिन्दी-उर्दू उभे एव स्वसारौ

(कविशिरोमणिः स्व० भट्टश्रीमथुरानाथशास्त्री, जयपुरम्)

[भूतपूर्वो भारतीसंपादकः कविशिरोमणि-भट्टश्रीमथुरानाथशास्त्री हिन्दी-उर्दू-संस्कृत-बंगलागुजरातीमराठीपारसीआदि —भाषाणां विद्वानासीत्, संपादकरूपेण प्रायोऽर्धशताब्दीं यावत्कार्यं कुर्वन्नभूदिति सामयिकंसमस्यानामप्यध्ययनमस्य सुगभीरमभूत्। हिन्दी-उर्दू-विवादोपरि तस्य ये विचारा अभूवन्, तान् स एकस्मिन् टिप्पणे न्यबध्नान् किन्तु नैतत् टिप्पणमद्यावधि प्रकाशितम्। भारती-पाठकानां प्रमोदाय तदिदं प्रकाशयितुं गृहीयते सम्प्रति।]

—कलानाथशास्त्री

(तत्पुत्रः)

हिन्दी उर्दू द्वे अपि भारते एव उत्पन्ने, अत्रैव प्ररूढे, अत्रैव च प्रचरिते। अत एव अनयोर्विवादो न कथञ्चिदपि समञ्जसो न च शोभते नूनम्। इमे द्वे अपि भाषे न नाम पृथक् पृथक्। एते हि एकस्यैव वस्तुनो द्वे पार्श्वे। भारते किञ्चित्कालपूर्वं यो ह्यनयोर्भाषयोर्विवादः समभूत्, यस्य वशेन भारतस्य प्रान्तेषु तन्निवासिषु योऽसौ विसंवादो तज्जनितं वैमनस्यमिव चाभूत्तदिदं तात्कालिकशासकानां भेदपूर्णा राजनीतिरेवासीत्। किं कश्चित्साधयितुं प्रभवेद यद् भारताद् बहिर्यूरोपअरबादिदेशेषु ‘उर्दू’ सेयं प्रभाष्यते, अथवा तत्रोत्पन्ना ? सेयं हि भारते एव उत्पन्ना, अत्रत्यैरेव समेधिता, इहत्यैरेव च साग्रह प्रचारिता च। अत एव भारते यदा सर्वप्रान्तीयानामेकता, स्नेहसंवादश्च प्रतिपद प्रचार्यंते तदा अनयोर्भाषयोरपि विवादो न कथञ्चिदपि देशस्य हिताय! भाषयोरनयो’ स्वरूपस्य आपाततो भेद इव प्रतीयते। यतो हि हिन्दी भाषा संस्कृतशब्दबहुला, उर्दू च सेयं पारसीकभाषाशब्दबहुला। अनयोरस्मिन् समये, यदा हि सामाजिकः, जातिसम्बन्धी च सर्वविधोऽपि विवादः सर्वतः समाप्यते, तदा भेदोऽयं समाजस्य न शोभायै नापि वा हिताय।

एतदर्थं सरलः साध्यश्च सोयमुपायोस्ति’ यत् हिन्दीभाषायां ये संस्कृतस्य शब्दाः प्रचलिताः ते उर्दूभाषायां गृह्येरन्। एवमेव उर्दूभाषायां ये पारस्यभाषाशब्दाः संव्यवहृताः ते हिन्दीभाषायां स्वीक्रियेरन्। एवं हि भाषयोरनयोः सोयं जटिलः प्रश्नः समाहितो भवति। आचारे व्यवहारे भोजने वेषभूषादिषु च कामं भवेद् भारतीयानां प्रान्तीयो भेदः, किन्तु मूलतस्तदिदं भारतमेकमेव नूनम्। मध्ये सोयं देशो नानाराज्येषु,

प्रान्तेषु च विभक्तोपि तत्त्वतः समभूदेक एव, वर्तमानेऽपि चैक एव। हिमालयादारभ्य कन्याकुमारीपर्यन्तमद्य सोयं विस्तृतो देशः एकस्यैव राजतन्त्रस्याधीनः। इदमस्मत्कृते महत्सौभाग्यम्। तदिदं सौभाग्यं वयं निष्कण्टकं निर्वाह्याम एतदेव सामयिकं कर्तव्यम्। भारतेऽस्मिन् सर्वासामेव भाषाणां विकासो भारतसर्वकारेण काम्यते, आवश्यकं चापीदम्। अत एव राजनैतिकः सोयं निर्णयः समभूद, यत् शिक्षायां, प्रशासनक्षेत्रेषु च प्रादेशिकभाषाणां प्रयोगः प्रवर्तताम्। किन्तु अखिलभारतीयेषु विषयेषु एकस्या एव भाषायाः सुतरामावश्यकता। अत एव तदर्थं सेयं हिन्दी भाषाऽभून्निर्वाचिता।

न केवलं ममैव, अपि तु बहूनामेव तत्त्वविमर्शिनां सोयं विवेकोऽस्ति यत् उर्दू, किंवा सेयं हिन्दी न नाम पृथग्भाषा। द्वयोरयमेव भेदो यद् हिन्द्यां संस्कृतशब्दाः संमिलिताः, उर्दूभाषायां आरव्य-पारस्यभाषयोः शब्दा नूनम्। उर्दूहिन्दीभाषयोर्व्याकरणं तावदेकमेव। भाषा हि व्याकरणेन परिचीयते पृथकक्रियते च एवं स्थितौ यदि हिन्दी भाषा भाषिणः उर्दूभाषाप्रचलितान् शब्दान् स्वीकुर्युः, एवम् उर्दू भाषाभाषिणश्च हिन्दीप्रचलितान् संस्कृतशब्दांश्च गृह्णीयुस्तर्हि विवादस्याऽस्य न केवलं समाप्तिरेव, अपितु द्वयोर्लाभोऽपि भवेद् भूयान्। यतो हि द्वयोरपि भाषयोरेवं कृते भवेद्विकासः एवं सूक्ष्माणां च, आधुनिकविचाराणां चाप्यभिव्यक्तौ भूयसी सहायता संभवेत्।

एवं सति उर्दूभाषाया हिन्दीभाषायाश्चापि शब्दकोषः प्रकामं प्रवर्द्धेत येन प्रतिदिनव्यवहारविषयेष भवेद् भूयः सौकर्यम्। वर्तमानसमये वैज्ञानिकशब्दानां कृते अंग्रेजी भाषा सेयं भारतीयभाषासु संनिविष्टा तथैव भाषयोरनयोः सर्वविधसौकर्याय संस्कृत-पारस्यभाषयोः शब्दकोषः सहायकोऽस्तु इति को वा विवेकी न संमन्यते।



❀ सोयं विषयो हिन्दी-उर्दू छन्दसां संग्रह-प्रकरणे मया विस्तरेण गृहीतो वर्णितश्च। मल्लिखितस्य "जयपुरवैभवस्य" भूमिकायां द्रष्टुं शक्नुयुर्जिज्ञासवः।

'जयपुर' नगरे संस्कृतसाहित्याभिवृद्धिः

[डॉ० श्रीप्रभाकरः शास्त्री, जयपुरम्]

प्रस्तावना–खण्डम्

एलवर्टभवनं, विचित्रवस्तुभवनं (म्यूजियम) श्रीमानगुल्मटिका[1] (स्टेच्यू सर्किल) रामबागहर्म्यमला, लालडूंगरी, मोतीडूंगरी, गालवाश्रमः (गलता), नवघट्टः (नयाघाट), झाडखण्डः, रावलजलबन्धः (रावलजी का बन्धा), पुराणघट्टः (पुरानाघाट), घट्टहनुमान् (घाट के बालाजी), प्रभातपुरीनिर्झरः (प्रभातपुरी का खोला), ब्रह्मपुरी[2], गणेशगढं,[3] जयदुर्गम्, आम्बेरनगरी—तत्र च दर्शनीयानि भूतेश्वरमन्दिरं, छीलाबायः, वराहीदेवीमन्दिरम्, बटुकभैरवालयः, जगत्शिरोमणिमन्दिरम्, नरसिंहमन्दिरं, हर्षनाथभैरवमन्दिरम्, रत्नाकरसागरः, बाईजीराज्ञ्याः निकेतनं (बाईजी की साल), शिलामातामन्दिरं, पुरातनानि राजहर्म्याणि इत्यादीनि बहूनि सन्ति । एवं जयपुरराज्यान्तर्गतेषु अन्यस्थानेषु–जमुआरामगढबन्धः,[4] जगदम्बादेवीमन्दिरम्, सवाईमाधवपुरम्, रण-

---

[1] श्रूयते–यत् रामबागोद्यानस्थितायाः हर्म्यमालायाः नैऋत्यकोणे श्रीमानसिंहद्वितीयेन स्वप्रतिमासंस्थापनार्थं यत् स्थानं सुरक्षितमासीत्, तत् 'श्रीमानगुल्मटिका' नाम्ना प्रथितम् । अत एव जयपुरवैभवे भट्टश्रीमथुरानाथशास्त्रिणा अस्योल्लेखः एवमेव विहितः । साम्प्रत तु अत्र जयपुरनगरप्रतिष्ठापकस्य सवायीतिपदधारकस्य श्रीजयसिंहद्वितीयस्य प्रतिमा (प्रस्तरमयी) स्थापिता वर्तते, या हि उत्तरस्यां दिशि मुखं कृत्वा स्थिता वर्तते ।

[2] श्रीजयसिंहदेवेशेन यदा जयपुरनगरं प्रतिष्ठापितं, तदा ये ये ब्राह्मणाः अश्वमेधार्थमाहूतास्तेषु ये सुप्रसिद्धा गुणिनोऽभवन्, महाराजस्य च पूजनीया आसन्, तान् सर्वान् सादरं सप्रश्रयं निवास्य तदुपजीविनस्तत्सार्थीयांश्च पुरुषानपि तत्रैव निवेश्य 'ब्रह्मपुरी' नाम्ना सेयं वसतिः पृथगेव निर्मिता ।

[3] अश्वमेधीययज्ञे पूजितः श्रीगणेशदेवः पर्वते मन्दिरं निर्माय संस्थापितः ।

[4] शैलमन्धौ कर्नलजैकबनिर्मापितः सोऽयं बन्धः (जलबन्धः) तथा कौशलेन रचितो यथा वारिवृद्धौ उपरितः जलनिर्गमेऽपि नाऽस्य भगभयम् । अस्य कुल्याभिरद्यापि बहुक्रोशपर्यन्तं कृषिसेकः समभूत । विद्युतयन्त्रद्वारा जयपुरनगरेऽपि जबप्रबन्धोऽमुष्मादेव क्रियते । अस्मिन् कार्ये पञ्चाशल्लक्षेभ्योऽप्यधिकमुद्राणां व्ययः समजनि । लार्ड इरविनमहोदयेन चास्य उद्घाटनमक्रियत । अत्रैव जयपुरराज्ञां कुलदेवीमन्दिरमपि विद्यते या 'जम्बुवाहिनी' ति नाम्ना प्रथिता वर्तते ।

थम्भोरदुर्गम्, अन्यानि च कतिपयानि स्थानानि साम्प्रतमपि शोभनतया चित्तमावर्जयन्ति ।

साहित्यिकं महत्त्वं—

प्रतियुगं प्रारम्भत एव तस्य परमेश्वरस्य चेतनसृष्ट्या सहैव साहित्यसृष्टिरपि संभवति । तस्य सृष्टौ मानवः सर्वप्रशस्यः प्राणीति मन्यन्ते वैज्ञानिकाः । स हि तस्य परमेश्वरस्य आज्ञापालकः क्रीडनकश्च विद्यते । मानवमात्रस्य प्रक्षिणं सम्पद्यमानाः क्रीडाः, तस्यै परमेष्ठिनः निर्देशनमनुसृत्य सम्भवन्ति । मानवस्तस्य सर्जनकर्तुः यशो गायति विभिन्नेषु स्वरूपेषु च दर्शनं करोति । सोऽयं तस्यैव कौतुकिनः परमेश्वरस्य प्रतिपल सम्पद्यमानानां प्रौढक्रीडानां सुमधुरं साधनमिति गीयते । एवं तस्य सुसम्पन्नस्य मानवसमाजस्य विभिन्नयुगसंचितानां भावनानां, तस्य तुरीयब्रह्मणः परमात्मनश्चानन्तक्रीडानाम् इतिहास एव 'साहित्य' मित्यभिधीयते । तस्मिन् केवल युगस्य कालस्य च भेदो लक्ष्यते । तस्य कौतुकिनः परमात्मनः क्रीडाः यथेच्छं परिणमन्ति । तत्र देशकालादीनां बन्धनं नैव भवति; तथापि तानि कौतुकानि बन्ध-भयविनिर्मुक्तानि नैव भवितुं शक्यानि । देशेन कालेन च सह सम्पर्कसस्थापनं तस्य कृते परमावश्यकम् । अस्माकं भाषा, अस्मदीयं साहित्यम्, अस्माकं पूर्वजानां स्वभावादयः संचितभावानां कोषः एतदखिलं तस्य कौतुकिनः परमेश्वरस्य प्रसन्नतायै समुपस्थापितानि साहित्यरूपाणि क्रीडासाधनानि भवन्ति । एतानि साहित्यक्रीनकानि भाषानुसारि कतिपयेषु भागेषु विभक्तानि दृश्यन्ते । संस्कृतभाषायाश्चापि तेषु अन्यतमं स्थानम् ।

राजस्थानस्य गौरवमये इतिहासे जयपुरस्य स्थानं सर्वोत्तमं विद्यते । हिन्दु-धर्मस्य, हिन्दगौरवस्य, हिन्दस्वातन्त्र्यस्य च रक्षायै ये ये उपायाः सम्पादिताः अत्रत्यैः नीतिज्ञैः धर्मपरायणैः प्रजावत्सलैः भूपतिभिः, ते सर्वेऽपि इतिहासे स्वर्णाक्षरैः समुट्टंकनीयाः सन्ति । समाजस्य गतिविधीन्, देशस्य संस्कृतीः, समाजस्योन्नतीश्चोन्नमयितुं साहित्यस्य महत्त्वपूर्णं योगदानं भवति । जयपुरीयाणां नरेशानामस्मिन् विषये योगदानं स्मरणीयमेव । यस्मिन् समये समस्तो देशो मुगलानां बर्बरताभिः क्रूराभिश्च यातनादिभिः परिपीड्यमान आसीत्, तदैव अत्रत्यैः राजभिः शरीरेण, मनसा धनेन च मर्यादानामपि उल्लंघनं विधाय नीत्या आपत्पयोधौ मग्नं समग्रमपि स्वशासनं रक्तपातादिभिः सर्वथा संरक्षितमिति प्रशंसास्पदम् । मर्यादानुसारं स्वधर्मपरायणानां जनानां धार्मिकस्वातन्त्र्यं सुरक्षीकृत्य स्वप्रयासेषु साफल्यं लब्धवन्तः । एषां शान्तिमये शासने कलाकाराणां, साहित्यिकानां, विद्यावयोवृद्धानां पर्याप्तं सम्मानमासीत् । प्रथितयशसां विदुषां कलाप्रदर्शकाणाञ्चात्र शुभागमनं भवति स्म । सर्वे च ते व्यवहारेण, सम्मानेन च सन्तुष्टा अत्रैव वसति चक्रुरि-

त्यपि श्रूयते । न केवलं संस्कृतभाषा-भाषिणां विदुषामेव सम्मानादिकं भवति स्म, हिन्द्याः, राजस्थानीभाषायाश्चापि विद्वांसः राजाश्रयं लब्धवन्तः ।

हिन्दी भाषायाः साहित्याभिवर्द्धनक्षेत्रे जयपुरे कलाप्रेमिभिः शासकैः केचन सन्ताः सम्मानिताः बभूवुरिति तेषामुल्लेखनं विधीयते—

(१) महात्मा अग्रदासः
(१५७५ ख्रीष्टाब्दः)

(२) महात्मा नाभादासः
(षोडशशतकम्)

(३) महात्मा दादूदयालः
(१५४४ ख्रीष्टाब्दः)

(४) महात्मा रज्जबदासः
(१५६,७ ख्रीष्टाब्दः)

(५) महात्मा सुन्दरदासः
(१५९६ ख्रीष्टाब्दः)

(६) महात्मा गरीबदासः
(१६०३ ख्रीष्टाब्दः)

एते सर्वेऽपि महात्मानः भक्तिसम्प्रदायाचार्या आसन् । एतदतिरिक्तं सप्तदशशतकस्य द्वितीयचरणतः ऊनविंशशतकपर्यन्तम् एषा भाषा डिंगलभाषाप्रभावात् विमुच्य परिष्कृतरूपेण व्रजभाषारूपेण प्रकटिता बभूव । अस्मिन् समये विशेषतः राधाकृष्णस्य प्रेमलीलासमन्वितं साहित्यं विविधाभिः विधाभिः प्रबन्धमुक्तकादिभिः शृङ्गाररसपरिपूर्णं रचितम् । शृङ्गाररससम्राट् कविवरो बिहारीलालः (१६०३ ई०) मिर्जाराजाजयसिंहप्रथमस्य सभासद आसीत् ।

हिन्दीभाषायाः विकासे महाराज-स० प्रतापसिंहस्य नामापि चिरस्मरणीयः स्थास्यति । अस्य त्रयोविंशति कृतयः सुप्रसिद्धाः, या "व्रजनिधि" नाम्ना प्रथिताः सन्ति । एतदतिरिक्तं श्रीपद्माकरभट्टः श्रीकुलपतिमिश्रः, श्रीलालकविः (कविकलानिधिः श्रीकृष्णभट्टः) वाणीकविः कविवरमंडनः इत्यादीनां व्रजभाषाकवीनां नामानि जयपुरीयेतिहासे ख्यातानि । नायमस्माकं विषयः, अत एव नात्र विस्तरेण विवेच्यते ।

हिन्दीभाषायाः रचनाभिः सार्द्धं संस्कृतसाहित्यविषयिण्यः बह्व्यः रचनाः रचिताः, याः सर्वाः प्रायशः उपर्युक्ते पुस्तकसंग्रहालये (पोथीखानायाम्) विद्यमानाः स्युरिति अनुमीयते । आसां सर्वासां विवेचनं कर्तुं न शक्यते, अनुपलब्धेः । कतिपयानाञ्च विवेचनं विधास्यते अग्रे ।

संक्षेपतो वक्तुं शक्यते, यत् जयपुरं शिक्षायाः प्रधानकेन्द्रमासीत् । अत्रत्याः नरेशाः कलासु दक्षाः साहित्यप्रेमिणश्चासन्, यैः स्वशासनकाले विश्रुतविदुषः, कलाकारान्, राजनीतिपटून् सुदूरात् समाहूय, ते ससम्मानमत्रैव वासिताः जीविकाप्रदानादिभिश्च भृशं तोषिताः । तेषां वंशजास्तु साम्प्रतमपि

राज्याश्रयमुपभुंजानाः सन्ति। अयमेव हेतुः यत् 'जयपुर' नाम्नीयं नगरी साहित्यसर्जनाक्षेत्रे सस्कृतिसंरक्षणे च भृशं विश्रुता—"अपरा काशी" तिनाम्ना संस्मर्यते पुराविदैः।

(घ) कछवाहवंशीय-राज्ञां ढुण्डार-प्रदेशे समागमनम्, अम्बापुर्याश्च संस्थापनम्

जयपुरीयराजवंशस्य महत्त्ववर्णनं यदि विस्तरेण क्रियेत, तदा एको महत्त्वपूर्णो ग्रन्थ एव निर्मितो भवेत्। वस्तुतस्तु नायमस्माकं शोधविषयः। केवल सामान्यज्ञानार्थं कच्छपवंशीयानां राजां संक्षेपतो विधीयते विवेचनं, येन तेषां विद्वद्भिः साकं सम्बन्धदर्शनं सारल्येन ज्ञातो भवेत्।

साम्प्रतकालिकाः राजपुत्राः वैदिककालिकानाम् आर्यक्षत्रियाणां वंशजा एव सन्ति। एतेषां क्षत्रियाणां सूर्य-चन्द्राग्निवंशाः स्मर्यन्ते। एष्वपि सूर्यवंशीयाः क्षत्रियाः धर्मात्मानः, दानक्रियानिपुणाः, योद्धारः वीराः, चक्रवर्तिनो देशनेतारः, विश्वमार्गप्रदर्शकाश्चाभूवन्निति पौराणिकाः। भगवतो रामचन्द्रस्य पुत्रस्य कुशस्य नाम्ना प्रसिद्धोऽयं वंशः 'कुशवाहा', ततश्च 'कुछवाहा', साम्प्रतं कछवाहा' इति ज्ञायते एतेषां सूर्यवंशीयेषु कुशवाहावंशीयानां राज्ञां शासनं भारते अयोध्यामारभ्य साकेते, श्रावस्त्यां, रोहितासगढ़े, ग्वालियरनगरे, नरवरे, बरेलीनगरसान्निध्येऽपि अवर्तत। कुशवाहानामेषां पुरातनीभिर्वंशावलीभिः ज्ञायते यदयं वंशः अतिप्राचीनः। 'मुंहता नैणसी री ख्यात' नामके ग्रन्थे लिखितमस्ति—[1]

"कछवाहां री पीढ़ी (वंशावली)। कछवाहा सूरजवंशी कही जे। तयांरी विगत (१) आदि (२) अनादि (३) चांद (४) कंवल (५) ब्रह्म (६) मारीच आदि।"

(क्रमशः)

---

[1] मुहता नैणसी री ख्यात'—भाग-१ पृष्ठ २६१ राजस्थान पुरातत्त्व मन्दिर, जयपुरतः प्रकाशितं प्रथमसंस्करणम्।

राजस्थानराज्यस्य शिक्षामन्त्री

श्रीभंवरलालशर्मा

श्रीगंगाधरद्विवेदी
" सरस्वतीपीठम् " ब्रह्मपुरी, जयपुरम्

जयपुरनगराभिजनः श्रीभंवरलालशर्मा विधिस्नातकपरीक्षां समुत्तीर्य वाक्कीलव्यवसाये संलग्नोऽभूत् ।

विद्याध्ययनसमयादेव सोऽयं राष्ट्रीयस्वयंसेवकसंघस्य स्वयंसेवकतां गृहीतवान् । अतीतेभ्यः पंचदशवर्षेभ्यश्चायं जनसघस्यापि सक्रियः कार्यकृदासीत् ।

जयपुरस्य नगरपालिकायाः निर्वाचने विजयं लब्ध्वा बहुवर्षपर्यन्तमेष नगरपरिषदः अध्यक्षपदमलमकरोत् ।

श्रीशर्मा अत्यन्तं कर्मठः, सिद्धान्तपरायणः, संवेदनशीलः, सेवातत्परः संगठनकर्मणि कुशलः, अतीव अनुभवशीलश्चास्ते ।

जयपुरनगरे एवमेतत्परिधौ जिलामुख्यालयेषु च लक्षाधिकैः परिवारैः सह अस्य पारिवारिकः संबन्धो विद्यते ।

राजस्थानस्य मुख्यमंत्रिणा श्रीशर्मणे शिक्षाविभागं दत्त्वा प्रदेशस्य महानुपकारः कृतः । श्रीभंवरलालशर्मणां कुशलनेतृत्वे प्रदेशस्य शिक्षाविभागः सम्यक् व्यवस्थितायाः उपयोगिन्याश्च शिक्षादीक्षायाः व्यवस्थां कृत्वा, भारतस्य भाविसन्ततेः निर्मातॄन् विद्यार्थिनः शिक्षकांश्च समुचितं मार्गदर्शनं प्रदास्यति ।

श्रीशर्मणा सद्य एव शिक्षासंस्थानां निरीक्षणं तासां सुचारुसंचालनाय च स्वकीयः प्रयत्नः प्रारब्धः । प्रारंभादेव प्रबुद्धस्य कार्यकुशलस्य चास्य नेतृत्वे चायं विश्वासो जायते यत् लोकतन्त्रस्य जीवनाधारभूतः शिक्षाविभागः समुन्नतो यशस्करश्च संपत्स्यते ।

□

मदीया सोवियत यात्रा

(यात्रा-संस्मरणानि)

"पद्म" शास्त्री
32577 राजापार्क जयपुरम्

पूर्वाऽनुवृत्तम्—

शीतस्य भीषणे प्रकोपे सत्यपि तत्रत्या जना बहिरागत्य गृहान्नियमितरूपेण भ्रमन्ति। मारकोनिवासिनां कृते प्रत्येके भवने, प्रत्येके संस्थाने प्रत्येके वाहने शीताद्रक्षार्थं समुचिता व्यवस्था कृता विद्यते। सर्वेषु कक्षेषु तापमानस्य व्यवस्था तथा सर्वेषां नागरिकाणां स्वास्थ्यसंरक्षणाय पूर्णमाश्वासनं सर्वकारद्वारा प्रदत्तम्। प्रत्येकस्य नागरिकस्य कृते नववर्गमीटरं स्थानं तथा परिवारस्य निवासार्थं पर्याप्तं स्थानं प्रदत्तमस्ति। प्रतिदिनं चतुश्शतं नूतनभवनानि निर्माप्यन्ते। भवनानां निर्मितिर्भिन्ना कथं न भवेत् किन्तु कक्षाणां साजसज्जा प्रायः समाना विद्यते। विभिन्नव्यवसायवन्तस्तथा विभिन्नवर्गस्था जना एकस्मिन्नेव सद्मनि निवसन्ति। अत्रत्यं प्रत्येकं भवनं वर्गविहीनसमाजसंरचनाया आदर्शं प्रस्तौति। प्रत्येकनारिकस्य 2½ प्रतिशतं वेतनं भवनस्य कृते व्ययीभवति। प्राकृतिको वाष्पश्चात्राधिक्येनोपलभ्यते। इत्थमेव विद्युत्तथोष्णजलप्रणालकानां व्यवस्थापि स्वल्पमूल्येनोपलब्धास्ति। अतः सोवियतसंघवासिनां कृते स्वजीवनस्यावश्यकतापूर्तये नाधिकस्य धनस्यावश्यकता वरीवर्तते। अत्रत्या परिवहनव्यवस्था न महार्हा ह्यपि तु सर्वसुलभा वर्तते। मास्कोनगरे ट्रामबस–ट्रालीवस तथा भूगर्भयानानां (मैट्रो ट्रेन) चिटिकानां मूल्यं द्वाविंशतिवर्षपूर्वनिर्धारितमेवास्ति। सर्वेषु यानेषु न कोऽपि चिटिकाविक्रेता न कोऽपि निरीक्षको वर्तते। भवान् चिटिकावितरकयन्त्रे कौपेकान् (पणान्) निक्षिप्य चिटिकां गृह्णातु, वाहने चोपाविशतु। न कोऽपि तत्र चिटिकां विना वाहनेषूपविशति। यदीत्थं नाभविष्यत्तर्हि तेषां व्यवस्थेयं समाप्ताऽभविष्यत्।

प्रत्येको नागरिकः स्वराष्ट्रियार्थव्यवस्थां प्रति स्वयमेवोत्तरदायित्वं निर्वहति। तत्र व्यक्तेरधिकं राष्ट्रस्य महत्त्वं वर्तते। यत्र बालकेभ्य राष्ट्रगरिमारक्षणस्य शिक्षा प्रदीयते तत्रैव सर्वं सम्भवम्। अत्र बालकेभ्यो दशमकक्षापर्यन्तमनिवार्यशिक्षा निःशुल्कं वितीर्यते। यदि बालकः प्रतिभाशाली भवति तदैव स उच्चतरशिक्षार्थं छात्रवृत्तिं लभते सम्पूर्णे देशे चिकित्साव्यवस्था निःशुल्का विद्यने।

भोज्यवस्तूनां मूल्यमप्यत्र नाधिकम्। रोटिकाया, दुग्धस्य, नवनीतस्य, कुक्कुटाण्डस्य मूल्यं नास्मद्देशादधिकं किन्तु तत्रत्यं न्यूनतम वेतनं 700 सप्तशतं रूप्यकाणि वर्तते। एतदतिरिक्तं प्रत्येकपरिवारः 75% सर्वकारीयानुदानेन समस्ते देशे भ्रमितुं शक्नोति।

एतदतिरिक्तमत्र विलाससामग्रीणां नितान्तमभावो दरीदृश्यते।

स्तालिनयुगे तु ह्येतादृशसामग्रीणामुपयोगे प्रतिबन्धश्चासीत्। जनाः स्वपरंपरागतां वेषभूषां त्यक्तुं नाशक्नुवन् परं तत्पश्चात्तत्रत्याः प्रबुद्धा नागरिकाः पुराणीमिमां रूढीमत्यजन्। उदारमतावलम्बिनि शासनतन्त्रे सत्यपि न तत्र हिप्पीवादस्य लेशमात्रमपि प्रभावोऽलक्ष्यत। जनानां पार्श्वे रूबलान्यपि वर्तन्ते परं समस्येयं समुपस्थिता यत्ते तानि कथं व्ययीकुर्वीरन्। यतो हि चान्यपाश्चात्यदेशानामिव तत्र विलाससामग्र्यो यथेष्टं नोपलभ्यन्ते।

नागरिकाणां कृते रूबलसञ्चयस्य तत्र नाकर्षणं यतो हि सोवियतव्यवस्थान्तर्गतं स्वसम्पदः स्वोद्योगस्य च नावकाशः। औद्योगिकः श्रमिकः स्ववेतनस्य तृतीयांशं भोजने तथा मद्यपाने 23% प्रतिशतं वस्त्रादिषु व्ययीकुर्वन् केवल 6% प्रतिशतं धनं संरक्षति। स स्ववेतनस्याष्टशत कररूपेण सर्वकाराय प्रयच्छति पर सर्वकारीयसौविध्यरूपेण तस्मादप्यधिक प्राप्नोति। अवशिष्टधनस्योपयोगं ते प्रोन्नतपान्थावासेषु तथा मनोरञ्जनार्थं कुर्वन्ति ईदृग्व्यवस्थायां भ्रष्टाचाराय तस्करवृत्तये च न कुत्रापि स्थानं वर्तते। तत्र श्रूयते यत्कोऽपि जनो दुर्भाग्यादीदृक्कर्म कुर्वन् प्राप्येत तर्हि स कठोरदण्डभाग्भवति।

तथ्यहीनैस्तर्कैः समस्यानां समाधानं न भवति। केचन नीरक्षीरविवेकं विना केवलं दोषानेव पश्यन्ति ते कथयन्ति यत्सोवियतसंघे अमरीका-प्रभावो वर्धते। तत्र रूढिवादस्य साम्राज्यं वर्तते। तत्र छात्रेष्वनुशासनमस्मात्कारणाद्वर्तते यत्ते छात्रवृत्ति शिक्षकाणामाशीर्वादेन प्राप्तुं शक्नुवन्ति। प्रयतमामोऽपि स नामेरिकावदार्थिकसम्पन्नताशिखरमारूढस्तथा प्राकृतिकबाधासु विजयं नाप्नोत्। तत्रापराधा न भवन्ति यतो हि कठोरदण्डस्य भयमस्ति। तत्रत्या लेखकाः सर्वकारस्य समालोचनां न कुर्वन्ति यतो हि तेषामाजीविकायाः स्वतन्त्रप्रबन्धो नास्ति।

समालोचकानामेतेषां प्रश्नानानुत्तराणि दृष्टिभेदसृष्टिभेदसिद्धान्तेष्वाधारितानि वर्तन्ते। विगतवर्षेषु सोवियतसंघकृतां सर्वतोमुखीं प्रगतिं विलोक्य ते समुद्विग्नाः पुंजीवादस्योपनेत्र धारयित्वा प्रश्नानामेतेषां समाधानं नोपलभ्यते। शोषणबलाद्विकसितेन द्विशतवर्षेभ्यो विकासपथमारूढेन राष्ट्रेण सहास्य तुलना कर्तुं नोचिता। स्वभाषया, संस्कृत्या, कलाभिः सहानुरागः स्वाभाविकः सर्वेषाम्। विश्वस्य प्रत्येको देशः भिन्नभिन्नराजनैतिकव्यवस्थया प्रतिबन्धितस्तथा कोऽपि शासन-

सूत्रधारः स्वनागरिकान् स्वच्छन्दतया राजमार्गे विरोधस्यानुमतिं न ददाति। समालोचकाः प्रश्नानामेभिरुत्तरैः सन्तुष्टाः सन्तः प्रगतिपथपथिकानां नूतनस्याभियानस्याभिनन्दनं कुर्वन्तु।

भव्यप्रासादयुक्तं, भौतिकसुखसाधनैः सुसज्जितं सोवियतसंघस्य राजधानी मास्कोनगरमस्ति यस्य गणना विश्वस्य प्रमुखनगरेषु क्रियते। द्विनवतिलक्षजना नगरेऽस्मिन्वसन्ति। अस्यां महानगर्यां चतुस्त्रिंशन्नृत्यगृहाणि, पञ्चसप्ततिप्रकाशगृहाणि, एकसहस्राधिकत्रयोविंशतिपुस्तकालयास्तथाशीतिः शिक्षणसंस्थानानि सन्ति। सुन्दरतमास्तथा विस्तृता राजमार्गाः सुसज्जितान्युपवनानि, आधुनिकतमाः पान्थावासाः सन्त्यत्र एभिः कारणैरेव ह्यपि तु रूसीयानां स्नेहेनातिथ्येन चाकर्षिता पर्यटका अत्रागत्य मोदन्तेतमाम्।

द्वितीये दिने प्रातराशं विधाय वयं "नोवस्ती प्रेस-एजेन्सी" संस्थायाः प्रमुखं कार्यालयं प्राप्ताः। तत्रत्यैरधिकारिभिरस्माकं विधिवत्स्वागतं विहितम्। कुशलक्षेमानन्तरमस्मत्कार्यक्रमेण वयमवगता जाताः। तस्मात् वयं मास्कोनगरदर्शनार्थं प्रस्थिताः।

बोल्गायाः पुत्री मस्कवाकुल्यया परिवेष्टितं मास्कोनगरं विश्वस्य सुन्दरतमनगरेष्वेकं वर्तते। दूरदर्शनकेन्द्रं तथा मुख्यमुख्यभवनानां निरीक्षणं कुर्वन्तो वयं मास्कोविश्वविद्यालयस्य परिसरं प्रविष्टाः। आधुनिकज्ञानविज्ञानयोः पवित्रस्तीर्थो मास्कोविश्वविद्यालयः संसारस्य प्रमुखविश्वविद्यालयेषु मूर्धन्यं स्थानं भजते। अत्रत्या मूर्धन्या भौतिकविद्याविदः स्वाभिनवैः प्रयोगैः प्रगतिशीलविश्वस्य कृते मार्गदर्शकाः सन्ति। विश्वविद्यालयस्य भव्यानि भवनानि तथा कलाकृतीन् वीक्ष्य मानवमनो भावभरितं भवति। विश्वविद्यालयपरिसराद्दृग्गोचरं, मस्कवाकुल्यया परिवेष्टितं, मास्कोनगरस्य विहगमं दृश्यमतीव चित्ताकर्षकं वर्तते। लेनिनपर्वताख्येऽस्मिन्परिसरे नवविवाहिता युवका युवत्यश्च समागच्छन्ति तथा लेनिनस्य स्मृतौ श्रद्धावनता भूत्वा सगर्वं नगरस्यास्य निरीक्षणं कुर्वन्ति यत्र पूर्वं केवलं गिरिजागृहाणि तथा राजप्रासादादतिरिक्तं मलिनवसतीनां साम्राज्यमासीत्तत्रैवाद्य व्यवस्थित, भौतिकसाधनसज्जितं महानगरं नागरिकैर्विनिर्मितम्। हरितशाद्वलैर्वनराजिभिश्च परिवृतेऽस्मिन् स्थले वैदेशिकाः पर्यटकाः सूर्यस्नानाय समुद्यन्ता दृश्यन्ते। तेषां स्वच्छन्दविहारस्य निरीक्षणं कुर्वन्तो वयं लेनिनसंग्रहालयं द्रष्टुमुपागताः।

अपना धन दुगना कीजिए

राष्ट्रीय बचत पत्र
(पंचम निर्गम)
द्वारा

केवल 7 वर्षों में
100 रु० के
200 रु०
हो जाते हैं

अन्य लाभ :
- कर-मुक्त ब्याज
(एक वर्ष में 3,000 रु० तक)
- धन-कर से छूट
(1.5 लाख रु० तक)

अतिरिक्त जानकारी के लिए
सम्पर्क कीजिए :
हमारे अधिकृत एजेन्ट
या डाकघर।

राष्ट्रीय
बचत
संगठन

davp 78/927

देशवार्ताः—

अधिकाधिकारदानस्य प्रश्नः

श्रीगंगाधरद्विवेदी
" सरस्वतीपीठम् " ब्रह्मपुरी, जयपुरम्

राज्यानां केचन मुख्यमंत्रिणः केन्द्रशासनोपरि प्रभावनैपुण्येन सविधानदत्तां स्वीयामधिकारमर्यादामुपेक्ष्याधिकानधिकारान् लब्धुं प्रयतमाना दृश्यन्ते । राज्येषु संप्रत्ययं चर्चाविषयः । इमां प्रवृत्तिमवरोद्धुं प्रधानमंत्रिणा श्रीदेसाईमहोदयेन राज्यशासनं प्रति सामयिकमुद्बोधनं कुर्वता दृढैः शब्दैराक्रोशः प्रकटितः । तेनोक्तं राज्यानि केन्द्रोपरि अधिकप्रभावारोपणार्थं प्रयासं न कुर्युः । केन्द्रसर्वकारः न कस्यापि राज्यस्य बलादारोपितं प्रभाव सहिष्यते, न च स्वयं तादृशं व्यवहारमाचरिष्यति ।

कलिकातानगरे जनतादलेन समायोजितायां एकस्यां विशालजनसभायां तेनोक्तम्ः— गतवर्षे विधानसभानां निर्वाचनेषु अनेकेषु राज्येषु जनतादलमेव विजयं लब्धवान् केषुचिद् राज्येषु अन्यदलान्यपि । पश्चिमबंगे मार्क्सवादिभिर्बहुमतमधिगतम् । इदं सर्वं जनेच्छोपरि निर्भरम् । जनता यस्मै इच्छेत् तस्मै बहुमतं दद्यात् । नायं विवादस्य विषयः । एतेन तु लोकतन्त्रस्यैव आधारः सुदृढो भवति । किंतु राज्ये कस्यापि दलस्य शासनं भवेत्—न खलु तद्दलं स्वकीयेष्वेव हितेषु दत्तावधानं भवेत्—प्रत्युत सर्वैः सह समानं व्यवहरेत् सर्वेषां च कल्याणाय हिताय च प्रयतेत ।

प्रधानमंत्रिणाभिहितं यत् केन्द्रियशासनं सर्वेषामपि राज्यानां समानस्तरं मन्यते । राज्यानामपि इदमेव कर्तव्यम् । अनेन केन्द्रं राज्यञ्चापि सुदृढं भविष्यति । वयं राज्यवादं विहाय परस्परं सहयोगं कुर्याम । समस्तेऽपि देशे राष्ट्रीयां भावनामुत्पादयेम । संविधाने केन्द्रराज्ययोः परस्परसंबन्धस्य व्याख्या पूर्वत एव प्रचलति । राज्यं च सर्वैः सह समानं व्यवहरति नवेति प्रेक्षणाधिकारः केन्द्रस्यैव वर्तते । भारतमिदं संघीयं शासनं नूनमास्ते–किंतु अत्रत्यः संघो भिन्नप्रकृतिकः । यतोऽयमेकात्मकतामादाय प्रवृत्तः । देशस्य एकैको वर्गः क्षेत्रञ्च उत्थानमर्हति । दुस्तरे चास्मिन् कार्ये राज्यानां सहयोगः अपेक्षित एव, नैतेन विना तदिदं कथञ्चिदपि संभवेत् । अतः केन्द्रराज्ययोर्द्वयोरपि सुदृढता आवश्यकी । केन्द्रराज्ययोः संबन्धविषये चर्चायां न कापि हानिः, किंतु सा परस्परं कलहवृद्ध्यै न स्यात् ।

देशस्य शिक्षाव्यवस्थायां परिवर्तनस्य निर्धनवर्गस्य चोत्थानमुद्दिश्य क्रियमाणा चर्चैव संप्रति समयानुगुणा । वयं महात्मनो गांधिनो मार्गमनुसरेम । न कमपि संपीड्य प्रत्युत सर्वैः सह समन्वयं कृत्वैव संचलनमभीष्टम् । इदमपि सिद्धमेव यन्न कोऽपि अस्य देशस्य विनाशं कर्तुं प्रभवति । एतेन सहैव इदमपि संप्रतिपन्नं यत् योऽपि लोकतन्त्रविरुद्धमाचरिष्यति तं जनतैव समुच्छेत्स्यति ।

तृतीयं विश्वपुस्तकमेलकम्

अस्मिन् वर्षे नवदिल्ल्यामायोजिते तृतीयविश्वपुस्तकमेलके 'अखिलभारतीयहिन्दीप्रकाशकसंघस्य' तत्त्वावधाने हिन्द्यां सर्ववर्गगतैः प्रकाशकैः हिन्दीमण्डपस्य स्थापना एका महत्त्वपूर्णा प्रशंसनीया चोपलब्धिः । यतः हिन्द्याः सामान्यप्रकाशकैः सह पाठकानां हिताय प्रायेण सर्वाभिरपि प्रमुखाभिः हिन्दीप्रकाशनसंस्थाभिः परस्परं सम्मेलनार्थं 'हिन्दीमण्डप' एव माध्यमत्वेन उपकल्पितः । तेन देशस्य साहित्यकाराणां, शिक्षाविदां पत्रकाराणां पाठकानां प्रकाशकानां, पुस्तविक्रेतृणां, पुस्तकालयाध्यक्षाणां एकस्मिन् मंचे समुपस्थानं, विचारविनिमयेन संपर्कलाभश्चापि अन्योन्यस्य हिताय संपत्स्यते ।

इतः पूर्वं १९७२ एवं १९७६-वर्षे दिल्ल्यामेव समायोजिते मेलकद्वयेऽपि दर्शकैरनुभूतं यत् भारतस्य प्रधाना लोकभाषा-राजकीया भाषा-राष्ट्रभाषा च आङ्गलभाषैव वर्तते । द्वयेऽप्यस्मिन् मेलके हिन्द्याः अन्यासां च भारतीयभाषाणां पाठकाः प्रकाशकाश्च अतिन्यूनसंख्यायां सम्मिलिता अभूवन् । ये चापि तत्र संगताः ते चापि आङ्गलभाषायाः नेपथ्यचाकचक्ये विलीना इव समभवन् । अतः स्वतन्त्ररूपेण 'हिन्दीमण्डपस्य' निर्माणसंकल्पः सर्वथा श्लाघनीयः । यत्र प्रकाशकसंघः, केन्द्रशासनं-हिन्दीभाषिणो राज्यसर्वकाराः अन्याश्च सार्वजनिकसंस्थाः परस्परं सम्पर्केण लाभान्विता भवेयुः ।

मण्डपस्य इदमपि वैशिष्ट्यं यत् एकतः विश्वविद्यालयस्तरीयविविधप्रकाशनैः सह मांटेसरीकक्षापर्यन्तानां पाठ्यपुस्तकानामुपलम्भो भविष्यति–अपरतश्च देववाण्याः वेद–पुराणोपनिषदैः गीतारामायणादिभिश्च साधं भारतीयसंस्कृतेः, धर्मस्य–दर्शनस्य च विवेचनपराणि विवेकानन्दप्रभृतीनां चिंतकानां पुस्तकान्यपि सुलभानि भविष्यन्ति । नूनं ग्रामोत्थानसंबन्धि साहित्यमपि-प्रचुरमात्रायां मण्डपेऽस्मिन् दृष्टिपथमवतरिष्यति । एतदतिरिक्तमत्र दुर्लभानां पाण्डुलिपीनां प्रदर्शनकक्षमपि पाठकानां ज्ञानवृद्धिं जनयिष्यति ।

मेलकावसरे अ० भा० हिन्दीप्रकाशकसंघः 'हिन्दीप्रकाशनस्य नूतनः आयामः' इति विषयमवलम्ब्य त्रिदिवसीयां गोष्ठीमायोजयिष्यति । अस्य, उद्घाटनं उत्तरप्रदेशस्य मुख्यमन्त्री श्रीरामनरेशयादवः, समापनं च राजस्थानस्य मुख्यमन्त्री श्रीभैरोंसिंहशेखा-

यतो विधास्यति । देशस्य प्रमुखाः प्रकाशकाः, लेखकाः, पत्रकाराः, शिक्षाविदः पाठकाः पुस्तकविक्रेतारश्चात्र समायोजने संमिलिताः भूत्वा हिन्दीप्रकाशनानां प्रगतेः तुलनात्मिकां समीक्षां करिष्यन्ति । भारतीयसंस्कृतेः पृष्ठभूमौ धर्मदर्शनादिप्रकाशनानां हिन्द्यां बाहुल्यं—तथा भाविसंततेः हितार्थं समयानुकूला योजनाबद्धा च पुस्तकप्रकाशनादिविषयिणी चर्चा साहित्यस्य प्रचार-प्रसारे भृशमुपयोगिनी भविष्यतीति विश्वसिमः ।

राजस्थानमन्त्रिमण्डलस्य विस्तारः

साधसप्तमासैः प्रतीक्षितस्य राज्यमन्त्रिपरिषदो विस्तारः अन्ततो वसन्तकाले संपन्नः ।

राज्यपालो महामहिमः श्रीरघुकुलतिलकः राजभवनान्तःसमायोजिते एकस्मिन् साधारणसमारोहे षण्णां केविनेटमन्त्रिणां द्वयोः राज्यमन्त्रिणोश्च शपथाचारं समपूरयत् ।

शपथग्रहणसमारोहे चास्मिन् मुख्यमंत्रिणां श्रीभंरोंसिहशेखावतेन एकैकशः प्रथमं मंत्रिणां ततो राज्यमन्त्रिणां नामानि प्रस्तुतानि । सर्वैरप्येतैः पदस्य गोपनीयतायाश्च शपथो गृहीतः ।

शपथग्रहणात्पूर्वं प्रातः मुख्यमन्त्रिणा अ० भा० जनतादलस्य मन्त्रिणा श्रीरविरायेन सह विचारविमर्शो विहितः । तदनन्तरं संवादप्रेषकाणां समक्ष नाम्नां घोषणा कृता ।

प्रथमोऽयमवसरः यदस्मिन् मंत्रिमण्डले जयपुरेण प्रतिनिधित्वमवाप्तम् । एवमेव कोटानगरस्यापि द्वौ विधायकौ प्रथमतया एव मंत्रिमण्डले समाविष्टौ । शपथग्रहीतॄणां नामानि इमानि संति:—

१—श्रीकैलाशमेघवालः
२—श्रीपुरुषोत्तममंत्री
३—श्रीसूर्यनारायणचौधरी
४—श्रीभंवरलालशर्मा
५—श्रीदिग्विजयसिंहः
६—श्रीजयनारायणपूनिया

श्रीकैलाशमेघवालः यो हि पूर्वं राज्यमंत्री-आसीत्-पदोन्नत्या संप्रति मंत्रिपदे प्रतिष्ठितः । विस्तारमानीते चात्र मन्त्रिमण्डले सांप्रतं द्वादश मन्त्रिणः पञ्च राज्यमंत्रिणश्च समभवन् । मुख्यमंत्रिणा संवादवाहकेभ्यः प्रत्युक्तं यदनुपदमेव-अन्येऽपि त्रयो मंत्रिणः अस्यां परिषदि सम्मिलिष्यन्ति । ये च संसदीयसचिवाः अत्र नियुक्तिमर्हन्ति तेषां नामानि श्वः परश्वो वा घोषितानि स्युः ।

समारोहावसरे लोकायुक्तः श्री आई जी हुआ, राजस्थान उच्चन्यायालयस्य मुख्यन्यायाधीशः श्री ए० पी० सेनः इतरे न्यायाधीशाः तथा जनतादलस्य प्रदेशाध्यक्षः श्रीटीकारामपालीवालः, सांसदाः, विधायकाः उच्चाधिकारिणश्च समुपस्थिता आसन् ।

शपथग्रहणात् प्रागेव जनताकार्यालये सर्वेषां शुभाशंसनं संपन्नम् । श्रीपालीवालेन भाले तिलकं विधाय पक्वेन शर्कराखण्डेन सर्वेषां मुखास्वादो मधुरतां नीतः ।

दीनानाथत्रिवेदी मधुपः
सम्पादकः

विश्वहिन्दूपरिषदध्यक्षाणां महाराणाश्रीभगवत्सिंहमहाभागानां कर्णाटकयात्रा

विश्वहिन्दूपरिषदध्यक्षा श्रीमहाराणाभगवत्सिंहमहाभागा मेदपाट (मेवाड)—कर्णाटकप्रदेशयोः साप्ताहिकीं यात्रां परिसमाप्य स्वावासे परावृत्ताः। अस्मिन्नवसर एते बेलगांव–बुबली–मैसूर–सकलेशपुर–मरकेडा-बैंगलोर-प्रभृतिषु स्थानेषु परिषदा समायोजितासु सभासु जनतां समबोधयन्। तत्रत्यैस्तत्रनिवासिभी राजस्थानाभिजनैश्चैषां महतोत्साहेन स्वागतं विहितम्।

मरकेडा–ग्रामे पञ्चविंशतिलक्षरूप्यकव्ययेन निर्मितस्य शतद्वयरोगिशय्यावतः "आश्विनी अस्पताल" इत्याख्यस्य चिकित्सालयस्योद्घाटनमेभिरनुष्ठितम्। अत्रानेहसि जगद्गुरु—मध्वाचार्य–पेजावर – स्वामिश्री–विश्वेशतीर्थमहाराजानां शुभाशीर्वादोऽपि सम्प्राप्तः।

धारवाडे प्रस्तावितस्य पञ्चसप्ततिसंख्याकरोगिशय्यावतः "सजीवनी अस्पताल" इत्यभिधेयस्य चिचित्सालयस्याधारशिला महाराणामहाभागैः संस्थापिता।

परिषदध्यक्षत्वेनैते पूर्वमपि केरल-तामिलनाड-गुजराताऽऽन्ध्रप्रदेशानां यात्रां कृतवन्तः।

यात्रासु यथास्थानं यथासमयं चैभिः प्रत्तानां भाषणानामयं सार आसीत्—

'स्वस्व-धर्मानुपालनेनैव वातावरणं शुद्धं भवति। सर्वेऽपि हिन्दवः संघटिता भूत्वा स्वधर्मस्य मानवतायाश्च सेवां कुर्युः। विश्वस्मिन् विश्वे योऽस्माकं संमानः स प्राचीनभारतस्यास्ति। नवीनभारतमपि यथा तादृशमेव संमानितं स्थानं प्राप्नुयात्तथाऽस्माभिः प्रयतनीयम्। राष्ट्रेऽस्मिन् हिन्दूनां संख्या ८४%अस्ति, अत एतावद् दायित्वमस्माकमेवेति।

सागरस्य भीषणं ताण्डवम्

आन्ध्रद्राविडयो राज्ययोर्वेलावर्तिभिरखिलैरपि प्राणिभिः सागरस्य यादृशं भीषणं ताण्डवं गतमार्गशीर्षमासेऽनुभूतं न तादृशं गतशतके कदाप्यवलोकितम्। अस्मिन् क्षणनाट्ये सहस्रदशकद्वयतोऽप्यधिकं प्राणा उत्क्रान्ताः। बहूनि कुटुम्बानि एकावशेषाणि नामशेषाणि वा संजातानि। शासनस्य कोटिशो रूप्यकाणि छिद्रमिदं समीकर्तुं व्ययितानि। राष्ट्रिय-स्वयं-सेवक-संघसदस्यः

राजस्थान में पोषाहार कार्यक्रम

नयी पीढी को स्वस्थ बलशाली और साहसी बनाये रखने के लिये सस्ते व पोषक आहार की आवश्यकता है।

इसी उद्देश्य से राज्य की 47 पंचायत समितियों में व्यावहारिक पोषाहार कार्यक्रम चलाया जा रहा है जिसके

170 सामुदायिक उद्यान

598 शाला उद्यान

8636 आंगन बाडी

44 बाल बाडियां

435 महिला मण्डल, और

516 युवक मंडल संगठित रूप से चल रहे हैं।

मध्यान्ह शाला कार्यक्रम में 3 लाख से भी अधिक बालकों को पोषक आहार दिया जा रहा है।

आप भी हरी सब्जियों के लिए आंगन बाड़ी लगाइये और अपने गांव में महिला मण्डल व युवक मण्डल संगठित कीजिये।

राजस्थान सरकार द्वारा प्रसारित

संस्थास्तत्रकार्यरता वर्तन्त एव। अन्यैरपि निरपवादं साहाय्यमाचरणीयम्। भारती-परिवारोऽयमत्र साफल्याय श्रीसर्वेश्वरं प्रार्थयते।

संस्कृतशिक्षाविभागेन समायोजिता क्रीडाप्रतियोगिता

राजस्थान-संस्कृत-शिक्षा-विभागेन समायोजिता क्रीडाप्रतियोगिता दि० ४।१२।७७ तः प्रारब्धा। अत्र पूर्वप्रवेशिकास्तरीय-क्षैत्रीय-क्रीडाप्रतियोगिताया उद्घाटनं श्री-मास्टरआदित्येन्द्रः (वित्तमन्त्री) अकरोत्। अस्या एव राज्यस्तरीयाया अध्यक्षतां श्री-प्रो० केदारः (राज्यगृहमन्त्री) निरवहत्।

प्रवेशिकास्तरीय-क्षैत्रीय-क्रीडा प्रतियोगिता "बीकानेर शाहपुरा-नीमकाथाना-उदयपुर" इत्यस्मिन् केन्द्रचतुष्टये सम्पन्ना।

राज्यस्तरीयाया महाविद्यालय-विद्यालय-क्रीडाप्रतियोगिताया उद्घाटनमुदयपुर-केन्द्रे श्रीजगन्नाथसिहमहतामहाभागः (शिक्षाऽऽयुक्तः) व्यधात्। अस्मिन्नवसरे राजस्थानसस्कृतशिक्षाविभागस्य निदेशकः श्रीडा. रामनारायणचतुर्वेदमहाभागः समुपस्थितानतिथीन् स्वागतवचोभिः सममानयत्। मेवाड-महामण्डलेश्वरः श्रीमहान्तमुरलीमनोहरशरणदेवाचार्यश्च शुभाशीर्वचनैश्छात्रानबोधयत्।

राज्यस्तरीयक्रीडा—प्रतियोगितासु महाविद्यालयानां त्रयोदश (१३) दलानि विद्यालयानां च पञ्चदश (१५) दलानि संमिलितान्यभूवन्। तत्र खेलर्कानां छात्राणां पञ्चशती भागमगृह्णात्। इयं प्रतियोगिता दिनाङ्कः १६।१२।७७ पर्यन्तं प्राचलत्।

महाविद्यालयीय-प्रतियोगितासु सर्वनिपुणतापुरस्कारम् (जनरलचैम्पीयनशिप) उदयपुरस्थो महाराणा-संस्कृतमहाविद्यालयः प्राप्तवान्। विद्यालयीयप्रतियोगितासु च तदर्थं मनोहरपुरस्थ-संस्कृतमहाविद्यालयः प्राथम्यमभजत्।

अस्याः समापनसमारोहो मेवाडमहामण्डलेश्वरश्रीमहान्तमुरलीमनोहरशरणदेवाचार्यमहाभागानामाध्यक्ष्ये समपद्यत। अत्रोदयपुरविश्वविद्यालयस्योपकुलपतिमहाभागो मुख्यातिथिरासीत्।

संस्कृतशिक्षानिदेशकस्य डा० श्रीरामनारायणचतुर्वेदमहाभागस्य सत्प्रयासेन समेषामधिकृतानां च सहयोगेनेयं प्रतियोगिता साफल्यमवाप।

हन्त ! दुर्दैवम् !!

भारती-प्रबन्ध-सम्पादकस्य जनेषु "दादाभाई" इतिविश्रुतस्य कर्मयोगिनः श्रीगिरिराजशर्मण आत्मजः पुरुषोत्तमशर्मा माघकृष्ण-द्वादश्यां मन्दवासरे फर्वरीमासस्य चतुर्थे दिवसे जगदिदं विहाय नामशेषतामुपगत इति महद् दुःखम्।

अयं युवा स्वपितृतुल्य एव विद्वान् कर्मयोगी जनप्रियश्चासीत् । कतिपयदिवसेभ्यः पूर्वमसौ रोगाक्रान्तः समजनि । अबोधेन पुत्रत्रयेणैकया पुत्र्या च समं स्वकलत्रं पितरौ कौटुम्बिकान् मित्रवर्गांश्च संपश्यन्नपि निर्मोह इव चिरायानेहसेऽचिरं निमीलितनयनः सन् स्वचेतनामजहादिति हन्त दुर्दैवम् ।

दिवंगतोऽयमात्मा शाश्वतीं शान्ति तद्विरहितश्च परिवारो दुःखस्यास्य सहिष्णुतां लभेतामिति भारतीपरिवारः श्रीसर्वेश्वरं प्रार्थयते ।

समवेदना

सर्वजनप्रियस्य विदुषः पुरुषोत्तमशर्मणोऽसमय एव लोकान्तरगमनेन खिन्नो जयपुरस्थः श्रीसर्वेश्वरसंसत्परिवारो माघशुक्लाष्टम्यां बुधे (दि० १५ । २ । ७८) सायं शोकसभामायोज्य समवेदनां कुर्वाणो दिवंगताय पूतात्मने शाश्वतीं शान्ति तद्विरहिताय परिवाराय च सहिष्णुतां प्रदातुं भगवन्तं श्रीसर्वेश्वरं प्रार्थयत ।

□ □ □

सुरा वै मलमन्नानां, पाप्मा च मलमुच्यते ।
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ।।—मनुस्मृति ११–९३

सुरा (शराब) अन्न का मल है । मल को पाप कहते हैं । मल-मूत्र जैसे अभक्ष्य पदार्थ है वैसे ही ब्राह्मण-क्षत्रिय और वैश्य आदि सुरा (शराब) रूपी मलको न पीवे—क्योंकि मल-मूत्र तो शूकर (सूअर) आदि पशु ही खाते हैं । मनुष्य नहीं ।

पंजाबी चन्दू हलवाई करांची वाला

प्रधान कार्यालय : १८५ बालकेश्वर रोड, तीन बत्ती, बम्बई-६

दूरभाष—३६३६२५, ३६४७९५

स्थापना-१८९६ शाखायें :—

शाखायें	दूरभाष	शाखायें	दूरभाष
(१) जवेरी बाजार	३१३७२९	(६) वरली नाका	३७२९९६
(२) ग्रान्टरोड	३५१७८०	(७) सायन सर्कल	४७३८८९
(३) कुलाबा	२१३८१३	(८) ठाकुरद्वार	३५५६८३
(४) दादर टी० टी०	४४२०१२	(९) घाटकोपर-वेस्ट	५५२३८०
(५) सूर्योदयस्टोर्स, चर्चगेट	२९१९७	(१०) अकबर अलींसफोर्ट	२५३९२१-२२

कारखाना : चन्दू भवन, ग्रान्टरोड, बम्बई-७ दूरभाष—३७२६२८ और ३७०७३३

श्रीमत्कविकुलचूडामणिमहाकविकालिदासविरचितम्

महाकाव्यम् कुमारसम्भवम्

हिन्दीपद्यानुवादः

(अनुवादकः–श्रीसत्यनारायणशर्मा, साहित्याचार्यः, कोटा)

तृतीयः सर्गः

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥ १४ ॥

बता कर हर पर शराधिकार, किया स्वीकृत-सा यह सुरकर्म ।
देवताओं के द्वेषी बहुत, जान लो उद्धाराश्रित कर्म ॥ १४ ॥

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥ १५ ॥

देव हरवीर्योत्पन्न मनुष्य, चाहते सेनापति बलवान् ।
संयमी-आत्मलीन-शिव साध्य, बाण तव है साधन का मान ॥ १५ ॥

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद् वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ १६ ॥

हिमालय-कन्या पर आसक्त, बनें शिव, ये ब्रह्मा के बोल ।
नारियों में हर-वीर्याधार योग्य वह, यत्न करो दिल खोल ॥ १६ ॥

गुरोर्नियोगाच्च नगेन्द्र-कन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥ १७ ॥

नगेन्द्राज्ञा से शिव-सामीप्य, गुहा में अर्चन-लीना बाल ।
अप्सराओं ने मुझसे कहा, क्योंकि वह है मम चरगण-जाल ॥ १७ ॥

तद् गच्छ सिद्ध्यै कुरु देवकार्यं अर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ १८ ॥

करो सुर-कार्य सिद्ध, यह काम, कारणान्तर से तुम-सा हेतु ।
बीज उगने से पूर्व अतीव अम्बु आवश्यक है उस हेतु ॥ १८ ॥

तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥ १९ ॥

शम्भु पर अस्त्रक्षेप का कार्य, विजय हित तुम ही, तुम हो धन्य ।
पुरुष का अप्रसिद्ध भी कर्म, कीर्त्तिकारण ही रहे अनन्य ॥ १९ ॥

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ॥ २० ॥

देव हैं याचक इसके हेतु, तीन लोकों का है सम्बन्ध ।
चाप से काम न है अतिहिंस्र, अहो ! तव बल है विस्मयबन्ध ॥ २० ॥

मधुश्च ते मन्मथ ! साहचर्यादसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥ २१ ॥

स्वयं माधव सहचर तव काम ! न कहने पर भी बन्धु अभिन्न ।
"अग्नि-प्रेरक है पवन" कदापि नहीं यह आज्ञा देना भिन्न ॥ २१ ॥

तथेति शेषामिव भर्तुराज्ञामादायमूर्द्ध्ना मदनः प्रतस्थे ।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥ २२ ॥

मदन तब कह कर चला 'तथास्तु' ग्रहणकर सिर से इन्द्रादेश ।
फिराया ऐरावत-संस्पर्श-कठिन–कर मन्मथ पर अमरेश ॥ २२ ॥

स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥ २३ ॥

लिया प्रिय मित्र वसन्त, सशंक प्रिया रति को भी लेकर संग ।
हिमालय पर हर-गृह को गया, काम हो सिद्ध, विद्ध हो अंग ॥ २३ ॥

तस्मिन्वने संयमिनां मुनीनां तपः समाधेः प्रतिकूलवर्त्ती ।
संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥ २४ ॥

संयमी मुनियों की तप-शान्ति रुद्ध करने कानन में आज ।
मनोभव का अभिमान वसन्त, सजाने लगा काम का साज ॥ २४ ॥

(क्रमशः)

विश्व-वार्ताः—

परराष्ट्रमन्त्रिणः सद्भावनायात्रा

श्रीकलानाथशास्त्री, एम ए, साहित्याचार्यः,
निदेशकः, भाषाविभागे राजस्थानम्, जयपुरम्

फरवरीमासस्य प्रथमे सप्ताहे भारतीयविदेशमन्त्रिणः श्रीअटलबिहारि-वाजपेयिनः पाकिस्तानयात्रा भारत-पाक-संबंधानामितिहासे समुल्लेखनीयैका घटना। १९६५ ई० वत्सरे भारत-पाकयुद्धस्यानन्तरं न कोपि विदेशमन्त्री पाकिस्तानयात्रामकरोत्। यद्यपि १९७१ ई० वर्षे तदा पाकिस्तानस्य विदेशमंत्रिपदमधिरूढः श्रीभुट्टो शिमलावार्तायै भारतमागमत् किन्तु द्वयोरनयो राष्ट्रयोः संबधेषु नाभूत्तन्माधुर्यं, यात्राया आदान-प्रदानादि वा यत्प्रतिवेशिदेशेषु सामान्यतो भवति। एतस्य मौनस्य भङ्गार्थमेव श्रीवाजपेयिना तामिमां सद्भावनायात्रां विधाय फरवरीमासस्य ६–७ तारिकयोः पाक-राजधान्याम् स इस्लामाबादे पाक-सैन्यप्रशासकेन श्रीजियाउलहकमहोदयेन सह पारस्पारिक-संबंधानां विषये प्रलम्बो वार्तालापो विहितः। पाकिस्तानीय–परराष्ट्र–परामर्शकेन आगाशाहीमहोदयेन सहापि विमर्शोऽभूत्। वार्तानां पर्यन्ते तदिदं सूचितं यद् भारतयात्राया आमन्त्रणं श्रीआगाशाहीमहोदयेन स्वीकृतम्, अग्रिमे मासि सोऽत्रागमिष्यति।

एवं पारस्परिकसंबंधानां पुनरारम्भाय सेयं यात्रा लाभकरी सिद्धा। अद्यत्वे भारत-पाकयोर्मध्ये बहुषु विषयेषु सहमतिः, सौमनस्यं चास्ति, मतभेदोऽप्यन्येषु विषयेषु यथा, हिन्दमहासागरः शान्तिक्षेत्रत्वेन घोषणीयः, निःशस्त्रीकरणं भवेत्, इस्राइलेन आरब्यदेशानां कतिपये प्रदेशा बलाद् गृहीता ये तेन परावर्तनीयाः स्युरेव, इत्यादिषु विषयेषु मतैक्यं द्वयोरपि किन्तु विवादबिन्दुः प्रमुखतः काश्मीरदेशः, इत्यादि। विवादग्रस्तविषयाणामुपरि माभूद्विवाद इति विदेशमंत्रिणा पूर्वत एव सचातुर्यं प्रयतितम्। वार्तासु प्रमुखो विषयोऽभूत्पारस्परिकव्यापारसंबंधानां पुनरारंभः। विषयेऽस्मिन् ईरानदेशस्य सम्राजो भारत-पाक-यात्रयाऽपि विचारः संप्रेरितोऽभूत्। विदेशमंत्रिणा परामृष्टं यद् इटलीदेशात् यन्त्रादीनां क्रयस्यापेक्षया यदि पाकिस्तानो भारतात् क्रयं करोति तर्हि द्वयोरपि देशयोर्लाभो भवेत्। अद्यत्वे पाकिस्तानं भारतस्यौद्योगिक-प्रगतेस्तुलनायां, जनसंख्यास्तुलनायां चात्मानं लघु मत्वा यथाशंकितं स्यात्, तर्हि साऽऽशंकापनेया, इति

प्रमुखमुद्देश्यमासीदस्या यात्रायाः यदंशतः साफल्यमप्यभजत् । यद्यपि न कोऽपि निर्णयोऽभून्नवाऽधिकृता घोषणाः प्रसारिताः, किन्तु संबंधानां, समारंभः समजनि । पाकिस्ताने हिन्दूनां, भारते च मोहम्मदानां समस्यानामुपर्यपि विवादं विदेशमन्त्री सचातुर्यं न्यवारयत् सद्भावनाप्रेरक एव कार्यक्रमोऽभवत् । श्रीवाजपेयिना महाकवेरिकबालस्य समाधौ रणजित्सिहसमाधौ च पुष्पहारा अर्पिताः, दर्शनीयानि स्थानानि दृष्टानि । जनरलजियाउलहकेन प्रारम्भिके एव भाषणे यत् कथितं—"अन्ततः ६६–५० कोटिजनताया। संख्या ७.२ कोटिसंख्या च कथं तुलनीये स्याताम् ?", तस्या आशंकायाः समाधानार्थमेव वाजपेयिना भूयो भूयः स्पष्टीकृतं यज्जनसंख्यायास्तारतम्यं भवेन्नाम, किन्तु भारतं पाकस्य स्वतंत्रराष्ट्रत्वं पूर्णतः संमानयति ।

आशास्यते यद् द्वयोः प्रतिवेशिदेशयोः संबंधेषु उत्तरोत्तारं सहकारस्य संभावना वर्धिष्यते, न तु संघर्षस्य ।

☆

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम् संस्कृत हिन्दी टीका सहित	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगिनी)	" १.५०
३.	गोलनवाङ्कुरः (खगोलवर्णनम्)	" १.२५
४.	आयुर्वेदविशेषांकः	" ५.००
५.	आरोग्याङ्कः	" ५.००
६.	बालोपदेशमणिमाला (हिन्दी अनुवाद सहित)	" २.५०
७.	सूक्तिसुधा (हिन्दी अनुवाद सहित)	" १.००
८.	मातृस्तवनं (हिन्दीपद्यानुवाद सहित)	" २.००
९.	आध्यात्मिकशिवायनम् (हिन्दीगद्यानुवादसहित)	" ५.००
१०.	श्रीगुरुजीस्मृत्यङ्कः	" ५.००
११.	दुर्गासप्तशतीसर्वस्वम् (हिन्दीपद्यानुवाद सहित)	" ५.००
१२.	भारतभक्तिस्तोत्रम् (हिन्दीगद्यानुवाद साहत)	" ५.००
१३.	लघुकथासंग्रह (हिन्दीगद्यानुवाद सहित)	, ५.००

भारती के ग्राहकों को २५%वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगवायें ।

व्यवस्थापक
भारती संस्कृत-मासिक, जयपुर

दिल्ली में जनता प्रशासन

प्रमुख उपलब्धियां

ग्रामीण विकास

- ☐ 1.45 करोड़ रुपये तकावी वितरित
- ☐ पीने के पानी की योजना 45 लाख रुपये
- ☐ 92 ट्यूबवैल कनैक्शन दिये गये 500 शीघ्र दिये जायेंगे ।

हरिजन कल्याण

- ☐ हरिजनों को छात्रवृत्तियां : 70.50 लाख रुपये
- ☐ हरिजनों को मकान बनाने के लिये अनुदान : 24.50 लाख रुपये
- ☐ हरिजन छात्र-छात्राओं के लिए छात्रावास : मुफ्त आवास तथा भोजन ।

श्रम कल्याण

- ☐ श्रमिक वर्ग के ट्रेड युनियन अधिकारों को बहाली
- ☐ औद्योगिक शान्ति : उत्पादन में वृद्धि
- ☐ श्रम जीवी वर्ग की शिकायतों के शीघ्र निपटाने की व्यवस्था
- ☐ श्रमिकों के लिए मनोरंजन के साधनों में वृद्धि । अधिक श्रमिक गृहों की स्थापना ।

शिक्षा

- ☐ 16,500 छात्रों के लिए तकनीकी शिक्षा प्रशिक्षण
- ☐ निर्धन छात्र-छात्राओं को मुफ्त वर्दियों तथा पुस्तके
- ☐ 57.73 लाख रुपये की छात्रवृत्तियां
- ☐ 1000 प्रौढ़ शिक्षा केन्द्र स्थापनाधीन ।

चिकित्सा

- ☐ शाहदरा तथा हरिनगर में 500-500 बिस्तरों के दो अस्पताल : 22 करोड़ रु०
- ☐ आधुनिक नेत्र अस्पताल के लिए एक करोड रुपया
- ☐ देहाती क्षेत्रों में 100-100 बिस्तरों के सात अस्पताल व 18 डिस्पैंसरियां ।

उद्योग

- ☐ अनधिकृत क्षेत्रों में 24,000 औद्योगिक इकाइयों के लिए लाइसैंस
- ☐ 5·24 करोड़ रुपये की लागत से टूल रूम तथा प्रशिक्षण केन्द्रों का निर्माण
- ☐ नरेला में 620 एकड़ क्षेत्र में औद्योगिक वस्ती की योजना तैयार
- ☐ 28 सामुदायिक विकास केन्द्र । 5,600 व्यक्तियों को रोजगार ।

आवास

- ☐ गृह निर्माण के लिए आवास बोर्ड बनाने का निर्णय
- ☐ प्रति वर्ष एक लाख मकानों के निर्माण का लक्ष्य
- ☐ पुनर्वास कालोनियों में बिजली के कनैक्शन तथा अतिरिक्त सुविधाएं ।
- ☐ चार साल में पूर्ण नशाबन्दी । प्रथम चरण आरम्भ ।

सूचना एवं प्रचार निदेशालय दिल्ली प्रशासन, दिल्ली द्वारा प्रसारित

आयुर्वेद-स्तम्भः—

त्रिविधं शरीरम्

श्री वा० बा० नटराजशास्त्री
आयुर्वेदाचार्यः, तिरुचिरापल्ली ।

वय-उच्चत्वयोः अनुसारेण शरीरभारप्रदर्शिनी

पूर्वाऽनुवृत्तम्—

सारणी २

स्त्री

वर्षाणि

उच्चता		20	25	30	35	40	45	50
Feet.	inches	L. B.	L. B.	L. B.	Li B.	L. B.	L. B.	L. B.
4	10	86	90	93	96	99	101	103
4	11	89	92	96	99	102	104	105
5	0	92	95	99	102	105	106	108
5	1	94	98	102	105	107	109	111
5	2	98	101	105	108	110	113	114
5	3	102	105	108	112	114	116	118
5	4	104	106	112	115	117	119	121
5	5	108	112	117	119	122	124	125
5	6	110	114	119	123	126	128	130

अवधेयम्—प्रायः स्त्रीणां परमा उच्चता सार्धपञ्चपद ($5\frac{1}{2}$) प्रमितैव । स्त्रीणां पुरुषाणां च पञ्चाशत्तमात् वर्षात् उपरि भारस्य वृद्धिः दोषाय कल्पते । अतः पञ्चाशत्तमे वर्षे विद्यमानात् भारात् ऊनातिरेकौ यथा न भवेतां तथा षष्टितमवर्षपर्यन्तं शरीरभारो रक्षणीयः । षष्टितमात् वर्षात् परं क्रमेण मन्दगत्या भारस्य उपक्षयः साधीयान् । आरोग्यानुवृत्तिर्भवेत् । उपचयः दोषाय कल्पेत ।

शरीरभारसारण्यां अवधातव्याः मुख्यविषयाः

(1) वयः उच्चत्वं उभयं गृहीत्वा शरीरभारस्य प्राकृतत्वनिर्णय. कर्त्तव्यः, नैव अन्यतरन् मात्रं गृहीत्वा ।

(2) पुंसां स्त्रीणां च बाल्यादिषु सर्वासु अवस्थासु, समानवर्षीयाणामपि उन्नतौ भारे च पुरुषापेक्षया स्त्रियः किञ्चित् ऊना एव भवन्ति ।

(3) तथाऽपि तत्र कश्चन विशेषः—पुमपेक्षया स्त्रीदेहे यौवनदशा तत्प्रयुक्ता पुष्टिश्च शीघ्रतरं 10–11 वर्षादेव प्रारभते । अतः 11–15 वर्षीयकाले तस्याः उन्नतिभारौ पुरुषापेक्षया अधिकतरौ भवतः ।

(4) पुंसां यौवनं प्रायः चतुर्दशवर्षात् आरभते । ततः प्रायः चतुर्विंशतिवत्सरपर्यन्तं क्रमेण अभिवर्धते ।

(5) पुंसां प्रायो विंशतिहायनादुपरि, स्त्रीणां षोडशवर्षात् उपरि उच्चता न एधते । भारस्तु उभयोः आपञ्चाशद्वर्षाणि क्रमेण वर्धमानो भवति ।

(6) पुरुष समानवयस्कानामपि स्त्रीणां पुमपेक्षया उन्नतिभारबलगाम्भीर्येषु सर्वदा ऊनत्वं स्वभावसिद्धम् । एतादृग्भेदः न केवलं मनुष्यजातिमात्रपरिच्छिन्नः । भूतग्रामे अण्डजजरायुजादिषु समस्तप्राणिषु व्यापक एव । पश्यत परितः सञ्चरन्तौ धेनुवृषभौ कुक्कुटीकुक्कुटौ च ! अयं व्यत्यासः स्वभावसिद्धः, न हि स्वभावः पर्यनुयोगमर्हति ।

(7) उल्लिखिता इयं शरीरभारमानसारणी धातुसाम्य तत्फलभूतं आरोग्य च सामान्यत एव सूचयति इति न विस्मर्त्तव्यम्। अतः सारणीनिर्दिष्टात् भारप्रमाणात् किञ्चित् ऊनो वा अतिरेको वा तुलायां दृश्यते चेत् तत् शरीरस्य अस्वास्थ्यं सूचयति इति नैव आशङ्कितव्यम् । किन्तु भूयसा व्यत्यासेन, अर्थात् भारस्य अति अतिशयेन स्थौल्यजा रोगाः, अति अल्पत्वेन कार्श्यजा आमयाः सम्भवेयुरेवेति स्मारयितुं अत्यन्तं उपकरोति सारणी समेषाम् ।

(8) देशकुलजात्यादिभेदात् शरीर—भारमाने बहुधा तारतम्यं दृश्यते । अतः इयति उच्चत्वे सति इयान् भारः प्राकृत इति ग्राह्यम् ।

स्थौल्यं कार्श्यं वा गात्रे न एकेन अहोरा-

त्रेण सम्भवेत् । न कारणमन्तरेणापि जायेत । न च विना पूर्वरूपं सहसा आक्रामेत् । किञ्च, अतिस्थौल्ये कार्श्ये वा सम्भवतां रोगाणां काये व्यक्तं दर्शनात् परमेवं तेषां चिकित्सा न चिन्तनीया । तदा ते कृच्छ्रसाध्याः स्युः । अतः शरीरे धातूनां वैषम्यस्य— अर्थात् ऊनतायाः अतिरेकस्य वा आरम्भकाले एव, तयोः कारणं सम्यग् विज्ञाय, प्रथमं तत् कारणं परित्यक्तव्यम् । कारणे वर्जिते कार्यं - आमयरूपं आशु निवर्त्तेत । कारणं परित्यक्तुं तत् स्वरूपज्ञानं आवश्यकम् ।

अतिस्थौल्यकार्श्ययोः निदानचिकित्सिते अनुवर्त्तिष्येते ।

सुखी जीवन के लिए

बैद्यनाथ दवाएं

हमारे यहां की निर्मित उच्चकोटि की औषधियों को अपने स्वास्थ्य की रक्षा हेतु हमेशा प्रयोग करें, प्रत्येक ऋतु के आसव, अरिष्ट रस, भस्मों का प्रयोग देश के कौने २ में बैद्यनाथ औषधियों का मिलने के लिए पांच बृहत निर्माण-शालाएं —

झांसी, कलकत्ता, नागपुर, पटना और इलाहाबाद (नैनो)

६५० से अधिक विशिष्ट एजेन्सी व
६५ हजार से अधिक एजेन्सियां

श्री बैद्यनाथ आयुर्वेद भवन लि०

भारत का आयुर्वेदिक औषधियों का सबसे बड़ा कारखाना

गुसाईपुरा, झांसी

रामस्य वनगमनम्

(द्वितीयः सर्गः)

ले० श्रीरघुवीरस्वरूपभट्टः वरिष्ठ अध्यापकः (संस्कृत)
राज० उच्चमाध्यमिकविद्यालयः, काकरोली

अथेन्दीवरश्यामलः शान्तमूर्तिः,
प्रियापार्श्वमासाद्य रामः सलीलम् ।
मुखं वीक्ष्य लोलालकं राजमानं,
सरोजं वृतं चंचरीकैरिवास्याः ।।

नीलसरोरुहश्यामतनु, शान्तमूर्ति सविलास ।
पहुँच तुरत शुभ सदनमें, रामप्रिया के पास ।।
अलिसेवित उस कमल-सा, जिसमें नहीं विकास ।
चंचल अलकावलिवलित, आनन निरख उदास ।।

अवोचच्छुभेऽहं तवायत्तप्राण—
स्त्वमेवासि कान्ते कला चात्मनो मे ।
इयं संगतिर्जन्मजन्मान्तरेषु,
स्थिरा स्यादिमां भावनां संधरेव ।।

बोला यों तू अयि प्रिये, मेरी प्राणाधार ।
कान्ते आत्मा की कला, अकलुष और उदार ।।
जन्मान्तर में भी रहे, यह संगति अविकार ।
धरें भावना हम यही, होवे प्रीति प्रसार ।।

मया सत्यरक्षार्थमात्मोदयार्थं
प्रजानां हितार्थञ्च संचिन्तितं यत् ।
वनेऽहं चरन् लोकरक्षापरः स्याम्,
प्रसंगेऽत्र कल्याणि कस्ते विचारः

मैंने सोचा है प्रिये, रक्षणार्थं सद्धर्म ।
आत्मोन्नति करने तथा, करने जन-हित-कर्म ।।

वनविचरण करता हुआ, हरूं लोक का भार ।
इस प्रसंग में तू शुभे, कर निज व्यक्त विचार ।।

अथाग्रे स ऊचे वने संचरद्भ्यो
महादानवेभ्योऽतिभीताः सखेदम् ।
कथंचिज्जनाः कन्दमूलाशनेन,
जलेनैव वा जीवनं यापयन्ति ।।

फिर बोला बन में प्रिये, फिरते हैं मनुजाद ।
जिनसे हो अतित्रस्त जन। वनवासी सविषाद ।।
कन्दमूल का अशन कर, या जल ही कर पान ।
असमय में करते विवश, जीवन का अवसान ।।

तृणान्येव शैया वनालीषु वासो,
न यत्रास्ति रक्षापि शीतातपाभ्याम् ।
नरा ज्ञानहीनाश्चरन्त्यत्र दीना,
न तेषां च शाखामृगाणां विभेदः ।।

जो रहते हैं तरुतले, और बिछाते घास ।
शीतघाम के कोप से, रक्षा जहां न खास ।।
ज्ञान हीन निर्धन निरे, सहते निशिदिन खेद ।
वे नर हैं वानर सदृश, रंच न उनमें भेद ।।

अपाकृत्य सर्वापदो जीवनस्य,
स्थितिं सानुकूलां तथा कर्तुमीहे ।
ऋषीणामरण्यौकसां साहचर्याद्,
यथा ते मुदा जीवनं यापयेयुः ।।

जीवन की आपत्तियां, उनकी करके नष्ट ।
वैसी स्थिति अनुकूल में, करूं यही है इष्ट ।।
ऋषियों के सम्पर्क से, पाकर ज्ञान अमन्द ।
जिससे वे यापन करें, निज जीवन सानन्द ।।

(क्रमशः)

बालोपयोगिनी लघुकथा

१०–नूनं जयति बुद्धिमान्

श्रीपद्मशास्त्री, माण्डलगढ़: (राज०)

उवास कृषकः पूर्वं
ग्रामे कश्चिन्निरक्षरः ।
क्षेत्राणि तु बहून्यासन्
तस्य पार्श्वे विशेषतः ।। १ ।।

किसी गांव में एक निरक्षर कृषक रहता था। विशेषकर उसके पास बहुत से खेत थे ।। १ ।।

दूरे चासन् किन्तु
ग्रामाद्राजमार्गतटे ध्रुवम् ।
यात्रिणस्त्रोटयन्ति स्म
चेक्षुदण्डं विशेषतः ।। २ ।।

किन्तु वे खेत गांव से दूर सड़क के किनारे पर थे। उस खेत के गन्नों को यात्री तोड़ लेते थे ।। २ ।।

भक्तानां तिलकेनैव
मृद्देवश्च समाप्यते ।
विरला इक्षवः क्षेत्रेऽ-
वशिष्टाः कृषकस्य वै ।। ३ ।।

मिट्टी का देवता भक्तों के तिलक से ही समाप्त हो जाता है। किसान के खेत में अब विरले ही इक्षुदण्ड शेष रह गये ।। ३ ।।

कृषदेहोऽपि कृषक-
श्चौरान्बद्धुं समुद्यतः ।
एकाकी एव क्षेत्रेऽस्मि-
न्प्रच्छन्नो न्यवसत्सुधीः ।। ४ ।।

कमजोर शरीर वाला वह किसान चोरों को पकड़ने को तैयार हो गया। वह अकेला ही खेत में छिपकर बैठ गया ।। ४ ।।

निर्गच्छन्तस्त्रयस्तस्मा-
न्मध्याह्ने क्षेत्रपार्श्वतः ।

मध्याह्न में खेत के पास से निकलते

त इक्षुरसलोभेन
चेक्षुमत्रोटयंस्तदा ।। ५ ।।

हुए तीन यात्रियों ने गन्ने के रस के लोभ में गन्ने तोड़ लिये ।। ५ ।।

एकाकी तांस्तथा दृष्ट्वा
दण्डपाणिः स्थितो बहिः ।
कोऽयमिक्षूंस्त्रोटयति
प्रथमं सेवकोऽब्रवीत् ।। ६ ।।

उन्हें ऐसा करते देखकर वह अकेला ही हाथ में डंडा लेकर खडा हो गया और कहने लगा यह कौन गन्ना तोड रहा है पहले सेवक ने कहा ।। ६ ।।

इक्षुर्मुखेऽपि नो क्षिप्तः
स्वामिने त्रोटितं मया ।
स्वामी प्रोवाच दुष्ट ! त्वं
कथं मिथ्या प्रभाषसे ।। ७ ।।

मैंने गन्ने को मुख में भी नहीं लिया, मैंने स्वामी के लिए गन्ना तोड़ा है । स्वामी ने कहा तू झूठ क्यों बोल रहा है ।। ७ ।।

विप्रेण सह संमन्त्र्य
सर्वमेतत्कृतं त्वया ।
येदेते भिन्नमतयः
कृषकेण विचारितम् ।। ८ ।।

ब्राह्मण के साथ सलाह करके तुमने यह सब कुछ किया है । कृषक ने विचार किया कि इन सबकी भिन्न भिन्न मति है ।। ८ ।।

ताडनीयास्त्रयश्चाद्य
विभेद्य क्रमशो मया ।
विचार्य सेवकं प्राह—
"क्षेत्रमेतत्पितुस्तव" ।। ९ ।।

अतः फूट डालकर इन तीनों को मुझे एक एक करके दण्ड देना चाहिये । यह विचार कर सेवक को कहा—यह खेत तेरे पिता का है क्या ? ।। ९ ।।

मुखे पञ्च चपेटाश्च
पातिताः सेवकस्य वै ।
क्षत्रियं प्राह कृषकः
सत्वरं तदनन्तरम् ।।१०।।

सेवक के मुख पर उसने ५ चपेट लगाई । तदनन्तर कृषक ने शीघ्र ही क्षत्रिय को कहा ।। १० ।।

क्षत्रियाणां हि धर्मोस्ति
लोके सर्वस्य रक्षणम् ।

संसार में सबकी रक्षा करना ही

त्वया किमिति क्षेत्रेऽस्मि—
न्सेवको न निवारितः ।।११।।

क्षत्रिय का धर्म है तुमने सेवक को क्यों नहीं रोका ।। ११ ।।

ब्राह्मणं प्राह किं ब्रह्मन् !
चौर्यमेव कलौ स्थितम् ।
ब्राह्मणानां हि कर्तव्यं
तिष्ठ त्वां शिक्षयाम्यहम् ।।१२।।

कृषक ने ब्राह्मण को कहा हे ब्रह्मन् ! क्या ब्राह्मण का कार्य कलियुग में चोरी करना ही रह गया है ? तुम भी ठहरो, मैं तुम्हें शिक्षा देता हूँ ।। १२ ।।

एकां चपेटां दत्त्वाऽयं
कृषको विरराम ह ।
भेदनीत्या स कृषक—
एकाकी त्रीनदण्डयत् ।।१३।।

एक चपेट लगाकर कृषक रुक गया । इस प्रकार भेदनीति से उस किसान ने उन तीनों को दण्ड दिया ।। १३ ।।

दण्डयित्वा तथा तान्स
कृषकः प्राह सादरम् ।
किन्तु चौर्यं न युष्माभिः
कर्तव्यं हि कदाचन ।।१४।।

उन तीनों को दण्ड देकर किसान ने आदरपूर्वक कहा—चोरी करना तुम्हारा कर्तव्य नहीं है ।। १४ ।।

वनेऽपि सिंहा मृगमांसभक्षाः
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता
न नीतिमार्गं परिलंघयन्ति ।।

मृगों के मांस को खाने वाले सिंह वन में भूखे होने पर भी घास नहीं चरते हैं । इसी प्रकार कुलीन व्यक्ति विपत्ति में पड़ने पर भी नीतिमार्ग का उल्लंघन नहीं करते हैं ।। १५ ।।

नारीस्तम्भः—

दारिद्र्यमसह्यवेदनम्

श्रीमती राजेश्वरीभट्टमहोदया
संस्कृतविभागे, अध्यक्षा
(लालबहादुरशास्त्री-महाविद्यालयः, जयपुरम्)

वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहम्,
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्तापि नो ।
यत्नात्सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला,
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ।

एष पतिर्वृद्धो जरया जर्जरीकृतशरीरः, अथ च लोचनरहितः चलितुमसमर्थतया खट्वाश्रितः अस्ति । गृहं स्तम्भमात्राम शिष्टम् । एतेन वृष्टेरागमनात् गृहेऽस्मिन्नवस्थितिरपि कठिना वर्तते । समयः निकटजलागमः । वृष्टिपातजन्यक्लेशोऽवश्यम्भावी । धनार्जनाय प्रोषितस्य पुत्रस्य कुशलमयी वार्तापि न श्रुता । महता प्रयत्नेन संचितानां तैलविन्दूनां घटिका भग्ना । वधूप्रसवार्थं सञ्चितं तैलमपि नष्टम् । अतः अतीव पर्याकुला श्वश्रूः आत्मस्नुषां आसन्नप्रसवसमयां दृष्ट्वा चिरकालं यावत् रोदिति ।

सास ने आसन्नप्रसवा अपनी पुत्रवधू को देखा । उसके मन में विचार हो गया कि उसका बूढ़ा और अंधापति टूटी खाट पर पड़ा है, घर में केवल छप्पर को रोकने के लिये एक लकडी ही बची है । बरसात सिर पर आ रही है । धनोपार्जन के लिए विदेश गये हुए पुत्र का भी कोई कुशल समाचार नहीं मिला है और किसी प्रकार जोड जोड कर इकट्ठे किये गये तेल का पात्र भी फूट गया है और तेल फैल गया है । यह देखकर वह व्याकुल हो उठी और सिर धुन-धुन कर रोने लगी । दरिद्रता गृहस्थ जीवन को विशेषतः स्त्रीसमाज को कितना दुर्गत बना देती है ।

भारती

R. J. No. 2617
Licence. No. PP.9,
'Licenced to Post.
Without prepayment

सूक्ति-सुधा

धिक् धिक् तथा जीवितम्

डॉ० श्रीगङ्गाधरभट्टमहोदयाः, जयपुरम्

क्रोशन्तः शिशवः सवारि सदनम् पङ्कावृतं चाङ्गणम् ।
शय्या दंशवती च रूक्षमशनं धूमेन पूर्णं गृहम् ।
भार्या निष्ठुरभाषिणी प्रभुरपि क्रोधेन पूर्णः सदा ।
स्नानं शीतलवारिणा हि सततं धिक् धिक् गृहस्थं जनम् ।

गृहे बालकाः चीत्कारपरायणा कूर्दन्त उपद्रवाणा, गृहमुदकपूर्णम्, प्राङ्गणञ्च सदैव पङ्किलम् । शय्यायां मत्कुणादयो नाना कृमिकीटाः, भोजनञ्च रूक्षम् । घृतेन स्निग्धतायाः अभावो भोजने, गृहमपि धूमावृतम् । गृहिणी निष्ठुरवाक्, स्वामी सर्वदा क्रोधेन परिपूर्णः शीतकाले शीतलजलेन स्नानादिकाः क्रियाः–सर्वमेतद् गृहस्थजीवनस्य दूषणम् । गृहस्थजीवने एभिर्दूषणैः शान्तिः सुखं, समृद्धिर्वा पलायन्ते ।

बालकों के कारण घर में अशान्त वातावरण हो वे स्वच्छन्द होकर उछलते कूदते और चीत्कार करते हों, वर्षा का जल घर में भर जाता हो, आंगन सदा कीचड से युक्त और फिसलन से भरा हुआ रहे, भोज्य पदार्थ रूक्ष हों और घर भी सदैव धूम से घिरा हुआ हो, गृहस्वामिनी कटु भाषण करे और स्वामी भी सदा कुपित रहे, तथा सर्वोपरि शीतकाल में ठण्डे जल से स्नान करना पड़े तो उस गृहस्थी के जीवन को धिक्कार है । ये सभी एक–एक भी अथवा सम्मिलित रूप से मानव जीवन के दूषण होते हैं तथा जीवन को नरक बना देते हैं ।

प्रकाशक:–जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर ३०२००३ । दूरभाष 75496
राधेश्याम द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित दूरभाष: ६१७६७

भारती

संस्कृत-मासपत्त्रिकायाः

श्री बद्रीनाथः
श्री द्वारका
जगन्नाथः

पुस्तकालय
गुरुकुल काँगड़ी

24/5/78

त्रः

र्षम् २८

ङ्कः ७

मई

१९७८

ं विदीर्य यो दध्रे
दारुणं दैत्य-भी-करम् ।
-वरदं रूपं
देवं तं नृहरिं नुमः ।।

रामगोपालशास्त्री

वार्षिकमूल्यम् दशमुद्राः १०.००
एकप्रतेः—एकं रूप्यकम् १.००

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आन्ध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र०सं०	विषयाः	निबन्धारः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	२४१
२.	मासावतरणम्	„ „ „	„
३.	श्रीपरशुराम-स्तोत्रम्	महा०-आचार्य-श्रीमदमृतवाग्भवप्रणीतम्	२४२
४.	गङ्गाष्टकम्	श्रीगंगाधरद्विवेदी, जयपुरम्	२४६
५.	मदीया सोवियतयात्रा	श्रीपद्मशास्त्री, जयपुरम्	२५३
६.	नागानन्दनाटके रससमालोचना	श्रीरूपनारायणत्रिपाठी, जयपुरम्	२५६
७.	देशवार्ता	श्रीपद्मशास्त्री, जयपुरम्	२५८
९.	विश्ववार्ताः	श्रीकलानाथशास्त्री, जयपुरम्	२५९
१०.	को नामायं धर्मः ?	डा० श्रीविश्वनाथशर्मा, जयपुरम्	२६१
११.	आयुर्वेद-स्तम्भः	श्री वा० बा० नटराजशास्त्री तिरुचिरापल्ली	२६४
१२.	आद्यगुरुशंकराचार्यचरिते		२६८
१३.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	२७१
१४.	नारीस्तम्भः	श्रीमती राजेश्वरीभट्टः, जयपुरम्	२७७
१३.	सूक्ति-सुधा	श्रीरामगोपालशास्त्री, जयपुरम्	२७८

सम्पादकः
दीनानाथत्रिवेदी मधुपः
साहित्यालङ्कारः
सहसम्पादकः
रामगोपालशास्त्री
जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवन
गोपालजी का रास्ता
जयपुरम्-२

वर्षम् २८ | चैत्रः, विक्रमाब्दः, २०३५ [मई, १९७८] | अङ्कः ७

मङ्गलम्

श्रीरामगोपालशास्त्री, जयपुरम्

चेतोहरौ चन्दनचित्रिताङ्गौ
राधावरौ दत्तमिथोऽङ्कमालौ ।
याऽस्त्यक्षया पुण्यतिथिस्तृतीया
तत्रार्चितौ चेतसि चिन्तये चिरम् ।।

* * *

मासावतरणम्

श्रीरामगोपालशास्त्री, जयपुरम्

ददार भक्तार्तिद-दैत्यमीशः
प्रह्लादमात्माङ्घ्रिरतं ररक्ष ।
अतो नृसिंहं भज चेतसेति
वैशाखमासो विशतीह नूनम् ।।

परशुरामजयन्ती महोत्सवः

श्रीपरशुराम-स्तोत्रम्

(महामहिम-आचार्य—श्रीमदमृतवाग्भवप्रणीतम्)

सम्पूर्णा विलसन्ति सोपनिषदो वेदोपवेदाः पुरः ।
पृष्ठे मार्गणपूर्णतूणविलसत्कोदण्ड दण्डा महान् ।।
बर्हिष्टोमकमण्डलू च परशुं पाण्योर्वहन् शास्त्रवित् ।
शापे शस्त्रवरे च पेशलकरः श्रीभार्गवो भ्राजते ।।१।।

मत्तक्षत्रियकृत्तकण्ठविगलद्रक्तौघसम्प्लावितं ।
भक्तानुग्रहणं कठोरपरशुं धृत्वाऽवतीर्याऽधुना ।।
दृप्तोदण्डदुरीहदुष्टदमनो दीनाऽऽवलीपालको ।
धर्मोद्धारधुरन्धरो भृगुवरो रामः समुज्जृम्भताम् ।।२।।

श्रीमद्रेणुकया धृतं स्वजठरे भू-भारनाशाय यत् ।
श्रीमद्भार्गवजामदन्यमतुलं रामाभिधानं महः ।।
दृप्यत्पार्थिववृन्दकाननलज्ज्वालाढ्यवैश्वानरः ।
चण्डीप्राणपतिप्रियस्य परशोरादायि तत्सुं स्तुमः ।।३।।

लक्ष्मीपतेरुरसि रोषकषायिताक्षः ।
पादप्रहारमकरोन्मुनिपुङ्गवो यः ।।
ब्रह्मर्षिवृन्दपरिचुम्बितपादपद्मः ।
स श्रीभृगुर्जयति विप्रकुलप्रकाशः ।।४।।

श्रीमानुदारचरितो जयतादजस्रं ।
ब्रह्मर्षिसोमजमदग्निरिति प्रसिद्धः ।।
दृप्यन्नृपान्तकरणं तनयं प्रसूय ।
येनाऽखिलं जगदिदं परितो व्यरक्षि ।।५।।

सम्पूर्णभूमिगतवीरमहीपतीना– ।
मन्यायमाश्रितवतां प्रमदोद्धतानाम् ।।

सा कालरात्रिरिव नाशकरी समन्तात् ।
श्रीरेणुका भगवती विजयाय भूयात् ॥६॥

देवेन येन ततमस्ति समस्तमेत–।
द्विश्वं स्वशक्तिखचितं स्वविलासरूपम् ॥
तं त्वां महर्षिगणपूजितपादपद्मं ।
सर्वात्मना भृगुवरं शरणं भजामः ॥७॥

धर्मद्विषां नियमनाय गृहीतदीक्षं ।
श्रीरेणुकाभगवतीजठरात्प्रसूतम् ॥
श्रीभार्गवस्य जमदग्निमुनेः सुपुत्रं ।
रामं लसत्परशुपाणितलं नमामः ॥८॥

स्फूर्जन्मदोद्धतनृपावलिकाननाऽऽली–।
र्दग्ध्वा, महीसुरगणान्परिरक्ष्य बन्धून् ॥
त्रातं भुवस्तलमिदं भवता समस्तं ।
सम्प्राप्य खण्डपरशोः परशुं प्रसन्नात् ॥९॥

लोकत्रयाऽतुलपराक्रमजन्मभूमेः ।
शीर्षं निकृत्य कृतवीरसुताऽर्जुनस्य ॥
त्रिःसप्तवारमकरोर्वसुधां समस्तां ।
निःक्षत्रियां स्वपितृतर्पणकामनायाः ॥१०॥

दुर्नीतपार्थिवकदम्बनिकृत्तशीर्ष–।
ग्रावद्रवद्रुधिरसिद्धधुनीजलौघैः ॥
आकण्ठतो निजपितॄन्परितर्प्य पश्चात् ।
प्रादाद् धरां वसुमतीं किल कश्यपाय ॥११॥

पाणौ विलोक्य परशुं भगवंस्त्वदीये ।
स्त्रीवेषभाग्दशरथोऽपि पलायितोऽभूत् ॥
यः स्वासनार्धं उपवेश्य पुरन्दरेण ।
सम्मानितोऽभवदमोघबलेन शश्वत् ॥१२॥

श्रीराम ! भार्गव ! भवच्चरणारविन्द–।
मूलं शरण्यमधुना वयमागताः स्मः ॥

कारुण्यपूर्णसुदृशा किल नोऽनुगृह्य ।
शक्तिं निजामनयनाशकरीं प्रदेहि ॥१३॥

वाक्चातुरी चलति नो चतुराननस्य ।
यच्छक्तिवर्णनविधौ खलु तत्र केयम् ॥
अस्माकमल्पविदुषां नृगिरा वराकी ।
शक्ता भवेत्तदपि नाथ ! वरं प्रदेहि ॥१४॥

वीरश्रीजामदग्न्यस्य पुण्यं स्तोत्रमिदं नराः ।
पठन्त्यनन्यमनसो येऽर्थबोधपुरस्सरम् ॥१५॥
दुःशासनान्तकरणो भीमा धर्मप्रबोधिनी ।
तेषां करगता शक्तिश्चकास्त्येव न संशयः ॥१६॥

अङ्काष्टनन्दपृथिवीमितवैक्रमाब्दे ।
वैशाखशुक्लगिरिजादिवसे ग्रहेशे ॥
मार्तण्डतीर्थभवने जमदग्निपुत्र-
स्तोत्रं व्यधायि विदुषाऽमृतवाग्भवेन ॥१७॥

इति श्रीसर्वतंत्रस्वतंत्रमहामहिमाचार्य-
श्रीमद्वाग्भवप्रणीतं श्रीपरशुरामस्तोत्रम्

Wanted Agent

Wanted Agents (Male/Female) Candidates do this work at own Area. Salary Rs. 300/-, Commission and T.A. axtra.

Qualification :

Candidate should be minimum Matric or Higher Secondary. Age 16 to 45 yrs.

Send applications only in Hindi or in English. Registered letter at following address :—

GWALIOR TEXTILES,
38-B, MAJLIS PARK, DELHI - 110 033.

प्राक्कथन

भारत धार्मिक मान्यताओं का देश है। यहाँ की नदियों और पर्वतों का अपना महत्व आदिकाल से चला आरहा है। 'गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥' इस प्रार्थना मंत्र से स्नान-कर्म व सप्त देव-नदियों के सामूहिक आवाहन की प्रथा आज भी हमारे देश में प्रचलित है। इन नदियों में पतित-पावनी पुण्यसलिला गङ्गा का महत्व सर्वोपरि है। गङ्गास्नान और गङ्गाजल के पान का सौभाग्य विरले पुण्यात्माओं को ही मिला करता है।

गङ्गा दशहरा – गङ्गाजी के जन्मदिवस के रूप में सारे भारत में मनाया जाता है। इस पुण्य-पर्व पर धार्मिक जनता प्रसिद्ध तीर्थों पर स्नान करके आत्मिक सुख शान्ति और शारीरिक पवित्रता का लाभ लेती है। इस शुभ दिवस पर गङ्गाजी की स्तुति में निर्मित "गङ्गाष्टक" की दो अलग-अलग रचनाएँ यहां प्रस्तुत की जा रही हैं। इनका विवरण इस प्रकार है :—

राजस्थान प्राच्य-विद्या-प्रतिष्ठान में श्रीनाथ-कृत 'गङ्गाष्टक' तथा देवेश्वर कृत 'गङ्गाष्टक' के दो अष्टक कोई पुस्तक विक्रेता लाया था। उसकी प्रतिलिपि प्रतिष्ठान के तत्कालीन डिप्टी डायरेक्टर पं० श्री गोपालनारायणजी बहुरा ने करली थी। प्रतिष्ठान के द्वारा इन दोनों को प्रकाशित कराने का उनका विचार था किन्तु अन्य कार्यों में व्यस्त रहने से यह संभव नहीं हो सका।

सेवा निवृत्ति के बाद अभी हाल में जब श्री बहुरा ने इन दोनों स्तोत्रों के प्रकाशन की इच्छा प्रकट की, तब दोनों अष्टकों को मैंने देखा और दो प्राचीन कवियों की इन कृतियों के प्रकाशन की बात मुझे भी रुचिकर लगी। किन्तु रचना सटीक होते हुए भी कठिन प्रतीत हुई और हम लोगों ने सोचा कि यदि इसके साथ हिन्दी अनुवाद भी लगा दिया जाय तो सबको समानरूप से लाभ मिल सकता है। अतः मैंने दोनों 'अष्टकों' का हिन्दी में अनुवाद कर दिया है।

गङ्गाष्टक की यह प्रति स्वयं श्रीनाथ पुरोहित की लिखी हुई थी। इनकी हस्तलिपि सुन्दर और शुद्ध थी। ये जोधपुर के महाराजा जसवन्तसिंह के समसामयिक थे। इनके पिता का नाम चक्रपाणि ज्योतिर्विद् था। संवत् १७३० से ३४ तक लिखी हुई इनकी हस्तलिखित पुस्तकें, जो जोधपुर प्रा. वि. प्रतिष्ठान में मौजूद हैं—उनकी नामावलि निम्नलिखित है :—

१—षड्दर्शनसमुच्चय सावचूरि (प्रा. वि. प्रति. ह. ग्रं. सं १७५५२ लिपि संवत् १७३४)।

२—किरातार्जुनीयम् सटिप्पणम् (ग्रंथ सं० १६२२८—संवत् १७३०)।

३—अव्ययनिरूपणम्—स्वयंकर्तृक—ग्रं. सं. १६६२१, संवत् १७३०।

४—कामरत्नम् (सं. १५६७६, अपूर्ण–विशेष विवरण अज्ञात)।

श्रीनाथ पुरोहित संभवतः पुष्करणा ब्राह्मण थे। जोधपुर में आज भी पुष्करणा ब्राह्मणों का बाहुल्य है। इनका विशेष वृत्तान्त प्राप्त नहीं हो सका।

देवेश्वर कृत 'गङ्गाष्टकम्' का उल्लेख आफ्रेक्ट ने कैटलागस कैटलागरम के प्रथम भाग में पृ. २७२ पर किया है। इसका मूल भाग निर्णय सागर प्रेस बंबई से प्रकाशित काव्यमाला के किसी गुच्छक में निकला है। यह सूचना भी आफ्रेक्ट ने दी है।

साधुरत्न के शिष्य पार्श्वचन्द्र ने इस पर टीका लिखी है। इनका एक प्राकृतव्याकरण का ग्रंथ 'प्रश्नव्याकरणसूत्राणि' का उल्लेख भी आफ्रेक्ट ने अपने कैटलागस कैटलागरम ३३६ पृ. पर किया है। यह पुस्तक अनूप संस्कृत लाइब्रेरी, बीकानेर में भी उपलब्ध है।

(देखिये कैटलागस कैटलागरम २७२ पृ०)।

आशा है, पुण्यसलिला गङ्गा के आस्थावान भक्त पाठक इन अष्टकों का पाठ कर मानसिक सुख शान्ति के साथ आनन्द लाभ लेंगे।

—गंगाधर द्विवेदी

।। श्रीगङ्गायै नमः ।।

ज्योतिर्विच्चक्रपाणिसूनुश्रीनाथविरचितं

गङ्गाष्टकम्

स्वोपज्ञटीकासमन्वितम्

विधुक्रमाम्बुजाच्च्युता ध्रुवाण्डभाण्डखण्डिनः ।
त्रिदृग्जटायिशम्बरा सुरापगा पुनातु नः ।। १ ।।

टीका—

गणेशं जानकीनाथं नत्वा च क्रियते द्रुतम् ।
व्याख्या गङ्गाष्टकस्यैषा श्रीनाथेन मया शुभा ।।

विधुक्रमाम्बुजादिति ।। सुराणां देवानामापगा गङ्गा नोऽस्मान् पुनातु पवित्रीकरोतु । पुनात्वयं पूञ् पवने इत्यस्य धातोर्लोट् प्रथमपुरुषैकवचनरूपम् । किं विशिष्टा सुरापगा विधुक्रमाम्बुजाच्च्युता । क्रमः पाद एवाम्बुजं कमलं क्रमाम्बुजं विधोर्वामनरूपधारिणो नारायणस्य क्रमाम्बुजं विधुक्रमाम्बुजं तस्मात् तथोक्तात् च्युता भ्रष्टा पतितेत्यर्थः । किं विशिष्टात् विधुक्रमाम्बुजात् ध्रुवाण्डभाण्डखण्डिनः अण्डमेव भाण्डोऽण्डभाण्डः ध्रुवस्य वेधसो ब्रह्मणश्चाण्डभाण्डः ध्रुवाण्डभाण्डस्तं खण्डयति दारयतीत्येवं शीलं ध्रुवाण्डभाण्डखण्डि तस्मात् ध्रुवाण्डभाण्डखण्डिनः । 'धाता विधाता विधिर्वेधसौ ध्रुव' इति हैमः ।। पूर्वं यदा त्रिविक्रमवामनरूपधारी विष्णुर्बलिं छलित्वा तृतीयं पादमूर्द्धमक्षिपत्तदा ब्रह्माण्डखण्डनं जातम् । पुनः किं विशिष्टा सुरापगा त्रिदृग्जटायिशम्बरा तिस्रो दृशो नेत्राणि यस्य स त्रिदृक् रुद्रस्तस्य जटायामयति प्रचरतीत्येवं शीलं त्रिदृग्जटायि 'अय् गताविति धातोः शीले णिनि प्रत्ययः । त्रिदृग्जटायि शम्बरं नीरं यस्याः सा तथोक्ता । स्रवन्ती निम्नगापगा । 'विधुः श्रीवत्सलाञ्छनः', 'अम्भोर्णांस्तोयपानीयनीरक्षीराम्बुशम्बरम् ।' सर्वत्राप्यमरः । अधुनैतद्वृत्तास्यैव लक्षणमाह । "प्रमाणिका जरौ लगौ' इति ।। १ ।।

त्रिविक्रम के रूप में अवतार लेकर, वलि को छलकर अपने तीसरे पैर से ब्रह्मा के ब्रह्माण्ड को खण्डित करने वाले वामनरूपधारी भगवान नारायण के चरणकमल से प्रवाहित शंकर की जटा में संचरणशील जल धारण करने वाली भगवती गंगा हम सब लोगों को पवित्र करे ॥ १ ॥

शौक्ल्यं निदधत् सुतारकाचक्रकेण सह भव्यकृल्लसत् ।
शैलाधिपमस्तके पतज्जाह्नवीजलमलं पुनातु नः ॥ २ ॥

शौक्ल्यमिति ॥ जह्नोरपत्यं स्त्री जाह्नवी गङ्गा तस्या जलं पानीयमलमत्यर्थं नोऽस्मान् पुनातु पवित्रीकरोत्वित्यर्थः । जाह्नवीत्यत्रापत्येऽर्थेऽण् प्रत्ययः । जाह्नवीजलं किं कुर्वत् शौक्ल्यं श्वेतत्वं निदधत् नितरां बिभ्रत् । शौक्ल्यमित्यत्र भावे ष्यञ् प्रत्ययः । उत्प्रेक्ष्यते जाह्नवीजल किमिव । सुतारकाचक्रकेण सह सुष्ठु ज्योतिश्चक्रमिव यथा सुतारकाचक्रकं शौक्ल्यं निदधाति । चक्रकमिव इत्यत्र स्वार्थे कः प्रत्ययः । सहशब्दोऽत्र इवार्थे । 'सह सम्बन्धसादृश्ययौगपद्यसमृद्धिषु । साकल्ये विद्यमाने चेत्यनेकार्थः । सादृश्ये, इवार्थे । यथा माघः—

"सिक्ता इवामृतजलेन मुहुर्जलानां
क्लान्तिच्छिदो वनवनस्पतयस्तदानीम् ।
शाखावसक्तवसनाभरणाभिरामाः
कल्पद्रुमैः सह विचित्रफलैर्विरेजुः ॥"

सुतारकाचक्रकेणेति सहयोगे तृतीया । अन्यथा सुतारकाचक्रकेणेति पदं जाह्नवीजलमित्यस्योपमानम् । जाह्नवीजलं पुनः किं कुर्वत् शैलाधिपमस्तके पतत् शैलानां पर्वतानामधिपो नायको हिमाचलस्तस्य यो मस्तकः शिरस्तस्मिन् पतत् स्रवत् अत एव लसत् प्रसरत् हिमाचलोपरीति शेषः । किं विशिष्टं जाह्नवीजलं भव्यकृत् भव्यं क्षेमं करोतीति भव्यकृत् स्नातॄणामिति शेषः । कृदित्यत्र कर्तरि क्विप् । भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियामित्यमरः । अधुनैतद्वृत्तस्यैव लक्षणमाह 'पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥ २ ॥

प्रकाशमान तारकामण्डल की तरह शुभ्रवर्णा, हिमालय के मस्तक पर बहती हुई, स्नान करने वालों का कल्याण करने वाली जाह्नवी का जल हम लोगों को पवित्र करे ॥२॥

मध्ये त्वत्स्वर्धुनि जलपायी मण्डूको वा कमठ उरगः ।
श्रेष्ठोऽहमिह जितभवदुःखो नान्यत्र स्त्रीसुखलसन्महीशः ॥ ३ ॥

मध्येत्वदिति ।। हे अंहोह हे पापहरे ! हे स्वर्धुनि, स्वः स्वर्गस्य धुनी नदी स्वर्धुनी तस्या आमन्त्रणे हे स्वर्धुनि ! हे गङ्गे ! नदी सरित् 'तरङ्गिणी शैवलिनी तटिनी ह्लादिनी धुनीत्यमरः। तव मध्ये इति मध्येत्वत् पारे मध्ये षष्ठीति वा समासः। वनपायी वनं जलं पिबतीति एवं शीलो वनपायी। शीले णिनि प्रत्ययः। 'सलिलं कमलं जलं। पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः।' मण्डूको दर्दुरः। 'भेको मण्डूक वर्षाभू शालूरप्लवदर्दुरा' इत्यमरः। वाऽथवा कमठः कच्छपः। 'कूर्मः कमठकच्छपावित्यमरः'। वाऽथवा उरगः सर्पः श्रेष्ठः परार्द्ध्यः। पुनर्जितभवदुःखः। जितं भवदुःखं संसारसम्बन्धि जननमरणादिकष्टं येन स जितभवदुःखः। अन्यत्र स्त्रीसुखलमहीशः स्त्रीसम्बन्धिसुखानि विषयाणि तानि लाति गृह्णाति इति स्त्रीसुखलः। 'ला दान ग्रहणयोरिति धातोराऽतोउ इति सूत्रेण उः प्रत्ययः। स चासौ महीशो भूपतिश्च स्त्रीसुखल महीशः श्रेष्ठो न। पुनर्जितभवदुःखोऽपि न। न शब्दोऽत्र द्वयाग्रेऽपि योज्यः। अधुनैतद्वृत्तास्यैव लक्षणमाह 'ज्ञेया मत्ता मनसगयुक्ता' इति ।। ३ ।।

हे जाह्नवी ! तुम्हारी धारा में जल पीने वाले मेंढक, कछुए, या सर्प बड़े भाग्यशाली हैं क्योंकि वे संसार के दुःख से मुक्त हो जाते हैं किन्तु स्त्रीसुखादि विषयों में अनुरक्त राजा लोग श्रेष्ठ नहीं होते क्योंकि वे भवदुःख को नहीं जीत पाते ।। ३ ।।

जह्नुसुते भवदीयजलानाममृतददां स्नपनाय वसेयुः ।
ये स्वगृहेऽपि नरो भवकारागृहयुज एव सुधर्म्मकृतस्ते ।। ४ ।।

जह्नुसुते। इति ।। हे जह्नुसुते गङ्गे ! ये नरः पुरुषाः। नरः प्रथमा बहुवचनान्तः पितृशब्दवत्। स्नपनाय भवदीयजलानां त्वदीयपानीयानां स्वगृहेऽपि वसेयुः। स्नानाय भवदीयजलान्यनादृत्य। किं गङ्गाजलस्नानेनेत्यनादरीकृत्य निजवेशमन्यपि तिष्ठेयुरित्यर्थः। अपि शब्दोऽत्र निश्चयार्थे। ते सुधर्म्मकृतः सुष्ठु चासौ धर्म्मस्त कुर्वन्ति विदधतीति सुधर्म्मकृत ईदृशाः सन्तोऽपि भवकारागृहयुज एव संसारबन्दिगृहं युञ्जन्ति, एव। त्वज्जलानादरकर्तारः सुकृतिनोऽपि पुनर्भवाब्धौ पतेयुरिति तात्पर्यार्थः। किं विशिष्टानां भवदीयजलानां अमृतददां अमृत मुक्ति ददते ददतीति अमृतददस्तेषां अमृतददां। दद् दाने क्विप्। 'मुक्तिः कैवल्यनिर्वाणश्रेयो निःश्रेयसामृत'मित्यमरः। भवदीयजलानामित्यनादरे षष्ठी, अधुनैतद्वृत्तास्यैव लक्षणमाह 'भत्रयमोजगतं गुरुकौ चेद्, युजि च नजौ ज्ययुतौ द्रुतमध्या' इति ।। ४ ।।

हे मां गंगे ! जो स्नान के लिए आपके जल का अनादर करके अपने घर में ही रहते हैं वे सुधर्मा होते हुए भी संसार रूपी कारागृह में निवास करते हैं अर्थात् पुण्यात्मा भी आपका निरादर करके पुनः पुनः जन्म लेते हैं ।। ४ ।।

अवेक्षत एव तव प्रतटाच्च तदन्तवहन्ति चरं भुवनानि ।
दरीवहनास्पृशतीश्वरि यो न तथापि भवेदनघः स नरोऽम्ब ।।५।।

अवेक्षत इति ।। ईष्टे इति ईश्वरी 'ईश ऐश्वर्ये' तस्याः सम्बोधने हे ईश्वरि ! हे अम्ब हे मातः । अम्ब इत्यत्राम्बार्थनद्योर्ह्रस्व इत्यनेन ह्रस्वः यो नरो मनुष्यस्तव प्रतटात् भुवनानि जलान्यवेक्षत एव । तव प्रकृष्टतटं प्राप्य जलानि पश्यतेत्येत्यर्थः । प्रतटादित्यत्र ल्यब्लोपे पञ्चमी । 'सलिलं कमलं जलं । पयः कीलालममृतं जीवनं भुवनं वन' मित्यमरः । च पुनः भुवनानि न स्पृशति तथाप्यनघः पापरहितः स नरो भवेत् । मातस्त्वज्जलदर्शनमात्रेणैव निःपापो नरो भवेदिति तात्पर्यार्थः । किं विशिष्टानि भुवनानि चरं क्षिप्रं यथा स्यात्तथा तदन्तवहन्ति । तस्य तटस्यान्तेऽन्तिके समीपे वहन्तीति तदन्तवहन्ति । शतृप्रत्ययः । तानि तथोक्तानि । 'लघु क्षिप्रमरं द्रुतमित्यमरः । 'अन्तोऽन्त्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती । अथ विशेषणेन जलास्पर्शने हेतुमाह । किं विशिष्टो नरः । वहनाद्दरी भयी, दरो भयं विद्यतेऽस्येति दरी । 'दर त्रासो भीतिर्भीः साध्वसं भय' मित्यमरः । अधुनैतद्वृत्तस्यैव लक्षणमाह जजाविह मौक्तिकदाम जजौ च' इति ।।५।।

हे ऐश्वर्यशालिनी मां ! जो आपके तट के पास बहने वाले जल का दर्शन करता है वह निष्पाप होकर संसार में जन्म नहीं लेता अर्थात् वह आपके दर्शन मात्र से ही निष्पाप हो जाता है । कुछ लोग जो भय के मारे जल का स्पर्श तक नहीं करते वे भी दर्शन मात्र से निष्पाप हो जाते हैं ।।५।।

उज्जासयितुं सुरापगे ना जन्तूनां निदधन्नितान्तरोषम् ।
चेत्तो ह्यमृतं स्पृशेत्तदाख्यं देवैर्वस्तु तदा नयेदलभ्यम् ।। ६ ।।

उज्जासयितुमिति ।। हे सुरापगे ! हे गङ्गे ! ईदृशोपि ना पुमान् हीति निश्चयेन चेद्यदि ते तवाऽमृतं पयः पानीयं स्पृशेत् 'पयः कीलालममृतमित्यमरः । तदा तर्हि तदाख्यं तदमृतमेवाख्या नाम यस्य तत् तदाख्यं तत् वस्तु नयेत् मुक्तिपदार्थं लभेतेत्यर्थः । अमृतं यज्ञशेषेऽम्बु सुधामोक्षे छाया चित्ते । अन्नकाम्भ न यो जू द्यौ खे खा दु नि रसायने ।।१।। घृते हृद्ये गोरसे' इत्यनेकार्थः ।। ईदृशः कीदृशः । नितान्तरोषं निदधत्

अतिशयेन कोपं बिभ्रत् 'कश्चिदुपसर्गस्त मनुवर्त्तत इति वचनान्निदघदित्यत्र धात्वर्थो मुख्यो ज्ञायते। अप्यथाऽतिशयो भरः। 'तीव्रैकान्तनितान्तानीत्यमरः' किं कर्तुं नितान्तकोपं बिभ्रत् जन्तूनां प्राणिनामुज्जासयितुं हिंसितुमित्यर्थः। हिंसार्थानामिति कर्मणि षष्ठी। किं विशिष्टं वस्तु देवै अपीति शेषः। अलभ्यं न लभितुं[1] योग्यं यद्देवैरप्यलभ्यं तत् सामान्यजन्तुभिस्तज्जलस्पर्शनं बिना कुतो लभ्यमिति भावः। अधुनैतद्वृत्तस्यैव लक्षणमाह 'तुं जेन परौ जरौ गुरुश्चेत्। म्सौ ज्गोगेभद्रविराट् भयेदनोजे ।। इति ।। ६ ।।

हे जह्नुतनये ! देवताओं को भी दुर्लभ आपके अमृतस्वरूप जल का स्पर्श, अत्यन्त क्रोधयुक्त होकर प्राणियों की हिंसा करने वाले लोगों को भी मुक्ति देने वाला है ।। ६ ।।

भूयिष्ठकष्टजलविष्टपनीरराशौ नौकायमानतनवे जनतारणाय ।
स्वर्गौकसां च यमिनाम्भरपूजितायै श्रेयस्तनो! त्रिपथगे हि नमोऽस्तु तुभ्यम् ।।७।।

भूयिष्ठकष्टजलविष्टपनीरराशाविति ।। श्रेयो मुक्तिरेव तनुः शरीरं यस्याः सा सम्बोधने हे श्रेयस्तनो ! हे मुक्तिमूर्ते ! हे त्रिपथगे ! हे गङ्गे ! हीति निश्चयेन तुभ्यं नमोऽस्तु नमस्कारोऽस्त्वित्यर्थः। तुभ्यमिति नमः योगे चतुर्थी। कथंभूतायै तुभ्यं भूयिष्ठकष्टजलविष्टपे नीरराशौ नौकायमानतनवे विष्टपं जगत् तदेव नीरराशिः समुद्रो विष्टपनीरराशिः। विष्टपं भुवनं जगदित्यमरः कष्टमेव जलं कष्टजलं भूयिष्ठं बहुलं कष्टजलं यस्मिन् स भूयिष्ठकष्टजलः स चासौ विष्टपनीरराशिश्च भूयिष्ठकष्टजलविष्टपनीरराशिस्तस्मिन् तथोक्ते नौका इव चरतीति नौकायते। नाम्न आचारार्थे क्यङ् प्रत्ययः। नौकायत इति नौकायमाना। शानच् प्रत्ययः नौकायमाना तनुः शरीरं यस्याः सा नौकायमानतनुस्तस्यै तथोक्तायै। कस्मै जनतारणाय लोकपारोत्तारणाय। पुनः कथंभूतायै तुभ्यम् स्वर्ग ओको गृहं येषां ते स्वर्गौकसो देवास्तेषां स्वर्गौकसां च पुनर्यमिनो मुनीनां यमः संयमो विद्यते येषां ते इति यमिनस्तेषां यमिनां भरपूजितायै स्वर्गौकोभिर्यमिभिश्चातिशयेन पूजनीयायावित्यर्थः। 'अप्यथाऽतिशयोभर' इत्यमरः। स्वर्गौकसां यमिनामित्यत्र कर्त्तरि षष्ठी पूजितायावित्यत्र वर्त्तमाने क्तप्रत्ययः। अधुनैद्वृत्तस्यैव लक्षणमाह। उक्ता वसन्ततिलका तभजा जगौ गः। इति ।। ७ ।।

---

[1] लभितुमिति प्रामादिकं लब्धुमिति युज्यते।

अत्यन्त कष्ट रूपी जल से परिपूर्ण इस संसार समुद्र में लोगों को नाव की तरह पार उतारने में तत्पर, एवं देवताओं तथा ऋषि मुनियों द्वारा पूजनीया तथा मुक्तिस्वरूपा त्रिपथगे गङ्गे आपको प्रणाम हैं ।। ७ ।।

पापघ्नं स्वान्तहारि मद्यभ्रश्यत्षट्पदचञ्चुनागमज्जम् ।
हंसै रोधोऽभितो निषेव्यं गाङ्गं वारि शिवाय नः सदा स्तात् ।।८।।

पापघ्नमिति ।। गङ्गाया इद गाङ्गं । तस्येदमिति इदमर्थेऽण् । वारि पानीयं सदा नित्यं नोऽस्माक शिवाय शुभाय स्तात् भवतु । 'श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभमित्यमरः । किं विशिष्टं वारि पापघ्नं दुरितहारि पुनः किं विशिष्टं वारि मद्यभ्रश्यत्षट्पदचञ्चुनागमज्ज मज्यते इति मज्जः पचादित्वादप्रत्ययः नागानां गजानां मज्जो ब्रुडनं केल्येति शेषः । नागमज्जः । मद्ये मदे भ्रश्यन्तः पतन्तश्च ते षट्पदा भ्रमराश्च तै वित्तो नागमज्जो यस्मिन् तत् मद्यभ्रश्यत्षट्पदचञ्चुनागमज्जं तेन वित्ताश्चञ्चुप्चणपाविति चञ्चुप् प्रत्ययः । पुनः किं विशिष्टं वारि हंसैर्मरालै रोधस्तीरमभितः समंततो निषेव्यमाश्रयितव्यमित्यर्थः । रोध इति अभितोयोगे द्वितीया । 'कूलं रोधश्च तीर चैत्यमरः । अत एव स्वान्तहारि । स्वान्त मनो हरतीति एव शीलं स्वान्तहारि मनोहारीत्यर्थः । स्वान्तं हृन्मानसं मन' इत्यमरः अधुनैतद्वृत्तस्यव लक्षणमाह पर्यन्तेर्यौ तथैव शेषं, चौपच्छन्दसिकं सुधीभिरुक्तम् । इति ।। ८ ।।

मां, पापों का नाश करने वाला, स्नान करते हुए हाथियों के मद के कारण उन पर मंडराने वाले भौरों से परिपूर्ण, तट पर विहार करने वाले हंसों के झुण्ड से मन को लुभाने वाला आपका यह जल हमारा कल्याण करे ।।८।।

ज्योतिर्विच्चक्रपाणेः प्रथितसुयशसः सूनुना निर्मितं स-
च्छ्रीनाथाख्येन सम्यक् पठति नरवरो जह्नुकन्याष्टकं यः ।
कुर्वन् स्नानं प्रभाते निजहृदयमलं स्थावरीकृत्य नूनं
कैवल्यं लभ्यते वा शमितकलिमलश्रेणिना तेन तूर्णम् ।। ९ ।।

इति श्रीनाथविरचितं गङ्गाष्टकं सम्पूर्णम् ।। श्रीरस्तु श्रीः ।।

ज्योतिर्विच्चक्रपाणेरिति ।। यो नरवरो मनुष्यश्रेष्ठः प्रभाते प्रातः काले स्नानमभिषवं कुर्वन् सन् इदमिति शेषः । जह्नुकन्याष्टकं गङ्गाष्टकं पठति भणतीत्यर्थः । कि

कृत्वा अलमत्यर्थं निजहृदयं स्वकीयमानसं स्थावरीकृत्य स्थिरं कृत्वा। 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मन' इत्यमरः। नूनमिति निश्चयेन 'नूनं तर्केऽथ निश्चय' इत्यमरः। तेन नरवरेण कैवल्यमुक्तिः तूर्णं सत्वरं यथा स्यात्तथा लभ्यते वा प्राप्यत एव इत्यर्थः। वाशब्दोऽत्र एवार्थे। 'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चय' इति विश्वः। किं विशिष्टं जह्नुकन्याष्टकं ज्योतिर्विच्चक्रपाणेः ज्योतींषि वेत्तीति ज्योतिर्वित् गणकः सचासौ चक्रपाणिश्च चक्रपाणिनामा च। ज्योतिर्विच्चक्रपाणिस्तस्य ज्योतिर्विच्चक्रपाणेः सूनुना पुत्रेण। 'सूनुः पुत्रेऽनुजे रवाविति विश्वः। सम्यक् सुष्ठुप्रकारेण निर्मितं रचितं किं विशिष्टस्यज्योतिर्विच्चक्रपाणेः प्रथितसुयशसः प्रथितं विख्यातं सुष्ठु यशः कीतिर्यस्य सः प्रथितसुयशास्तस्य तथोक्तस्य जगत्यामिति शेषः। 'यशः कीर्तिः समज्या च स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः। किं विशिष्टेन सूनुना श्रीनाथाख्येन श्रीनाथ आख्या नाम यस्य सः श्रीनाथाख्यस्तेन तथोक्तेन। पुनः किं विशिष्टं गङ्गाष्टकं जह्नुकन्याष्टकं सत् प्रशस्तं 'सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः। किं विशिष्टेन तेन शमितकलिमलश्रेणिना शमिता शान्ति प्राप्ता कलिमलश्रेणिः कलियुगसम्बन्धि पापावली यस्य सः शमितकलिमलश्रेणिस्तेन शमितकलिमलश्रेणिना। अधुनैतद्वृत्तस्यैव लक्षणमाह 'अभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।' इति।९॥

जो भाग्यशाली पुरुष प्रातःकाल स्नान करते हुए पूर्णतः स्थिरचित्त होकर प्रसिद्ध और यशस्वी ज्योतिर्विद् चक्रपाणि के पुत्र तथा कलिकाल के पापों से मुक्त श्रीनाथ के निर्मित इस पापनाशक गङ्गाष्टक का पाठ करता है, उसे शीघ्र और निःसंदेह मुक्तिलाभ मिलता है॥ ९॥

इति श्रीनाथेन विरचिता स्वकृतगङ्गाष्टकस्य टीका समाप्तिमगात्॥श्रीरस्तु॥ कल्याणमस्तु॥

नेत्राग्निमुनिचन्द्र १७३२ युतवर्षस्य मार्गशीर्षमासे शुक्लपक्षे चतुर्दश्यां तिथौ रविवासरे च सति श्रीनाथेन सवृत्तिगङ्गाष्टकमलेखि महाराजश्रीयशवन्तसिंहरक्ष्यमाण जोधपुरमध्ये। करोतु जगतां शंभु निजनाम निरन्तरम्।

संवत् १७३२ मार्गशीर्ष शुक्ला १४ रविवार को श्रीनाथ ने वृत्ति सहित गङ्गाष्टक जोधपुर नरेश महाराज श्री यशवन्तसिंह के राज्य में लिखा। अपने नाम के अनुसार भगवान् शंकर संसार का कल्याण करे।

* * *

मदीया सोवियतयात्रा

श्रीपद्मशास्त्री

325/7 राजापार्क, जयपुरम्

पूर्वाऽनुवृत्तम्

1917 वर्षस्य फरवरीमासस्य विद्रोहात्पूर्वमस्य संग्रहालयस्यैको भागस्तत्कालिकराज्यसञ्चालकानां निवासश्चासीत् । रूसस्य विख्यातकलाविशेषज्ञैः विगतशताब्दीषु पञ्चवारमस्य पुनर्निर्माणो विहितः । अक्टूबरक्रान्ते, पश्चात् षड्विभागे विभक्तेऽस्मिन्संग्रहालये सोवियतसंघस्य तथा विश्वस्य, खृस्तात्पूर्वं सप्तशताब्देरारभ्य पिकासो चित्राणि यावद् विभिन्न कालानां कलासंस्कृतिसम्बन्धीनि सप्तविंशतिलक्षवस्तूनि संग्रहीतानि विद्यन्ते ।

अस्मिन्संग्रहालये विश्वविख्यातिकलाकाराणाँ विभिन्नाणि चित्राणि. शिल्पिभिः समुत्कृष्टशिल्पकलायाः प्रतिबिम्बानि, प्राचीनराज्ञां धातुविनिर्मिता विशाला मूर्तयः । विभिन्नकालेसु सैनिकैः प्रयुक्तानि शस्त्रास्त्राणि, मध्येशियायाः संस्कृतेर्ध्वंसावशेषाः, ऐतिहासिकास्तथा प्रागैतिहासिकाश्चालेखाः, विभिन्नकालिका मुद्राश्च सुसज्जिताः सन्ति ।

१७८३ तमे वर्षे विनिर्मिते विशाले रंगमण्डपे सम्प्रत्यपि विश्वविख्यातकलाकाराः, चित्रकाराः, शिल्पिनः, स्वस्वकलानां प्रदर्शनं तथा कलागोष्ठीनामायोजनञ्च कुर्वन्ति ।

द्वितीये दिवसे प्रातर्लेनिनग्रादस्य "नोवस्ती प्रेस एजेन्सी" नः स्वागतञ्चाकरोद् यत्र लेनिनग्रादस्य प्राच्यभाषाविदां गोष्ठी समायोजिताऽऽसीत् । हिन्दीभाषाया रूसीयो विद्वान् बारान्निकोवः, नतालिया तालस्तायः, संस्कृतभाषाविद् व्लादिमीरः, इरमयेप्रभृतिभिर्विद्वद्भिः सह होराद्वय यावद्विचारविमर्शमकुर्मः । ते लेनिनग्रादविश्वविद्यालये कृतानां प्राच्यभाषासम्बन्धि शोधकार्याणां तथानुवादकार्यस्य विस्तृतं विवरणं प्रास्तुवन् । प्राच्यभाषाविदां पाण्डित्यपूर्णं शोधकार्यं तथानुवादकार्यं वीक्ष्य वयं हर्षोत्फुल्लाः सञ्जाताः ।

सायंकाले विमानेन वयं जार्जियाराजधानीं त्बिलीसीं गन्तुकामाः परं प्रकृतिप्रकोपेन वयमवरुद्धाः । अस्माकं मार्गदर्शकः मास्कोकार्यालयात्सम्बन्धं स्थापयित्वा वाष्पयानेन मास्कोनगरं गन्तुं व्यवस्थां व्यधात् येन वयं प्रातरेव मास्कोनगराद् विमानेन त्बिलीसीनगरं गन्तुं पारयेमस्तथास्माकं निश्चितः कार्यक्रमोऽपि निरस्तो न स्यात् ।

यात्रा कार्यक्रमस्याकस्मिकेन परिवर्तनेन सोवियतसंघस्य रेलयात्राव्यवस्थायाश्चावलोकनस्यावसरोऽमिलत् । चतुश्शय्यावति शयनकक्षे चास्माकमारक्षणं कृतम् । अन्यकक्षेष्वपि

सोवियतनागरिकाणां ससुपवेशनाय सुखदाश्चासन्दिकाः, अशनपानादिका व्यवस्था, स्वच्छतां तथा शिष्टाचारपूर्णव्यवहारं वीक्ष्य मोमुद्यते मनः। यद्यप्यस्माकमियं वाष्पयानयात्रा रात्रौ रात्रौ सम्पद्यमानाऽऽसीत्तथापि सूर्यप्रकाशेन दृष्टिगोचराणां विभिन्नवनानां, भूगर्भमार्गाणां, सोवियतग्रामाणाञ्च निरीक्षणं कुर्वन्तः तीव्रगत्या प्रचलद् विद्युद्वाष्पयानेन वयं षड्होरासु मास्कोनगरं प्राप्ताः। "नोवस्ती प्रेस-एजेन्सी" कार्यालये नित्यक्रियाभिर्निवृत्य विमानेन जार्जियागणराज्यस्य राजधानीं त्विलीसीनगरं प्रति प्रस्थिताः।

त्विलीसी जार्जिया राज्यस्य सुन्दरतमं तथा सम्पन्नं नगरं वर्तते। काकेकसपर्वतश्रेणिभिः कृष्णसागरं यावत् विस्तृतोऽयं प्रान्तरुस्तावेलीसदृशान्कवींस्तथा विख्यातलेखकानजनयत्। अष्टादशशताब्द्यामपि स्टालिनज्वौलूकित्जषमाः क्रान्तिकारिणश्चात्र जनिं लेभिरे ये पूंजीवादव्यवस्थाविरुद्धं यावज्जीवं संघर्षमकुर्वन् तथा शोषणस्याधारे स्थापितां समाजव्यवस्थां निर्मूलामकुर्वन्। उभयतो नगरं पर्वतोपत्यका, मध्ये प्रवहमाना कुरानाम्नी मनोरमा सरिदस्य नगरस्य शोभां द्विगुणां विदधाति। पर्वतावस्थितं दूरदर्शनकेन्द्रं रात्रौ देदीप्यमानमतीव मनोरमं विभाति। सर्वप्रथमं बख्तानगर्गासालेमहोदयश्चतुर्थशताब्द्यामस्य नगरस्य निर्माणमकरोत् यस्य विशालः स्मारकः पर्वतोपरिस्थितः। त्विलीसीनगरस्योपत्यकायां निर्मितानि शष्पमृत्तिकागृहाण्यद्यापि दर्शकानां दर्शनाय सुरक्षितानि सन्ति। अत्राधिक्येन ख्रिस्तमतावलम्बिनश्चाल्पसंख्यायां मुस्लिमनागरिका विराजन्ते।

अत्रत्या बोडकानाम्नी सुरा विश्वप्रसिद्धा मन्यते। क्षेत्रादस्मात् खनिजं जलं, फलानि तथा ब्रह्मकषायः (चाय) सम्पूर्णदेशे समुपयोगाय सम्प्रेष्यते। अत्रोष्णजलस्य स्रोतांस्युपलब्धानि। अत्रत्या जनाः स्वकलासु संस्कृतिषु च प्रीतिमन्तः। अत्रत्ये तकनीकी–विश्वविद्यालये भारतीयाश्छात्रा अपि पठन्ति। शास्त्रीयसंगीतस्य शिक्षार्थमपि नगरमिदं विख्यातं वर्तते। भारतीयकथासाहित्येन, नाटकैस्तथा शास्त्रीयसंगीतेनात्रत्याः कलाविशेषज्ञाः प्रभाविताः सन्ति। ते स्वभाषास्वपि तत्तत्साहित्यस्यानुवादं कृतवन्तः।

प्रभाते कार्यक्रमानुसारं वयं राज्यसांस्कृतिकमन्त्रालयं गताः यत्र सांस्कृतिक मन्त्रिणा तथोपमन्त्रिणा सह द्विभाषिकमाध्यमेन वार्ता प्रारब्धा। स्वयं सांस्कृतिकमन्त्री सोवियतसंघस्य लब्धप्रतिष्ठो गायको यो मन्त्रालयस्य सांस्कृतिकगतिविधिभिरस्मान् परिचितानकरोत्। वार्तायामस्यामेकः शास्त्रीयसंगीतकारोऽपि समुपस्थितश्चासीत्। मन्त्रिमहोदयश्चास्मान् फलानि फलरसञ्चापाययत्। वार्तायाः समाप्तौ ते कृतज्ञतां प्रकटयन्तः स्वगीतानां रिकार्डानां संग्रहमस्मभ्यमयच्छन्।

मध्याह्ने वयं नगराद्बहिर्भागस्थितं

विशालचायसंस्थानं निरीक्षितुं प्रचलिताः केवल यत्र चायस्य विभिन्नाकारेषु विभाजनं क्रियते कर्मकरैः। राष्ट्रस्य बृहत्तमेयं निर्माणी (फैक्टरी) १९४० तमे वर्षे स्थापिताया निर्माण्या पञ्चशतं टनपरिमितं दैनिकमुत्पादनं वर्तते। देशस्य विभिन्नभागेभ्यश्चायोद्यानानां चायं वाष्पयानैरत्रानीयते। अत्राष्टशतं श्रमिका विभिन्नसंयन्त्रैश्चायस्य वर्गीकरणं कुर्वन्ति। सोवियतसंघे तथा मित्रराष्ट्रेषु चायस्य निर्यातः क्रियते। संस्थानस्यास्य प्रबन्धकाः विश्वस्य विभिन्नदेशेषु चायोद्यानानां निरीक्षणं कृतवन्तः। संस्थानस्य गणवेशं परिधाय वयं तदन्तः प्रविष्टा यत्र सोवियतनार्यः कुशलतया स्वस्वकार्यमकुर्वन्। पुरुषास्तु केवलं बृहद्यन्त्राणां परिवीक्षणं कुर्वन्तो दृश्यन्ते। श्रमिकेभ्यो निवासादीनां व्यवस्था क्षेत्रेऽस्मिन्कृता वर्तते। भारतीयचायस्य सम्बन्धे ज्ञानमस्माकं श्रुत्वा प्रबन्धकाः प्रभाविताः सञ्जाताः। त्रिहोरापर्यन्त संस्थानस्यावलोकनं कृत्वा, चायपानं विधाय कृतज्ञतां प्रकटयित्वा वयं तस्मात्प्रचलिताः।

द्वितीये दिने प्रभाते विंशतिकिलोमीतरपरिमित दूर "जबरीक-सावदरी" नामकं पञ्चमशताब्द्या गिरिजागृहं द्रष्टुं गताः। यल्लघुपर्वतोपरि कानने स्थितमस्ति। सर्वतः पर्वतोपत्यकां पीतानि तुष्पाणि विकसितानि। गिरिजागृहमिदं पुरातनतमम्। व्यतीतेष्वप्यनेकेषु शताब्दिषु गृहस्यास्य मूलस्वरूपमद्यापि सुरक्षितं विद्यते। अस्माद् गिरिजागृहान्नाति दूरे एकमपरं प्राचीनगिरिजागृहं वर्तते यद् विशालप्राचीराभ्यन्तरे सुरक्षितम्। कनाडातश्चामेरिकातस्तथा स्थानीयाश्चर्चपूजका अत्रागत्यार्चां पूजां प्रकुर्वन्ति। गिरिजागृहेऽस्मिन्नेकतः कार्यालयश्चान्यतश्चर्चपूजकानां निवासस्थानानि सुशोभन्ते।

तृतीये दिने वयं विमानेनोजबेकिस्तानस्य राजधानीं ताशकन्दं प्रति प्राप्ताः। होरार्धं यावन्नगरस्य विशालभवनानां तथा राजमार्गाणां निरीक्षणं कुर्वन्तो वयमुजबेकिस्ताननामकं विशालं पान्थावासं प्रत्यागताः।

(क्रमशः)



नागानन्दनाटके रससमालोचना

श्रीरूपनारायणत्रिपाठी
एम., ए., साहित्याचार्यः
प्रवक्ता, श्री दि० जैन-संस्कृतकालेजः, जयपुरम्

को नाम भारतीयसंस्कृतेरुपासकः स्थाण्वीश्वरं प्रजावत्सलं हर्षवर्द्धनं न जानाति। हर्षवर्द्धनो यथा प्रशासनचातुर्येण इतिहासे प्रसिद्धः, तथैव नाट्यरचनादिभिः संस्कृतसाहित्येऽपि लब्धादरो वर्तते। तस्य रचनाशक्तिं विलोक्य महाकविजयदेवेन 'हर्षः कविताकामिन्याः हर्षः' इति कथितं तत्समीचीनमेव। हर्षस्य नाटकेषु निखिलैर्नाट्यलक्षणैः समन्वितं नागानन्दनाटकं संस्कृतरूपकाणां मध्ये विपुलं वैशिष्ट्यं धारयति। अस्य कथानका जनानां कल्याणाय परोपकारव्रतस्य अहिंसाव्रतस्य च वैशिष्ट्यं प्रकटयति, प्रायशः संस्कृतनाटकेषु श्रृंगाररसस्यैव प्राधान्यं दृश्यते, परं नागानन्दनाटके कविना श्रृंगाररसं गौणरूपेण प्रदर्श्य वीररसस्य प्रधानता वर्णिता।

नाट्शास्त्रानुशारेण नाटके एक एव रसः प्राधान्येन विधेयः; स रसः वीरः श्रृंगारो वा। अन्ये रसास्तु तदङ्गत्वेनैवोपनिबन्धनीयाः। नागानन्देऽपि एक एव वीररसोऽङ्गित्वं भजते। तल्लक्षणं यथा चन्द्रालोके—

"उत्साहाख्यस्थायिभावः
प्रभावादिविभावभूः।
वीरोऽनुभावैः स्थैर्याद्यैर्भा-
वैर्गर्वादिभिर्युतः॥"

धनञ्जयमते स वीररसः त्रेधा—दयायुद्धदानयोगात्, परं साहित्यदर्पणकारस्य विश्वनाथस्य मते स चतुर्धा भवति—दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरश्चेति। यथा—

"स च दानधर्मयुद्धैर्दयया च
समन्वितश्चतुर्धा स्यात्।"

अन्येषां मते वीरस्य सत्य-क्षमा-पाण्डित्य-बल-वीरादयोऽपि भेदाः भवितुमर्हन्ति। वीरस्त्रेधा चतुर्धा वा भवतु, नात्राऽस्माकं कापि विप्रतिपत्तिः, यतो हि सर्वेषां मतेषु विद्यते सद्भावो दयावीरप्रकारस्य। स दयावीररस एव नाटकेऽस्मिन् नागानन्दे प्राधान्येन वर्तते। नागानन्दे नायकभूतस्य जीमूतवाहनस्य शंखचूडनामकनागस्य प्राणपरिरक्षणाय स्वप्राणपरित्यागे उत्साहः स्थायी भावः, गरुडस्य भक्ष्यभूतेन शंखचूडालम्बनविभावेन पुत्राय सोरस्ताडमाक्रोशन्त्या वृद्धायाः करुणविलपनैरुद्दीपनविभावैश्च विभावितः, तथा च—

"शिरामुखैः स्यन्दत एव रक्त—
मद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवापि तावत्
किं भक्षणात् त्वं विरतो गरुत्मन्॥'-

इत्यादिभिर्महासत्त्वाभिव्यञ्जकवचनैरनुभावैरनुभावितः; "ग्लानिर्नाधिकपीयमानरु-

धिरस्यापि……"प्रीत्या प्रसन्नं मुख" मित्यादिवर्णितैर्ग्लान्याभावप्रीतिहर्षादिभिर्व्यभिचारिभावैः सुतरां परिपुष्टः दयावीराख्यः रसः। स च कामपि परोपकारशीलां प्राणिकल्याणनिरतामहिंसावृत्ति प्रथयति ।

यद्यपि नागानन्दनाटके निर्वेदस्थायिभावात्मकः पित्रोर्वनगमनादिभिर्विभावैर्विभावितः "आयासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद् गुणः" इत्यादिभिरनुभावैरनुभावितः शान्तरसोऽपि विद्यते; मलयवत्यालम्बनस्तदलौकिकवीणावादनादिभिरुद्दीपनविभावैरुद्दीपितः मनोगतरागाभिव्यञ्जकवचनानुभावो मलयवतीपरिणयनिबन्धनः रतिस्थायिभावात्मकः शृंगाररसोऽपि सहृदयानां मनांसि रञ्जयति, तथैव—

निराधारं धैर्यं कमिव
शरणं यातु विनयः,
क्षमः क्षान्तिं वोढुं क इह ?
विरता दानपरता ?
हतं सत्यं सत्यं व्रजतु
कृपणा क्वाद्य करुणा,
जगज्जातं शून्यं त्वयि
तनय ! लोकान्तरगते ॥

इत्यादिस्थलेषु शोकस्थायिभावात्मकः शङ्खचूडस्य वृद्धामातुः तैस्तैः करुणक्रन्दनैरनुभावितः करुणरसोऽपि उत्तररामचरितमिव प्रस्तरचेतांस्यपि द्रवीभावं नयति। तथापि शान्तशृंगारकरुणरसाः नागानन्देऽङ्गित्वेन नहि निविष्टाः; अपितु ते अङ्गीभूतस्य दयावीररसस्याङ्गत्वमेव भजन्ते । अतस्तेषां गौणतैव न तु प्राधान्येन स्थितिः। एतेन निर्विवादपूर्वकं कथयितुं शक्यते, यद् परोपकारादिभिः प्राणिकल्याणकारिभावैरास्वादनीयः दयावीररसः नागानन्दनाटके सहृदयानां चेतांसि केनाप्यानन्दातिरेकेण चमत्करोतीति ।

SUDHIR RATHI

M/s. Baldev Krishna

MOUNT ROAD EXTENSION, NAGPUR-440001
OFF. 24926, RES. 24080

Rep.

EUTECTIC WELDING ALLOYS, PAPER-POWER CAPACITORS,
LAMPS & TUBES H. SANITARYWARE, SP GLAZED TILES,
SOMA C. P. FITTINGS THERMOCOLE

देशवार्ता:-

श्रीपद्मशास्त्री
325/7 राजापार्कं, जयपुरं

१. रामायणस्य आदर्शाः निजजीवने अवतारणीयाः--

अस्माकं प्रधानमन्त्रिणा श्रीमोरारजीदेसाईमहाभागेन चित्रकूटनगरे चैत्रकृष्णनवम्यां सार्धलक्षमिते जनसम्मर्दे प्रतिपादितं यत् "रामायण-कथा अस्माकम् अमूल्यो निधिः। अयं ग्रन्थो भारतीयसंस्कृतेः प्रतिनिधिः। महात्मना गान्धिना स्वराज्यान्दोलनं सञ्चालयता निवेदितमासीत् 'वयं स्वराज्यं कामयामहे' यतो रामराज्यमस्माकं लक्ष्यम्। जनताया जीवनं सुखमयं भवेदेतदेवास्माभिर्मिलित्वा विचारणीयम्। श्रीदेसाईमहोदयः प्रावोचत् यत् रामलीलाप्रसगेषु स्थाने स्थाने रावणपुत्तलिकाया दाहो न समीचीनः वस्तुतः श्रीरामचन्द्रेण रावणाय मुक्तिः प्रदत्ता। दक्षिणदेशीयानां सहयोगमवाप्यैव राघवः साफल्यमभजत्। राष्ट्रहिताय उत्तरदक्षिणयोर्विरोधः परिहार्यः।

२. राष्ट्रिय-संस्कृत-संस्थानस्य विकासयोजनाः-

षष्ठयोजनायां संस्कृतविकासाय राष्ट्रियसंस्कृतसंस्थानेन त्रिषष्टिलक्षाधिको द्विकोटिपरिमितो धनराशिः स्वीकृतः। सम्प्रति संस्थानेनानेन पञ्चविद्यापीठानि सञ्चाल्यन्ते यत्र छात्रा योग्यतानुसारं छात्रवृत्तिं लभन्ते। केन्द्रिय-शिक्षामन्त्रिणा चाध्यक्षपदेन लोकसंस्कृतिविकासस्याग्रहः कृतः। षष्ठयोजनायां पत्राचारपाठ्यक्रमः, मातृभाषया सह संस्कृतस्याध्यापनव्यवस्था, संस्थानस्य विकासः शोधकार्यविकासश्चेति विकासकार्याणि समावेशितानि। सुभाषितश्लोकानां संस्कृतगीतानाञ्च ध्वनिमुद्रिकाः (ग्रामोफोन रेकार्ड) ध्वनिपट्टिकाः (टेप) च निर्माय तदीयसंग्रहालयनिर्माणकार्यक्रमोऽपि विचाराधीनः।

३. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य स्थापनोत्सवः-

कुलाधिपतीनां श्रीमतां काशिराजानां विभूतिनारायणसिंहदेवानां साभापत्ये चैत्रशुक्लद्वितीयायां विश्वविद्यालयस्य एकत्रिंशतितमः स्थापनोत्सवः समपद्यत। कुलपतिमहोदयेन विश्वविद्यालयस्य कार्यकलापानां विस्तरतश्चर्चा कृता निवेदितञ्च "भारतीयदूतावासेष्वपि विदेशस्थितेषु संस्कृतज्ञानां प्रतिनियुक्तिः करणीया। आचार्यपरीक्षोत्तरणानन्तरं वर्षत्रयं यावत् विशिष्टाध्ययनव्यवस्थाऽपि अपेक्ष्यते। मीमांसादर्शनस्याध्ययनं प्रायोगिकं भाव्यम्। आयुर्वेदविभागो विश्वविद्यालयेन सह संयोजनीयः।

४. कल्याणाश्रमस्य रजतजयन्तिसमारोहः-

कल्याणाश्रमो वनवासिनां सर्वांगीण-

विश्व-वार्ता:—

पाकिस्तानस्य भूतपूर्वराष्ट्रपतये मृत्युदण्डः

श्रीकलानाथशास्त्री, एम ए, साहित्याचार्यः,
निदेशकः, भाषाविभागे राजस्थानम्, जयपुरम्

जानन्त्येव पाठका यत् पाकिस्तानस्य भूतपूर्वाय प्रधानमन्त्रिणे राष्ट्रपतये च श्रीजुल्फिकार अली भुट्टोमहोदयाय, यस्य हि शासनं गतवर्षीय-महानिर्वाचनेषु विजयाधिगमानन्तरं सैन्यप्रशासकेन जनरलजियाउलहकेन समाप्य राजसत्ता स्वहस्तगता कृताऽ-

---

विकासाय यत्कार्यं करोति तत्प्रशंसनीयम्। आश्रमस्य "रजत-जयन्ति-समारोहे भाषमाणः केन्द्रिय-गृहराज्यमंत्री धनिकलालमण्डलः प्रावोचत्—विगतवर्षेभ्यो वनवासिनां हितायानेन यत्कृतं तत्को विस्मर्तुं शक्नोति। महामन्त्रिणा बालासाहबदेशपाण्डेमहोदयेनाश्रमस्य विस्तृत प्रतिवेदनं प्रस्तुतम्। समितेः कार्याध्यक्षा श्रीमतीविजयाराजेसिंधिया, महापौरः श्रीहंसराजगुप्तस्तथान्ये गण्यमान्याः समाजसेविनोऽपरेऽस्मिन् कल्याणाश्रमस्य विकासाय स्वाभिमतं प्राचकटन्।

५. हा! हन्त! कीर्तिशेषाः श्रीदयानन्दशास्त्रिणः।

जयपुरस्थ—दादूसंस्कृतमहाविद्यालये चत्वारिंशद्वर्षाणि यावदाचार्यकक्षापर्यन्तं विविधविषयाणामध्यापनं विधाय संस्कृतसाहित्यस्य मूर्धन्याः पण्डिताः श्रीदयानन्दशास्त्रिणः स्वजीवनस्योत्तरे वयसि करनालनगरे संस्कृतपाठशालां प्रत्यध्यापनार्थं गच्छन्नकस्मान्मार्गे कीर्तिशेषाः सञ्जाताः। मूकसंस्कृतसेवकस्य निधनसमाचारं श्रुत्वा संस्कृतजगति सर्वत्र शोकः प्रसृतः।

प्रतिभासम्पन्नोऽयं बालः कर्मकाण्डाभिरति महति ब्राह्मणकुले, करनालमण्डलस्य सांगरियाग्रामे जन्मपरिग्रहं चकार। आशैशवात्प्रतिभासम्पन्नो गृह एवाक्षरज्ञानमवाप्य शेखावाटीक्षेत्रे अध्ययनार्थं गतः। तेषां सहाध्यायिभि र्व्याकरणस्याप्रतिमविद्वद्भिः श्रीस्वामिबालानन्दमहोदयैः साकं तेषां नियुक्तिर्दादूमहाविद्यालये सञ्जाता। विद्वन्मूर्धन्या बहूनि वर्षाणि यावदाकाशवाण्यामपि रेडियोनाटकनाटिकानां सफलमभिमञ्चनं कृतवन्तः। ते स्वकीयामेकाकिनीं पुत्रीं सुमित्रां शास्त्रिपर्यन्तं संस्कृतमपाठयन्। किं तत्कृतसंस्कृतसेवायाः सम्यग्मूल्याङ्कनं कदापि भविष्यति? इति विचारयन्—अनासक्ताय संस्कृतसेविने सादरं सविनयं शतशः प्रणामाञ्जलयो विलसन्तुतमाम्।

❖

भूत्, पाकिस्तानीयेन उच्चन्यायालयेन मृत्युदण्डो गतमार्चमासस्याष्टादश्यां तारिकायामादिष्टः। तेन सहान्येऽपि चत्वारो जना मृत्युदण्डेनादिष्टाः। एतेष्वारोपोऽभूद् यदेभिः नवावमोहम्मदअहमदखां कसूरिणो हत्यायाः षड्यंत्रः कृतोऽभूत्। २२ मार्चदिवसेऽन्यैरेभिश्चतुर्भिर्जनैः सर्वोच्चन्यायालयो दण्डमसुं निषेधितुं प्रार्थितः किन्तु श्रीभुट्टो तादृशीं प्रार्थनां २५ मार्च दिवसे व्यधात्।

पाकप्रशासको जनरलजियाउलहक आशास्ते यत्सर्वोच्चन्यायालय एतस्याः प्रार्थनाया विषये कमपि निर्णयं मासद्वयाभ्यन्तरे विधास्यति किन्तु भुट्टोमहोदयस्याधिवक्ता मन्यते यदेको वत्सरोऽस्मिन् निर्णये व्यतिगच्छेत्तर्हि नाश्चर्यम्। एवंविधा सेदं घटना पाकिस्तानस्येतिहासे त्वभूतपूर्वाऽस्त्येव, विश्वस्य कोणे कोणे समाचारेणानेन आश्चर्यस्य, विरोधस्य, विचारमन्थनस्य चैका विचित्रा धारा प्रवाहितास्ति। पाश्चात्यराष्ट्राणि निर्णयस्यास्य विरोधे स्वमतानि प्रकटितवन्ति। एतेषां राज्यसर्वकारैरपि पाकिस्तानीय-सैन्यशासकोऽनुरुद्धो यद् भुट्टोमहोदयस्य प्राणा रक्षितव्या इति। पाकिस्ताने भुट्टो-समर्थकैः परःसहस्रं जनैः लाहौरस्थस्योच्चन्यायालयस्यास्य निर्णयस्य विरोधे प्रदर्शनमपि कृतम्। यद्यपि बंगल देशस्य मुक्त्यभियानसमरे तस्य प्रदेशस्य स्वातन्त्र्यकामनानां कण्ठशोषं कृत्वा, तस्मिन् प्रदेशे स्व० शेखमुजीबुर्रहमानस्य दले बहुमतं प्राप्तवति सत्यपि तस्याधिकारहननादि च कृत्वा भुट्टो-महोदयो नाटकीये स्वकीये व्यक्तित्वे प्रभाववति सत्यपि सर्वत्र विवादास्पदतामगात्, तथापि यत्किमपि भवतु—एकस्य भूतपूर्वस्य राष्ट्रनेतुः, राष्ट्रपतेः, प्रधानमन्त्रिणश्च मृत्युदण्डद्वारा प्राणान्तस्य सम्भावनया सर्वेऽपि विश्वजनाश्चिन्ताकुलाः सन्ति। भारतसर्वकारेण यद्यप्यधिकृतरूपेण एतस्य विवादस्य विषये न किमपि लिखित पाकिस्तानसर्वकाराय यतो हि तन्मते कस्यापि देशस्याऽऽन्तरिकसमस्यानां न्यायव्यवस्थायाश्च विषये कस्यचनाप्यन्यस्य देशस्य हस्तक्षेपोऽवाञ्छनीयतामेव भजति तथापि परोलक्षं भारतीया जनाः एतादृशीं घटनां विचित्रां मन्वानाः सौत्सुक्यं भाविघटनानां परिवर्तं प्रतीक्षन्ते।

को नामायं धर्मः ?

वैज्ञानिके युगेऽस्मिन् सर्वेषां सुखसाधनानां संयोजनेऽपि इदानीन्तनाः जनाः सानन्दाः न। तेषां जीवने धर्माभावः आनन्दाभावस्य मूलकारणम्। को नामायं धर्मः? किं मालाधारणं रामनामजपनादि? नहि। धारयतीति धर्मः।' यः कश्चिदपि धारयत्यस्मान् अस्मभ्यं गांभीर्यं सुस्थिरतामुत्साहं च प्रददाति, यस्माच्चास्माकमूर्ध्वंसंचरणं भवति, स एव धर्मः।

धर्मो जीवनादविच्छिन्नं कणे-कणे अनुस्यूतमस्य घटकत्वमस्ति। जीवनात् भिन्नं धर्मस्य कोऽप्यर्थः नावशिष्यते। जीवनस्य प्रत्येक आचारो यद्यय सदाचारस्तर्हि धर्म एव परिगण्यते उक्तं च मनीषिभिः ‘आचारलक्षणो धर्मः।”

धर्मादतिरिक्तं धर्मकाममोक्षाश्च जीवने परमावश्यकाः सन्ति। एषां मूले यावच्चिरं धर्मोऽभिवर्तते तावदेव इमे सफला आनन्दप्रदाश्च प्रभवन्ति। अधर्मेण मोक्षस्य तु का कथा, कमार्थयोः सेवनेन जीवनस्य पतनं तु सुनिश्चितमेव। महाभारते अधार्मिकेषु कौरवेषु व्यासस्येयमुक्तिरासीत्—

"ऊर्ध्वबाहुः विरौम्येष नहि कश्चिद् शृणोति माम्।

धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते? ।।"

परिणामे कौरवाणाम् विनाश एवाभवत्। अपरस्मिन् पक्षे महाप्रस्थानसमये साक्षात् धर्मराजः शुनोरूपेण महाराजं युधिष्ठिरमनुगतः। तेषामनुकम्पया च स भौतिकशरीरेणैव स्वर्गं प्राप्तवान्। इदं प्रतीकं यद् अन्तकाले प्रियादपि प्रियो जनः सह गन्तुम् सामर्थ्यहीनो भवति केवलं धर्म एवानुवर्तते, धर्मानुशीलनकर्तारश्च कदापि नाशं न प्राप्नुवन्ति।

धर्मसाधन किमस्ति, केन प्रकारेणायं पाल्यते? अयं प्रश्नः सम्मुखमायाति। देवालयेषु नित्यप्रतिगमनं, ईश्वरोपासनं, स्वकीयेष्टादर्शाणां चरितानां रामायणादीनां पठनं, तेषां नामजपनं चिन्तनं च इमानि सर्वाणि मनुष्यं शुभं प्रति प्रेरयन्ति, तस्मादेव धर्मे परिगणितानि, परं यदा तानि प्रेरकरूपं अपहाय मात्राडम्बररूपेण परम्परारूपेण वा स्वीक्रियन्ते तदा न धर्मः इति न मन्तव्यानि।

कर्मजीवनसर्वस्वं मन्यमानेन तत्रभवता जैमिनिना कर्मकाण्डस्य धर्मरूपेण महत्त्वं प्रतिपादितं कथितञ्च— "अथातो धर्मजिज्ञासा" अर्थात् ताः प्रवृत्तयस्ते आचाराः ये मनुष्यं प्रेरयित्वा उत्थापयन्ति धर्मः इति सन्ति।

अथवा गौतमेन न्यायशास्त्रे सुष्ठुपरिभाषितो धर्मो यथा हि यतोऽभ्युदयनिःश्रेय-

ससिद्धिः स धर्मः। तत्र भवान् अभ्युदयेन ऐहिकसिद्धिमर्थकामौ, निःश्रेयसेन पारलौकिकसिद्धि-मोक्षं च संगृहीतवान्।

कदाचिदुत्पद्यतेऽयं तर्कोऽस्माकं मनस्सु यत् कामस्यापि आवश्यकता किम्? तर्हि कामस्य मात्रमैथुनं इत्यर्थग्रहणमनुचितं भविष्यति। इन्द्रियाणां स्वकीयेषु स्वकीयेषु स्वाभाविकरूपेण प्रधावनं कामः। कामशास्त्रकारेण प्रतिपादितम्—'श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तमनसाप्रतिष्ठितानां स्वेषु स्वेषु विषयेस्वानुकूल्यतः प्रवृत्तिः कामः।" एतासां स्वाभाविकीनां प्रवृत्तीनां दमनेन बहवो मानसिकग्रन्थयः संजायन्ते। अतो दमनोपेक्षया ताः परिष्कृत्य जीवने तासां सन्तुलनस्य महती आवश्यकता वर्तते। संतुलितरूपेण इन्द्रियाणां प्रवर्तनमेव धार्मिकप्रवर्तनमित्यभिधीयते। उक्तञ्च नीतिशास्त्रे—

"आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥"

सम्प्रति मनोविज्ञानमपि अस्माकमिदमेव प्रदर्शयति यद् मूलप्रवृत्तयस्तु पशुमनुष्येषु समाना एव भवन्ति, परं पशुभ्यः मानवस्य इदं वैशिष्ट्यं यद् स ताः स्वेच्छानुसारं परिष्कृताः संयताश्च कर्तुं प्रभवति। इदं मूलप्रवृत्तीनां सन्तुलनं वशीकरणं, ताः विजित्य साध्वाचरणं धर्मः।

धर्मस्य स्वरूपविचारणानन्तरं कः स्वधर्मः कः परधर्म इति विचारणीयम्। समयस्थानस्थित्यवस्थानुसारं विभिन्नानां मनुष्याणां विभिन्नाः धर्माः भवन्ति, ते च तेषां स्वधर्माः यथा—सेवाधर्मः, राजनीतिधर्मः शिक्षाधर्मश्च। संतुलितोऽप्याचारः यदि समयस्य प्रतिकूलतया परस्परं च विरोधराहित्येन न संचाल्यते तदा संघर्षं उत्पाद्यते। अतः समयानुकूलतया मानवस्य व्यवहारस्तस्य स्वधर्म इति परिगण्यते अस्माद् विपरीतः परधर्म इति च। स्वामिविवेकानन्देन कथितं यद् स्वकीये जीवने प्रतिदिनं प्रगल्भालापं कुर्वतोऽध्यापकात् सः उपानत्कारः श्रेष्ठो योऽल्पात्यल्पसमयेन दृढं उपानहं निर्मिमीते। कर्त्तव्यमेव धर्मः कर्त्तव्यसाधनानि एव ईश्वरोपासनस्य श्रेष्ठः प्रकारोऽस्ति। प्रत्येकं कर्त्तव्यं पवित्रमस्ति, तस्य पालनें निधनमपि वरम्।

मह्यं स्वधर्मपरधर्मयोः एकापरापि परिभाषा रोचते। धर्मपालनस्य प्रभावः प्रमुखतया आत्मोपर्येव जायते तथा गौणरूपेण तस्याधिष्ठाने शरीरेऽपि प्रभवत्येव। सत्याहिंसासमत्वभावनादयः शाश्वतात्मधर्माः सन्ति यतः एषां पालनेन निर्गतमालिन्ये आत्मन्यानन्दानुभूतिः संजायते दृढत्वं च आयाति। प्रभावशालिनः स्वामिनः सेवका अपि तादृशाः भवन्ति यथा तथैव आत्मनि

बलिष्ठे सति शरीरं अपि बलिष्ठं आरोग्यसहितं च भवति। एवं स्वधर्मस्य इयं व्याख्या संभवति—स्वात्मा, तस्य धारकाचारः स्वधर्मः। परः आत्मेतरमात्रशरीरादयः तेषां धारकवृत्तयः परधर्माः।

यो धर्मो धारकतत्त्वः सः प्रमुखतया आत्मोन्नतिं करोति तस्यालम्बने निधनमपि श्रेयस्करो यथा गांधिमहोदयेन सत्याहिंसासमत्वभावनादीनां पालने स्वकीयं जीवनमपि लघु मानितम्। स्वधर्मपालनेनैव स महात्मा अस्माकं पूज्यः परं ये नराधमा मात्रवासनायां येनकेनामि प्रकारेण धनैश्वर्यादिसंचये आत्मानं समर्थयन्ति तेषां का गतिः? तैः न ऐहलौकिकं न च पारलौकिकं सुखमुपभोक्तुं शक्यते। अत इयं सूक्तिः प्रचलिता वर्तते—
"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।"

डा० विश्वनाथशर्मा
व्याख्याता
संस्कृत-विभागः
राजस्थान वि० वि० जयपुरम्

आप ऊपर से सत्य दिखायी देने वाले इस तर्क के धोखे में न आइये कि भारत को जबरन संयमी न बनाया जाये और जो शराब पीना चाहे उन्हें पीने की सुविधा दी जाये। राज्य का कार्य लोगों की बुराइयों के लिए सहूलियत पैदा करना नहीं हैं। हम व्यभिचार के अड्डों का संचालन नहीं करते और न हीं उनके परवाने हैं। हम चोरों को उनकी चोरी की वासना पूरी करने के लिए सुविधा नहीं देते। मैं शराबखोरी को चोरी और शायद व्यभिचार से भी अधिक निन्दनीय समझता हूँ। क्या यह अक्सर दोनों की जननी नहीं होती।

—महात्मा गांधी
(यंग इण्डियां ८-६-२१)

पंजाबी चन्दू हलवाई करांची वाला

प्रधान कार्यालय : १८५ बालकेश्वर रोड, तीन बत्ती, बम्बई-६

दूरभाष—३६३६२५, ३६४७६५

स्थापना-१८९६ **शाखायें :—**

शाखायें	दूरभाष	शाखायें	दूरभाष
(१) जवेरी बाजार	३१३७२६	(६) वरली नाका	३७२९९६
(२) ग्रान्टरोड	३५१७८०	(७) सायन सर्कल	४७३८८९
(३) कुलाबा	२१३८१३	(८) ठाकुरद्वार	३५५६८३
(४) दादर टी० टी०	४४२०१२	(९) घाटकोपर-वेस्ट	५५२३८०
(५) सूर्योदयस्टोर्स, चर्चगेट	२९१९७	(१०) अकबर अलीसफोर्ट	२५३९२१-२२

कारखाना : चन्दू भवन, ग्रान्टरोड, बम्बई-७ दूरभाष—३७२६२८ और ३७०७३३

आयुर्वेद-स्तम्भः—

श्री वा० बा० श्रीनटराजशास्त्री
आयुर्वेदाचार्यः, तिरुचिरापल्ली ।

त्रिविधं शरीरम्

पूर्वाऽनुवृत्तम्—

वय-उच्चत्वयोः अनुसारेण शरीरभारप्रदर्शिनी सारणी

पुरुषः			स्त्री		
वयः वर्षाणि	उच्चता Inches	भारः Pounds	वयः वर्षाणि	उच्चता Inches	भारः Pounds
2	34.4	27 7	2	34 1	27.1
2½	36.3	30.0	2½	36.0	29.6
3	37.9	32.2	3	37 7	31.8
3½	39.3	34.3	3½	39.2	33.9
4	40.7	36.4	4	40.6	36 2
4½	42.0	38.4	4½	42.0	38.5
5	42.8	42.0	5	42.6	41.4
5½	45	45.6	5½	44.4	44.4
6	46.3	48.3	6	45.6	46.5
6½	47.6	51.2	6½	46.9	49.4
7	48.9	54.1	7	48.1	52.2
7½	50	57.1	7½	49.3	55.2
8	51.2	60.1	8	50.4	58.1
8½	52.3	63.1	8½	51.4	61.0

अवधेयम्—जननादारभ्य समग्रं आयुष्कालं शरीरस्य उच्चतायां भारे यस्त्र्यपेक्षया पुरुषाणां अधिकत्वं विद्यते स्वभावतः। अयं व्यत्यासः न मानवमात्रवर्त्ती, किन्तु समस्तप्राणिवर्गसाधारणः। परिपश्यत वृषभं धेनुं च कुक्कुटं कुक्कुटीं च।

सारणी

स्त्री

वर्षाणि 20–50

उच्चता Feet.	Inches	20	25	30	35	40	45	50
		L. B.	L. B.	L. B.	L. B.	L. B	L. B.	L. B.
4	10	86	90	93	96	99	101	103
4	11	89	92	96	99	102	104	105
5	0	92	95	99	102	106	106	108
5	1	94	98	102	105	107	109	111
5	2	98	101	105	108	110	113	114
5	3	102	105	108	112	114	116	118
5	4	104	108	112	115	117	119	121
5	5	108	112	117	119	122	124	125
5	6	110	114	119	123	126	128	130

(स्त्रीषु सार्धपञ्च पदेभ्यः (5-6)" उच्चतरत्वं प्रायो नास्ति)

अतिस्थौल्यस्य निदानम्

मिथ्याहारविहारावेव क्षतिस्थौल्यं जनयतः । तद्यथा—"तत् अतिस्थौल्यं अन्नस्य चतुर्विधस्य मुहुः अतिमात्रं. सम्पूरणात्, गुरुमधुरशीतस्निग्धोपयोगात्, अव्यायामात् अव्यावायात्, दिवास्वप्नात्. हर्षनित्यत्वात्, अचिन्तनात्, बीजस्वभावाच्च उपजायते । एतत् सर्वं श्लेष्ममेदसी संवर्धति ।"

"तस्य हि अतिमात्रं मेदस्विनः मेद एव उपचीयते न इतरे धातवः, मेदसा स्रोतसां रसरक्तवहानां संकोचात्, तस्मादस्य आयुषो ह्रासः । शैथिल्यात् सौकुमार्यात् गुरुत्वाच्च मेदसः जवोपरोधः गतागतेषु, शुक्राबहुत्वात् मेदसा आवृतमार्गत्वाच्च कृच्छ्रव्यवायता (मैथुने अशक्तिः) दौर्बल्यं असमत्वाद् धातूनां (केवलं मांसमेदसोरेव अतिशयेन उपचयात् अन्येषां धातूनां अपचयाच्च धातूनां वैषम्यम्)

दौर्गन्ध्यं मेदोदोषात् मेदसः स्वभावात् स्वेदनत्वाच्च, मेदसः श्लेष्मसंसर्गात् विष्यन्दित्वाच्च बहुत्वात् गुरुत्वात् व्यायामासहत्वाच्च स्वेदाबाधः, तीक्ष्णाग्नित्वात् प्रभूतकोष्ठवायुत्वाच्च क्षुदतिमात्रं पिपासातियोगश्चेति ।"

अतिस्थूललक्षणम्

" मेदोमांसातिवृद्धत्वात्
चलस्फिगुदरस्तनः ।
अयथोपचयोत्साहो
नरोऽतिस्थूल उच्यते ।।"
(च० सू० अ० २१)

अतिमेदुराणां तीक्ष्णाग्नित्वादौ हेतूनाह–

" मेदसाऽऽवृतमार्गत्वात्
वायुः कोष्ठे विशेषतः ।
चरन् सन्धुक्षयत्यग्निं
आहारं शोषयत्यपि ।।
तस्मात् स शीघ्रं जरयत्याहारं
चाति काङ्क्षति ।
विकारांश्चाश्नुते घोरान्
काँश्चित् कालव्यतिक्रमात् ।।

यथा बहिश्चरो वायुः अग्निं संदीपयति, तथा कोष्ठान्तश्चरो वायुः कोष्ठे पाचकाग्निं सन्धुक्षयति । मेदसा कोष्ठेतरस्रोतसां संरोधात् महास्रोतस्येव निरुद्धो वायुः सदागतिः कोष्ठमेव भस्त्रिकेव भूरि विस्तारयति । तेन मेदुराः महातुन्दाः क्लिश्यन्ति शरीरभारेण। अशितपीतानां आशु जीर्णत्वात् क्षुत्–पिपासाऽसहत्वाच्च मुहुः प्रभूतं आहारराशिं भुञ्जते ।

यौ खलु वायुवैश्वानरौ देहं पालयतः तावेव अतिस्थूलं पातयतः इत्याह—

"एतावुपद्रवकरौ
विशेषादग्निमारुतौ ।
एतौ हि दहतः स्थूलं
वनदावो वनं यथा ।।

मेदस्यतीव संवृद्धे
सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा
नाशयन्त्याशु जीवितम् ।।
(च० सू० अ० २१)

अत्रेदं बोद्धव्यम् अतिस्थौल्यस्य

निदानगणनायां "बीजस्वभावाच्च" इति बीजस्वभावश्च गृहीतः । शरीरस्य अतिस्थौल्यं अपथ्यजं सहजम् इति द्विविधम् । अन्नातिसंपूरणादि—अचिन्तनाद्यन्तसप्तविधापथ्यानां सेवनात् सम्भवति अपथ्यजं स्थौल्यम् । सहज स्थौल्यं तु मातापित्रोः शुक्रशोणितयोः द्वयोः अन्यतरस्मिन्वा विकृतश्लेष्मणा दुष्टयोः सतोः गर्भः सम्भवति चेत् बीजगतश्लेष्मदोषसङ्क्रान्तेः अपत्यं स्थूलं मेदुरं च भवति कफानुशयात् । बीज–दोषात् संभूतं सहजं स्थौल्यं अतिस्थूलस्य भूयिष्ठं सम्भवन्तो रोगाः नातीव पीडयन्ति । अपथ्यजं अतिस्थूलं तावत् सर्वे रोगाः बलवन्तः

क्षिप्रं आविशन्ति । अतः अपथ्यजः अतिस्थूलः अतीव निन्दिताः भवन्ति ।

सगर्भ्येषु भ्रातृषु एक स्थूलः, अन्यः कृशः, अपरः समशरीरश्च यत् दृश्यते, तादृशवैसदृश्ये हेतुः—गर्भाधानावसरे शुक्रशोणितयोः श्लेष्मविकृतौ स्थूलः, वायुविकृतौ कृशः विकृत्यभावे समशरीरश्च जायते इति उन्नेयम् ।

स्थूलदेहान् प्रायः सहसा आक्रामतो रोगान् आह सुश्रुतः—प्रमेह-मधुमेह-पिडका-ज्वर-भगन्दर-विद्रधि-श्वास-गद्गदत्व-नानाविधा वातविकाराः—मद-मूर्च्छाय-रक्तसंहतिप्रभृतयश्च । अतस्तस्य उत्पत्तिहेतुं परिहरेत् ।

उच्यते हि—"संक्षेपतः क्रिया योगो
निदानपरिवर्जनम् "
इति ।

निदानपरिवर्जनं विना भेषज-मात्रसेवनेन नैव शक्यते कर्तुं व्याधेरुन्मूलनम् ।।

(अति स्थूलचिकित्सितं अनुवर्तिष्यते)

* * *

सुखी जीवन के लिए—

बैद्यनाथ दवाऐं

हमारे यहां की निर्मित उच्चकोटि की औषधियों को अपने स्वास्थ्य की रक्षा हेतु हमेशा प्रयोग करें, प्रत्येक ऋतु के आसव, अरिष्ट रस, भस्मों का प्रयोग देश के कोने २ में बैद्यनाथ औषधियों का मिलने के लिए पांच बृहत निर्माण-शालाएं—

झांसी, कलकत्ता, नागपुर, पटना और इलाहाबाद (नैनो)
६५० से अधिक विशिष्ट एजेन्सी व
६५ हजार से अधिक एजेन्सियां

श्री बैद्यनाथ आयुर्वेद भवन लि०

भारत का आयुर्वेदिक औषधियों का सबसे बड़ा कारखाना
गुसाईपुरा, झांसी

आद्यगुरुशंकराचार्यचरिते

नेपालागमनम् (चतुर्थः सर्ग)

❀
यदा भारतदेशे वै बुद्धधर्मप्रचारिते
तदा नेपालदेशेऽपि बुद्धिष्ठा ह्यभवन्प्रजाः ॥ १ ॥

प्रचारिते बौद्धमते प्रसह्य अवैदिकीं पूजनपद्धतिं तदा
राजा तदानीं वृषदेवसंज्ञको ह्यासीच्च वै सौगतधर्मसंयुतः ॥ २ ॥

३–शिवालये वैष्णवशक्तिपीठके देवालये पूजननित्यकर्मणि
१–संस्थापिते वेदविरुद्धमार्गतः समस्तयागादिकश्राद्धकर्मणि ॥ ३ ॥

एकधर्मा यदा जाता सर्वे तु ब्राह्मणब्रुवाः
ये विरुद्धाः स्थितास्तान्वै संजघ्नुर्बहवोद्धताः ॥ ४ ॥

❀ एकदा नेपालदेशेऽपि बौद्धधर्मस्य प्रभावो नितरां वृद्धिङ्गतः। बौद्धमन्त्रतन्त्रविद्भिः। सनातनधर्मावलम्बिनः पराजिताः। सनातनधर्मस्य दुर्दशां वीक्ष्य ४१ ब्राह्मणाः शंकराचार्यस्य दर्शनार्थी ज्योतिमठं जग्मुः परं शंकरस्तस्मिन्काले रामेश्वरयात्रार्थी गन्तुकामः। स्वप्ने देवी शंकरं समाज्ञापयत् 'नेपालदेशं गत्वा सनातनधर्मं समुद्धर''। गतकलौ २६१३ तदनुसारं नन्दसम्बत्सरे ६१३ वर्षे, आकाशमार्गेण गन्तुकामः शंकरो बौद्धतान्त्रिकैरपहृतद्दक्शक्तिः कृतः परं ते शंकरशक्तिसम्मुखे विफलाः सञ्जाताः। जयवागीश्वर्यां सप्तदिनानि यावत् शास्त्रार्थः समजनि विरोधिनः परास्ताः सञ्जाताः। इत्थं नेपालस्य विभिन्नक्षेत्रेषु वर्षमेकं (महत्त्वपूर्णानि अष्ठादशदिनानि) बौद्धान्विधूय नृपान् वशीकृत्य, शिवमन्दिराणि संस्थाप्य, अद्वैतामृतेन देशमिमं पावनं कृतवन्तः।

जगद्गुरोर्जीवनसम्बन्धे मिलन्त्यनेकानि काव्यानि यात्रासंस्मरणानि च परं नेपालयात्रात्मकोऽयं प्रसंगः केवलं तत्रैव प्रसिद्धः। आद्यशंकराचार्यस्य २४८६ तमे जयन्त्यवसरे भारतीपाठकानां कृते, स्वनामधन्येन केनचिन्महात्मना हस्तलिखितग्रन्थात्समुद्धृता इमे षोडशश्लोकाः प्रसादीकृताः सप्रश्रयं सादरञ्च प्रकाश्यन्ते।

इत्थं ब्राह्मणवर्णस्य क्षयं दृष्ट्वाऽवशेषतः
श्लेष्मान्तकवने स्थित्वा नित्यमाराधितो शिवः ॥ ५ ॥

तदा स्वप्ने श्रुतं तैश्च महेश्वरप्रभाषितं
ममैवांशेन जनितः शंकराचार्यनामकः ॥ ६ ॥

इदानीं विद्यते काश्यां शिष्यवृन्दसमावृतः
तं प्रसाद्यानय क्षिप्रं तदा कार्यं भविष्यति ॥ ७ ॥

श्रुत्वा तु भगवद्वाक्यं मन्त्रणां चक्रुरुद्यताः
गुरुमत्र समानेतुं जग्मुर्वाराणसीं पुरीम् ॥ ८ ॥

तत्र गत्वा ह्यदृष्ट्वा वै श्रुत्वा तत्रत्यभाषितम्
ज्योतिर्मठे समाजग्मुस्तत्र प्रापुश्च दर्शनम् ॥ ९ ॥

श्रुत्वा नेपालवार्तां च तथा पशुपतेर्दशां
स्वयं दृष्टस्य स्वप्नस्य स्मृत्वा स्मृत्वा तदैव हि ॥ १० ॥

अत्रागन्तुं मनश्चक्रे खमार्गेण स्वयं यदा
शिष्यादीन् ब्राह्मणांश्चैव ह्यागच्छध्वं शनैरिति ॥ ११ ॥

इत्याज्ञाप्य समागत्य गुह्येश्वर्याः समीपके
उपस्थित्वा स्तुतिं चक्रे यदा सिद्धगणास्तदा। ॥ १२ ॥

तत्रस्थास्ते प्रभावज्ञाः शंकरस्य महात्मनः
विरोधं दर्शयामास ज्ञात्वा ह्यागमकारणम् ॥ १३ ॥

इतो वा त्वरितं गच्छ नोचेत् प्राणं गृहीणिमः
श्रुत्वा वाक्यं तदा तेषां शिद्धेश्वरी समुत्थिता ॥ १४ ॥

जगद्गुरुं समालिंग्य स्थित्वा तत्रैव तैस्तदा
शिलावर्षा समारब्धा गुह्येशीं शंकरं प्रति ॥ १५ ॥

तदा संस्तंभयामास सा वर्षां वै जगद्गुरुः
अद्यापि ताः शिला ह्यत्र वर्तंन्ते गुह्यपीठके ॥ १६ ॥

राजस्थान में अन्त्योदय योजना

- केवल डेढ माह में राज्य के ३३ हजार गांवों में पांच – पांच सबसे गरीब परिवारों का चयन करके इस प्रकार कुल १.६५ लाख परिवारों का चयन किया गया ।
- मात्र चार माह की अवधि में ही सरकार ने ४५ हजार ६०० परिवारों को अपने पैरों पर खड़ा होने के साधन सुलभ करा दिये । शेष के लिए कार्य जारी है ।
- इस योजना का क्रियान्वयन ग्राम पंचायतों के माध्यम से कराने की दृष्टि से सरकार ने पंचायतों को ५ करोड़ रुपये का अनुदान देने का फैसला किया है ।
- पूर्व में ४ प्रतिशत ब्याज दर पर केवल ०.५ प्रतिशत गरीब लोगों को ऋण मिलता था किन्तु जनता सरकार ने रिजर्व बैंक से अब ०.९ प्रतिशत गरीबों को इस ब्याज दर पर ऋण देने के लिए राजी किया है । बैंकों ने १५ किलोमीटर के दायरे से बाहर भी गरीबों को ऋण देना मान लिया है । यह ऋण प्राथमिक कृषि सहकारी समितियों के माध्यम से दिया जायेगा ।
- सरकार को गरीबों के ऋण की गारन्टी देने में कतई संकोच नहीं होगा ।
- अन्त्योदय योजना के तहत जाति, धर्म व सम्प्रदाय के भेद-भाव के बिना सहायता दी जाती है । इसके अन्तर्गत १५ से १६ प्रतिशत मुस्लिम परिवार चुने गये हैं । इनमें ६० प्रतिशत दस्तकार हैं तो ४० प्रतिशत अनुसूचित जाति एवं अनुसूचित जन जातियों के लोग हैं ।
- अर्थशास्त्रियों ने इस योजना को " महत्वाकांक्षी " अथवा " असहायों की योजना " की संज्ञा दी है । उन्होंने आशंका प्रकट की थी कि इससे सरकार का खजाना खाली हो जावेगा परन्तु सरकार इस खतरे की परवाह किये बिना इसे क्रियान्वित कर रही है ।

(राजस्थान सरकार द्वारा प्रसारित)

बालोपयोगिनी लघुकथा

३-स्वर्णगर्गरी (स्पेनदेशस्य श्रेष्ठा कथा)

श्रीपद्मशास्त्री

325/7 राजापार्क, जयपुरम्

पुरा स्पेनस्योत्तरे भागे अश्वव्यवहारी न्यवसत् । तस्य परिवारे केवलमेका माता तथा भगिनी चासीत् । स्वगृहे तस्योपस्थितिर्न्यूना एवासीत् । एकदा स कस्मिँश्चिन्नगरे हयान्विक्रेतुमगच्छत्तत्रापश्यद् यदेका सुन्दरी स्वहस्तनिर्मितामूर्णां विक्रेतुमागता । तामुद्वाह्य स स्वगृहमानयत् । वर्षानन्तरं सा सुतामेकामजनयत् परं किञ्चित्कालानन्तरं सा मृता । तस्य मातापि मृता । सुतां प्रति स ह्यधिकमस्निह्यत



पुराने समय में स्पेन के उत्तर में एक घोड़ों का व्यापारी रहता था । उसके परिवार में केवल एक माता तथा बहिन थी । वह अपने घर में कम ही ठहरा करता था । एक दिन वह घोड़े बेचने के लिए किसी नगर में गया हुआ था कि उसने वहां एक सुन्दरी को देखा जो अपने हाथ से कती हुई ऊन को बेचने आई थी । उससे विवाह कर वह उसे घर ले आया । एक वर्ष के बाद उसने एक पुत्री को जन्म दिया । किन्तु कुछ समय बाद ही उसकी मृत्यु हो गई । उसकी माता की भी मृत्यु हो गई । वह अपनी पुत्री से अधिक

परं भगिनी जुग्राना बालिकां प्रति नास्निह्यत् ।

कौनचिटानाम्नी सा बालिका पितुर्भगिन्या बिभेति स्म । बालिकायाः पितुरनुपस्थितौ जुग्राना चातिकठिनानि गृहकार्याण्यकारयत् तेष्वेकं निर्झराज्जलभरणमप्यासीत् । दवीयस्यास्य पर्वतनिर्झरस्य सम्बन्धे लोकानां विश्वास आसीद्यत्तत्र भूतप्रेता निवसन्ति, परन्तु बालिका तत्रानन्दं शान्तिञ्चान्वभवत् ।

बहून्यहानि व्यतीतानि, सप्तदशवर्षीया कौनचिटा पुष्पवन्मनोहरा मनोमोहका च सञ्जाता । तद्गृहस्य समीपे ईसामतावलम्बी कारलो नामको युवको न्यवसत् । दयालुः सुन्दरश्चासौ युवको विश्वसिति स्म यदावयोः पितरौ स्वाशीर्भिर्नौः कृतार्थयिष्यतः ।

संयोगात्तस्य जन्मदिवसस्तथा सेन्टजाननामकश्चोत्सवः सहैवागतौ । कौनचिटा तदुत्सवे तेन सह नर्तनाय वचनं दत्तवती । सुन्दराणि वस्त्राणि परिधाय, केशेषु सुगन्धितं तैलं निक्षिप्य यावत्सा गन्तुमुद्यता तावत्पितृस्वसा विमना प्रावोचत्--नास्ति गृहे जलस्य बिन्दुमात्रमपि त्वं नर्तितुमीहसे ? । पूर्वं जलमानय पश्चाद् गच्छ ।

स्नेह रखता था किन्तु उसकी बहिन जुग्राना पुत्री पर स्नेह नहीं रखती थी ।

कौनचिटा नाम की वह बालिका अपनी बुग्रा से डरती थी । बालिका के पिता की अनुपस्थिति में जुग्राना उससे अति कठोर घर के कार्य करवाया करती थी जिनमें एक झरने से जल भर कर लाना भी था । दूरी पर स्थित इस पहाड़ी झरनें के सम्बन्ध में लोगों का विश्वास था कि वहां भूतप्रेत रहते हैं परन्तु उस बालिका को वहां शांति तथा आनन्द मिलता था ।

अनेकों वर्ष बीत गये । १७ वर्षीया कौनचिटा पुष्प की तरह मनोहर लगने लगी । उसके घर के पास कारलो नामक एक ईसाई युवक रहता था । दयालु एवं सुन्दर इस युवक का विश्वास था कि हमारे मातापिता अपने आशीर्वाद से हमें कृतार्थ करेंगे ।

संयोग से उसका जन्म दिन सैन्ट जौन का त्यौंहार एक ही साथ आये । कौनचिटा ने उस उत्सव में उसके साथ नाचने का वचन दिया था । सुन्दर वस्त्र धारण कर, केशों में सुगन्धित तेल डालकर जब वह वहां जाने को तैय्यार हुई तब जुग्राना ने नाराज होते हुए कहा—घर में जल की बूंद भी नहीं है तुम्हें नाच की सूझ रही है । पहले जल लाओ फिर जाना ।



रुदन्ती कौनचिटा घटमादाय निर्झरमुपगता । सा मनस्यकरोत् जलमानीय द्रुततरमागच्छामि परं कौनचिटा तस्मान्न निवृत्ता । प्रतीक्ष्यमाणः कारलो व्यचिन्तयत्किं सा रुग्णा सञ्जाता ? स तत्क्षणं तद्गृहं ययौ । जुआना ब्रूते सा चिराज्जलमानेतुं गता, नाद्यावधि प्रतिनिवृत्ता । अहमपि तामन्वेष्टुं तत्रगता पर घटमतिरिच्य न तत्र किमपि दृष्टम् । तत्र मयानुभूतं यद्बहवश्चाश्वारोहा मत्समीपमागच्छन्ति । तस्माद्भयद्रुताहं गृहमागत्य प्रसुप्ता ।

कारलो व्यचिन्तयत् श्वः सैन्टजौन उत्सवः । स्पेनस्य मूरनामकाः प्रेता रात्रौ समुत्तिष्ठन्ति । स प्रमत्त इव धावन्निर्झरमनुययौ । परं निर्झरमाह्वयन्नपि न तामाससाद ।

इतः कौनचिटा घटे जलमापूर्य गृहं गन्तुमुद्यता परं तत्क्षणं सा श्वेता-

कौनचिटा रोती हुई घड़ा लेकर झरने के पास गई । उसने मन में विचार किया कि जल लेकर शीघ्र आ जाऊंगी परन्तु कौनचिटा वहां से नहीं लौटी । प्रतीक्षा करते हुआ कारलो ने विचार किया कि वह बीमार हो गई है ? वह उसी समय उसके घर गया । जुआना ने कहा—वह बहुत पहले जल लाने गई थी अभी तक नहीं लौटी । मै भी उसे ढूंढने वहां गई किन्तु घड़े के अलावा वहां कुछ भी नहीं दिखाई दिया । मैंने अनुभव किया कि बहुत से घुडसवार मेरे पास आ रहे हैं । डर के मारे मैं अपने घर आकर सो गई ।

कारलो ने विचार किया कल सेन्ट जौन का त्यौहार है । स्पेन के मूरनामक प्रेत रात्रि में उठेंगे । वह पागल की तरह दौडता हुआ झरने पर गया परन्तु बहुत पुकारने पर भी वह उसे नही प्राप्त कर सका ।

इधर कौनचिटा घड़े में जल भर जब घर जाने को तैय्यार हुई परन्तु उसी समय उसने

नश्वारोहानपश्यत् तानेव भूतप्रेतान्निभाल्य चाकम्पत । कान्दिशीका सा यावद् घटमुत्थाप्य चलितुं प्रवृत्ता तावदुपविर्झरमेकास्त्री प्राचकटत् । अवरुद्धकण्ठया बालिकया पृष्टं किं भवती मां किमपि कथयितुमिच्छति ? सा प्रावोचच्चल मया साकम् । तया सह सा पर्वतकन्दरामेकां प्राविशत् । कौनचिटा कन्दरां विलोक्य चाकचक्यचकिता सञ्जाता । तत्राभितो हीरकमौक्तिकानि जटितान्यासन् । सा स्त्री तामुपगम्य स्वकथां श्रावयितुं प्रवृत्ता ।

सहस्राणि वर्षाणि व्यतीतानि, मूरपरिवारे लब्धजन्माऽहमप्यासमेका मनोरमा बालिका । तस्मिन्काले मूर-ईसामतावलम्बिनोर्भीषणः संगरः प्रवृत्तः । ईसामतावलम्बी एकश्चाधिकारी माँ स्वदेशमनयत् तत्रैवावयोर्विवाहः सञ्जातः । मृत्युशय्यास्थितो मत्पिता मामशपत्—यत्त्वया स्वधर्मस्त्यक्तः । तावत्त्वं प्रेतयोनिविमुक्ता नाभविष्यद्यावत्कापि सुन्दरी बाला गह्वरमागत्य तव साहाय्यं नाचरिष्यत् । इयमैन्द्रजालिकी कन्दरा । अतस्त्वं दृढतया मत्करं गृहाण, निरन्तरं प्रार्थनाञ्च करु । अनेन ममात्मा विमुक्तो भविष्यति ।

सफेद घुडसवारों को देखा और उन्हे भूतप्रेत समझकर वह कांप उठी । भयभीत वह बालिका जब घडा उठाकर चलने लगी तब झरने के पास एक स्त्री प्रकट हुई । गद्गद् स्वर से बालिका ने पूछा क्या आप मुझे कुछ कहना चाहती हैं ? वह बोली मेरे साथ चलो । उसके साथ उसने एक पहाडी गुफा में प्रवेश किया । गुफा को देखकर कौनचिटा चकित हो गई जहां सब ओर हीरेमोती जड़े हुए थे । वह स्त्री उसके समीप जाकर अपनी कहानी सुनाने लगीं ।

हजारों वर्ष बींत गये हैं । मूर परिवार में मेरा जन्म हुआ था और मैं भी एक सुन्दर बालिका थी । उस समय मूर तथा ईसाइयों में भयंकर युद्ध हुआ । एक ईसाई अधिकारी मुझे अपने देश ले गया । वहाँ हम दोनों का विवाह हुआ । मेरे पिता ने मृत्युशय्या से ही मुझे श्राप दिया कि तुमने अपने धर्म को छोड़ा है । तुम तब तक प्रेतयोनि से मुक्त नहीं हो सकती हो जब तक कोई सुन्दरी बालिका गुफा में आकर तुम्हारी सहायता न करेगी । यह जादू की गुफा है । अतः तुम मजबूती से मेरा हाथ पकड़ो तथा निरन्तर प्रार्थना करो । इससे मेरी आत्मा मुक्त होगी ।



प्रार्थनापरायणा बालिका दृष्टवती यत्सा तत्क्षणमेव कृष्णभल्लूरूपं दधार। सम्पूर्णा गुहा भल्लूकैर्भरिता। गुहामभितश्चान्धकारः प्रसृतः। समुद्रगर्जनमिव ध्वनिरुच्चरत् परं तत्क्षणमेव सर्वं निर्मक्षिकं सञ्जातम्। तत्क्षणमेव कौनचिटा कारलोमहोदयस्याह्वानमशृणोत् परं सा तन्नियमं संस्मृत्य नोत्तरं दत्तवती। गुहायां पुनः प्रकाशस्योद्गमः सञ्जातः। तया दृष्टं यत्सा स्त्री भीषणाकारे सर्परूपे परिणता। तत्र सहसा चाग्निः प्राज्वलत्। सर्परूपा स्त्री प्रज्वलज्ज्वालासु चापतत्। सा रक्तशलाकारूपे परिणता। अधुना सा दृष्टवती यत्सा स्त्री पुनः प्राचकटत्। सा स्त्री शनैः प्राबोचत् मां चुम्बस्व। सा तामचुम्बत्। तत्क्षणमेवाग्निर्विलुप्तः। तमसावृतायां गुहायां सा निर्भरं प्रसुप्ता। यदा सा शयित्वा जागृता तदा सा निर्झरस्य समीपमासीत्। जलघटा अपि तत्रैवासन् प्रथमं तु सा व्यचारयत्किं मया स्वप्नो दृष्टः? किन्तु तद्धस्ते स घट आसीत् यस्तया

प्रार्थना करती हुई बालिका ने देखा कि उस स्त्री ने उसी समय काले भालू का रूप धारण कर लिया सारी गुफा भालुओं से भर गई। गुफा के चारों ओर अन्धकार छा गया। समुद्र के गरजने की सी आवाज आने लगी, परन्तु उसी समय एकान्त हो गया। उस समय कौनचिटा ने कारलो महोदय की आवाज सुनी परन्तु उस नियम का उसे ध्यान आ गया और उसने उत्तर नहीं दिया। गुफा में फिर प्रकाश फैल गया उस बालिका ने देखा कि वह स्त्री भयंकर सर्प का रूप धारण कर चुकी है। वहां अचानक अग्नि जल उठी। सर्प रूपी स्त्री जलती हुई ज्वालाओं में गिर गई तथा लाल छड के रूप में बदल गई। अब उसने देखा कि वह स्त्री पुनः प्रकट होगई है। उस स्त्री ने धीरे से कहा—मेरा चुम्बन लो। बालिका ने उसका चुम्बन लिया। उसी समय अग्नि बुझ गई। उस अन्धेरी गुफा में वह बालिका गाढी नींद में सो गई। जब वह सोकर उठी तब वह झरने के समीप गई। जल के घड़े वहीं थे। पहले उसने विचार किया क्या मैंने स्वप्न देखा है? किन्तु उसके

दत्तः । स घटः सम्प्रति स्वर्णमयः सञ्जातः ।

अन्धकारावृता निशा विगता । खगानां कलकूजनेन कौनचिटा प्रसन्नासीत् । घटमादाय सा गृहं प्रति प्रचलिता । संमुखमागच्छन्तं सा कारलोमहोदयमपश्यत् । कारलोमहोदयस्तां विलोक्य नितरां प्रसन्नः प्रमत्त इवाभवत् । स तां पौनःपुन्येन रात्रिवृत्तांतमपृच्छत् । कौनचिटा स्वर्णमयं घटमदर्शयत् । तौ यदा गृहं प्राप्तौ तथा तत्र चाश्रुमुखी जुआना विलपन्ती चास्ते । सा व्यचारयत् यन्नाहं भविष्ये कौनचिटां पीडयिष्यामि परं स्वभावो दुरतिक्रमः ।

कौनचिटायाः पिता यावद् गृहमागतस्तावत्तेन कारलो साकं विवाहस्यानुमति र्दत्ता । घटस्थै रूप्यकैस्ते ह्युपग्रामं क्षेत्रमेकमक्रीणन् गृहं निर्माप्य वसतिञ्चाकुर्वन् । तयोर्गावो दुग्धमधिकमयच्छन् । कुक्कुटा वर्षपर्यन्तमण्डान्ययच्छन् । क्षेत्रवृक्षा मधुपूरिताः सञ्जाताः । इत्थं तौ तत्रैव ससुखं स्वजीवनमयापयताम् ।

हाथ में जो घड़ा था वह उस स्त्री ने उसे दिया था, वह घड़ा अब सोने का हो गया था ।

अन्धकार वाली रात्रि समाप्त हुई । चिड़ियों की चहचहाट से कौनचिटा प्रसन्न थी । घड़ा लेकर वह घर की ओर चली । उसने सामने आते हुए कारलो को देखा । कारलो ने उससे बार-२ रात्रि की घटना सुनाने को कहा । कौनचिटा ने उसे सोने का घड़ा दिखाया । वे दोनों जब घर लौटे तब आंसू बहाती हुई जुआना विलाप कर रही थी । जुआना ने विचार किया अब मैं भविष्य में कौनचिटा को दुःख नहीं दूंगी, परन्तु स्वभाव को कौन बदल सकता है ?

कौनचिटा का पिता जब घर आया तो उसने उसे कारलो के साथ विवाह करने की अनुमति दे दी । घड़े में जो रुपए थे उनसे उन्होंने गांव के पास ही एक खेत खरीदा और वहीं घर बनाकर रहने लगे । उनकी गायें अब अधिक दूध देती थीं । उनके कुक्कुट वर्षभर अण्डे देते थे । उनके खेत के पेड़ों पर खूब शहद उतरा करता था । इस प्रकार वहां उन दोनों ने सुखपूर्वक अपना जीवन व्यतीत किया ।



नारीस्तम्भः—

पत्या श्रीरिव मोदते

श्रीमती राजेश्वरीभट्टमहोदया
संस्कृतविभागे, अध्यक्षा
(लालबहादुरशास्त्री-महाविद्यालयः, जयपुरम्)

मानवः तपसा, त्यागेन ब्रह्मचर्येण योगसाधनाद्युपायैः यत् परमपदं लभते नारी तस्य पदस्य प्राप्ति पातिव्रत्यधर्मस्याचरणेनानायासेनैव समधिगच्छति ।

पतिं या नाभिचरति मनो वाक्कायसंयता
सा भर्तृलोकानवाप्नोति सद्भिः साध्वीति चोच्यते ।
(मनु० ६, ६५)

या नारी मनसा. वचसा शरीरेण संयता भूत्वा पतिसेवामाचरति सा पत्या सह स्वर्गादिदिव्यलोकानवाप्नोति जगति च सती साध्वी आदिभिः शब्दैः सम्मान्यते । नारीणां कृते पतिरेव एक ईश्वरः । पतिसेवा एव तस्याः जीवने व्रतयज्ञोपवासादीनतिशेते ।

नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ।। मनु०

नारीणां कृते पृथक्रूपेण यज्ञस्य, व्रताचरणस्योपवासादेः आवश्यकत्वं न विद्यते। सा तु पतिसेवया एव उत्तमां गतिं समवाप्नोति ।

(जो स्त्री मन, वचन और शरीर से संयत होकर पति सेवा करती है वह पति के साथ दिव्य लोकों को प्राप्त करती है और संसार में सती-साध्वी आदि शब्दों से सम्मान पाती है।)

(स्त्रियों के लिए पृथक् रूप से कोई यज्ञ, व्रत, उपवास आदि करना आवश्यक नहीं है। केवल पति सेवा के द्वारा ही वह उत्तम गति को प्राप्त कर लेती है।

* * *

113542
No. N-1379/51

भारती

R. J. No. 2617
Licence. No. PP.9.
'Licenced to Post.
Without prepayment

सूक्ति-सुधा

श्रीरामगोपालशास्त्री, जयपुरम

अलंकारो हि नारीणां क्षमा तु पुरुषस्य वा ।
दुष्करं तच्च वै क्षान्तं त्रिदशेषु विशेषतः ।।
यादृशी वः क्षमा पुत्र्यः सर्वासामविशेषतः ।
क्षमा दानं क्षमा सत्यं क्षमा यज्ञाश्च पुत्रिकाः ।।
क्षमा यशः क्षमा धर्मः क्षमायां विष्ठितं जगत् ।

[बाल्मीकि रामायणम् २।३३।७-९]

कुशनाभ और घृताची की १०० कन्याएं एक समय एक साथ उद्यान में संमिलित हुई। वहां वायु ने उपस्थित होकर अपनी कामना प्रकट की किन्तु कन्याएं स्वयं वरण करने के लिये उत्सुक नहीं हुई। उन्होंने कहा—माता पिता जिसके लिये देवेगें, वह ही हमारा भर्ता होगा, अन्य नहीं। " इस पर वायु ने क्रुद्ध होकर उन सबको कुब्जा बना दी। कन्याओं ने यह कष्ट सह लिया पर अपनी संस्कृति व धर्म के विपरीत आचरण नहीं किया।

पिता कुशनाभ अपनी कन्याओं की उक्त धर्म-निष्ठा व क्षमा शीलता से प्रसन्न होकर बोले—

हे पुत्रियो ! एकमत होकर तुमने अपने कर्तव्य का पालन किया है। मेरे कुल के गौरव की भी रक्षा की है।

स्त्रियों अथवा पुरुषों के लिये क्षमा अलंकार है। हे पुत्रियो ! तुम सब में सामान्य रूप से जैसी क्षमा है, वैसी देवताओं में होना दुष्कर है। क्षमा ही दान, सत्य, यज्ञ, यश और धर्म है। सारा जगत् क्षमा में ही प्रतिष्ठित है।

प्रकाशक:-जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर ३०२००३ । दूरभाष 75496
राधेश्याम द्वारा श्री शंकर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित दूरभाष: ६१७६७

भारती

संस्कृत-मासपत्त्रिकायाः



2118

पुस्तकालय
गुरुकुल कां

येष्ठ

र्षम् २८

ङ्कः ८

जूनः

१९७८

त्र-धर्म-परित्राता
राष्ट्र-गौरव-वर्द्धकः ।
हाराणाप्रतापोऽयं
स्वाभिमानी महीयताम् ।
रामगोपालशास्त्री

वार्षिकमूल्यम् दशमुद्राः १०.००
एकप्रतेः—एकं रूप्यकम् १.००

राजस्थान-मध्यप्रदेश-गुजरात-महाराष्ट्र-मद्रास-आंध्र-उत्तरप्रदेश-
बिहार-पञ्चनद-सर्वकारैः स्वीकृता

विषय-सूची

क्र०सं०	विषयाः	निबन्धारः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीरामगोपालशास्त्री, जयपुरम्	२८१
२.	मासावतरणम्	" " "	"
३.	सम्पादकीयम्	दीनानाथत्रिवेदी मधुपः	२८२
४.	'जयपुर' नगरे संस्कृतसाहित्याभिवृद्धिः	डा० श्रीप्रभाकरशास्त्री, जयपुरम्	२८६
५.	राजस्थानस्य संस्कृत-समाराधकः श्रीमान् गोपीनाथदाधिचिः महोदयः	लेखकः डा० श्रीवैकुण्ठनाथशास्त्री, सवाईमाधोपुरम्	२९२
६.	आचार्यः आर्यभटः	प्रो० श्रीसुरेन्द्रकुमारशर्मा अज्ञातः गढशंकरः	२९५
७.	शाकुन्तलच्छन्दोविमर्शः	ले० श्रीशिवसागरत्रिपाठी, जयपुरम्	२९८
८.	आयुर्वेद-स्तम्भः	वै० श्रीछगनलालशास्त्री, जयपुरम्	३०२
९.	देशवार्ता	श्रीपद्मशास्त्री, जयपुरम्	३०६
१०.	श्रीमत्कविकुलचूडामणिमहाकवि-कालिदासविरचितम्	अनु०—श्रीसत्यनारायणशर्मा, साहित्याचार्यः, कोटा	३०९
११.	बालोपयोगिनी लघुकथा	श्रीपद्मशास्त्री, जयपुरम्	३१३
१२.	विश्ववार्ता	श्रीकलानाथशास्त्री, जयपुरम्	३१७
१३.	सूक्ति-सुधा	श्रीगंगाधरभट्टः, जयपुरम्	३१८

सम्पादकः
दीनानाथत्रिवेदी मधुपः
साहित्यालङ्कारः
सहसम्पादकः
रामगोपालशास्त्री
- जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

संरक्षकः
श्रीदेवीशङ्करतिवाड़ी
प्रबन्ध-सम्पादकः
श्रीगिरिराजशर्मा
भारती-भवन
गोपालजी का रास्ता
जयपुरम्-२

वर्षम् २८ | ज्येष्ठः, विक्रमाब्दः, २०३५ [जून, १९७८] | अङ्कः ८

मङ्गलम्

श्रीरामगोपालशास्त्री, जयपुरम्

निज-जन-सुखकारी पाप-पुञ्जापहारी
सकल-हृदय-चारी दैत्यदारी मुरारिः ।
विनयिषु हितकारी नित्यलीलाविहारी
नव-युगल-विहारी राजतां लास्यकारी ॥

* * *

मासावतरणम्

श्रीरामगोपालशास्त्री, जयपुरम्

यत्रोष्णरश्मिर्वृषभाधिरूढो
मानं मुदा वर्द्धयते दिनानाम् ।
यत्रावतीर्णा त्रिदिवात् सरिद्वरा
ज्येष्ठोऽयमायाति स पापहारी ॥

दीनानाथत्रिवेदी मधुपः
सम्पादकः

भगवतो नवयुगलविहारिणः श्रीराधासर्वेश्वरस्य

प्रतिष्ठा–महोत्सवः

श्रीनिम्बार्काचार्यपीठद्वारा संस्थापितस्य मदनगंज–(किशनगढ) स्थितस्य श्रीसर्वेश्वरसत्सङ्गभवनस्य नवनिर्मिते मन्दिरे गतज्येष्ठमासस्य शुक्लदशम्यामभिजिन्मुहूर्तेऽनन्तश्रीविभूषितजगद्गुरुनिम्बार्काचार्य– **श्रीजी** महाराजस्य करकमलाभ्यां भगवतः प्रभोः श्रीराधासर्वेश्वरस्य युगलश्रीविग्रहस्य वैदिकविधिना प्रतिष्ठा साधु समपद्यत–इति ।

ॐ स्वस्ति, विश्वकल्याणार्थमलवरमण्डलान्तर्गत–श्रीभर्तृस्थलेऽनन्तश्रीविभूषित–**बाबा-वामनदास**द्वारा ज्येष्ठमास–शुक्लचतुर्थीतः समायोजितस्य नवदिवसीयस्यैकोत्तरशतकुण्डचात्मकस्य **श्रीविष्णुमहायज्ञस्य** पूर्णाहुतिसमये समर्प्यमाणं—

शुभाशंसनम्

प्रभुर्यज्ञेश्वरः सोऽयं शरणागतवत्सलः ;
सर्वेषामपि भक्तानां कल्याणं कुरुतात् सदा ।। १ ।।

त्यक्त्वा गेहसुखं विषह्य बहुलं कष्टञ्च तन्मार्गजं,
गेहेभ्यः समुपागतान् द्विजवरान् यज्ञस्थले साम्प्रतम् ।
स्वाभीष्टस्य न लाभतोऽतिविकलान् भक्तान् तवैव प्रभो ! –
स्वामिन् भर्तृहरे ! प्रसीद भगवन् त्वं पाहि सर्वानिमान् ।। २ ।।

बाबा–वामनदासोऽयं संयोजकोऽस्य वर्तते ।
श्रीदिग्विजयसिंहेन मान्येन कृषिमन्त्रिणा ।। ३ ।।

कृतमुद्घाटनं यस्य दृढभक्त्या यथाविधि ।
आचार्यः कुशलः श्रीमान् भैरवसहायः सुधीः ।। ४ ।।

उपाचार्यश्च मदन–गोपालः पण्डितस्तथा ।
रामानन्दबुधो यत्र ब्रह्मासनसुसंस्थितः ॥ ५ ॥

श्रीराधेश्याममिश्रश्च द्रष्टा, गोवर्धनस्तथा-।
उपद्रष्टृपदे स्थित्वा स्वकर्म कृतवानिह ॥ ६ ॥

विशुद्धानन्द आचार्यः श्रीरामायणपाठका ।
श्रीराधेश्यामशर्माऽयं 'पाण्डचे' पदविभूषितः ॥ ७ ॥

श्रीमद्भागवतस्यात्र पारायणपरायणः ।
सन्त्यन्येऽपि विद्वांसो महान्तो गुणिनस्तथा ॥ ८ ॥

यज्ञमण्डपकुण्डेषु यजमानैः सह स्थिताः ।
गौरीशङ्कर–केदार–हरि–श्रीनवलादयः ॥ ९ ॥

सोऽयं विष्णुमहायज्ञः श्रीमद्भर्तृहरिस्थले ।
श्रीगोविन्दप्रसादेन निर्विघ्नं समपद्यत ॥ १० ॥

यात्रिका येऽत्र सम्प्राप्ता यजमानाश्च ये स्थिताः ।
यज्ञेशः सफलीकुर्यात् तेषां सर्वान् मनोरथान् ॥ ११ ॥

यैः श्रीभर्तृहरिस्थ–यज्ञपुरुषस्याराधने सज्जनैः—
साहाय्यं विहितं धनेन वचसा कायेन भक्त्या तथा ।
विद्वांसः समुपागताश्च बहवः सन्तश्च ये दर्शका—
स्तेभ्यो यच्छतु मङ्गलं स भगवान् यज्ञेश्वरः सर्वदा ॥ १२ ॥

शुभं भूयात्

शुभतिथिः
ज्येष्ठशुक्ला १२ रवि।
वै० सं० २०३५

शुभेच्छु। —
दीनानाथत्रिवेदो मधुपः साहित्यालङ्कार,
भारतीसम्पादकः
जयपुरम्

सुमहतः प्रमोदस्यायमस्ति विषयो यदनन्तश्रीविभूषित—जगद्गुरु—शङ्कराचार्य—पुरीपीठाधीश्वर—**श्रीनिरञ्जनदेवतीर्थमहाराजाना**माध्यक्ष्ये चिरायुषो **गोपालस्य** शुभविवाहमधिकृत्य समायोजितायां विद्वत्सभायां सुप्रसन्नेनान्तरात्मना प्रत्ताः—



शुभाशीर्वादः

काले कराले भुवि वर्तमाने **दीना** नरा नाथ ! निपीडिता ये ।
तान् सत्वरं पाहि विपद्गणात्त्वं गोविन्द ! **गोपाल** ! नमोऽस्तु तुभ्यम् ॥ १ ॥

पुरीपीठेश्वरान् पूज्यान् सम्मान्यान् **श्रीजगद्गुरून्** ।
सादरं श्रद्धया भक्त्या वन्देऽहं शिरसाऽधुना ॥ २ ॥

श्रीगोपालश्चिरञ्जीवी रामरत्नात्मजो वरः ।
वधूं लब्ध्वा सुनीताख्यां सान्वयो मोदतां सदा ॥ ३ ॥

भक्तकल्पद्रुमो देवो गोविन्दो भगवान् प्रभुः ।
कल्याणं कुरुतान्नित्यं **श्रीगोपालसुनीतयोः** ॥ ४ ॥

यशोदानन्दनः कृष्णो भक्तानामीप्सितप्रदः ।
धामाणिन् सकुटुम्बस्य कल्याणं कुरुतात्तव ॥ ५ ॥

शुभतिथिः—
ज्येष्ठशुक्ला १५ भौमवारः
वै० सं० २०३५
स्थानं—श्रीगोविन्ददेवमन्दिरम्
जयपुरम्

शुभेच्छुः—
दीनानाथत्रिवेदी मधुपः
भारतीसम्पादकः
जयपुरम्

शुभोऽभिलाषः

वन्दारु-मन्दार उदारदेवो लीलाविलासी मृदुहासशीलः ।
गोविन्ददेवः कृतदेवसेवो भक्तानुकम्पी जयतादजस्रम् ॥ १ ॥

स्वान्ते योऽस्ति निरञ्जनो बुधगणे शास्त्रार्थविद्याञ्जनो ।
लोकेऽस्मिन् जनरञ्जनो निशितधीर्धीरो मनस्वी महान् ॥
गोसेवानिरतः सनातनवृषत्राणे वितन्द्रः सदा ।
सोऽयं शङ्करपादपीठमहितो विभ्राजतां भूतले ॥ २ ॥

गोपालपाणिग्रहमङ्गलार्थमामन्त्रिता या विदुषां सभा सा ।
वराय वध्वे शिवमातनोतु संमानिता श्रेष्ठिवरेण भक्त्या ॥ ३ ॥

गोविन्दाङ्घ्रिसरोजालिर्बुधालिपदसेवकः ।
घामाणीपरिवारोऽयं कीर्तिमृद्धिं च विन्दतु ॥ ४ ॥

शुभेच्छुः—
श्रीरामगोपालशास्त्री, जयपुरम् ।

'जयपुर' नगरे संस्कृतसाहित्याभिवृद्धिः

[डॉ० श्रीप्रभाकरः शास्त्री, जयपुरम्]

प्रस्तावना-खण्डम्

पूर्वाऽनुवृत्तम्

'माची' नगरे शासन् स 'रामगढ' नामकं ग्रामं संस्थापितवान्। अस्य आरादेव जमवायमातुः मन्दिरमपि वर्तते। जम्बुवाहिनीयं देवी एतेषां कुलदेवी। श्रीदुर्लभरायस्य समयः १००६ तः १०३७ वैक्रमाब्दपर्यन्तं (९४९ ई० तः ९८० ई० पर्यन्तम्) आसीत्। स्वपितुः समक्षे बलपराक्रमादिभिः राज्यं संस्थाप्य तं तुतोष। पितुः स्वर्याने सोऽयं दुर्लभरायः राज्यं शशास। ततश्चास्य पुत्रः "काकिलः" उत्तराधिकारी जातः। ख्याते लिखितं वर्तते—"राजा काकिल आमेर बसायो....।"[१]

राजा काकिलः अम्बानगर (आमेर) मैडं, बैराठमित्यादिग्रामान् अजयत्। एषु अम्बानगरं स्वराजधानीरूपेण निश्चियाय। अत्र अम्बिकेश्वरं नाम शिवलिङ्गमपि सस्थापितवान्, तत एव स्थानमिदम् अम्बिकानगरं आम्बानगरम् आमेरम् आम्बेरम् वेति नामभिः विश्रुतम्।

कछवाहवंशीयानां शासकानां वंशानुक्रमेण स्पष्टीभवति यत् काकिलमनु श्रीहनुदेवः (१०३९–१०२३ ख्रीष्टाब्दपर्यन्तं), तमनु श्रीजानडदेवः (१०५३–१०७० ख्रीष्टाब्दपर्यन्तम्) अम्बानगरं शशास। अस्य पुत्रः श्रीपज्वनः (१०७०-१०९४ ख्रीष्टाब्दपर्यन्तम् चोहानवंशीयस्य पृथ्वीराजसम्राजः भगिनीं, कान्हनामकस्य सामन्तस्य पुत्रीं परिणीतवान्। अस्य वंशजेषु द्वादशतमो शासकः चन्द्रसेनः (१५२४-१५५९ वैक्रमाब्दपर्यन्तम्) आसीत् यस्मिन् दिवंगते तत्पुत्रः श्रीपृथ्वीराजः (१५५९–१५८४ वैक्रम०) सिंहासनमधितस्थौ। अस्य द्वादश पुत्रा आसन्, तेषु ज्येष्ठः पूरणमलः पुत्राभावे स्वकनिष्ठं भीमं दत्तकत्वेन जग्राह। अस्य चतुर्थे वंशानुक्रमे भारमल्लः (सम्वत् १६०४-१६३०) राज्यमधितिष्ठति स्म। ततश्च भगवन्तदासः (भगवानदासो वा) आमेरं शशास। अस्य पुत्रो 'मिर्जाराजेति' विरुदसम्वलितः श्रीमानसिंहः प्रथमः आसीत्, येन १६४६ वैक्रमाब्दस्य माघकृष्णपञ्चमीतः

---

[१] "मुंहता नैणसी री ख्यात"—भाग-१ पृष्ठांक २९५ पुरातनग्रन्थ माला राजस्थान प्राच्यविद्याप्रतिष्ठानस्य प्रकाशनम्।

शासनं समारब्धम् । अद्वितीयोऽयं विद्वान् योद्धा चासीत् । सोऽयं अकबरसम्राजः प्रधानसेनापतिपदमप्यलंचकार । प्रसन्नेन सम्राजा मानसिंहाय बहवो विरुदाः प्रदत्ताः । श्रीमानसिंहानन्तरम् अस्यैव पौत्रः, स्वर्गतस्य श्रीजगत्सिंहस्य पुत्रः श्रीमहासिंहः राज्याधिकारे स्थापितः । चतुःपञ्चवर्षाणामन्तराले सहसा दिवं प्रयाते महासिंहे तस्य भ्रातृषु अन्यतमः श्रीभावसिंहः राज्याधिकारं लब्धवान् । स हि दक्षिणं शास्ति स्म । ततश्च पुनरेव महासिंहस्य पुत्रो मिर्जाराजा जयसिंहः प्रथमः राज्याधिकारं गृहीतवान्, यो हि १६६८ ख्रीष्टाब्दपर्यन्तं शशास । संस्कृतभाषायाः प्रेमी, अद्वितीयोऽयं वीरः स्वशासनकाले विदुषां सम्मान चकारेति गीयते । अनेनैव महाराष्ट्रकेसरी छत्रपतिः शिवाजीमहाभागः अवरंगजेबसम्राजः समक्षे उपस्थापितः । ततः अस्य पुत्रो मिर्जाराजा रामसिंहः प्रथमः उत्तराधिकारी बभूव । अस्य शासनसमयः अतिविस्तृत आसीत् । अस्य पुत्रः श्रीकृष्णसिंहः तत्समक्षमेव दिवं प्रयातः । अतः अस्य पौत्रः श्रीविष्णुसिंहः (विशनसिंहः) शासनमधितस्थौ । सोऽयं एकादशवर्षपर्यन्तं राज्यशासनं चकार । १७५६ वैक्रमाब्दस्य माघशुक्लसप्तम्यां स्वर्गं प्रयाते श्रीविष्णुसिंहे तत्पुत्रः श्रीजयसिंहो द्वितीयः सिंहासनमधिरुरोह ।

महाराजाधिराजः सवायीतिपदधारको जयसिंहो द्वितीयः १६९९ ख्रीष्टाब्दतः १७४३ ख्रीष्टाब्दपर्यन्तं (१७५६-१८०० वैक्रमाब्दपर्यन्तम्) आमेर-जयपुरं शशास । जयपुरनामकस्य शोभननगरस्य संस्थापकरूपेण विश्रुतोऽयं राजा । युद्धवीरोऽयं नृपः कलाप्रेमी, विद्वान् चासीत् । भारतस्य विभिन्नेषु पञ्चसु स्थानेषु ज्योतिषयन्त्रशालानां संस्थापनापि श्रीमतैव विहिता । अनेन श्रीमतां जयसिंहमहोदयानां ज्योतिषविषयकं प्रेम प्रस्फुटीभवति ।

श्रीजयसिंहद्वितीयानन्तरं तस्य ज्येष्ठपुत्रः सवाई ईश्वरीसिंहः १७४३ ख्रीष्टाब्दे (१८०० वैक्रमाब्दे) जयपुरनगरशासनसूत्रं स्वीचकार । अष्टवर्षानन्तरमेव गृहकलहेन आत्मघातं कृत्वा स्वर्याते ईश्वरीसिंहे तत्कनिष्ठो भ्राता वैमात्रेयः श्रीमाधवसिंहः प्रथमः शासनं प्रारब्धवान् । अस्य शासनकालः १८०८ वैक्रमाब्दतः १८२४ वैक्रमसंवत् पर्यन्तं (१७५०-१७६७ ई०) आसीत् । ततश्च अस्य ज्येष्ठपुत्रः श्रीपृथ्वीसिंहः कतिपयवर्षाणि यावत् उत्तराधिकारित्वेन राज्यं चकार ।

युवावस्थायामेव दिवं प्रयाते श्रीपृथ्वीसिंहे तत्कनिष्ठो भ्राता श्रीप्रतापसिंहः शासनसूत्रं प्रवर्तयामास । अस्य शासनकालः हिन्दीसाहित्यस्य प्रचाराय प्रसाराय उद्भवाय च स्वर्णयुगत्वेन मन्यते । शासनञ्चास्य १७७८ ख्रीष्टाब्दतः १८०३ ई० पर्यन्तं (१८३५-१८६० वैक्रमाब्दं यावत्) बभूव । ततः


परिवार
कल्याण
NIRODH
SUBSIDISED PRICE
25 PAISE FOR 3

क्या ?

परिवार कल्याण का उद्देश्य परिवार को सुखी और स्वस्थ रखना है।

क्यों ?

प्रत्येक प्रसव के बाद माँ के शरीर में खून की कमी हो जाती है। बार बार के प्रसव से यह कमी बढ़ती जाती है। और अन्त में घातक रोगों का रूप धारण कर लेती है।

कब ?

सही समय पर, जीवन में सही कदम उठाकर आप अपना और अपने बच्चों का जीवन सुखी बना सकते हैं।

कैसे ?

परिवार कल्याण की विधियों को प्रयोग में लाकर। विवाह के बाद एक बच्चा हो जाने तक निरोध या खाने वाली गोली। एक बच्चा हो जाने पर आई०यू०डी० दो बच्चे हो जाने पर स्वैच्छिक नसबन्दी।

परिवार कल्याण के उपाय, सामग्री आदि के लिए समीप के स्वास्थ्य केन्द्र से संपर्क कीजिए। लड़का हो या लड़की—बच्चे सिर्फ दो।

लड़का हो या लड़की, बच्चे सिर्फ दो।

davp 77/219

श्रीजगत्सिंहः राजा आसीत् । पञ्चदश वर्षाणि यावत् प्रशास्य सोऽयं स्वीयाम् अन्तर्वत्नीं पत्नीं विहाय निस्सन्ततिरेव दिवं प्रयातः ततः श्रीजयसिंहस्तृतीयो जन्म लेभे । राजकीयैः षड्यन्त्रैः प्रपीडितः श्रीजयसिंहस्तृतीयः १८९१ वैक्रमाब्दे १८३४ ख्रीष्टाब्दे वा दिवं प्रापितः ।

महाराजस्य श्रीजयसिंहस्य (तृतीयस्य) मृत्युसमयेऽपि अस्य एका पत्नी गर्भवती आसीत् । विश्वस्तैः राजभक्तैः सामन्तैः राज्यक्षार्थं नरवरतः श्रीमोहनसिंहनामा क्षत्रियवरः समाहूतः शासनकर्मणि च नियुक्तः कतिपयमासानन्तरं गर्भवती राज्ञी श्रीरामसिंह प्रासूत । १८२४ ख्रीष्टाब्दौ (१८९१ संवत्) जन्मत एव सोऽयं क्षत्रियबालः उत्तराधिकारित्वेन स्वीकृतः । श्रीमद्भिः जयपुरनगरस्य प्रतिष्ठायै भृशं प्रयतितम् । तदा शिक्षाक्षेत्रे जयपुरनगरी वाराणसीमपि प्रत्याख्यापयति स्म । श्रीरामसिंहशासनकालः श्रीरामराज्यमिव आसीत् । श्रीमतां शासनसमये संस्कृतभाषायाः हिन्द्याश्च प्रचुरमात्रायामुन्नतिः संजातेति कथनं "वाराणसीं वा जयपत्तनं वा" इत्युक्तिः साधयति ।

श्रीरामसिंहानन्तरं दत्तकपुत्रत्वेन स्वीकृतः 'ईसरदा' राजकुमारः कायमसिंह श्रीमाधवसिंहद्वितीयनाम्ना सिंहासनमधितस्थौ । अस्य शासनकालः १८८० ईशवीयतः १९२२ ख्रीष्टाब्दपर्यन्तमासीत् । १९२२ ख्रीष्टाब्दे दिवं प्रयाते श्रीमाधवसिंहे पुनरपि ईसरदाराजकुमारः श्रीमानसिंहो द्वितीयः उत्तराधिकारित्वेन नियुक्तः । श्रीमतां शासनकालः साहित्यसर्जनाक्षेत्रे साम्प्रतमपि स्मर्यते । सोऽयमासीत् जयपुरनगरस्य अन्तिमो राजा । परतश्च १९५० ई० तः राजस्थानप्रान्तस्य ऐक्यं विधाय कांगरेससर्वकारस्य शासनसूत्रं प्रवर्तितमासीत् यस्यापि समावसानः गत निर्वाचनसमये संवभूव ।

कच्छवाहवंशीयानामेषां राज्ञां वंशावली एवं प्रस्तोतुं शक्यते—

आमेर-जयपुराधीशानां कच्छपघातीयवंशजानामनुक्रमः

श्रीसोढदेवः (९६६ ई० दौसायां राज्यारम्भः, १००७ ई० मृत्युः)
|
श्रीदूलहरायः (ढूंढार प्रदेशे स्थितिसंस्थापकः १०३० इ० मृत्युः)
|
श्रीकाकिलः (आमेरस्य संस्थापकः, १०४० ई० मृत्युः)
| २. इल्हडरायः ३. देल्हणः ४. रल्हणः)
श्रीहनुः (१०५३ ई०)
|

श्रीजानडदेवः (१०७१ ई०)
|
श्रीपज्वनः (श्रीपृथ्वीराजचौहानस्य भगिनीं परिणीतवान् ।
|
श्रीमलेसी (११४७ ई०)
|
श्रीबीजलदेवः (११८० ई०)
|
श्रीराजदेवः (१२१६ ई०)
|
श्रीकील्हणः (१२७६ ई०)
|
श्रीकुन्तलः (१३१८ ई०)
|
श्रीजोनसी (१३३७ ई०)
|
श्रीउदयकरणः (१३८९ ई०)
|
श्रीनरसिंहः (१४२९ ई०)
|
श्रीवनवीरः (१४३९ ई०)
|
श्रीउद्धरणः (१४६७ ई०)
|
श्रीचन्द्रसेनः (१५०३ ई०)
|
श्रीपृथ्वीराजः (१५२७ ई०)
|
श्रीपूरणमलः (१५३४ ई०)
|
श्रीभीमः (पूरणमलस्य भ्राता, दत्तकः, १५३७ ई०)
|
श्रीरतनसिंहः १५४८ ई०)
|
श्रीआशकरणः (१५४८ ई०) कतिपयमासानन्तरमेव)
|

श्रीभारमल्ल। (१५७४ ई०)

श्रीभारमल्लः (१५७४ ई० दिवंगतः)

श्रीभगवन्तदासः   श्रीभगवानदासः   श्रीजगन्नाथः

श्रीमानसिंहः (अकबरस्य सेनापतिः, १६१५ वर्षे दिवं गत)

श्रीजगत्सिंह (बाल्ये दिवं प्रयातः

श्रीमहासिंहः (श्रीजगत्सिंहस्य पुत्रः)

श्रीभावसिंहः (श्री जगत्सिंहस्य भ्राता)

श्रीजयसिंहः प्रथमः (मिर्जाराजा, १६६७ ई०)

श्रीकृष्णसिंहः (बाल्ये दिवं प्रयातः)

श्रीविष्णुसिंहः (१६८८ ई०)

श्रीजयसिंहः द्वितीयः (सवाई जयपुरसंस्थापकः, १६९८-१७४३ ई०)

श्रीईश्वरीसिंहः सवाई, (गृहकलहे दिवं प्रयातः, १७४३-१७५० ई०)

श्रीमाधवसिंहः प्रथमः (वैमात्रेय, सवाई १७५०-१७६७ ई०)

श्रीपृथ्वीसिंहः (अल्पावस्थायां दिवं गतः १७६७-१७७८ ई०)

श्रीप्रतापसिंहः (श्री पृथ्वीसिंहस्य भ्राता, १७७८-१८०३ ई०)

श्री जगत्सिंहः (ब्रिटिशसर्वकारतः सन्धिकर्ता, १८०३-१८१८ ई०)

श्रीजयसिंहस्तृतीयः (१८१८-१८३४ ई०)

श्रीरामसिंहः द्वितीयः (१८३५-१८८० ई०)

श्रीमाधवसिंहः द्वितीयः (२९-९-१८८० तः १९२२ ई० पर्यन्तम्)

श्रीमानसिंहः द्वितीयः (१९२२-१९५० ई० यावत् राजा, १९७० वर्षे दिवंगतः)

श्रीभवानीसिंहः (वर्तमानः)

राजस्थनास्य संस्कृत-समाराधकः श्रीमान् गोपीनाथदाधिचिः महोदयः

लेखकः—डॉ० श्रीवैकुण्ठनाथशास्त्री

व० अ० सवाईमाधोपुरम्

पूतेऽस्मिन् राजस्थाने अनेके साहित्य-समाराधकाः सुरभारतीसेवकाः अभूवन्, येषां रचनानां विषये अद्यनापि संस्कृतानुरागिणः अपरिचिताः सन्ति । तेष्वेव विद्वत्सु एकतमः श्रीगोपीनाथमहोदयः अस्ति । अस्य महाभागस्य रचनानां संकलनम् जयपत्तनस्य प्राच्यशोधसंस्थाने साम्प्रतमपि संस्थितं वर्तते ।

अस्य महाभागस्य विरचितान्यनेकानि काव्यानि सन्ति तेषु श्रेष्ठतमम् 'आनन्दनन्दन' काव्यमस्ति । काव्यमिदं अमरकोशोदाहरणरूपमस्ति । अस्मिन् काव्ये पञ्चानां वाटिकानां उल्लेखनम् प्राप्यते । एतासां सर्वासां वाटिकानां नामधेयान्यपि कल्पवृक्षस्य-पर्यायाणि सन्ति यथा मन्दारवाटिका–पारिजातवाटिका-सन्तानवाटिका–कल्पवृक्षवाटिका हरिचन्दनवाटिकाश्चेति । सर्गस्थाने कविना वाटिकाशब्दस्य प्रयोगः कृतः । ४१६ पद्यात्मकोऽयं काव्यग्रन्थः षट् चत्वरिंशत् पृष्ठेष्वुल्लिखितः वर्तते ।

आद्या वाटिका मन्दाराभिधा अस्यां वाटिकायां मङ्गलाचरणे श्रीकृष्णस्य स्मरणं यथाकृतम् तदित्थम् ।—

श्रीकृष्णं कमलाकान्तं
कमलायतलोचनम् ।
कालिन्दीकमले कामं
क्रीडन्तं सततं श्रये ।।
सुमनोभिः सुमनोभिः
सेव्यमानपादयुगं ।
कलिकलमषकुलविघ्नं निघ्नं
भक्तैर्भजाम्यह कृष्णम् ।।

अत्र प्रथमे पद्ये यमुनायाः जले क्रीडतः कमलायतलोचनस्य भगवतः श्रीकृष्णस्य कमलाकान्तस्य स्मरणं कृतम् । पद्येऽस्मिन् अनुप्रासस्य छटा सुस्पष्टा शब्दानां चयनमपि सुन्दरमाकर्षकञ्च विद्यते ।

द्वितीये पद्ये निगदितं यत् सुमनोभिः (शुद्धचित्तैः) सुमनोभिः (बुधैः) कलिकलमषापहारकं श्रीकृष्णस्य पादयुगं सेव्यमानमस्ति । अत्र सुमनशब्दस्य अमरकोशानुरूपं अनेकार्थत्वम् प्रतिपादितम् ।

पारिजातवाटिकातः

दृश्यन्ते पुटभेदनानि मथुरा
मुख्याऽत्र तेषां यतो ।
भूभारोद्धरणायवासमकरोदत्रैव
नारायणः ।।

अस्यां वासमपास्य येऽत्र मनुजा
अन्यत्र वासोत्सुकाः ।
ते क्षीरोदमुदस्य यान्ति सहसा
वासाय सर्वेरूमाम् ॥

पारिजातवाटिकातः उद्धृतोऽयं श्लोकः सम्प्रति प्रस्तूयते । पद्येऽस्मिन् कविना मथुरानगर्याः महत्त्वम् प्रतिपादितम् । अत्र कविना स्पष्टरूपेण कथित यत् भूमौ अनेकानि पत्तनानि सन्ति किन्तु तेषु सर्वेषु पत्तनेषु मथुरा मुख्या वर्तते । अस्मात् कारणादेव पृथिव्याः उद्धारार्थं भगवान् श्रीकृष्णः अत्रैव आत्मनः जन्मपरिग्रहं चकार । ये जनाः इमां नगरीमुत्सृज्य अन्यत्र स्वकीयं वासमिच्छन्ति ते मूढाः यतोहि ते पयोदधिवासमुत्सृज्य अन्यत्र वासोत्सुकाः वर्तन्ते तन्न समीचीनं प्रतिभाति । अत्र 'पत्तनम् पुटभेदनमित्यस्य-अमरकोशशब्दस्य निर्वाहो सम्यक्प्रकारेण कृतः । बहुषु एकस्य निर्धारणे षष्ठ्याः (तेषां पदे) प्रयोगोऽपि औचित्यं धत्ते ।

कल्पवृक्षवाटिकातः

गेहे यस्य भवेद् वधूः सुकृतिनी
रूपान्विता शिक्षिता,
पुत्रो यस्य महोद्यमः सहृदयः
शास्त्रेषु वैज्ञानिकः ।
यो नो सांशयिकोऽथ
संशयतरुच्छेदे कुठारोपमः,
तं जैवातृकतां नयेशवसुधा-
लङ्कारभूतं नरम् ॥

पद्येऽस्मिन् स्पष्टं यत् यस्य नरस्य गृहे सुरूपा सुकृतिनी शिक्षिता भार्या वर्तते यस्य पुत्रः उद्यमी सहृदयः शास्त्रेषु विचक्षणः, संशयतरुच्छेदने कुठारोपमश्च, सः पुरुषः वसुधायाः अलङ्कारभूतो वन्द्यः । कविनाऽत्र तस्य आयुष्मत्तायाः प्रार्थना कृता 'जैवातृकः स्यादायुष्मान्' इत्यमरकोशवाक्यस्योदाहरणम् ।

सन्तानवाटिकातः

मेघश्यामलविग्रहं कटितटे
पीताम्बरेणावृतम्,
मुक्ताविद्रुमशोणरत्ननिचितां
मालां वहन्तं गले ।
वंशीं स्वाधरपल्लवैकरसिकां
संवादयन्तं मुहु—
र्वन्दे निर्जरवन्द्यपादयुगलं
श्रीराधिकावल्लभम् ।

अत्र राधिकावल्लभस्य श्रीकृष्णस्य स्वरूपसौन्दर्यम् प्रतिपादितम् । श्लोकेऽस्मिन् अनेकेषां श्रीमद्भागवतसदृशग्रन्थपद्यानां केन्द्रीयभावः समाविष्टः यथा भागवते दशमस्कन्धे श्रीकृष्णजन्मसमयवर्णने 'श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं, पीताम्बरं सान्द्रपयोदसौभगम्' अनेनैव प्रकारेण तस्यैव ग्रन्थस्य दशमस्कन्धे चतुर्दशेऽध्याये ब्रह्मस्तुतिप्रकरणे आद्ये श्लोके 'नौमीड्य तेऽभ्रवपुषे तडिदम्बराय' इत्यत्राऽपि श्रीकृष्णस्य वपुर्वेषसाम्यञ्च परिलक्ष्यते । अत्र देववाचिनिर्जरशब्दस्य प्रयोगः काव्यसौन्दर्यञ्चास्ते ।

हरिचन्दनवाटिकातः

योगेन योगिभिर्ध्यातो
यो नानुभवगोचरः।
तं कृष्णमनुधावन्तं
वत्सान् ध्यायाम्यहर्निशम् ॥

पद्येऽस्मिन् प्रतिपादितमिदं यत् योगिभिर्ध्यानमार्गेण ध्यातः यः कृष्णः अनुभवगोचरो न भवति। वत्सान् अनुधावन्तं तं कृष्णमहं (कविः आत्मानं प्रति कथयति) वन्दे। श्लोकेऽस्मिन् भगवतः कृष्णस्य योगिनामप्यागम्यत्वं प्रतिपादितम्। श्रीमद्भागवते ब्रह्माऽपि ईदृग्विधं कृष्णमवलोक्य मोहितो जातः, यतोहि सः बालकैः सह सामान्यबालकवत् क्रीडानुरक्तः आसीत्, तदा ब्रह्मणा विचारितं कुतोऽयं पूर्णब्रह्म अस्मादेव कारणात् परीक्षणार्थं सः वत्सपान् वत्सांश्चाहरत्।

इत्थं पञ्चसु वाटिकासु कविना काव्यस्रोतस्विनी प्रवाहिता विभिन्नेषु पद्येषु अमरकोशस्य क्लिष्टानां शब्दानां प्रयोगः कृतः। एतेषां साहित्यकाराणां साहित्यस्य सम्यक् आदरः प्रदेयः अस्माभिः। धन्यवादार्हाः इमे यैः साहित्यसमाराधने स्वकीयस्समयो दत्तः अनुगृहीताश्च संस्कृतप्रणयिनः।

❖

Wanted Agent

Wanted Agents (Male/Female) Candidates do this work at own Area. Salary Rs. 300/-, Commission and T.A. axtra.

Qualification :

Candidate should be minimum Matric or Higher Secondary. Age 16 to 45 yrs.

Send applications only in Hindi or in English. Registered letter at following address :—

GWALIOR TEXTILES,
38-B, MAJLIS PARK, DELHI - 110 033.

आचार्यः आर्यभटः

प्रो० श्रीसुरेन्द्रकुमारशर्मा अज्ञातः
खालसाकालेजः, गढ़शंकरः (होश्यारपुरम्)

सिद्धान्तपञ्चकविधावपि दृग्विरुद्धमौढ्योपरागमुखखेचरचारक्लृप्तौ ।
सूर्यः स्वयं कुसुमपुर्यभवत् कलौ तु भूगोलवित् कुलप आर्यभटाभिधानः ।।

येन केनापि श्लोकोऽयं प्रणीतः, तेन सत्यमेवैकान्तिकमुक्तम् । न केवलं भारते अपि तु विश्वस्मिन् विश्वे आर्यभटस्य स एव महिमा यः सौरमण्डले सूर्यस्य । १९-४-१९७५ दिनांके भारतेन यः स्वीयः प्रथमतमः उपग्रहः अन्तरिक्षपथपथिकः विहितः तस्य जगति महत्त्वपूर्णं स्थानम्, यतोहि एतेन भारतदेशः विश्वस्य तेषु एकादशदेशेषु अन्यतमः संवृत्तः यैः हि स्वीयाः उपग्रहाः अन्तरिक्षपथपथिकाः कृताः । भारतीयोपग्रहं प्रति विश्वस्य ध्यानं केन्द्रितमस्ति ।

उपग्रहोऽयं पञ्चकोटिरुप्यकाणां व्ययेन निर्मितः अभवत् । रूसदेशीयवैज्ञानिकानां साहाय्येन मास्कोनिकटस्थात् वीयर्सलेकस्थानात् अन्तरिक्षं प्रति क्षिप्तः उपग्रहः चक्रभ्रमिवत् भ्राम्यति स्वीयाक्षमुपरि पृथ्वीं परितश्च । अस्य भारः ३५० किलोमितः । अयं ९६-कलासु पृथ्व्याः एकां परिक्रमां सम्पादयति । यदा तु एकस्यां कलायामयं नवतिवारं स्वीयाक्षमुपरि भ्राम्यति । अक्षमुपरि भ्रमणस्याधारः नाईट्रोजनवायोः अस्तित्वमस्ति । डॉ० रावमहोदयः कथयति यद् यया गत्या नाईट्रोजनवायोः व्ययः अधुना उपग्रहे भवति तयाऽनुमीयते यदुपग्रहोऽयं सार्धद्वयवर्षं यावदन्तरिक्षे स्थास्यति यदा तु पूर्वं षण्मासं यावदस्य स्थितिः सम्भाव्यते स्म । अयं ६१९ किलोमीटरत उच्चैः परिक्रामति । प्रथममस्य नियन्त्रणं मास्कोस्थितवैज्ञानिकानां हस्ते आसीद् परमधुना भारतीया एव वैज्ञानिकाः श्रीहरिकोटातः अस्य नियन्त्रणं कुर्वन्ति । एतस्योपग्रहस्य नामार्यभटः इति कृतोऽस्ति भारतेन ।

एतस्योपग्रहस्य या संज्ञा कृता, सा साभिप्राया । ईश्वीयपंचमशताब्द्यां (४७७ वत्सरे) आर्यभटसंज्ञकः खगोलविद्याविद्[1] जज्ञे । स आर्यसिद्धान्तापरपर्यायं आर्यभटीयनामकं ग्रन्थं प्रणिनाय । उपलब्धज्योतिषग्रन्थकदम्बे प्राचीनतमोऽयं ग्रन्थः । अतः भारतीयखगोलविद्यासन्दर्भे एतस्य ग्रन्थस्यानन्यसुलभं महत्त्वम् । एतादृक्षस्य ग्रन्थस्य प्रणेतुः नामापि

---

१. षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः ।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनोऽतीताः ।। कालक्रियापादे

चिरस्मरणीयं, न केवलं भारते अपि तु विश्वखगोलविद्येतिहासे । अस्मादेव कारणादार्यभटं प्रति स्वीयसम्मानप्रदर्शनार्थं भारतेन स्वीयस्य प्रथमतमोपग्रहस्य संज्ञापि 'आर्यभटः' इति कृता ।

आर्यभटसंज्ञकौ द्वौ पुरुषावभवतामिति बेरुनीमहोदयः लिखति । परं भारतीयखगोलज्ञेतिहासविद् शंकरबालकृष्णदीक्षितः उभयोः अभिन्नत्वं साधयति[1] । आर्यभटः कुसुमपुरे[2] उवास । अद्यतनीयं बिहारप्रान्तीयं पटनानामकं नगरं कुसुमपुरमित्याम्नन्ति विद्वांसः । तेन सौरमण्डलविषये महदन्वेषणं कृतम् । आत्मनः कार्यस्य मूल्यांकनं कुर्वता तेन स्वयमेव भणितम्—

क्षितिरवियोगाद्दिनकृद्रवीन्दुयोगात्
प्रसाधितश्चन्द्रः ।
शशिताराग्रहयोगात्तथैव
ताराग्रहाः सर्वे ॥ ४८ ॥

सदसज्ज्ञानसमुद्रात्
समुद्धृतं देवताप्रसादेन ।
सज्ज्ञानोत्तमरत्नं मया
निमग्नं स्वमतिना वा ॥ ४९ ॥

अनेनेदन्तु हस्तामलकवद् भवति स्पष्टं यद् स ग्रहस्पष्टीकरणपद्धत्यां संशोधनञ्चकार । प्राचीनग्रन्थानां सारासारविमर्शेन, स्वबुद्ध्या, वेधशालया च नूतनं ज्ञानमधिगतं तेन ।

१२० पद्यात्मके आर्यभटीयनामके ग्रन्थे स स्वीयराद्धान्तान् लिपिबद्धान् चकार । अद्य ग्रहगणितग्रन्थेषु सौर-आर्य-ब्रह्म-नामकाः त्रयः पक्षाः दृग्गोचरीभवन्ति । एषु आर्यसिद्धान्तः आर्यभटोपज्ञः । आर्यभटः स्वीयं व्यक्तित्वं स्वीयमौलिकसिद्धान्तैः अद्ययावद् रक्षति सम्मानपूर्वकम् । तस्य वैशिष्ट्यमनायासं सम्मुखमायाति भारतीयखगोलज्ञवंशावल्याम् ।

प्रायः ज्योतिषग्रन्थाः गणनार्थं भू-राम-वेदादिशब्दान् प्रयोगविषयीकुर्वन्ति, परन्त्वार्यभट्ट अक्षरैः संख्याः सूचयाञ्चकार; यथा अ=१, इ=१००, उ=१००० इत्यादि । अनेनाल्पाक्षरैः बहु वक्तुं शक्यते । युगपद्धतिप्रसंगेऽप्यार्यभटीयं वैशिष्ट्यं निर्विवादम् । स सर्वान् युगपादान् समान् एव स्वीचकार । तस्य गणनानुसारं वर्तमानकलियुगारम्भपर्यन्तं १९८६१२०००० वर्षाणि व्ययीबभूवुः, कल्पारम्भे च गुरुवारः बभूव[3] । यूरोपीयदोषज्ञेष्वियं धारणा बद्धमूलाऽऽसीद् यद् भुजज्यायाः प्रथमतमः उपयोगः नवमशताब्द्यां

---

[1] पश्यत—भारतीयज्योतिष (मराठी) पृ० २९१, हिन्दीअनुवादकः शिवनाथ झारखण्डीमहोदयः

[2] आर्यभटस्त्विह निगदति कुसुमपुरेऽभ्यर्चितं ज्ञानम् (गणितपादे)

[3] काहो मनवो ढ १४ मनुयुगश्रव ७२ गतास्ते च ६ मनुयुगछ्ना २७ च ।
कल्पादेर्युगपादा ग ३ च गुरुदिवसाच्च भारतात्पूर्वम् ॥ ३ ॥

जातेन अरबदेशीयेन अलबटानीमहोदयेन कृत आसीद्; परन्त्वार्यभटीयग्रन्थे पंचमशताब्द्यामेव भुजज्यायाः सद्भावं दृष्ट्वा ते स्वीये ज्ञाने आमूलचूलं परिवर्तनञ्चक्रुः। ऐवं प्राथम्येनार्यभट एव पृथ्व्याः दैनन्दिनगतिविषये लिलेख—'प्राणेनैति कला भू।[1]' अर्थाद् पृथ्वी पलस्य षष्ठांशे एकां कलां यावद् चलति। स तिथि-नक्षत्र-महापातादिसर्वान् विषयाञ्जज्ञे। अत एव तस्य ग्रन्थस्य दक्षिणभारते—कर्नाटके मैसूरे चापि—प्रसारः बभूव। वैष्णवाः आर्यपक्षाभिमानिनः।

भारतीयखगोलविद्येतिहासाकाशे द्वावार्यभटौ—एकः खगोलविद्याविद्, अन्यश्च तस्य स्मारकः भारतीयः उपग्रहः—अनन्यसाधारणप्रभया चकासतः। युक्तमुक्तमज्ञातनामधेयेन केनचिद् विदुषा—'भूगोलवित् कुलप आर्यभटाभिधानः'।

❖

---

[1] चतुर्थी आर्या।



सुखी जीवन के लिए—

बैद्यनाथ दवाएं

हमारे यहां की निर्मित उच्चकोटि की औषधियों को अपने स्वास्थ्य की रक्षा हेतु हमेशा प्रयोग करें, प्रत्येक ऋतु के आसव, अरिष्ट रस, भस्मों का प्रयोग देश के कौने २ में बैद्यनाथ औषधियों का मिलने के लिए पांच बृहत निर्माण-शालाएं —

झांसी, कलकत्ता, नागपुर, पटना और इलाहाबाद (नैनी)

६५० से अधिक विशिष्ट एजेन्सी व

६५ हजार से अधिक एजेन्सियां

श्री बैद्यनाथ आयुर्वेद भवन लि०

भारत का आयुर्वेदिक औषधियों का सबसे बड़ा कारखाना

गुसाईपुरा, झांसी

शाकुन्तलच्छन्दोविमर्शः

ले० श्रीशिवसागरत्रिपाठी, प्राध्यापकः,
रा० विश्वविद्यालयः, जयपुरम्

छन्दोदृष्टया नान्दी-प्रयोगः–

नाटकेऽस्मिन् महाकविना नाटकस्य निर्विघ्नपरिसमाप्त्यर्थं रङ्गविघ्नोपशान्त्यर्थञ्च स्रग्धराच्छन्दसि[1] आशीर्वादात्मिका नान्दी (मङ्गलाचरणं वा) प्रयुक्ता[2]। एतच्छन्दः मगणेन प्रारभ्यते, यस्य खलु देवता भूमिः मित्रसंज्ञकः, लक्ष्मीदायकः शुभश्च भवति यः। अथ च एतद् यगणेन पर्यवस्यति, यस्य देवता जलं, भृत्यसंज्ञकः वृद्धिदायकः शुभश्च यः। एवमेषा नान्दी वर्णतः गणतः लिपितः छन्दोदृष्टया च सर्वशुद्धा वर्तते। कवेः कौशलमेवात्र कारणम्।

छन्दः प्रयोगः–

अत्रैकोनत्रिंशच्छन्दांसि प्रयुक्तानि। एतेषामकारादिकक्रमेण, तेषां श्लोकसंख्यायुता तालिका प्रमाणितनिर्णयसागरमूलपाठानुसार दीयते। अत्र केवलं तेषां चतुर्विंशतिसंख्या प्रदर्शिता यतः आर्यागाथे, गीतिउद्गाथे, अनुष्टुप्-पथ्यावक्त्रे, मालभारिणी-औपच्छन्दसिके, वियोगिनीसुन्दर्यौ च-एतेषु पञ्चसु छन्दोयुग्मेषु सत्यामपि लक्षणगतभिन्नतायामुदाहरणगतभिन्नता नास्ति। अतः कैश्चिच्छन्दसां चतुर्विंशतिः संख्यापि स्वीक्रियते।

* शाकुन्तलप्रयुक्तच्छन्दस्तालिका *

क्रम-संख्या	छन्दोनामानि	श्लोक-संख्या	क्रम-संख्या	छन्दोनामानि	श्लोक-संख्या
१.	अनुष्टुप्/पथ्यावक्त्रम्	२७	१३	मालिनी	७
२.	अपरवक्त्रम्	२	१४	रथोद्धता	१
३.	आर्या/गाथा	३७	१५	रुचिरा	१

---

[1] म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।

[2] 'या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री' इत्यादिना शिवस्तुतिः कृता।

क्रमः संख्या	छन्दोनामानि	श्लोक-संख्या	क्रम-संख्या	छन्दोनामानि	श्लोक-संख्या
४.	इन्द्रवज्रा	२	१६	वशस्थम्	१३
५.	उद्गाथा/गीतिः	२	१७	वसन्ततिलका	३०
६.	उपजातिः	११	१८	वियोगिनी/सुन्दरी	३
७.	औपच्छन्दसिकम् मालभारिणी	४	१९	वैतालीयम्	५
८.	त्रिष्टुप्	१	२०	शार्दूलविक्रीडितम्	२०
९.	द्रुतविलम्बितम्	५	२१	शालिनी	१
१०.	पुष्पिताग्रा	३	२२	शिखरिणी	७
११.	प्रहर्षिणी	२	२३	स्रग्धरा	२
१२.	मन्दाक्रान्ता	३	२४	हरिणी	३

एवं स्पष्टं भवति यद् विवेच्यनाटके पञ्चविंशतिः (२५) वर्णिकच्छन्दांसि चत्वारि (४) च मात्रिकच्छन्दांसि प्रयुक्तानि। आर्यायां[1] गाथायाञ्च सप्तपञ्चाशत् । (५७) मात्रा भवन्ति। त्रिष्वपि नाटकेषु कालिदासस्यार्यां प्रति विशेषः पक्षपातो दृश्यते। अग्निपुराणानुसारम्[2] एव कोमलभावानां चित्रणे मात्रिकच्छन्दसां प्रयोगः कृतः कविना। अर्थात् सप्तत्रिंशदवारम्[3] आर्यागाथाः द्विवार[4]ञ्च गीत्युद्गाथे। अपरयुग्मे षष्टिः मात्राः भवन्ति, परं गीतिचरणेषु १२-१८, १२-१८ एषः क्रम आवश्यकः।

उपर्युक्ततालिकात इदमपि स्पष्ट भवति यत् नाटकेऽस्मिन् लघुच्छन्दांसि प्रचुरतः प्रयुक्तानि, महच्छन्दःसु केवलं शार्दूलविक्रीडितम् विंशतिवारं प्रयुक्तम्। अपरस्मिन्नाटकद्वयेऽपि महच्छन्दांसि अत्यल्पतया प्रयुक्तानि। एवं निश्चीयते यत् कालिदासस्य, छन्दोज्ञानमुत्तरोत्तरं वृद्धिं यातम्। एतद्दृष्टचापि 'अभिज्ञानशाकुन्तलम्' कालिदासस्य चूडान्तनिदर्शनमेव।

१—यस्याः पादे प्रथमे द्वादश मात्रास्तथातृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ २–अ० पु०–अध्याय ३३७

२—१/३, १२, १४, १५, १८, २१, २४, २५, ३०; २/१,८। ३/२, ४, ५, ९, १२, १४, १५, १९; ४/१२, १६, २१; ५/१३, १६, १८, २१, २८, ३१; ६/२, ३, ७, १५, १९, २१; ३१; ७/२२ ॥ ४-१/४; ३/१३ ॥

परिहारसूत्रम्–

छन्दोविधाने कालिदासोऽतीवकुशल आसीदिति प्रतीयते, यतः कुत्रापि छन्दोदोषः न प्रत्यक्षताङ्गतः। पिङ्गलाचार्यस्य "ध्रादिपरः" अथवा "प्रह्रे वा" इति परिहारसूत्रस्य केवलमेकवारमेव आवश्यकताऽनुभूयते । यथा—

'प्रबलतमसामेवं प्राया शुभेषु प्रवृत्तयः'[1] अत्र 'संयुक्ताद्यं दीर्घं" मिति नियमाद् हरिणीच्छन्दसि[2] त्रयोदशः वर्णः गुरुः प्रतीयते परमुपर्युक्तसूत्रवशाल् लघुरेव स्वीकार्यः, न छन्दोभङ्गोऽत्र विचारणीयः ।

यतिप्रयोगः–

श्लोकपादे जिह्वेष्टविश्रमस्थानं[7]यतिर्विच्छेदसंज्ञितः[8] । एषा पादान्ते सर्वत्र श्लोकार्धे च विशेषतो भवति ।[8] पूर्वा पूर्णांका अपरा च 'लयात्मके'ति कथ्यते ।

यतिप्रयोगेऽपि न कापि विप्रविपत्तिः दृश्यते पदमध्यवर्तिनी यतिः शोभां क्षिणोति । अतः—

'इत्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः[3] इत्यत्र द्वादशाक्षरे यतिदोषयुतं स्थलमेकं परित्यज्य प्रायः पदान्तवर्तिनी यतिरेव प्रयुक्ता कविना, या खलु शोभादायिनी भवति । पदमध्यवर्तिनी यतिरपि यदि स्वरसन्धियुता भवति तदा सुन्दरतामेवोत्पादयति । अस्याः प्रचुरप्रयोगा[2] शाकुन्तलेऽनेकत्र द्रष्टव्याः । यथा—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः[3]

श्रव्यतैव गरीयसी[4]:—

श्लोकस्य पद्यस्य वा अस्खलितगत्या पठने विस्वरता अन्या कापि बाधा वा यदि

१—शाकुन्तलम् ७/२४।। २—रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा।। ७—छन्दोमञ्जरी १/१२ जतु०-पिंगल-सूत्रम् १/६; वृत्तारत्नाकरः १/१२।। ८—द्रष्टव्यम्-क्षेमेन्द्रकृतं सुवृत्ततिलकम् ।

३—शा०—५/६।। २-शा० ४/५; ६/५; ७/११ आदि।। ३—शा०—२/५ ४—सुवृत्ततिलकम् ।।

नानुभूयते तर्हि सुष्ठु भवति। एषा 'गतिः' छन्दसां कृते आवश्यकी। महाकविना कालिदासेन प्रणीतेषु श्लोकेषु लयात्मकता, संगीतात्मकता, सुष्ठुता किंवा श्रव्यता सर्वत्र दृश्यते।

छन्दोवैशिष्टचम्

उपरि प्रदर्शिततालिकाया सर्वाण्येव छन्दांसि शाकुन्तले सुष्ठुतया प्रवीणतया च प्रयुक्तानि। यत्किमपि तत्र वैशिष्टचं, तदत्र प्रदर्श्यते। नाटकेऽस्मिन् अनुष्टुप्पथ्यावक्त्रयोः प्रयोगः सप्तविंशतिवारं[५] जातः। एतयोः नास्ति विशेषो भेदः। पथ्यावक्त्रे[६] युजोश्चतुर्थतः जगणो (।ऽ।) भवति, अर्थात् पञ्चमं लघु, षष्ठं गुरु सप्तमञ्च लघु भवति। अनुष्टुप्छन्दस्यापि[७] एषैव स्थितिर्भवति। केचिदस्य लक्षणं प्रायिकं मत्वा केवलमष्टाक्षरतामेव स्वीकुर्वन्ति—

> प्रयोगे प्रायिकं प्राहुः केऽप्येतद् वृत्तलक्षणम्।
> लोकेऽनुष्टुबिति ख्यातं तस्याष्टाक्षरता मता॥

परमेतन्न व्यवहार्यं प्रतीयते, यतः श्रव्यता बाध्यते विस्वरता चोत्पद्यते। तथापि प्रस्तुते नाटके कतिपयस्थलेषु लक्षणस्य पूर्णनिर्वाहो न दृश्यते। यथा—



५– १/६, १० ११स, २२; २/१३, १६, १७; ३/१, २०; ४/४, ७; ५/१४, २४, २६, २९; ६/१४, २२, २३, २८; ७/९, १३, १४, १५, २३, २८, २९॥ ६– युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्तितम्। ७– द्वात्रिंशदक्षरा अनुष्टुप् ऋ० प्रा० १६/१७ 'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम्॥' 'हुङ्कारेणैव धनुषः'[१] 'तथापि तस्या लावण्यम्'[२] 'प्रक्रीडित सिंह शिशुम्'[३]–प्रभृतिस्थलेषु छन्दोगणेषु उपर्युक्तः परिहारः कार्यः।

आयुर्वेद-स्तम्भः-

सांख्यसमीक्षायाम्—

"चरकीयः प्रकृतितत्त्वविवेकः"

पं० छगनलालशास्त्री भिषगाचार्य आयुर्वेदाचार्यः साहित्याचार्यो दर्शनाचार्यः
लक्ष्मीनारायणपुरी, जयपुरम्

इह तत्र भवानाचार्यश्चरको हि नाम सांख्यदर्शनस्य सिद्धान्तसरणिमनुसृत्य दृष्टतमस्यास्य विश्वस्य प्रलयोदययोः क्रमिकं शाश्वतिकञ्च विकासं संस्थापयामास । एतत्सिद्धान्तानजानन्तः समन्वयग्राहग्रहिलमेधसः केचन विद्वांसः कापिलसौश्रुतगीतादिसर्वानपि सांख्यदर्शनग्रन्थान्समानमानानामनन्तोऽस्य वैशिष्ट्यसारसरणेः शतांशमपि न स्पृशन्ति, न च मार्गणां कुर्वन्ति, केवलं च केनापि वराकेणोक्तं "चरकस्तु चिकित्सिते" इत्याभाणकमेव प्रमाणयन्त एतावन्मात्रमेवास्य गौरवं मन्यन्ते ।

किन्तु, नैतन्मनोरमं विपश्चितामिति यद्यन्मयानुसन्धत्तं चरकीयदर्शनसिद्धान्तान्पुरस्कृत्य तत्सर्वं विदुषां विनोदाय, स्वान्तस्तमसः कज्जलिकापनोदाय, छात्राणामर्थबोधाय च गीर्वाण "भारती" मुखेन निवेदयन् कृतार्थतामनुभवामि । आशासे च मान्याः, सततं शास्त्रनिकषोपलनिशातमतयो विबुधाः प्रमाणपटवः सर्वैरपि प्रमाणैर्मदुक्तार्थान्प्रमेयान्प्रमाणीकृत्य मामभितः कृतार्थयिष्यन्तीति ।

प्रकृतिर्हिनाम सर्वैरपि सांख्याचार्यैरभिमतमाद्यतमं तत्त्वम् यैव बीजरूपाऽव्यक्तरूपतया संस्थिता सती विश्वरूपेण व्यक्ततामेति । सैवास्य व्यक्तचरस्य विश्वस्य बीजमित्याचार्याः सर्वेऽपि समानमेवामन्यन्ते, किन्त्वस्याः प्रकृतेः किं स्वरूपम्, के गुणाः, कानि च कार्याणीति पुनरपि जिज्ञासितव्यमेव भवति; समेषामपि सांख्यसमीक्षकाणाम्— इत्येवात्र प्रथमं चरकसिद्धान्तजालमुररीकृत्य विचार्यते । तुलनात्मतया च सौश्रुतगीताकापिलादिसांख्यसिद्धान्ता अपि विमृश्यन्ते, तेष्वपि आयुर्वेदाचार्यतया सौश्रुतमेव सांख्यं प्रथमं समीक्षितव्यं भवति ।

सर्वेषामपि सांख्येयसांख्यानां सिद्धान्तबीजान्युपनिषत्सु ज्ञानविज्ञानविदामृषिवर्यैः परस्परं तर्कयुक्तिपुरःसरं निर्णीयैव स्थिरीकृतानि सूत्रात्मतयेति मुहुर्मुहुरुपनिषद्ग्रन्थानामनुशीलनात्प्रत्ययमावहति चेतः । तान्येव

पुनर्विभिन्नोपनिषद्ग्रन्थग्रथितानि बीजानि पृथक् पृथक् दर्शनशास्त्ररूपेणाङ्कुरितानि पुष्पितानि फलितानि चेति, विभिन्नसांख्यसिद्धान्तभेदानाकलय्य प्रतिपत्तिमप्यधिगच्छति च चेतः ।

चरकीयसांख्यस्यापि बीजमुपनिषद्ग्रथितो मन्त्रोऽयम्—"अजामेकां लोहितशुक्लकृष्णामजोह्येको जुषमाणोऽनुशेते" । अत्राजाजौ शब्दौ प्रकृतिपुरुषवचनौ बर्करीबर्करवचनौ च, उभयोरपि 'अजत्व"सामान्यात्, प्रकृतिपुरुषौ न जायेत इत्यजौ । अजगताविर्यस्माद् धातोरजशब्दस्याजतीति विग्रहे सिद्धिस्तेन प्रकृतिर्बर्करी चेत्युभेऽपि सततं गमनशीलत्वादजेतिप्रथिते, बर्करोऽपि तथैव. परं पुरुषो न सततं गमनशीलस्तस्यापरिणामित्वादिति, परं तस्यापि नानायोनिषु कर्मणामनुबन्धेन गमनकर्त्तृत्वादजत्वं सुवचो भवति । अत्र श्लेषनिर्दिष्टोपमानोपमेय भावस्तु द्वयोरपि प्रकृतिपुरुषयोर्बर्करीबर्करयोरिह दाम्पत्यसूचनार्थः, तदेव च दाम्पत्यं "जुषमाणोऽनुशेते" चेति क्रियापदे दृढयतः, उभयत्र संख्यातैकत्वसंख्यापि द्वयोर्जोषणेऽनुशयने च सम्भावनीयतमान् बाधकभावानपवारयति ।

सौश्रुते हि सांख्ये, प्रकृतेरेकत्वात् पुरुषाणामानन्त्यात्, प्रकृतेर्विभुत्वात्, पुरुषाणां परमसूक्ष्मत्वाच्च प्रकृतिपुरुषयोर्न दाम्पत्यं घटते, तत्र तु प्रकृतिरव्यक्तमेकं बहूनां क्षेत्रज्ञानामधिष्ठान समुद्र इव औदकानां भावानाम्, मातुरंकमिव वा बहूनां शिशूनामितिकृत्वा "धात्रीशिशु" सम्बन्धः प्रकृतिपुरुषयोर्घटते । तदेतद्यथावसरं स्पष्टयिष्यामि ।

चरके तु प्रकृतिरेका विभ्वीच, पुरुषोऽप्येको विभुरिति द्वयोरेकत्वादजत्वाच्च दाम्पत्यसम्बन्धः सुवच एव । कापिलेऽपि प्रकृतिपुरुषयोः सम्बन्धो यथा विश्वनिर्माणविधौ "पंगवन्ध" स्तथा चरकीयसांख्येऽपि दाम्पत्यसम्बन्धोऽवगन्तव्यः सौश्रुते च "धातृशिशु" सम्बन्ध इति ।

एवं हि द्वयोरपि प्रकृतिपुरुषयोरेकैकयोरजयोर्विभुनोरव्यक्तयोः परस्परं नित्यं दाम्पत्यसम्बन्धमभ्युपेतयोर्विश्वैकहेतुभूतबीजयोर्दृष्टचरस्यास्य विश्वस्य यो विकासः स भगवता चरकेण द्वयोरप्येतयोरव्यक्तत्वादेकीकृत्य अव्यक्तन्नाम तत्त्वन्निर्वर्णितम् । अतःश्चरकोक्तं सर्गहेतुवीजभूतमव्यक्तं नाम तत्त्वं जडचेतनतत्त्वयोः प्रकृतिपुरुषयोः समवायः, न तु केवला प्रकृतिरत्राव्यक्तं न चापि केवलः पुरुषोऽपि वाव्यक्तः । सौश्रुते तु सांख्येऽव्यक्तं नाम केवला पुरुषनिरपेक्षा, त्रिगुणात्मिका, बीजधर्मिणी, प्रसवधर्मिणी च प्रकृतिरभिहिता ।

अत एव चरके द्वयोस्तत्त्वयोरेकीभावात्तत्त्वसंख्या चतुर्विंशतिरभिहिता, सौश्रुते तु पंचविंशतिरिति भेदो भिन्नप्रयोजनो यथावसरंस्पष्टयिष्यते । साम्प्रतं तु चरकीयमव्यक्तं संश्रितस्य प्रकृतितत्त्वस्य निरूपणमेव विधातुकामोऽहम् ।

अत्र विप्रतिपन्नाः केचिद्विद्वत्तल्लजा—यच्चरकीया प्रकृतिरस्पष्टेति, परमेतन्न मनोरमम् । चरकीया हि प्रकृतिः स्वात्मनि न केवलं सांख्यशास्त्रसिद्धान्तानेवात्मसात्करोति, किन्तु सर्वेषामपि दर्शनसिद्धान्तानात्मसात्कर्तुमीशा सा—अतः सर्वेषामपिवैशेषिकादीनां दार्शनिकानां सृष्ट्युत्पत्तिविषयवचनानि सिद्धान्ततः स्थिरीभूतान्यादिमानि तत्त्वानि—चरकीयायाः प्रकृतेरेव परिचायकानीति—संधाय तेषां तेषा तत्त्ववाक्यानां व्याख्या तत्परकमेवाधिगन्तव्यम्—यथाहि—

सांख्यवैशेषिकयोरैक्यम्—

चरके, "विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते" इत्युक्त, एतेनाधिगम्यते यत् "साम्यं प्रकृति" रिति अस्याः साम्यरूपाया प्रकृतेः क उपयोग इति जिज्ञासायां वैशेषिकसिद्धान्तं प्रकृतावात्मसात्कुर्वन्नाचार्यो विशदीकरोति—

सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम् । इति ।

सामान्यमेकत्वकरम्। इति

तुल्यार्थता हि सामान्यम् । इति च ।

अत्रैतत्समुन्नेयम् यत्, समशब्दः समानशब्दश्चेत्युभावपि तुल्यवचनौ शब्दौ परस्परं पर्य्यायौ—तत्र, समस्य भावः कर्म वा साम्यं सांख्येषु चरकेण प्रकृतिरुक्ता, तस्यैव च पर्यायभूतस्य समानस्य भावः कर्म वा सामान्यमिति वैशेषिकेषु तेनैव जातिरुक्ता, अतः किञ्चित्समवधेयं भवति यत्—"यैव सांख्येप्रकृतिः, सैव वैशेषिकेषु जातिरिति, साम्यं प्रकृतिर्भवति, सामान्यं च जातिर्भवति, तत्र लक्षणप्रयुक्तौ साम्यसामान्यशब्दावेव चेत् पर्यायवाचिनौ भवतस्तर्हि लक्ष्यद्वयमपि प्रकृतिर्जातिश्च पर्यायावेवेति न भेदलेशमात्रम् । इति पूर्वं समीक्षमाणैरधिगन्तव्यं यदाचार्यश्चरको वैशेषिकोक्तं सामान्यं प्रकृतावेव तत्पर्यायरूपेण स्वीचकारेति । क्रमशः

निवेदनम्

मदीयमिदमेवास्ति सादरं विनिवेदनम्— ।
गतेष्वङ्केषु येऽप्यत्र लेखाः केचित् प्रकाशिताः ।। १ ।।

कृतेऽपि शोधने तेषां सन्ति तेऽशुद्धिदूषिताः ।
अतः शुद्धाः सुवाच्याश्च लेखाः प्रेष्या बुधोत्तमैः ।। २ ।।

जायमाने विलम्बे च पत्रिकायाः प्रकाशने ।
किञ्चित् कर्तुं प्रभुर्नाऽहं, क्षन्तव्योऽयं जनोऽस्त्यतः ।। ३ ।।

—मधुपः, सम्पादकः

राजस्थान : खादी व लघु उद्योगों के विकास की दिशायें

- ऊनी खादी को बढ़ावा : खादी बोर्ड द्वारा लिये गये ऋण पर देय व्याज में से ४ रुपये का सरकार द्वारा अंशदान।
- खादी बोर्ड को एक करोड़ २० लाख रुपये की गारंटी दी गई जिससे साढ़े चार से सात करोड़ रुपये मूल्य तक का उत्पादन हुआ व गरीबों को रोजगार मिला।
- खादी एवं ग्रामोद्योग एक्ट १९५६ में उल्लिखित सभी उद्योगों द्वारा निर्मित वस्तुएं कर मुक्त। कुछ अन्य खादी उद्योगों में प्रयुक्त कच्चे माल पर बिक्री कर माफ।
- खादी की कुछ अन्य वस्तुएं जैसे स्लाइवर, कच्ची व तैयार ऊन, प्लाई, तकिये, मोजे आदि कर मुक्त।
- इस वर्ष १,८०० हैंडलूम और लगेंगे। खादी बोर्ड राज्य को दस हजार हैंडलूम और देगा।
- पिछले ११ वर्षों में राज्य में कोई नया तकुआ नहीं लगा जबकि वर्तमान सरकार ने प्रयास कर १५ हजार ५२० नये तकुए लगाये हैं तथा २५ हजार ५२२ तकुओं के लिए लाइसेंस दिये हैं।
- छोटे उद्योग की जरूरत के लिए चार टन तक लोहा राजस्थान लघु उद्योग निगम सुलभ करायेगा।
- राजस्थान वित्त निगम ने प्रत्येक जिले के लिये एक-एक लाख की ग्रामीण औद्योगीकरण योजना आरंभ की है। दो हजार रुपये से १०,००० रुपये तक के ऋण दिये जायेंगे। लघु उद्यमियों के लिये ऋण की न्यूनतम सीमा १०,००० से घटाकर ५,००० रुपये कर दी गई है।
- खनिज उत्खनन के दो हजार पट्टे हाल ही गरीबों को लीज पर दिये गये।
- गोबर गैस प्लांट तथा कुछ और कृषि औजार बिक्री कर मुक्त।

(राजस्थान सरकार द्वारा प्रसारित)

देशवार्ताः—

श्रीपद्मशास्त्री
325/7 राजापार्क, जयपुरं

१—भंढारकरप्राचयसंस्थानस्य— होरकजयन्ती :—

संस्थानस्य हीरकजयन्त्यवसरे चाखिलभारतीय प्राच्यभाषासम्मेलनं पुण्यपत्तने जूनमासस्य १ दिनांकात् ३ दिनांकं यावत् सुसम्पन्नम्। सम्मेलनस्य समुद्घाटनं महाराष्ट्रस्य महामहिम्ना राज्यपालमहोदयेन कृतम्। सम्मेलन–महाध्यक्षस्य (प्रो॰ जॉन गोंडा, उभेच्त-हालेण्ड-वास्तव्याः) भाषणं महामन्त्रिणा श्रीः आर॰ एन॰ दाण्डेकरमहोदयेन पठित्वा श्रावितम्। सम्मेलनेऽस्मिन् दशनूतनप्रकाशितग्रन्थानां विमोचनमभूत्तथा पञ्चदश समितीनां पृथक् पृथक् गोष्ठ्यः समायोज्यन्त तथा विभिन्नसमितीषु पत्रवाचनानि चाध्यक्षीयभाषणानि समजायन्त।

प्रथमतारिकायां रात्रौ संगीतशारदं नाम मराठीनाटकस्य संस्कृतरूपान्तरमञ्चनमभूत्। द्वितीयदिवसे संस्कृतलेखकसम्मेलनं, गन्धर्वरंगमन्दिरे शास्त्रीयनृत्यस्यायोजनञ्च समायोजितम्। तृतीयदिवसे पत्रवाचनान्यपराह्णे च समापनसमारोहः सायं कात्यायनी नामक मराठीनाटकस्य संस्कृतरूपान्तरणं प्रदर्शितम्।

सम्मेलनेऽस्मिन् संस्कृतपुस्तकप्रदर्शनी चापि समायोजितासीद्यस्यां देशस्य प्रमुखाः दक्षप्रकाशका भागमगृह्णन्। त्रिष्वपि दिवसेषु पण्डितपरिषदः समायोजनं, विभिन्नप्रान्तेभ्यः समागतानां संस्कृतविदुषां सम्मानञ्च सम्मेलनस्य वैशिष्ट्यमासीत्।

२—राष्ट्रीयस्वयंसेवकसंघस्य २५ दिवसीयं शिक्षणसत्रम्—

उदयपुरनगरस्य भूपालनोबलसमहाविद्यालये संघस्य २५ दिवसीयं शिक्षणसत्रं प्रारब्धम्। हिंदूविश्वपरिषद अध्यक्षा महाराणाभगवतसिंहमहोदयाः स्वयंसेवकान् समुद्बोधयन्त प्रावोचन्–वस्तुतो लक्ष्यहीनजीवनं निरर्थकं भवति। भवन्तो भाग्यशालिनो यदाबाल्याद्देशसेवाकार्येषु संलग्नाः। प्रचण्डेऽपि ग्रीष्मातपे सुकुमाराः किशोराः स्वव्ययभारमंगीकृत्य भाविजीवननिर्माणस्य कठोरसाधनायां संलग्नाः सन्तीति विभाव्य चेतसि प्रसन्नता जायते।

भारतीयसंस्कृतिसंरक्षणार्थं स्वयंसेवकैरद्यावधि किन्न कृतम्? विषयेऽस्मिन् विवेचनं कुर्वता महाराजेन प्रोक्तम्—भवन्तो मामत्राहूतवन्त एतदर्थमहं नितरामनुग्रहीतोऽस्मि भवताम्। राजस्थानस्य विभिन्नमण्डलेभ्यः 800 शिक्षार्थिनः सत्रेऽस्मिन् भागमगृह्णन्। राजस्थाने नैतादृशः समारोहश्चाद्यावधि सम्पन्नः।

३—जनतादले वैमत्यम्:—

जूनमासस्य ३० तारिकायां भारतस्य राष्ट्रपतिमहोदयेन गृहमन्त्रिणस्तथा स्वास्थ्यमन्त्रिणस्त्यागपत्रं स्वीकृतम् । जनतादलस्य महासचिवेनापि त्यागपत्रं प्रदत्तम् । अनेन सार्धं विभिन्नप्रान्तेष्वपि आलोददलानुयायिनां त्यागपत्रैर्जनतादलस्य विघटनं प्रारब्धम् । विदेशमन्त्रीमहोदयोऽपि त्यागपत्रस्येच्छां प्राचीकटत । जुलाईमासस्य ११ तारिकायां, जनताकार्यकारिण्यां विषयेऽस्मिन् विचारयिष्यते । तदनन्तरमेव राजनैतिकध्रुवीकरणस्य कापि सम्भावना सम्भाव्यते ।

*

राजस्थान में जनता सरकार की एक वर्ष की महत्वपूर्ण उपलब्धियां

☐ आपातकाल के आतंकपूर्ण वातावरण को समाप्त करके नागरिकों को भय मुक्त किया ।

☐ राजस्व अभियान चलाकर किसानों के लगभग 9 लाख मामले निपटा कर उनको घर बैठे न्याय दिलाया गया ।

☐ अन्त्योदय योजना के तहत 1.65 लाख निर्धनतम परिवारों का चयन किया गया तथा उनमें से अब तक 80 हजार परिवारों को जीवन-यापन के साधन उपलब्ध कराये जा चुके हैं । शेष को भी शीघ्र ही राहत दी जा सकेगी ।

☐ अनुसूचित जाति व अनुसूचित जन जातियों के लोगों की सुरक्षा व विकास की तरफ विशेष ध्यान दिया गया है, जिसके लिए सचिवालय में एक अलग प्रकोष्ठ है ।

☐ अलग से जन-जाति क्षेत्रीय विकास विभाग की स्थापना भी की गई है । आदिवासियों के विकास के लिए एक आदिवासी उपयोजना क्रियान्वित की जा रही है ।

☐ ग्रामीण क्षेत्रों में पेयजल की समस्या के समाधान के लिए विशेष प्रयास करके 450 गांवों को पेयजल उपलब्ध कराया । इस वर्ष की योजनाओं से 550 अतिरिक्त गांवों को लाभ मिलेगा :

☐ जनता सरकार ने अनुत्पादक एवं अनावश्यक व्यय में हर सम्भव कमी करके तथा मुनाफाखोरी व जमाखोरी पर अंकुश लगाकर उपभोक्ता वस्तुओं की कीमतों को नियंत्रण में रखा ।

☐ राज्य में 13 वर्ष बाद पंचायतों के चुनाव कराकर पंचायती राज की पुर्नप्रतिष्ठा की गई है । पंचायतों को मिलने वाले अनुदान की राशि भी बढाकर प्रति व्यक्ति ढाई रुपये करदी गई है ।

(राजस्थान सरकार द्वारा प्रसारित)

सेठी/17-6-78

आप 'भारती' के लिए क्या कर सकते हैं ?

१—१०) रु० भेजकर ग्राहक बनिये ।

२—अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सम्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३—अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४—'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५—धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६—'भारती' के अभिकर्ता (प्रचारक) बनिए ।

७—'भारती' की कमियां तथा सुधार के लिए हमें समय-समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए ।

८—आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए । हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिए अग्रसर ही रहेंगे ।

गौ के प्रति देश के करोड़ों लोगों की जो निष्ठा है उसकी अपेक्षा नहीं की जा सकती । शुष्क तर्क के आधार पर यह नहीं माना जा सकता कि कितने गाय और बैल बेकार हैं इन्हें नष्ट कर दिया जायें । निश्चय आधुनिक तरीकों का अवलम्बन लेकर गोवंश को उन्नत बनाना हमारा कर्त्तव्य है । गोरक्षा के प्रश्न पर वास्तव में हमारा बीच का मार्ग होना चाहिए इसके लिए तर्क और भावना दोनों का सहयोग हो ।

—लालबहादुर शास्त्री

पंजाबी चन्दू हलवाई करांची वाला

प्रधान कार्यालय : १८५ बालकेश्वर रोड, तीन बत्ती, बम्बई-६

दूरभाष—३६३६२५, ३६४७९५

स्थापना-१८९६ **शाखायें :—**

शाखायें	दूरभाष	शाखायें	दूरभाष
(१) जवेरी बाजार	३१३७२९	(६) वरली नाका	३७२९९६
(२) ग्रान्टरोड	३५१७८०	(७) सायन सर्कल	४७३८८९
(३) कुलाबा	२१३८१३	(८) ठाकुरद्वार	३५५६८३
(४) दादर टी० टी०	४४२०१२	(९) घाटकोपर-वेस्ट	५५२३८०
(५) सूर्योदयस्टोर्स, चर्चगेट	२९१९७	(१०) अकबर अलीसफोर्ट	२५३९२१-२२

कारखाना : चन्दू भवन, ग्रान्टरोड, बम्बई-७ दूरभाष—३७२६२८ और ३७०७३३

श्रीमत्कविकुलचूडामणिमहाकविकालिदासविरचितम्

महाकाव्यम् कुमारसम्भवम्

हिन्दीपद्यानुवादः

(अनुवादकः—श्रीसत्यनारायणशर्मा, साहित्याचार्यः, कोटा.)

तृतीयः सर्गः

पूर्वाऽनुवृत्तम्—

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलंध्य ।
दिग्दक्षिणा गन्धवह मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥ २५ ॥

सूर्य धनपति-दिश-उत्तर हेतु, चला समयोचित अवसर जान ।
तभी दक्षिणमुखने अविरोध, दुःखनिःश्वास तजा पवमान ॥ २५ ॥

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।
पादेन नापेक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ॥ २६ ॥

पल्लवित कुसुमित हुआ अशोक, शीघ्र सप्रसून हुई हर डाल ।
ध्वनितनुपुर वाले थे पाद, रमणियों के विस्मृत उस काल ॥ २६ ॥

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतवाणे ।
निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥ २७ ॥

आम के बौरों के नव-पत्र, पक्षयुत शर से कर निर्माण ।
मधुप मंडराते मधु ने रखे, मनोभव के नव नाम प्रमाण ॥ २७ ॥

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥ २८ ॥

रागयुत भी निर्गन्ध कनैर, चित्त में चुभता था उस काल ।
अधिकतर गुण-गण की परिपूर्त्ति-निमित्त विमुख है विधिका ख्याल ॥ २८ ॥

बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥ २९ ॥

अरुण अति वक्र पलाश–प्रसून अविकसित थे बालेन्दु-समान ।
वनावनि के नखक्षत-से शीघ्र वसन्त-समागम पर छविमान ।। २९ ।।

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ।। ३० ।।

भ्रमर-अंजन-रेखा से युक्त तिलक को मधु-शोभा ने धार ।
उदित-रवि-राग-रम्य था ओष्ठ, आम्र पल्लव का भूषण-भार ।। ३० ।।

मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिल विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ।। ३१ ।।

प्रियाल-पुहुप का उड़ा पराग, मृगों के दृष्टिपात को रोक ।
वन-स्थल पर मर्मरध्वनि संग, विचरने लगे मदान्ध अशोक ।। ३१ ।।

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्ष तदेव जात वचनं स्मरस्य ।। ३२ ।।

पुंस्कोकिल का जो कल-गान हुआ चूतांकुर-रस से स्नात ।
वचन मनसिज का था वह स्त्री के मानःनिवारण में निष्णात ।। २२ ।।

हिमव्यपायाद्विशदाधराणा–मापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ।। ३३ ।।

रम्य रदनच्छद कुछ कुछ पीत वदनबाली किन्नरियाँ, ओह !
पत्र-रचनाएं साधें वहीं गीष्मऋतु में सित स्वेदारोह ।। ३३ ।।

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः ।। ३४ ।।

शुद्धमन मुनिजन वन में देख, अकालिक ही वसन्त का रंग ।
कर सके किसी प्रकार सयत्न, विकृत-मन का तात्कालिक भंग ।। ३४ ।।

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ।। ३५ ।।

मदन रति–संग वहां उस काल, आ गया सुमन-शरासन तान ।
प्राणि युगलों के भाव विकार लगे करने प्रेमासव पान ।। ३५ ।।

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृंगेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥ ३६ ॥

भ्रमरियों के अनुचर हो भृङ्ग पियें मधु सुमन–चषक से मस्त ।
ग्रहण करती मृगशृंग-स्पर्श सौख्य दृग मींच मृगी आश्वस्त ॥ ३६ ॥

ददौ रसात्पंकजरेणुगंधि गजाय गंडूषजल करेणुः ।
अर्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा ॥ ३७ ॥

दिया करिणी ने निज गंडूष मतङ्गजको ससुगन्ध सराग ।
दिया चकवे ने नीरज-नाल प्रियाको अर्ध-जग्ध शुभ-भाग ॥ ३७ ॥

गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे ॥ ३८ ॥

स्वेद सीकर से पत्राकार विकृत-भूषा लख तब फिर घूम ।
कुसुममधुमत्तनेत्रयुत वदन लिया किन्नर ने स्त्री का चूम ॥ ३८ ॥

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालौष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ ३९ ॥

पुष्प-गुच्छों के कुच-वर धार प्रवालों के धर ओष्ठ ललाम ।
वृक्ष से लिपट वल्लरी वधू गई शाखा-भुज डाल सकाम ॥ ३९ ॥

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥ ४० ॥

हुए हर तत्क्षण आत्म-विलीन अप्सराओं के भी सुन गीत ।
विघ्न योगी सबल समाधिः कदापि न सकते जग में जीत ॥ ४० ॥

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकांगुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ॥ ४१ ॥

लता-गृह बाहर नन्दी बैठ कनक लकुट ले वामकरमध्य ।
"चपलता नहीं" दिया आदेश, गणों को दे मुख अंगुलि सद्य ॥ ४१ ॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ ४२ ॥

वृक्ष थे स्थिर, द्विरेफ थे मौन, जीव चुप थे, मृग शान्तप्रचार।
शंभु के शासन से सर्वत्र चित्र–सा स्थिर था सब कान्तार ॥ ४२ ॥

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥ ४३ ॥

काम शिव–दृग से बच सशंक शुक्र-सम्मुख-सा हतगति आज ।
नमेरु-विटप-कुंजों के देश गया, था जहां पुरारि समाज ॥ ४३ ॥

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥ ४४ ॥

व्याघ्रचर्मच्छादित आसन्द विनिर्मित देवदारु से पूत ।
संयमी निश्चल शिव को देख रहा था मन्मथ मरणाहूत ॥ ४४ ॥

पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम् ।
उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ॥ ४५ ॥

देह पर्यङ्कबन्ध से अचल लम्ब बन्धुर स्कंधों से युक्त ।
विकचराजीव-तुल्य था अङ्क ऊर्ध्वतल हस्तों से संयुक्त ॥ ४५ ॥

भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥ ४६ ॥

भुजङ्गसबद्ध जटा का जूट अक्षमाला से शोभित कर्ण ।
नील-गल-आभा से अति नील कृष्णमृगचर्मधरे शुभवर्ण ॥ ४६ ॥

किंचित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्षममभालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ ४७ ॥

अचल पुतली की ज्योति सुमन्द, भ्रुकुटिचालनसे नयन विरक्त ।
पलक निश्चल थे नेत्रज्योति अधोमुख थी वह घ्राणासक्त ॥ ४७ ॥

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कपमिव प्रदीपम् ॥ ४८ ॥

बलाहक-से वर्षा से हीन अचंचलवीचि तडाग-समान ।
अकम्पित दीप-तुल्य थे स्थाणु पंचमारुत का रोध प्रमाण ॥ ४८ ॥

(क्रमशः)



४-विचित्रं शिरस्त्राणम् (श्रीलंकादेशस्य श्रेष्ठा कथा)

श्रीपद्मशास्त्री

325/7 राजापार्क, जयपुरम्

एकः श्रमशीलः किन्तु निर्धनो बालकश्चासीत् । तस्य श्रमेण प्रसन्नश्चैकः कृषकस्तस्मै वृषभमेकं प्रदत्तवान् । बालको व्यचारयत्-अनेन वृषभेण कृषि करिष्यामि । स वृषभं नीत्वा प्राचलत् । मार्गे ह्येको धूर्तस्तमाह्वयत् हंहो ! एष मेषस्त्वया कुत्र नीयते ? बालकः प्रोवाच—अयं तु वृषभो न मेषः । धूर्तोऽयं प्रहसन् स्वसहयोगिनः प्रावोचत्—अयं मदमत्तः प्रतीयते, यतोऽयं मेषं वृषभं कथयति । द्वितीयोधूर्तोऽवदत्-मेषोऽयं म्रियमाण इवास्ति । तृतीयेन कथितं वराकस्यायं मेषः पञ्चरूप्यकैरस्माभिः क्रेतव्यः ।

एक परिश्रमी किन्तु निर्धन बालक था । उसके परिश्रम से प्रसन्न होकर किसी किसान ने उसे एक बैल दे दिया । बालक ने विचार किया—इस बैल से कृषि करूंगा । वह उस बैल को लेकर चल पड़ा । मार्ग में किसी धूर्त ने उसे पुकार पुकार कर कहा—अरे तुम इस भेड़ को कहां ले जा रहे हो ? । बालक ने कहा—यह बैल है न कि भेड़ । हंसते हुए इस धूर्त ने अपने सहयोगियों से कहा—प्रतीत होता है कि यह बालक पागल है क्योंकि यह भेड़ को बैल कह रहा है । दूसरे धूर्त ने कहा—यह भेड़ मरने वाली ही है । तीसरे धूर्त ने कहा—बेचारी इस भेड़ को, पांच रुपयों में हमें खरीद लेना चाहिए ।

एकाकी स व्यचारयत्—यदहमेकाकी त्रिभिरेभिर्न जेष्यामि । त्रयस्ते वृषभं नीत्वा प्राचलन् । ताननुगच्छन्स प्रोवाच—भवन्तो दयालवः । नास्मिल्लोके मम कोऽपि विद्यते । मामपि

उस अकेले बालक ने विचार किया—अकेला मैं इन तीनों से नहीं जीत सकता । वे तीनों धूर्त उस बैल को लेकर चल पड़े । उनके पीछे पीछे चलते हुए उस बालक ने कहा—आप लोग दयालु हैं । मेरा इस



भृत्यरूपे सहैव नयत । ते तं सहैवानयन् । परिश्रमेण, परिचर्यया स तेषां मनांस्यजयत् ।

एकदा स बालको विचित्रं शिरस्त्राणं परिधाय स्वगृहं प्रत्यचलत् । तद् दृष्ट्वा हसन्तस्ते प्रावोचन्—विदूषकस्येव शिरस्त्राणं त्वया कुतः समासादितम् ? बालको ब्रूते—शिरश्छत्रमिदं सिद्धिप्रदायकं वर्तते । एतत्परिधायापणे वस्तूनि विना मूल्येन नेतुं शक्यन्ते । अस्य प्रभावश्चापणे भवद्भिर्द्रष्टव्यः । तेन सहापणं गन्तुकामास्ते धूर्तास्तद्दिने स्वस्वकार्यकरणाय निर्गताः ।

इतो बालकश्चापणं गतः । प्रसिद्धानापणिकानवदत्—अहं श्वस्त्रिभिर्धूर्तैः समं वस्तूनि क्रेतुमागमिष्यामि शिरस्त्राणमेतत्परिधाय । भवन्तो वस्तूनां

संसार में कोई नहीं है । मुझे भी नौकर के रूप में अपने साथ ले चलिए । वे उसे भी साथ ले गये । परिश्रम, तथा सेवा ने उनके मन जीत लिए ।

एक दिन वह बालक किसी विचित्र टोपी को पहन कर अपने घर की ओर जाने लगा । उन धूर्तों ने हंसते हुए कहा—जौकर की तरह की यह टोपी तुमने कहां से ली ? । बालक ने कहा—यह टोपी सिद्धिप्रदायक है । इसे पहन कर बाजार में सभी चीजें बिना मूल्य ही मिल सकतीं हैं । इस टोपी का प्रभाव आप बाजार में देखना । उसके साथ ही बाजार जाने की इच्छावाले वे धूर्त उस दिन अपने अपने कार्य पर चले गये ।

इधर बालक भी बाजार गया । मुख्य-दूकानदारों से कहने लगा—मैं इस टोपी को पहनकर कल तीन धूर्तों के साथ चीजें खरीदने आऊंगा । आप मुझसे चीजों का

मूल्यं मा याचन्ताम्, पुनरहं समस्तं मूल्यं दास्यामि । धनराशिमिमामग्रिमां स्वीकुर्वन्तु । आपणिकैस्तत्स्वीकृतम् ।

अन्यस्मिन् दिने प्रातः स धूर्तैः सममापणं प्राप । आपणिकास्तमुत्थाय प्राणमन् पूर्णं दिनं ते शिरस्त्राणस्य चमत्कारेण चमत्कृता यथेच्छं रममाणा रात्रौ स्वावासं प्रापुः । शिरस्त्राणमेतत्क्रेतुं ते बालकमकथयन् । बालकः प्रोवाच-मदीयेयं पैतृकीसम्पत्तिः कथमहमेनां विक्रीणे ? । चान्ते ते स्वकीयाः सर्वसम्पदो दत्त्वा तत् शिरस्त्राणं क्रीत्वा प्राचलन् । बालकोऽपि सर्वां सामग्रीं वृषभे समारोप्य रात्रावेव दूरमगात् । प्रातस्ते शिरस्त्राणं परिधाय तेष्वेवापणेष्वगच्छन् यथेच्छं भोजनञ्चाकुर्वन् । यदा चापणाद्बहिरागच्छन्नापणिकस्तानवोचत्—वस्तूनां मूल्यानि तु यच्छत ।



मूल्य न मांगे । फिर मैं सारा मूल्य दे दूंगा । इस अग्रिम धनराशि को स्वीकार कीजिए । दूकानदारों ने उसे स्वीकार कर लिया ।

दूसरे दिन प्रातःकाल वह धूर्तों के साथ बाजार गया । दूकानदारों ने उठकर उसे प्रणाम किया । दिन भर वे उस टोपी के चमत्कार से चमत्कृत घूमते फिरते रात्रि में अपने घर पहुंचे । इस टोपी को खरीदने के लिए उन्होंने बालक को कहा—बालकने कहा—यह मेरी पैतृक सम्पत्ति है मैं इसे कैसे बेचूं ? । अन्तमें उन धूर्तों ने अपनी सम्पत्ति के बदले उस टोपी को खरीदा और वे चल पड़े । इधर बालक भी सारी सम्पत्ति बैल पर रखकर रात्रि में ही बहुत दूर चला गया । प्रातःकाल वे धूर्त उन उन दूकानों पर गये और इच्छानुसार भोजन करने लगे । जब दूकानों से बाहर आये तो दूकानदारने कहा—चीजों की कीमत तो दो । चकित होकर उन्होंने कहा—इस टोपी को नहीं देख रहे हो ।

चकितास्ते प्रावोचन् न पश्यसि शिरस्त्राणमेतत् । क्रुद्धश्चापणिकस्तानरुन्धत् । तेष्वेको विपदमिमामापतितां वीक्ष्य शीघ्रं रूप्यकाण्ययच्छत् । झटिति ते तस्माद् हट्टान्निर्गताः ।

क्रुध होकर दूकानदारने उन्हें रोक लिया । उनमें से एक धूर्त ने इस आई हुई विपत्ति को देख कर शीघ्र ही रुपये निकाल कर दिये तथा वे शीघ्र उस दूकान से निकल गये ।



एवं कलहायमानास्ते परस्परं दोषारोपणं व्यधुः । तेषु तृतीयश्शिरस्त्राणं परिधाय द्वाभ्यां सह चापणं प्रविवेश । यथेच्छं भुक्त्वा यावत्ते बहिर्गन्तुमुद्यतास्तावदापणिको रूप्यकाण्ययाचत । तदा सः शिरस्त्राणं प्रकम्पयितुमारेभे । क्रुद्धः पण्याजीवश्चपेटामेकाममारयत्तेन तत् शिरस्त्राणं प्रज्वलदग्नौ पतितं भस्मसादभवत् ।

भस्मीभूतं शिरस्त्राणं वीक्ष्य ते प्रौच्चैर्व्यलपन् । तत्र जनसम्मर्दः समजनि । यावद् धूर्ताः शिरस्त्राणगुणानवर्णयन् तावत्सर्वे नितरां प्राहसन् । पण्याजीवस्तान् शिरस्त्राणस्य वास्तविकतामकथयत् । तच्छ्रुत्वा ते हतप्रभा इवाभवन् ते व्यचारयन्—तेन बालकेन वयं स्वबुद्ध्या प्रतारिताः । तद्दिनात्ते चान्यान् छलयितुं मतिं नाकुर्वन् ।

इस प्रकार झगड़ते हुए वे एक दूसरे पर दोषारोपण करने लगे । उनमें से तीसरा धूर्त टोपी पहन कर दोनों के साथ दूकान में प्रविष्ट हुआ । इच्छानुसार भोजन कर के जब वे बाहर जाने लगे तब दूकानदार ने रुपये मांगे । तब उसने अपनी टोपी कंपायी । क्रुद्ध दूकानदारने उसे एक चपेटा मारा इससे वह टोपी प्रज्वलित अग्नि में गिर गई तथा भस्म होगई ।

टोपी को जला हुआ देखकर वे विलाप करने लगे । वहां भीड़ एकत्रित होगई । जब धूर्तों ने टोपी के गुणों का वर्णन किया तो सभी लोग बहुत हंसे । दूकानदार ने टोपी की वास्तविकता उन्हें बतलाई । यह सुनकर वे हतप्रभ होकर विचार करने लगे, उस बालक ने हमें अपनी बुद्धि से ठग लिया है । उस दिन से उन्होंने दूसरों को छलना बन्द कर दिया ।

113542
गुरुकुल कांगड़ी विश्वविद्यालय

विश्व-वार्ता:—

नामीबिया-देशस्य स्वातंत्र्यसंघर्षः

श्रीकलानाथशास्त्री, एम ए, साहित्याचार्यः,
निदेशकः, भाषाविभागे राजस्थानम्, जयपुरम्

परिवर्तितेऽस्मिन् आधुनिके समयेऽपि विश्वस्मिन् कतिपये देशाः स्वातन्त्र्यस्योपभोगाद् वञ्चिताः सन्ति, तत्र च वैदेशिकानां शासनमद्यापि प्रचलतीति विदितमेव स्यात् पाठकमहाभागानाम् । एवं विधेषु देशेष्वधिकतस्तु अफ्रीकाप्रदेशीया भूतपूर्वाः पाश्चात्योपनिवेशा एव सन्ति । दक्षिणाफ्रिकाप्रदेशीया इमे देशाः स्वातंत्र्याय संघर्षरताः सन्ति बहुभिस्तु गतेष्वेषु वर्षेषु स्वातन्त्र्यं लब्धम् । एवं विधेष्वेकतमो देशः नामीबियाख्यः । दक्षिणाफ्रिकीयवैदेशिकशामनमद्यापि दक्षिणाफ्रिकाप्रधानमंत्रिणो वोरस्टरस्याधिपत्ये तत्र प्रचलति । दक्षिण-पश्चिमाफ्रिकीय—जनसङ्घटनं, यत् आङ्ग्लभाषाद्याक्षराधारेण 'स्वापो' इति प्रथितं, देशेऽस्मिन् स्वदेशीयानां स्वतंत्रशासनायान्दोलनरतमस्ति ।

भारतेनापि देशस्यास्य स्वातन्त्र्यान्दोलनभावनानामादरं कुर्वाणेन तदिदं संयुक्तराष्ट्रसंघस्य मंचोपरि स्पष्टीकृतमस्ति यद् वयं 'स्वापो' दलं देशस्याधिकृतं प्रतिनिधिं मन्महे । एवं च देशेऽस्मिन् शासनसत्ता स्वदेशीयानां हस्ते समागच्छेदित्यस्माकं वाञ्छा । २५ अप्रेलदिवसे संयुक्तराष्ट्रमहासभाया नामीबियादेशसमस्योपरि विशेषत आकारितेऽधिवेशने भारतीयपरराष्ट्रमन्त्रिणा श्रीअटलविहारिवाजपेयिना पुनरपि स्वदेशभाषायां हिन्द्यां भाषमाणेन तदिदं सुस्पष्टं व्यक्तीकृतम् । अनेन हि कथितं यद्—दक्षिणाफ्रिकाप्रदेशे गतत्रिंशद्वर्षेभ्यो या स्वातन्त्र्यान्दोलनभावना प्रचलिता तस्याः समर्थनं महात्मागान्धिनः समयादेवा स्माभिः कृतम् । १९६६ वत्सरे नामीबियादेशस्य स्वातंत्र्यं समर्थयता संयुक्तराष्ट्रसंघेनापि प्रस्तावः पारितः किन्तु मृषाकर्तुं दक्षिणाफ्रीकाशासनं कृत्रिमं 'स्वशासन'-प्रदानं व्यपदिश्य स्वकीयानेव काष्ठपुत्तलिकाभूतान् नेतृजनान् सत्तासिंहासने आरोपयितुमिच्छति । न वयमेतस्य समर्थकाः । 'स्वापो' दलाय पूर्णं स्वशासनं प्रदेयम् महानिर्वाचनानि करणीयानि, नामीबियादेशात्, तत्प्रतिवेशि 'वालविस' समुद्रखात (खाडी) तश्च वैदेशिकसैन्योपनिवेशाः अपसारणीयाः, देशस्यास्य आर्थिकं पुनर्निर्माणमपि प्रबन्धनीयमित्यादयः श्रीवाजपेयिनः परामर्शाः संयुक्तराष्ट्रसंघे सुभृशं प्रशंसिताः ।

◆

भारती

R. J. No. [illegible]
Licence. No. PP.9.
'Licenced to Post.
Without prepayment

सूक्ति-सुधा

स्नेहबन्धनानि

डॉ० श्रीगंगाधरभट्टः, जयपुरम्

सखि साहजिकं प्रेम दूरादपि विराजते ।
चकोरीनयनद्वन्द्वमानन्दयति चन्द्रमाः ।
क्वेन्दोर्मण्डलमम्बुधिः क्व च रविः पद्माकरः क्व स्थितः ।
क्वाभ्राः सन्ति मयूरपंक्तिरमला कान्तिः क्व वा मालती ।
हंसानां च कुलं क्व दूरविषये क्वास्ते सरो मानसं,
यो यस्याभिमतः स तस्य निकटे दूरेऽपि सन्वल्लभः ।

हे सखि ! सहजं सरलं स्वाभाविकञ्च प्रेम दूरादपि शोभते सहृदयानानन्दयति । चकोरीहृदयाह्लादकश्चन्द्रमाः दूरादपि आकाशे स्थितोपि चकोर्या नयनयुगलमानन्दयति । इन्दो मंण्डलं क्व क्व च समुद्रः । एतयोः महदन्तरं विद्यते । किन्तु एतयोः या प्रीतिः सा परस्परमाबध्नाति । चन्द्रोदये समुद्रः समुच्छ्वलति । क्व च सूर्यः क्व च पद्मराशिः । क्व वा अःभ्राः मेघाः क्व च विमला मयूरपंक्तिः क्व वा स्वच्छा कान्तिः क्व च मालती । हंसानां कुलं दूरे तथा च मानसं सरः, तानानन्दयति । हंसाः वर्षाकाले प्रत्यब्दं मानसरः प्रयान्ति । यः यस्य प्रियः सः दूरे निकटे वा भवतु प्रियस्तु प्रिय एव ।

हे सखि ! स्वाभाविक एवं सहज प्रेम दूर से भी आनन्द देता है । चन्द्रमा दूर आकाश पर रहने पर भी चकोरी के नयन युगल को आनन्द प्रदान करता है । चकोरी के नेत्र उसकी ओर लगे रहते हैं । चन्द्रा कहां और समुद्र कहां ? पूर्णचन्द्र को देखकर समुद्र उत्ताल तरङ्गों से आनन्दित होता है । कहां सूर्य और कहां कमल वन ? सूर्य को देखकर कमल विकलित होते हैं तथा उनकी कान्ति दर्शनीय होती है । मेघ कहां और मयूर कहां ? मेघ को आकाश में छाया हुआ देखकर मयूरों का मन नाच उठता है । कहां विमलकान्ति और कहां मालती ? हंसों की श्रेणी कहां और कहां मानसरोवर ? हंसों की प्रीति मान सरोवर की ओर उन्हें लेजाती है । अर्थात् जो जिसका प्रिय है वह चाहे दूर हो अथवा निकटवर्ती हो वह उसका प्रिय हीं है और उसे देखकर आनन्द की प्राप्ति होती ही है ।

प्रकाशकः-जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर ३०२००३ । दूरभाष 75496
राधेश्याम द्वारा श्री शंकर आर्ट प्रिन्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित दूरभाषः ६१७६७

Stock Verification-2024

Compiled
1999-2008